00044398

NOT TO BE ISSUED
OUT OF THE LIBRARY.

00044398

Digitized with financial assistance from

Government of Maharashtra

on 30 January, 2020

॥ श्रीः ॥

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः ४.

महाकविश्रीनीलकण्ठदीक्षितप्रणीतः

शिवलीलार्णवः ।

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितः

44398

लघुटिप्पण्या च संयोजितः ।

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितः ।

कौलम्बाब्दाः १०८४, क्रैस्ताब्दाः १९०९.

મમ398

PREFACE.

This Mahakavya is significantly titled **शिवलीलार्णव**, for the sixty four Lilas of Siva described in Halasya-Mahatmya of the Skandapurana are elaborately dealt with in it.

The author of this work is the great poet **Sri Nilakantha Dikshita**, grandson of reputed Appayya Dikshita's brother. This poem surpasses by its richness of poetic merit his other works viz. शान्तिविलास, अन्यापदेशशतक, वैराग्यशतक, कलिविडम्बन, सभारञ्जन, गङ्गावतरण, आनन्दसागरस्तव, नीलकण्ठविजयचम्पू and नलचरितनाटक held in great estimation by scholars.

The period of his life can be known to be about the first half of the 17th century A. D. from the following verse—

"अष्टात्रिंशदुपस्कृतसप्तशताधिकचतुस्सहस्रेषु ।
कलिवर्षेषु गतेषु प्रथितः किल नीलकण्ठविजयोऽयम् ॥"

in his नीलकण्ठविजयचम्पू.

This edition of the work is based on two palmleaf manuscripts, one (क) (about a century old) in the Palace Library and the other (ख) kindly lent to me by Pandit Nilakantha Sastri of Srivaikuntham Tinnevelly District.

T. Ganapati Sastri.

निवेदना।

श्रीहालास्यमाहात्म्ये स्कान्दागस्त्यसंहितान्तर्गते प्रतिपादितानां शिवस्य चतुष्षष्टिलीलानां विशालं वर्णनस्थानमितिकृत्वा महाकाव्यमिदं **'शिवलीलार्णव'** इत्युच्यते।

अस्य प्रणेता **श्रीमदप्पयदीक्षितानुजपुत्रो** महाकविः **श्रीनीलकण्ठदीक्षितः**। एतस्य तत्रभवतः **शान्तिविलासः, अन्यापदेशशतकं, वैराग्यशतकं, कलिविडम्बनं, सभारञ्जनं, गङ्गावतरणं, आनन्दसागरस्तवः, नीलकण्ठविजयचम्पूः, नलचरितनाटकम्** इत्यन्याः काश्चित् कृतयः सहृदयैरुपलालिताः प्रथन्ते। इदं काव्यरत्नं ताः सर्वाः काव्यगुणसम्पत्समृद्धया मन्ये, दूरमतिशेते।

अस्य जीवितसमयः—

"अष्टाद्रिदुपस्कृतसप्तशताधिकचतुःसहस्रेषु।
कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम्॥"

इति **नीलकण्ठविजये** वदतानेनैवाविष्कृतः।

अस्य संशोधनाधारभूतावादर्शौ द्वौ। तत्रैको राजकीयग्रन्थशालास्थस्तालपत्रात्मकः शताधिकवर्षदेशीयोऽचिरसम्पादितस्वात्मप्रतिरूपसचिवः **क.**संज्ञकः। अपरस्तु श्रीवैकुण्ठग्रामाभिजनैः पण्डितनीलकण्ठशास्त्रिभिः कृपया मह्यमुपकृतः **ख.**संज्ञस्तालपत्रात्मकः। एतदुभयावलम्बनेन ग्रन्थस्य शरीरमविकलं शुद्धं च सम्पादितम्॥

त. गणपतिशास्त्री.

॥ श्रीः ॥

महाकविश्रीनीलकण्ठदीक्षितप्रणीतः

शिवलीलार्णवः ।

प्रथमः सर्गः ।

पूतं स्वतः पूततरं ततो यद् गाङ्गं पयः शङ्करमौलिसङ्गात् ।
तत् पातु मातुः प्रणयापराधपादाहतैः पूततमं ततो नः ॥ १ ॥

अशक्यमङ्गान्तरवद्भिरुक्तुमणुप्रमाणं करणं यदन्तः ।
सामान्यभूतं शिवयोस्तदेकं सानुग्रहं स्यान्मयि गर्भदासे ॥ २ ॥

अन्विष्य खिन्नं निगमानशेषानमी न मीनं प्रथमं स्मरामः ।
अन्विष्यमाणं निगमैरशेषैरम्ब! स्तुमस्ते वयमाक्षिमीनम् ॥ ३ ॥

स्तन्येन कश्चित् कवयाम्बभूव ताम्बूलसारेण परो जनन्याः ।
अहं ततोऽप्युन्नतिमाप्तुकामः सेवे ततोऽप्युन्नतमक्षिकोणम् ॥ ४ ॥

अर्धं तनोरद्रिसुतामयोऽस्मीत्यहंयुना किं फलमादियूना ।
गीर्वाणयोगीन्द्रमुपास्महे तं सर्वात्मना शैलसुतात्मको यः ॥ ५ ॥

कालेन शम्भुः किल तावतापि कलाश्चतुष्षष्टिमिताः प्रणिन्ये ।
द्वासप्ततिं प्राप्य समाः प्रबन्धाञ्छतं व्यधादप्पयदीक्षितेन्द्रः ॥ ६ ॥

अनाहतोद्भूतमपास्तभेदमाद्यं शिवस्यौपयिकं विधातुः ।
नादाभिधं पारगमध्वनां तदनुत्तरं ज्योतिरनुस्मरामः ॥ ७ ॥

साहित्यविद्याजयघण्टयैव संवेदयन्ते कवयो यशांसि ।
यथा यथास्यां ध्वनिरुज्जिहीते तथा तथा सार्हति मूल्यभेदान् ॥ ८ ॥

यावत् कवेर्मार्दवमुक्तिबन्धे यावद् धियः श्रोतरि कोमलत्वम् ।
तावद् ध्वनौ तद्यतिभेदमूले तारत्वमालंकृतिका वदन्ति ॥ ९ ॥

---

१. द्रमिळशिशुरिति सौन्दर्यलहर्यां व्यवहृतो **ज्ञानसम्बन्धः**. २. **मूक**महाकविः.
३. अनाहतं हृत्स्थं द्वादशदलं पद्मम् ४. ध्वनिः वाच्यातिशायि व्यङ्ग्यं, 'नदन् काव्यं वा, अथ च नादः.

अस्मिन् महत्यस्तमितान्यवेद्ये विमृत्वरे वीचितरङ्गरीत्या ।
काव्यध्वनौ जाग्रति देहभाजां कर्णं विशेयुः कथमन्यशब्दाः ॥ १० ॥

कीर्णानि घण्टापथ एव हन्त शब्दार्थरत्नानि गिरां सवित्र्या ।
अत्यादरादामृशतां कवीनां दृग्गोचरं कस्यचिदेव यान्ति ॥ ११ ॥

प्रायस्तिरोभूतमहाप्रकाशाः पाषाणखण्डेष्विव चन्द्रकान्ताः ।
शब्देषु शब्दा मिलिताश्चरन्ति भाग्योत्तरा एव तु जानते तान् ॥ १२ ॥

यानेव शब्दान् वयमालपामो यानेव चार्थान्वयमुल्लिखामः ।
तैरेव विन्यासविशेषभव्यैः संमोहयन्ते कवयो जगन्ति ॥ १३ ॥

गायन्ति वीणा अपि वेणवोऽपि जानन्ति बालाः पशवोऽपि चेदम् ।
काव्यानि कर्तुं च परीक्षितुं च द्वित्रा भवेयुर्न तु वा भवेयुः ॥ १४ ॥

सव्यं वपुः शब्दमयं पुरारेरर्थात्मकं दक्षिणमामनन्ति ।
अङ्गं जगन्मङ्गलमैश्वरं तदर्हन्ति काव्यं कथमल्पपुण्याः ॥ १५ ॥

स्तोतुं प्रवृत्ता श्रुतिरीश्वरं हि न शाब्दिकं प्राह न तार्किकं वा ।
ब्रूते तु तावत् कविरित्यभीक्ष्णं काष्ठा परा सा कविता ततो नः ॥ १६ ॥

कर्णं गतं शुष्यति कर्ण एव सङ्गीतकं सैकतवारिरीत्या ।
आनन्दयत्यन्तरनुप्रविश्य सूक्तिः कवेरेव सुधासगन्धा ॥ १७ ॥

पश्येयमेकस्य कवेः कृतिं चेत् सारस्वतं कोशमवैमि रिक्तम् ।
अन्तः प्रतिश्यायमवेक्षितश्चेत् कोणे प्रविष्टा कविकोटिरेषा ॥ १८ ॥

वक्रोक्तयो यत्र विभूषणानि वाक्यार्थबोधः परमप्रकर्षः ।
अर्थेषु बोध्येष्वभिधैव दोषः सा काचिदन्या सरणिः कवीनाम् ॥ १९ ॥

सदर्थमात्रग्रहणात् प्रतीता सर्वज्ञता सापि शशाङ्कमौलेः ।
प्राप्ता विकासं प्रतिभा कवीनां व्याप्नोति यद्वेत्ति न तच्छिवोऽपि ॥ २० ॥

उल्लङ्घ्य तन्त्रान्तरसम्प्रदायानुत्प्रेक्षमाणा जगदन्यदन्यत् ।
कस्माद् विभीमः कवयो भवामः काव्यज्ञदण्डाद् बिभिमस्तु कामम् ॥ २१ ॥

तन्त्रान्तरेषु प्रतिपाद्यमानास्ते ते पदार्था ननु ते त एव ।
निर्वेदभीशोकजुगुप्सितान्यप्यायान्ति साहित्यपथे रसत्वम् ॥ २२ ॥

अर्थावबोधेऽपि समे रसज्ञैरन्विष्यते सत्कविसूक्तिरेव ।
अपत्यलाभेऽपि समे विदग्धा रूपोत्तरामेव हि रोचयन्ते ॥ २३ ॥

व्यामोहयन्ती विविधैर्वचोभिर्व्यावर्त्तयन्त्यन्यकलासु दृष्टिम् ।
कालं महान्तं क्षणवन्नयन्ती कान्तेव दक्षा कविता धिनोति ॥ २४ ॥

चिन्तासु संसर्गविशेषलाभे सन्दर्भणे चाथ पदैः पदानाम् ।
‡अर्थावबोधे च भवन् कवीनामानन्दभूमा वचसामसीमा ॥ २५ ॥

अनायतप्राणमसंयताक्षमब्रह्मचर्यानशनादिखेदम् ।
चित्तं महेशे निभृतं विधातुं सिद्धः कवीनां कवितैव योगः ॥ २६ ॥

तिर्यङ्मनुष्यव्यतिरेकहेतुर्देव्या गिरामेव कटाक्षपातः ।
प्रज्ञाविशेषास्तु परे जनानां प्रायो दिशन्ति श्वमृगालसाम्यम् ॥ २७ ॥

न कालभेदाद्रसवर्णभेदो न [1]जामिता वा न [2]ऋजीषभावः ।
सारस्वतं नाम फलं तदेतत् सदैकरूपं कृतिनो लभन्ते ॥ २८ ॥

बाल्यं विदुः प्राकृतभाषितानि श्रुतिस्मृती वृद्धदशां वदन्ति ।
साहित्यमेकन्तु गिरां सविध्यास्तारुण्यमुद्गाढमुशन्त्यभिज्ञाः ॥ २९ ॥

कार्थाः क शब्दाः क रसाः क भावाः क व्यङ्ग्यभेदाः क च वाक्यरीतिः ।
कियत्सु दृष्टिः कविना न देया किमस्ति राज्ञामियतीह चिन्ता ॥ ३० ॥

आवर्णशक्तिग्रहमापवर्गं दुःखैकरूपा विरचय्य विद्याः ।
विश्रान्तिहेतोः कवितां जनानां वेधाः सदानन्दमयीं किमाधात् ॥ ३१ ॥

सिद्धं पदं सिद्धतरस्तदर्थः साध्या पदानां परमानुपूर्वी ।
तन्मात्रसारे कवितापदेऽस्मिन् कियद्विधात्रा कृतमुच्चनीचम् ॥ ३२ ॥

तान्येव शास्त्राणि त एव शब्दास्त एव चार्था गुरवस्त एव ।
इयान् विशेषः कवितापथेऽस्मिन् देव्या गिरां दृक्परिवर्त्तभेदः ॥ ३३ ॥

पदानि भव्यान्यपि काव्यरीतिमस्थानदत्तानि न शोभयन्ते ।
नासाग्रलग्नेन भवन्मुखश्रीस्ताटङ्कबिम्बेन *किमङ्गनायाः ॥ ३४ ॥

---

१. जामिता यातयामता. २. ऋजीषं हृतसारोंऽशः.

---

‡ 'पुनर्विमर्शे' इति खपुस्तके पाठः. * 'कथं तरुण्या' इति खपुस्तके पाठः.

साहित्यविद्यां पदमेकमेव सर्वानवद्यामपि हन्ति दुस्थम् ।
दन्तावलिं मौक्तिकदामरम्यां दंष्ट्रेव वक्त्राद् बहिरुल्लसन्ती ॥ ३५ ॥

अन्योन्यसंसर्गविशेषरम्याप्यलंकृतिः प्रत्युत शोचनीया ।
निर्व्यङ्ग्यसारे कविसूक्तिबन्धे निष्क्रान्तजीवे वपुषीव दत्ता ॥ ३६ ॥

विद्वत्प्रियं व्यङ्ग्यपथं व्यतीत्य शब्दार्थचित्रेषु कलेर्विलासात् ।
प्राप्तोऽनुरागो निगमानुपेक्ष्य भाषाप्रबन्धेष्विव पामराणाम् ॥ ३७ ॥

कृते युगे व्यञ्जनयावतीर्णे त्रेतायुगे सैव गुणीबभूव ।
आसीत् तृतीये तु युगेऽर्थचित्रं युगे तुरीये यमकप्रपञ्चः ॥ ३८ ॥

दिष्ट्याधिरूढाः कविताधिराज्यं धीरा रमन्ते न हि शब्दचित्रे ।
स्वर्गेऽपि गत्वाप्सरसां निवासे काणेव किं कापि गवेषणीया ॥ ३९ ॥

मत्वा पदग्रन्थनमेव काव्यं मन्दाः स्वयं तावति चेष्टमानाः ।
मज्जन्ति बाला इव पाणिपादप्रस्पन्दमात्रं प्लवनं विदन्तः ॥ ४० ॥

कालाद् बहोः कान्यपि दुष्पदानि लब्धानि मन्दः परितो विकीर्य ।
छिद्राणि लोष्टैरथ पांसुभिश्च सम्पूरयन् विस्मयते विलज्जः ॥ ४१ ॥

अद्यैकमेकं कुधियः परेद्युरन्येद्युरेकं च पदं निबध्य ।
शुक्तं क्वचित् पर्युषितं क्वचिच्च कोष्णं क्वचिच्चारचयन्ति पद्यम् ॥ ४२ ॥

आपूर्य वक्त्रं लशुनैर्विधाता किं निम्बसारैः कुधियामसिञ्चत् ।
न चेत् कथं वाचि ततः क्षरन्त्यां स पूतिगन्धः स च तिक्तभावः ॥ ४३ ॥

लभेय निन्दामपि सत्कवीनां सव्यङ्ग्यसौरभ्यरसैर्वचोभिः ।
न तु प्रशंसामपि दुष्कवीनां दुर्गन्धिभिर्वीतरसैरमीभिः ॥ ४४ ॥

विवक्षितार्थप्रतिपादकं ये विन्यासभेदं न विदुः पदानाम् ।
दुःखावहोऽर्थः स्फुरितोऽपि तेषां दौर्भाग्यभाजामिव पुत्रलाभः ॥ ४५ ॥

दुर्मेधसः शुष्कतरां कठोरां दुर्गन्धसान्द्रां गिरमुद्विरन्तः ।
कालं चिरं हन्त कथं व्यथन्ते श्रोतुर्दशातरस कियत्तमोंऽशः ॥ ४६ ॥
शृण्वन्तु ते दुष्कवितां परेषां श्रोत्रेषु तप्तं जतु यैर्निषिक्तम् ।

---

१. हन्तेति शोके ! दुष्कवयो दुष्काव्यनिर्माणार्थं यद्व्यथन्ते तच्छोचनीयमित्यर्थः । तामिमां निर्मातॄणां व्यथनदुरवस्थां श्रोतुः श्रवणव्यथादुरवस्था दूरमतिशेत इत्याह – **श्रोतुर्दशात** इत्यादि.

शब्दार्थयोर्दुष्कविवक्त्रभाजोः किं दुष्कृतं स्यादवधारयन्तु ॥ ४७ ॥

श्राम्यन्ति यावत् कवयः परेऽपि श्राम्यन्ति तावच्च ततोऽधिकं च ।
गर्भोद्भवादिः प्रसवावसानः क्लेशो हि दुःपुत्रपुवां च तुल्यः ॥ ४८ ॥

दाक्षिण्यहानिर्जगतां विधातुर्दैन्या गिरां दुर्मरणस्य योगः ।
पापं जनस्येति च सर्वमेतत् समाहृतं दुष्कवितानिदानम् ॥ ४९ ॥

आब्रह्मघातादघशोधनानि स्मरन्ति ये ते परमर्षयोऽपि ।
यावत्तदात्मान्वयिताधियैव न सस्मरुर्दुष्कवितासु शुद्धिम् ॥ ५० ॥

स्वोक्तिं मुषित्वा पुरतः पठन्तं स्वस्यैव पश्यन् कविसाहसाङ्कम् ।
प्राज्ञो जनः किं प्रतिपद्यतां तमाहन्तु वा स्वोदरमाहतां वा ॥ ५१ ॥

निन्दन्तु वाचं मधुरां कवीनां नन्दन्तु च स्वां गिरमेव मूर्खाः ।
नाद्यां स्वरीत्या रसयन्तु जातु नान्त्यां पठन्तु स्वयतोऽपि पार्श्वे ॥ ५२ ॥

हिंसा पशूनां क्रतुमध्यरुग्रा स्वर्गो यथास्ते क्ष(य?)णदुःखहेतुः ।
किञ्चिच्छुभं पातकनव्यरुग्रं तथा मुदे स्यादपि दुष्कवीनाम् ॥ ५३ ॥

प्राचेतसव्यासमुखाः कवीन्द्राः प्राज्ञोऽपि किं दुष्कविभिर्विरिक्ताः ।
काव्यानि कर्तुं शतशः क्षमास्ते कथं न चेदासत कौकवन्ध्याः ॥ ५४ ॥

स्थूलाभिरभ्युल्लिखितानि धीभिः स्थूलानि मन्ये कुकवेर्वचांसि ।
कथं न चेत् कर्णपुटं प्रवेष्टुमेतानि यत्नादपि नोत्सहन्ते ॥ ५५ ॥

वाचं हतो यद्यपि ते तथापि न मूकता दुष्कवितैव दोषः ।
आद्या यदेकस्य विषादहेतुः प्रागोगरोधाय परा बहूनाम् ॥ ५६ ॥

वाचं विपञ्चीमिव *वादयन्ति कर्णामृतेन ध्वनिना कवीन्द्राः ।
मूर्खाः स्वमेधामुसलप्रहारैर्विनाशयन्त्येव विचेष्टमानाः ॥ ५७ ॥

शक्यं सुखं ग्रन्थयितुं प्रबन्धान् शक्यन्तु न श्रोतृजनानुरोधः ।
श्रान्ते सति क्वापि कवौ यदेष सर्वस्वनाशादिव खेदमेति ॥ ५८ ॥

अचुम्बितोल्लेखपदप्रवृत्तानसम्प्रदायेन कवीन् क्षिपति ।

---

१. 'स्वाङ्गकर्मकाच्च' इति वचनात् तङ्. २ .एकग्रन्थनिर्माणमात्रचरितार्था इत्यर्थः.

---

* 'वर्णयन्ति' इति खपुस्तके पाठः.

पथा प्रवृत्तान् प्रहतेन मूर्खाः पश्यन्त्यवज्ञामुकुळीकृताक्षाः ॥ ५९ ॥
रसं रसज्ञाः कलयन्ति वाचि परे पदार्थानपरे पदानि ।
वस्त्रं कुविन्दा वणिजो विभूषां रूपं युवानश्च यथा युवत्याम् ॥ ६० ॥
पाठप्रकारैः पदयोजनाभिस्तात्पर्यदुर्निश्चयतश्च मन्दैः ।
आयास्यमानां गिरमात्मनो ये कर्णे न कुर्वन्ति त एव धन्याः ॥ ६१ ॥
एको हि दोषः परकीयतैव पद्येषु सर्वेष्वपि दुर्जनानाम् ।
तस्मिन् पुरस्थेऽपि कियद्यतन्ते वृथैव ते दोषगवेषणाय ॥ ६२ ॥
आनन्दथुर्ब्रह्मविदां यदेकस्ते व्यङ्गचलाभेषु शतं कवीनाम् ।
एते सहस्रं पुनरर्बुदं वा परोक्तिदोषस्फुरणे खलानाम् ॥ ६३ ॥
प्राचीनपद्यभ्रमतः प्रवृत्ताः स्तोतुं खलाः प्रेक्ष्य कविं पुरस्तात् ।
येनान्यथाकर्तुमिदं गतन्ते क्लेशेन तेषां हि स एव दण्डः ॥ ६४ ॥
दोषः क्वचित् कश्चिदिति प्रतीतः प्राचामलङ्कारविदां प्रवादः ।
सर्वप्रबन्धानुगतस्तु मन्ये कर्तुः कवेर्जीवनमेव दोषः ॥ ६५ ॥
मुधैव वाक्येषु पदेष्वधीतं मुधैव दीर्घं कवितापथेऽपि ।
आवश्यकं यत्किल पामराणामावर्जनं तन्न किमप्यधीतम् ॥ ६६ ॥
निसर्गतो निर्गुणमुक्तिगुम्फं समर्थयन्ते सगुणं बलाद्ये ।
ते कञ्चुळीसन्नहनोन्नतेन लम्बस्तनेनापि मुदं लभन्ते ॥ ६७ ॥
पाण्डित्यलोभो यदि पामराणां कामं विहिंसन्तु कलास्त्रिषष्टिम् ।
कस्तेऽपराधः कविते! गृहीतः किमस्ति ते किञ्चन पूर्ववैरम् ॥ ६८ ॥
वाचं कवीनामुपलाळयन् यां भुङ्क्ते रसज्ञो युवतिं युवेव ।
तामेव भुङ्क्ते ननु तार्किकोऽपि प्राणान् हरन् भूत इव प्रविष्टः ॥ ६९ ॥
अर्थेष्वलङ्कारविदः प्रमाणं शब्देषु नः शब्दविदो मुनीन्द्राः ।
के तान्त्रिकाणां कवयो भवन्ति के वा कवीनामपि तान्त्रिकाः स्युः ॥ ७० ॥
घट्टोपविष्टानिव वाग्भिरर्थैः काव्यागमज्ञानुपसान्त्वयामः ।
आकुल्य भङ्कूकवदाततन्तः कथं नु जय्या इह गौतमीयाः ॥ ७१ ॥
अत्यन्तिकैरविभावनीयः सूक्ष्मः प्रकृत्या मृदुसूक्तिजन्मा ।
कुतर्कविद्याव्यसनोपजातः कोलाहलैर्न ध्वनिरेष वेद्यः ॥ ७२ ॥

---

१. घट्टः शुल्कस्थानम् .

गुणान् न गृह्णन्तु खलास्ततः किं गृह्णन्तु दोषानपि वा ततः किम् ।
अपि व्यतित्तामुभयं ततः किं गुणोऽपि दोषो यदि दुस्सहं तत् ॥ ७३ ॥

क्व ब्रह्मलोकः क्व गिरां सावित्री क्व भूमिभागाः क्व वयं वराकाः ।
दिष्ट्योपलब्धामपि देवतां तां विक्रीणते वृत्तिकृते विमूढाः ॥ ७४ ॥

दुष्पण्डिताराधनदुःखशीलान् कष्टादमुष्मात् कविताधिकारात् ।
वरं जगत्यामिह मूकभावो वरं च तिर्यक्तृणगुल्मभावः ॥ ७५ ॥

प्रायो जडा मत्सरिणश्च लोका दोषोत्तरं मृग्यगुणं वचो नः ।
गुणैकतुल्योऽपि जनः क्वचित् स्यादित्याशयैवायमियान् प्रयासः ॥ ७६ ॥

'वेदाहमेतं पुरुषं महान्त'मित्यामनन्तो निगमाः सगर्वम् ।
श्वानः कृता येन स एव देवो वर्ण्यः कथं वाङ्मनसातिवर्ती ॥ ७७ ॥

शब्देषु चार्थेषु परं यतिष्ये तथा तथा मां गुरवो विनिन्युः ।
चमत्कृतिं तत्र कथं विधास्ये न मत्कृतिर्यत् क्रमते तदंशे ॥ ७८ ॥

काहं क काव्यं कविराजसाध्यं काहं क शम्भुर्निगमैरगम्यः ।
निश्शङ्कमेवंविदपि प्रवर्ते निर्लज्जते देवि! तव प्रसादात् ॥ ७९ ॥

दत्ते त्वया वाङ्मयरत्नकोशे विक्रीय भुक्तं किल भुक्तमेव ।
शिष्टं त्वदङ्घ्र्योः पुनरर्पयेयं दयस्व मीनाक्षि! पुरैव मह्यम् ॥ ८० ॥

शब्दा यद्वदनं प्रपद्य मृदुतामाशासतेऽन्यादृशी-
मर्था यद्विषणाप्रवाहपतनादिच्छन्ति जिज्ञास्यताम् ।
यत्कीर्तिस्पृहया शिवोऽपि निगमान् अश्नाति सर्गादिषु
प्राचस्तान् कवितापितामहपदारूढान् कवीन् प्रस्तुमः ॥ ८१ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे प्रथमः सर्गः ।

अथ द्वितीयः सर्गः ।

अस्ति क्षितेराभरणायमानः पोरेसमुद्रं स हि पाण्ड्यदेशः ।
आशामगस्त्याध्युषितां गतोऽपि सर्वोत्तरो यो जगति प्रतीतः ॥ १ ॥

---

१. 'कर्त्तरि कर्मव्यतीहारे' इति तङ् . २. किरातावस्थायामिति शेषः.

आस्थाय वैराग्यमनुत्तमं यस्त्रैलोक्यलक्ष्मीं न तृणाय मेने ।
यदाधिपत्यस्पृहया स एव देवो दधे सुन्दरपाण्ड्यरूपम् ॥ २ ॥

सुदुष्करं यत्प्रतिसर्गमेव पश्यन् मुनिः प्राग् विरराम सर्गात् ।
न शुष्कया सान्त्वगिरा सुराणां किं गाधिसूनोरपि शान्तिरस्ति ॥ ३ ॥

मन्दानिलोऽसौ मलयानिलोऽसौ गन्धानिलोऽसाविति यं युवानः ।
सम्भावयन्ते चलितैः शिरोभिः स कोऽपि यत्कोणभवः समीरः ॥ ४ ॥

आकारिता यत्र मखेषु विप्रैरालोकयन्तो विबुधाः समृद्धिम् ।
युष्मान् यजामो वयमर्पयध्वे युष्मत्पदं चेदिति सान्त्वयन्ते ॥ ५ ॥

तपोवनेऽन्यत्र तपश्चरन्तो दिवं भजन्ते यदि युक्तमेतत् ।
ततोऽधिके यत्र तपस्यतां हि तत्रैव युक्तः सुचिरं निवासः ॥ ६ ॥

मृत्पिण्डरूपो जनको यदीयः पितामहो यत्य कुलाल एव ।
स कुम्भजन्माजनि सूत्रकारः कोणे वसन् क्वापि चिरं यदीये ॥ ७ ॥

सौभाग्यलक्ष्मीं नवचन्दनानां मन्दानिलानामपि मौक्तिकानाम् ।
अयातयामामभिनीवशन्ति प्रायेण कौमारहरा यदीयाः ॥ ८ ॥

यत्रोभयानुच्चतरान् रसालानालक्ष्य विन्ध्यस्मयभङ्गदक्षान् ।
तपस्यति न्यस्तभरः सुखेन तेष्वेव मैत्रावरुणिर्महर्षिः ॥ ९ ॥

उपत्यकामण्डलनिर्विशेषे देशे हि यस्मिन् मलयाचलस्य ।
उदेति मन्दं व्यजनानिलोऽपि चमत्कृतश्चन्दनसौरभेण ॥ १० ॥

पदेपदे चन्दनकाननस्थैः फणाधरैर्यत्र निषीयमानः ।
जातः प्रभूतोऽपि बहिः प्रसर्पन् मन्दः किलैवं मलयानिलोऽभूत् ॥ ११ ॥

मन्दानिलं मन्मथमूलकन्दं यत्रोपयोक्तुं मुनयस्त्रसन्तः ।
वैयाघ्रचर्मव्यजनोपजातैर्वातैर्व्रतं केचन वर्त्तयन्ते ॥ १२ ॥

*अयत्नलभ्यान्ययमद्भुतानि शरासकाण्डानि शरानसङ्ख्यान् ।
यत्रैव पश्यञ्जगदेकवीरः स्थिरं मनोजः शिबिरं चकार ॥ १३ ॥

---

१. दक्षिणामूर्तिरूप इत्यर्थः. २. द्रमिळभाषाव्याकरणसूत्रप्रणेता. ३. रसालान् इक्षूश्चूतांश्च.
४. न्यस्तोऽर्पितो भरो विन्ध्यस्मयभङ्गश्रमो येन सः.

---

* 'अयत्नलभ्यं रथम्' इति स्वपुस्तके पाठः.

ताम्रातरङ्गानिलताडितासु माकन्दवाटीषु मनोजवीरे ।
यत्रावतीर्णे महता बलेन तद्बाहुगुप्तातरुणा रमन्ते ॥ १४ ॥

वर्षोपला यत्र हि मौक्तिकानि काष्ठानि गन्धद्रुमकाण्डखण्डाः ।
कस्तेन विस्पर्धितुमुत्सहेत देशः शिलाकण्टकपूरितोऽन्यः ॥ १५ ॥

स्वर्गे नवं स्रष्टुमना मुनिः प्राक् ससर्ज यत्सम्मुखदेश एव ।
तन्मारुतस्पन्दनमात्रतोऽपि स्वर्भोगभाग्यं सुलभं विजानन् ॥ १६ ॥

अन्या विशन्त्यः सरितः समुद्रमापूरयन्ते जलजन्तुभिः स्वैः ।
रत्नापगा यत्र तु सम्पतन्ती रत्नाकरत्वं रमणस्य दत्ते ॥ १७ ॥

यत्सङ्गमादेव भवन्ति मुक्ताः सा जाह्नवी सर्वजनीनमेतत् ।
ततो विदुर्दक्षिणजाह्नवीति तादृग्विधां यत्र हि ताम्रपर्णीम् ॥ १८ ॥

दत्ते सुतां स्वामिव यां समस्तैरलङ्कृतां रत्नगणैरगत्यः ।
सरस्वते गोत्रमहत्तराय यतो गृहीता हरिणापि वेदाः ॥ १९ ॥

अभ्यापतन्तीमनुवासरं यामगस्त्यगोत्रप्रभवेति सिन्धुः ।
विकीर्य पुष्पैरिव मौक्तिकौघैः प्रत्युद्व्रजन् प्रापयते किमन्तः ॥ २० ॥

स्रोतोमुखैरम्बुनिधिं प्रविष्टं §त्वभावतः स्वादु यदीयमम्भः ।
निर्मथ्य लब्धं त्रिदशैः कदाचिदास्वाद्यतेऽद्यापि सुधा सुधेति ॥ २१ ॥

क्षारोदकास्वादभवं विपाकमपाकरिष्यन्निव कुम्भजन्मा ।
जहाति शैलं मलयं न जातु पातुं प्रकृत्या मधुरं यदम्भः ॥ २२ ॥

यां सर्वरत्नैकखनिं विहाय गङ्गामधात् केन गुणेन शम्भुः ।
का प्रीतिरर्के सति कैतकेऽपि न हीश्वराः पर्यनुयोज्यशीलाः ॥ २३ ॥

वैदूर्यनीलोपलमौक्तिकानि यदादिमध्यान्तसमुद्भवानि ।
सा ताम्रपर्णी सरिदेव यत्र साधरणी काचन सारणीव ॥ २४ ॥

तस्मिन् विशाले तरुणेन्दुमौलेरावासभूतं पदमद्भुतानाम् ।
वनं जगत्पावनमस्ति किञ्चिन्नीपद्रुमाणां निकषा वृषाद्रिम् ॥ २५ ॥

---

१. दक्षिणदिग्देशो हि पाण्ड्यसम्मुखदेशः. २. रत्नापगा मुक्तारत्नप्रसूस्ताम्रपर्णी. ३. कैवल्यभाजो मौक्तिकानि च. ४. गोत्रशब्दः पर्वतवंशयोः- ५. गृहीता आजादिता अधीताश्च. ६. सारणी स्वल्पनदी.

§ 'वर्षासु वर्षासु' इति स्वपुस्तके पाठः.

अज्ञाततिग्मांशुकरावमर्शा छाया यदीया तमसां विहन्त्री ।
वातेरितं पुष्परजो यदीयं निश्शेषमुन्मार्ष्टि रजः प्रजानाम् ॥ २६ ॥

अन्तर्निलीनभ्रमरैः प्रसूनैराभाति यद् बद्धरजोभिरीषत् ।
सत्त्वेन निर्जित्य रजस्तमश्च सम्मूर्च्छितेनेव समन्ततोऽपि ॥ २७ ॥

यत्राभिषिञ्चन्ति मधु क्षरन्तो वृक्षा भुवं मूर्त्तिमिवाष्टमूर्त्तेः ।
झङ्कुर्वते कर्णरसायनानि सामानि गायन्त इव द्विरेफाः ॥ २८ ॥

वक्राणि यस्मिन् मुनिपादपानामाभान्ति पुष्पाण्यतिनिर्मलानि ।
समाहृता मुक्तिजुषां प्रदातुं शशाङ्कखण्डा इव शङ्करेण ॥ २९ ॥

सम्पूर्यमाणात् प्रतिपौर्णमासं शाखाग्रसङ्घट्टनतोऽवधूतात् ।
मृगाङ्कबिम्बाद् गलिता इवोर्व्यां मृगाः शतं यत्र परिभ्रमन्ति ॥ ३० ॥

प्रत्यर्थिनो यत्र महेश्वरस्य तत्तत्क्षणोदन्तविचारणाय ।
चारा नियुक्ता इव मन्मथेन चरन्ति भृङ्गाः सममन्यपुष्टैः ॥ ३१ ॥

प्रागम्बयाथ प्रमथाधिपेनाप्यध्यासिते यत्र कदम्बमूले ।
माकन्दजम्बूवटपादपानां मन्दाक्षमन्दानि कुलान्यभूवन् ॥ ३२ ॥

शाखासु शाखासु फलानि यत्र भान्तीव नाना परमार्थतस्तु ।
सर्वागमानां फलमेकमेव सन्दृश्यते तच्च कदम्बमूले ॥ ३३ ॥

तृणीकृते यत्र वसद्भिरार्यैश्चराचरेऽस्मिन् पशवश्चरन्ति ।
वैकुण्ठवाजोऽपि तृणीकृतस्तैर्न चेत् कुतोऽसौ हरिणादृतः स्यात् ॥ ३४ ॥

पुष्पाय वृक्षाग्रमदाधिरूढान् पुत्रान् मुनीनामुपलालयन्तः ।
व्याजेन देवातपसोऽभिसन्धिं पृच्छन्ति नित्यं परिशङ्कमानाः ॥ ३५ ॥

रोमाञ्चसान्द्रा इव कुग्मलौघैरुदश्रुपूर्णा इव शीथुवृष्ट्या ।
भस्मानुलिप्ता इव पुष्पधूल्या दृष्ट्वा मुनीन् यत्र भवन्ति नीपाः ॥ ३६ ॥

यस्मिन् महेशानकराश्रयेण केनापि कुल्येन कृतावलम्बाः ।
मृगा निरातङ्कलवाश्चरन्ति मृगादनैः प्रत्युत सेव्यमानाः ॥ ३७ ॥

व्याहन्यमाना मृगयासु यस्मिन् व्याघ्राः शिवत्वं प्रतिपद्य सद्यः ।

---

१. तृणीकृतेऽवज्ञाते अथ च तृणत्वमापादिते. २. नीपवनातिरिक्ते प्रपञ्चे ये चरन्ति ते पशव इति तात्पर्यम्. ३. द्विणं हि हरिणादृतं भवितुमर्हति.

अस्मत्कुलीनोऽसि महानसीति हन्तॄन् किरातानुपसान्त्वयन्ते ॥ ३८ ॥

दृष्टेष्विवानुश्रविकेषु यस्मिन् धीरा वितृष्णा इति नातुताय ।
स्वर्गाधिके धामनि संवसन्तः स्वर्ग्याणि कर्माणि किमादियेरन् ॥ ३९ ॥

पाणौ मृगं पार्श्वतले किरातीं पर्यङ्कबन्धे च गजं महान्तम् ।
सम्मानयन्नेव चरत्यरण्ये पैश्चाननः कोऽप्यधुनापि यस्मिन् ॥ ४० ॥

यद् द्वादशान्तैकविभावनीयं त्रय्यन्तदृश्यं कथमन्यतस्तत् ।
इत्यध्यवस्यैव तदावसन्ति ब्रह्मर्षयः पाशुपता महान्तः ॥ ४१ ॥

वल्ल्यो यदीयाः कठवल्लिकाद्याः शाखाश्च माध्यन्दिनकाण्वमुख्याः ।
सर्वागमस्तोममयस्य तस्य शक्नोति को वर्णयितुं प्रभावम् ॥ ४२ ॥

तस्मिन् कदम्बद्रुममूलसीम्नि तपःपरीपाकफलं जनानाम् ।
आस्ते जगन्मङ्गलमङ्गजारेर्लिङ्गं दयाविग्रहवत्त्वलिङ्गम् ॥ ४३ ॥

यद् गूहितं वाग्भिरकृत्रिमाभिर्यद् द्रष्टुकामा मुनयो यतन्ते ।
नाम्ना च रूपेण च सुन्दरं तत् प्रत्यक्षमास्ते प्रियैकस्य मूले ॥ ४४ ॥

पाण्ड्यार्पिता भात्यधुनापि यस्मिन्नृज्वायता वेत्रनिगूतरेखा ।
नारहस्यागमबोधनीयां नादात्मतामस्य विवृण्वतीव ॥ ४५ ॥

समस्तदिव्यागमसम्प्रतीते तारात्मके तत्र महेशलिङ्गे ।
अर्धेन्दुरर्धेन्दुतयैव दृष्टो बिन्दुस्तु सिन्धुः स्तिमिता जटाग्रे ॥ ४६ ॥

मूलञ्च मौलिश्च विवेक्तुकामौ यस्याक्रमेतां विधिरच्युतश्च ।
तन्मूलमेतत्तरुमूलगम्यं तन्मौलिरेतत्तरुमौलिवेद्यः ॥ ४७ ॥

छन्नं प्रसूनैः स्रपितं मरन्दैरलंकृतं भोगिभिरापतद्भिः ।
इत्थं स्वयं पूजितमस्ति नित्यं स्वायम्भुवं सुन्दरनाथलिङ्गम् ॥ ४८ ॥

एकं किल ब्रह्म यदद्वितीयं वक्तुं चतस्रः श्रुतयोऽपि नालम् ।
तादृग्विधान्येव भजन्ति तस्य ब्रह्माणि पञ्चावयवत्वमुद्राम् ॥ ४९ ॥

तस्मिन्नहम्पूर्विकया विशद्भिरपान्तवन्धैरधुनापि जीवैः ।
सम्बाधदुस्स्थैरजनिष्ट लिङ्गे सार्वत्रिकी दन्तुरतेति शङ्के ॥ ५० ॥

---

१. अस्मत्कुलीनत्वोक्तिः किरातरूपपरिग्रहावेक्षया. २. पञ्चाननः शिवः सिंहश्च. ३. प्रियकस्य नीपस्य. ४. तारात्मके प्रणवात्मके. ५. अवयवत्वमुद्रां सद्योजातवामदेवतत्पुरुषाघोरेशानाख्य मुखपञ्चकत्वरूपामित्यर्थः.

चिद्रूपमानन्दमयं च वेदाः शैवं वपुः शाश्वतमामनन्ति ।
दयामयं तेऽपि विदुर्न जातु दृष्टं तदत्रैव कदम्बमूले ॥ ५१ ॥

गूढं भवामीत्यभिमानमात्रं गूढं परं ज्योतिरिदं कथं स्यात् ।
यन्मूर्धनि प्रत्युत चन्द्ररेखा तेनैव तत् प्रेक्षि कदम्बमूले ॥ ५२ ॥

ख्याताः कला यद्यपि तत्र लिङ्गे पञ्चैव सिद्धाः शिवशासनेषु ।
तथापि तेनाध्युषिते तु देशे कलाश्चतुःषष्टिरपि स्फुरन्ति ॥ ५३ ॥

कृष्णार्जुनाभ्यां परिपूज्य लिङ्गमासादिताः सिद्धय इत्यवेत्य ।
कस्तूरिकाभिर्घनसारकैश्च लिम्पन्ति लोकाः खलु लिङ्गमेतत् ॥ ५४ ॥

यत्पीठिकाधस्पदमात्रलभ्या वाणी बहिर्न क्रमते कथञ्चित् ।
तत् कारणेशात्रितयातिवर्ति लिङ्गं कया वर्णयितव्यमुक्त्या ॥ ५५ ॥

सदाभिषिक्तं विबुधस्रवन्त्या सदा समभ्यर्चितमिन्दुना च ।
लिङ्गं तदैशं विजने वनेऽपि लोकत्रयक्षेमकरं बभूव ॥ ५६ ॥

कूजत्सु वन्येषु विहङ्गमेषु गायत्सु चाखण्डलगायनेषु† ।
प्रीतिं दधौ तुल्यवदेव देवः कस्तद्दृशा तेषु भवेद् विशेषः ॥ ५७ ॥

विनोद्यते यः किल योगिवृन्दैर्विद्याधरैरप्सरसां गणैश्च ।
व्यावैर्मृगैः पक्षिभिरप्यरंस्त स देवदेवश्चिरमत्र लिङ्गे ॥ ५८ ॥

अन्तर्हितावस्थितमत्र लिङ्गे तमाराधुस्तरवः प्रसूनैः ।
शृङ्गाग्रकण्डूयनतः कुरङ्गा निर्मोकपट्टार्पणतो भुजङ्गाः ॥ ५९ ॥

सन्ध्यासु सन्ध्यासु गणैरदृश्यैरारात्रिकं साधितमस्फुटं यत् ।
चक्रे जरज्जम्बुकवक्त्रलग्नैर्ज्वलद्भिरेतज्ज्वलनैः प्रकाशम् ॥ ६० ॥

वन्यद्विपेष्वन्यतमो गणेशो व्याधार्भकेष्वेकतमः कुमारः ।
साऽन्यादिशक्तिः शबरीषु कापि भूत्वा विजह्रुः सविधे पुरारेः ॥ ६१ ॥

इत्थं परिभ्राम्यति कालचक्रे प्रणश्यति प्रोद्यति च प्रपञ्चे ।
देवेषु योगिष्वपि केऽपि केऽपि शनैरबुध्यन्त रहस्यमेतत् ॥ ६२ ॥

---

१. पञ्च अकारोकारमकारनादबिन्दुरूपाः. २. लिम्पन्ति लेपनरूपया पूजया सम्भावयन्ति । कस्तूरिकाः कृष्णत्वात् घनसारकाणामर्जुनत्वाच्च तेषु पूजासाधनत्वाभिमानो जनानामित्युत्प्रेक्ष्यते.

† 'गायकेषु' इति खपुस्तके पाठः.

प्रत्यग्दृशा प्राक्तनपुण्ययोगादासोपदेशैरनुमानतश्च ।
क्रमाद् द्युलोके बहलीबभूव कदम्बकान्तारकथाप्रसङ्गः ॥ ६३ ॥

दूरात् प्रणेमुः कतिचिद् वनं तदारात् परे नीपतरूनपश्यन् ।
विचिक्युरेके तदनुप्रविश्य धन्याः परे तद् ददृशुश्च लिङ्गम् ॥ ६४ ॥

आनन्दजैरश्रुभिरभ्यषिञ्चन्नानर्चुरप्यक्षिभिरेव फुल्लैः ।
न्यवेदयन्तापि निकामधौतमात्मानमानन्दसुधाप्लुतं ते ॥ ६५ ॥

गूहत्सु युष्मास्वपि गूढमेतद्रहस्यमद्राक्ष्म वयं किलेति ।
अनुश्रवान् केचिदुपालभन्त केचिद्विधिं केऽपि शिलादसूनुम् ॥ ६६ ॥

वागीश्वरा वाग्भिरपूजयन्त ध्यानाध्वनीना हृदि दध्युरेनम् ।
बाह्यार्चनामात्रपरायणास्तु सामग्र्यलाभादलभन्त खेदम् ॥ ६७ ॥

अभ्रापगावारिभिरभ्यषिञ्चन् सुधान्धसः सुन्दरनाथलिङ्गम् ।
तत्रासमर्था मुनयो महीस्थास्तस्तम्भिरे केवलमश्रुपूर्णाः ॥ ६८ ॥
आलक्ष्य पूजाव्यवसायमेषामपामभावात् परमं च खेदम् ।
दीनानुकम्पानिधिरिन्दुमौलिर्दिव्यं सरस्तत्र विधातुमैच्छत् ॥ ६९ ॥

स दक्षिणस्यां दिशि बाणपाते सरो विधात्यन्नमृतांशुमौलिः ।
सङ्कल्पलीलादिव निर्बिभेद तीक्ष्णेन भूमिं त्रिशिखाञ्चलेन ॥ ७० ॥

आविध्य शूलं भुवि सद्य एव पादाङ्गदं पश्यति सुन्दरेशे ।
भक्तस्य ते न क्षतिरस्ति जातु शेषः सुखीत्याह सुता हिमाद्रेः ॥ ७१ ॥

आविध्यमानात् त्रिशिखाभिघातैरधःकपालाज्जगदण्डभित्तेः ।
अम्भो यदण्डावरणायितं तदुद्बुद्बुदं तत्क्षणमुद्बभूव ॥ ७२ ॥

त्रैविक्रमे कर्मणि शार्ङ्गिणापि प्रवर्तितं यत् किल पूर्वमम्भः ।
अधोगतिं प्राप तदेव लेभे शिवास्त्रयोगाद् गतिमित्थमूर्ध्वाम् ॥ ७३ ॥

दिदृक्षमाणेन महाद्भुतं तच्छिवेन यावन्नमितो न मौलिः ।
तावत् सरस्तत्कृतमुत्तरङ्गं ततः स्रवन्त्या विबुधस्रवन्त्या ॥ ७४ ॥

---

१. पादाङ्गदं तद्रूपं शेषम्. २. पश्यतीति । शूलस्यापाताल प्रवेशादादिशेषाशिरसि तदभिघातशङ्कया दर्शनम्. ३. इत्याहेति । इत्युक्त्वा भर्तुः शङ्कामपनुनोदेत्यर्थः. ४. अधोगतिं भोगवतीसंज्ञया पाताळगतिं अथ च दुर्गतिम्.

सरस्त्रिशूलप्रभवं पुरारेस्तथात्यगाधं तदभूत् क्षणेन ।
यथात्र देवोऽवतरन् प्लवेत त्रिविक्रमः क्रान्तजगत्त्रयोऽपि ॥ ७५ ॥

नौर्वान्न रामान्न च कुम्भयोनेर्यस्यास्ति भीतिस्तदवेक्ष्य तीर्थम् ।
आश्वासमाजग्मतुरर्णवस्थौ शश्वत्तमौ तावपि कूर्ममीनौ ॥ ७६ ॥

आविर्भवन्तीः सलिले समन्तादम्भोजिनीरुत्पलिनीश्च तस्मिन् ।
ददृशौ पिबन्त्यौ परमस्य धाम्नः प्रीतिं परां प्रापतुरर्कचन्द्रौ ॥ ७७ ॥

त्रैगुण्यरूपं त्रिशिखं हि शम्भोर्धीरा जगत्कारणमामनन्ति ।
तत्सम्प्रसूतेऽपि सरस्यमुष्मिन् का हेतुचिन्ता कमलोत्पलानाम् ॥ ७८ ॥

शैवालनीलं बहिरम्बुजाभमन्तर्घटैरुद्ध्रियमाणमच्छम् ।
त्रैगुण्यरूपं त्रिशिखोद्भवं तदम्भो निजान् हेतुगुणान् व्यनक्ति ॥ ७९ ॥

प्राचीनमब्जं परिहृत्य सद्यो जग्राह भानुर्जलजं तदीयम् ।
अत्रैव लक्ष्मीः स्थितिमाबबन्ध चतुर्मुखोऽतश्चक्रमे प्रसूतिम् ॥ ८० ॥

आचामत स्नात सरस्यमुष्मिन्नस्याम्भसा मामभिषिञ्चतेति ।
देवान् महर्षीनपि चान्वगृह्णद् वाचा भगिन्या विभुरागमानाम् ॥ ८१ ॥

खातं शूलशिखाञ्चलेन सलिलैः पूतं जटातीर्थजैः
प्रत्यक्षेण च शाम्भवेन विधिना प्राप्तं परां प्राह्यताम् ।
तीर्थं तत् प्रतिपद्य तापसगणा भागीरथीं तत्यजु-
र्मन्दं चादरमादधुः सुरगणा मन्दाकिनीस्रोतसि ॥ ८२ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे द्वितीयः सर्गः ।

अथ तृतीयः सर्गः ।

अथ जातु पुरन्दरः सुधर्मामधितिष्ठन् सह सप्तभिर्दिगीशैः ।
अविजेयमनुक्षणोपचित्या विमतं वृत्रममन्त्रयद् विजेतुम् ॥ १ ॥

चतुरङ्गमिदं महद् बलं नश्चतुरं गन्तुमहो न यत्समीपम् ।
न बल भुजयोः क्रमेत तस्मिन्नवशादञ्जलिबन्धशिक्षितौ यौ ॥ २ ॥

अमृताशनजातिमात्रजेतर्यलमस्त्राणि न तत्र दैवतानि ।
परिवृत्त्य पतेयुरासुराणि प्रबलं यूथपतिं तमेत्य सद्यः ॥ ३ ॥

निकृतिं शरणं वृणीमहे चेन्नियमादापदियं क्षमा तरीतुम् ।
निर्ऋतिं परिपृच्छतामुमर्थं स हि नः पुण्यजनेषु सम्प्रतीतः ॥ ४ ॥

असुरा हि भवेम युध्यमानाः कपटेनेति यदि स्थितं मतं वः ।
असुरत्वमयोऽशितं चिराय्नः सुरभावादतिगार्हितादमुष्मात् ॥ ५ ॥

स हि सम्प्रति सागरान्तरीपे क्वचिदालम्ब्य निराश्रयं समाधिम् ।
अविशङ्कितमास्थितस्तत्यां सुखजय्यो यदि रोचते भवद्भ्यः ॥ ६ ॥

इति वादिनि वज्रिणे सुरागामनुजग्मुर्हरिदीश्वराः सहस्रम् ।
प्रकृतिर्ह्यये रुचिः प्रजानां किमुत स्वामिनि तादृशेऽपि लब्धे ॥ ७ ॥

स हि यत्र तपश्चकार वृत्रस्तदनुप्राप्य तपोवनं महेन्द्रः ।
परमेण समाधिनोपविष्टं पविना तं विनिपातयाम्बभूव ॥ ८ ॥

कृतकृत्यममुं निवर्तमानं कियदप्यप्रतिसन्दधानमेनः ।
विकृता वपुषा विकीर्णकेशी समभेवानुससार वृत्रहत्या ॥ ९ ॥

पुनरेत्य यथापुरं सुधर्मां पुरुहूतः स्तुवतो विसृज्य देवान् ।
अवरोधमभीप्सुरालुलोके विशतीं स्वेन सहैव वृत्रहत्याम् ॥ १० ॥

अवकीर्य पविं विकीर्य केशानसमालोच्य च कृत्यमाप्तवर्गैः ।
स तयानुगतः पलायत द्राक् समरेष्वप्रतिमल्लसाहसोऽपि ॥ ११ ॥

अपथं तदभीक्ष्णमाहृतं यैरपि साक्षादुपदिष्टमादितश्च ।
जहसुः प्रथमं त एव शक्रं प्रकृतीनां प्रभवत्स्वयं स्वभावः ॥ १२ ॥

विपिनाद्विपिनं गिरिं गिरिभ्यो जलराशेर्जलराशिमन्ततश्च ।
जगतो जगदप्ययं प्रधावन्मुमुचे नैव तया धियेव जीवः ॥ १३ ॥

निपुणं स पुरन्दरो विलिल्ये सरसि क्वापि सरोजनाळतन्तौ ।
शतशः समुपात्तसप्ततन्तोरवलम्बाय बभूव कोऽपि तन्तुः ॥ १४ ॥

अवलोक्य तदन्तरं चिकीर्षन् नहुषो नाम नृपोऽधिकारभैन्द्रम् ।
अनियन्तृकताविषादमग्नैरनुमेने कथमप्यमर्त्यलोकैः ॥ १५ ॥

---

१. सप्ततन्तुशब्दः क्वचौ सप्तसङ्ख्याकतन्तुषु च.

अयथावदनुष्ठिताश्वमेधः कियता चैव दिवं गतः शुभेन ।
प्रभुतामपि वर्तयन् सुरागां प्रकृतिं स्वां न जहौ तमःप्रधानाम् ॥ १६ ॥

पृथिवीमनुशासतः पुरा ये रिपवस्तस्य महीभुजो बभूवुः ।
अधुना विषयेष्वसावमीषामाशिषद् वारिमुचो न वर्षतेति ॥ १७ ॥

अहमस्म्यभिवर्षुकः प्रजानां यजनीयश्च ततोऽहमेव तासाम् ।
क इमे हविषो मखे नराणामिति सर्वानयमाक्षिपत् सुधाशान् ॥ १८ ॥

सवनोपनतं हविः समस्तं मयि संवेदय मद्गृहीतशेषम् ।
प्रतिपादय तस्य तस्य पश्चादिति मूढः प्रशशास हव्यवाहम् ॥ १९ ॥

उदधेः सुरसिन्धुतोयपूर्णादुदपद्यन्त यदद्भुताः पदार्थाः ।
तदियं निपुणं विशोधनीयेत्यखिलं गाङ्गमवाकिरत् स तोयम् ॥ २० ॥

अवनेर्दिवमागतान् स्वयूथ्यानसकृत् तेषु च शीलितस्वभावान् ।
स हि मूलबलं समग्रहीत् स्वं न विशश्वास निसर्गदैवतानि ॥ २१ ॥

बहुभिस्तुरगैर्गजैश्च भाव्यं द्युतरून् याचत यद्यमी न दद्युः ।
विनिपातयतेति वीतशङ्कं वनपालान् प्रशशास वैधवेयः ॥ २२ ॥

अवितीर्णफला उपासिता अप्यवनिस्थेन पुरात्मना सुरा ये ।
द्विगुणं त्रिगुणं च निर्दयैस्तान् दनुजैरेव स दण्डयांबभूव ॥ २३ ॥

अमरैः प्रतिमासमद्यमानं कुलकूटस्थमवेक्ष्य खेदितोऽसौ ।
अवनाय समादिदेश भृत्यान् सितपक्षात्यय एव शीतभानोः ॥ २४ ॥

स स मित्रमभूदमुष्य यं यं पुरुहूतो विरुरोध दानवेषु ।
कथयन्ति कथाममुष्य ये ये कुपितोऽयं ज्वलति स्म तेषु तेषु ॥ २५ ॥

शयितुं परिवर्तितुं च बिभ्यन्नयनैर्निर्निमिषैः स सर्वगात्रे ।
नयनानि विभज्य निर्जरा मे प्रतिगृह्णन्विति सन्दिदेश मूर्खः ॥ २६ ॥

मृगपक्षिसरीसृपा मनुष्याः पशवो ये निहतास्त्वयाश्वमेधे ।
त इमे विचरन्ति हन्तुकामा इति तं शश्वदभीषयन्त देवाः ॥ २७ ॥

इयमेव शचीति दर्शयन्तो गणिकां कामपि निर्जराः सुराणाम् ।
अतिसन्दधिरे सुखेन मूढं प्रभुता का प्रकृतेरसम्मतस्य ॥ २८ ॥

शिबिकामधिरुह्य जातु गच्छन् स महर्षीन् विनियुज्य तत्र धुर्यान् ।
असकृन्निजगाद सर्प सर्पेत्यपि तं कुम्भभवस्तथा भवेति ॥ २९ ॥

अशनिर्ह्रसमाप्त एव भोगे पतितो मूर्धनि तस्य शापरूपः ।
अत एव पतन्नपि क्षमायां नहुषो न त्यजति स्म भोगिभावम् ॥ ३० ॥

चिरलुप्तकथे मघोनि तस्मिन्नपि तस्य प्रतिरूपके प्रनष्टे ।
अधिगन्तुमनाः प्रवृत्तिमैन्द्रीं युयुजे योगदृशा गुरुः सुराणाम् ॥ ३१ ॥

सरसीरुहनाळतन्तुलीनं सरसि क्वापि समेत्य योगगूढः ।
प्रतिबोधयति स्म देशिकस्तं करणीयं करुणाप्लुतैर्वचोभिः ॥ ३२ ॥

चकितः समयं कियन्तमस्मिन् सरसि स्थास्यसि खेदयन्नमर्त्यान् ।
न हि सम्यगनिष्कृतं तदेनः प्रळये प्राकृतिकेऽपि मुञ्चति त्वाम् ॥ ३३ ॥

सकलाघनिबर्हणे समाधौ वसतस्तस्य वधे तु कः समाधिः ।
चरणं परिहृत्य चन्द्रमौलेः शरणं संसरतां यदाविरिञ्चात् ॥ ३४ ॥

चर पाशुपतव्रतं चरन् सन्नवनावायतनानि शाम्भवानि ।
अनुयास्यति केवलं न तु त्वामधिकुर्वीत शिवाज्ञया तदेनः ॥ ३५ ॥

विशतस्तव यत्र सम्प्रसीदत्यमृतेनेव विशोधितोऽन्तरात्मा ।
करुणावरुणालयो महेशः कलुषं तत्र निवारयिष्यतीति ॥ ३६ ॥

स तथेत्यभिनन्द्य शासनं तत् कलितस्वस्त्ययनश्च देशिकेन ।
अधिरुह्य सुरद्विपं प्रतस्थे विविधान्यायतनानि विश्वमूर्त्तेः ॥ ३७ ॥

स गिरीन् हिमशैलकन्दरादीन् सरितो जह्नुसुताकलिन्दजाद्याः ।
विपिनानि च नैमिशादिमानि व्यचरत् पाशुपतव्रती महेन्द्रः ॥ ३८ ॥

स तपोवनदर्शमध्युवास प्रयतः सन्निममज्ज तीर्थदर्शम् ।
द्विजवेदमतर्पयद् धनौघैर्व्रततेदं नियतः समाचचार ॥ ३९ ॥

त्रिविधान्यपि शाम्भवानि लिङ्गान्ययजद्वस्तुभिरान्तरैश्च बाह्यैः ।
लभते स्म न शान्तिमात्मनोऽयं क्वचिदप्येषु कुतो हि पातकस्य ॥ ४० ॥

---

१. भोगिभावं सुखित्वं सर्पत्वं च. २. तपोवनदर्शं सर्वाणि तपोवनानि दृष्ट्वा । 'कर्मणि दृशिविदोः साकल्ये' (३-४-२९) इति णमुल्.

स तपांसि बहूनि तप्यमानः कलुषेणानुयतानुतप्यमानः ।
भवबन्धनिराकरिष्णुशाखापवनं नीपवनं समाससाद ॥ ४१ ॥

उपहारमनुत्तमं पुरारेरवतंसोत्पलसौरभं हरन्तः ।
अभिजग्मुरिवानिलास्तदीया अतिथिं स्वामिनमागतं चिराय ॥ ४२ ॥

स कदम्बवनीपरागलेशैः शिवगङ्गोदकशीकरानुविद्धैः ।
पवनोपहृतैः पतिः सुराणां परमां कामपि निर्वृतिं जगाहे ॥ ४३ ॥

प्रससाद मनः प्रसेदुरक्षीण्युपजज्ञे बलमुद्भवभूव शौर्यम् ।
स हि सन्निचकर्ष यावदित्थं कलुषं विप्रचकर्ष तावदस्य ॥ ४४ ॥

अतिहृष्टमनाः स तैर्निमित्तैरनुसन्धाय गिरं पुरोधसस्ताम् ।
परिनिश्चिनुते स्म तत् त्रिलोक्यां परमं धाम हरिः परस्य धाम्नः ॥ ४५ ॥

सकलाद्भुतधाम्नि सीम्नि तस्यां सहसैवायमवाप्तुतो गजेन्द्रात् ।
प्रयतः प्रविवेश काननं तत् सह सर्वैश्च विना तदेकमेनः ॥ ४६ ॥

स ददर्श फणातपत्रगुप्तान् नकुलानातपतापितानहीनाम् ।
अपि दृप्तचरत्तरक्षुदंष्ट्रामुखकण्डूयितलोचनां कुरङ्गीम् ॥ ४७ ॥

स लतां कमपि द्रुमं प्रपन्नां सविधस्थान्यतरूपगूहभीत्या ।
प्रतिसंहृतपल्लवामपश्यत् परिकृष्टामपि कौतुकात् किरातैः ॥ ४८ ॥

उपहृत्य चलद्द्रुमप्रवालान् कदलीरिक्षुलता मृणालिनीश्च ।
नमतः शतशो हरेः समक्षं न विषेहे वनकुञ्जरान् सुरेभः ॥ ४९ ॥

पथि वीक्षितवद्भिरादरेण प्रमथैः पाशुपतैर्महर्षिभिश्च ।
सविधं तपसातिनिर्मलोऽयं समुपानीयत सुन्दरेश्वरस्य ॥ ५० ॥

अविचिन्त्यमदृष्टमश्रुतं च त्रिषु लोकेष्वपि दिव्यलिङ्गमेतत् ।
विकचैर्नयनोत्पलैर्विडौजा विचकार[1] प्रथमोपहारहेतोः ॥ ५१ ॥

प्रमदाश्रुपरिप्लुतैस्तदानीं नयनैराचरणाग्रमाललाटम् ।
द्रवतां प्रतिपद्य भक्तियोगाद् ददृशे वारिमयीव तस्य मूर्त्तिः ॥ ५२ ॥

अथ दण्डवदानतस्य शम्भौ ददृशे दृष्टिमयी तनुर्मघोनः ।
उपहारकृते पुरो विकीर्णा विकचेन्दीवरमालिकेव दिव्या ॥ ५३ ॥

---

१. विचकार विकीर्णवान्.

सगणं सवृषं सनन्दिकेशं ससुतं साम्बमपि प्रभुं तमाद्यम् ।
परिपूजयितुं चकाङ्क्ष शक्रो महतामेव मनोरथोऽपि तावान् ॥ ५४ ॥

स्मृतसन्निहितोऽथ विश्वकर्मा सह दिव्येन पुरोधसा तदानीम् ।
शिरसा प्रतिगृह्य भर्तुराज्ञामयतिष्टायतनाय चन्द्रमौलेः ॥ ५५ ॥

विधृतं करिभिर्विमानरूपं विपुलं प्राक्प्रतिहारमेकभूमम् ।
शिखरोल्लिखिताम्बरं स *शिल्पी विदधे गर्भगृहं शुभे विलग्ने ॥ ५६ ॥

अतिसुन्दरमर्धमण्डपं च प्रतिहारत्रयभावितान्तरेण ।
महता मणिमण्डपेन सक्तं विदधे विश्वशुभाय विश्वकर्मा ॥ ५७ ॥

प्रतिमाः परिवारदेवतानां विविधान्यायतनानि तत्र तासाम् ।
परितः परितोऽपि पञ्च सालानकरोदुन्नतगोपुरोपगूढान् ॥ ५८ ॥

शुभवास्तुनि शूलपुष्करिण्या रुचिरे रोधसि पश्चिमे स शिल्पी ।
भवनं मणिचित्रितं भवान्या गणनाथस्य च कल्पयाम्बभूव ॥ ५९ ॥

अपरानपि मण्डपप्रभेदानभितश्चोत्सववीथिका विशालाः ।
असृजत् स मरुत्वतोऽनुरूपान् प्रभुताभक्तिविवेकपाटवानाम् ॥ ६० ॥

प्रहसद्वदनं प्रसन्ननेत्रं द्विभुजं दक्षिणतो धृतोत्पलं च ।
करकोपलवद् घनीभवन्त्या दययेवाकृत विग्रहं स देव्याः ॥ ६१ ॥

अधिकानि ममेत्यहर्निशं यैर्मघवा शोचति लोचनैः समन्तात् ।
अवलोक्य स विश्वकर्मकर्माण्यलमेतानि किमित्यशोचदेभिः ॥ ६२ ॥

दयितस्य दिदृक्षतेऽपसव्यं वपुरेषा किल वामभागगेति ।
कृतमिङ्गितवेदिना मघोना पदमस्याः किमु दक्षिणेन शम्भुम् ॥ ६३ ॥

अतिचारुमशेषलक्षणाढ्यं ललितं बिम्बमिमं स्वतो विविक्षुम् ।
हरिरर्थयते स्म शक्तिमाद्यां गुरुरावाहयदन्वमंस्त शम्भुः ॥ ६४ ॥

अखिलं जगदात्मसम्प्रसूतं परिपुष्णाति दृगेव यत् किलास्याः ।
अभिधामपि मीनलोचनेति व्यदधादिन्द्रपुरोहितस्ततोऽस्याः ॥ ६५ ॥

नियतां कनकारविन्दपूजां दिविजैः कर्तुमना हरिः सरोजैः ।
पवनं प्रजिघाय देवदूतं स्वयमस्मादथ शूलपुष्करिण्याम् ॥ ६६ ॥

---

* 'शिल्पम्' इति खपुस्तके पाठः.

कृतनित्यविधौ विलम्बमाने शिवमभ्यर्चयितुं क्षणं सुरेशे ।
कमलैरुदभावि जातरूपैः कमलिन्यामतिसौरभैरमुष्याम् ॥ ६७ ॥

स्वयमाहरदर्चनाय शम्भोः सुरभीण्यम्बुरुहाणि काञ्चनानि ।
कनकाम्बुजिनीति नाम तस्याः कलयन् विस्मित एष सस्मितश्च ॥ ६८ ॥

क्व नु काञ्चनता क्व सौरभं तद् दिवि सङ्कल्पभवेषु पङ्कजेषु ।
प्रभवत्यखिलं हि निर्जराणां ध्रुवमाध्यासिकतत्तदर्थवन्नः ॥ ६९ ॥

सलिलैरतिपावनैस्तदीयैः कमलैरप्यतिसौरभैर्महेन्द्रः ।
परिपूज्य शिवौ गुरूक्तरीत्या प्रणिपातैः परितोषयाम्बभूव ॥ ७० ॥

अपि गद्गदया प्रमोदबाष्पैरपि सारोज्झितयातिसम्भ्रमेण ।
पितरौ प्रियकप्रियौ सुरेशः स गिरानर्च वचःपथव्यतीतौ ॥ ७१ ॥

भुवि सुन्दरमास्पदं तवैतच्छिवलिङ्गं तु ततोऽपि सुन्दरं ते ।
अपि सुन्दरमेव सुन्दराणामभिधानं वचनामृतं त्वदीयम् ॥ ७२ ॥

समसेविषि मन्दरे हिमाद्रौ कलधौताचलकन्दरेऽपि च त्वाम् ।
विदितन्तु परं न विश्वपारं[1] किमु तत्रैवमसीति कापि शङ्का ॥ ७३ ॥

न मखैर्न जपैर्न होमदानैर्न तपोभिर्विविधैश्च लभ्यते यत् ।
तदिदं तव सन्निधानभाग्यं तरुभिः कैरपि भुज्यते निरीहैः ॥ ७४ ॥

निहता दनुजा जिता त्रिलोकी त्रिदिवे चाधिकृतं ततः किमासीत् ।
इह ये मृगपक्षिणो न हीमानपि नीराज्य विमोक्तुमर्हता मे ॥ ७५ ॥

अपवृज्य किमीश! साधयेयं भवदानन्दमवाप्नुयां तदाहम् ।
किमितोऽप्यधिकः स यो ममासावुचितः स्वाम्युपलम्भजः प्रमोदः ॥ ७६ ॥

जडमेव जगत् तव स्वमासीदजडाः केचन मादृशोऽपि जीवाः ।
अतिवाङ्मनसं भवन्तमेव प्रतिपन्नास्तु वयं प्रशासितारम् ॥ ७७ ॥

वचनावसरो न लभ्यते नस्त्वयि मीनाक्षि! शिवाविनाकृतायाम् ।
इति देवि! पृथक् कृतासि किञ्चित् तमिमं मा कुरु मानसेऽपराधम् ॥ ७८ ॥

गिरिराजकुमारिकामपि स्वं विपिनेष्वद्रिषु चानुवर्त्तमानाम् ।
भवतीं प्रियकप्रियेऽनुरोद्धुं स्वयमध्यास्त शिवः कदम्बमूलम् ॥ ७९ ॥

१, विश्वपारं सर्वोत्तीर्णं स्थानं मुक्तैकगम्यं कैलासाख्यमित्यर्थः.

जगतो जगदीश्वरस्य च श्रीर्भवती यद्यपि सर्वतोऽस्ति पूर्णा ।
करुणामयमुत्सहे न हातुं तव मीनाक्षि ! तथापि रूपमेतत् ॥ ८० ॥

हरयस्त इमे महावनेऽस्मिन्नयमिन्द्रद्रुरसावपीन्द्रवल्ली[1] ।
मम नामजुषः स्थिता यदेते मम सेवेयमिति प्रतीच्छ मातः ! ॥ ८१ ॥

कति सन्तु न वेधसः कतीन्द्रास्तव मीनाक्षि ! तरङ्गितैरपाङ्गैः ।
किमधश्च्यवते मया विना द्यौः कृपणं मां घटयस्व किङ्करेषु ॥ ८२ ॥

व्यगलद् दनुजेषु मत्सरो मे विरराम त्रिदिवोपभोगरागः ।
स्थगिता बहिरेव वृत्रहत्या भवतोरद्य मयि प्रसादलेशात् ॥ ८३ ॥

इति तं प्रणिपत्य संस्तुवन्तं प्रथमं भक्तिमतां पतिं सुराणाम् ।
अनुगृह्य दयोर्मिलैरपाङ्गैरगदिष्टामिदमादिमौ युवानौ ॥ ८४ ॥

आद्यस्त्वमेषामसि पार्षदानां कुमारयोश्चास्यनयोस्तृतीयः ।
जानीवहे ते परमां च भक्तिं विद्राविता सा तव वृत्रहत्या ॥ ८५ ॥

वासन्तिकप्रथमपर्वसु वासव ! त्वमित्थं समेत्य सकलैरनुयायिवर्गैः ।
आविश्वपारनगराभिमुखात् प्रयाणादभ्यर्च नौ कनकवारिरुहैरमीभिः ॥ ८६ ॥

इत्युक्ते सति जगदादिदम्पतिभ्या-
मिन्द्रस्तद्गुरुरितरेऽनुयायिनश्च ।
प्रस्थानप्रणतिपरम्पराभिरेता-
वन्योन्याभ्यधिकदयामयौ वितेनुः ॥ ८७ ॥

आमन्त्र्य द्विरदेन्द्रवक्त्रमसकृत् सम्प्रार्थ्य नन्दीश्वरं
सम्मान्य प्रमथान् निवेद्य सकलं चण्डेश्वरं शाम्भवम् ।
आशीर्भिः प्रतिनन्दितो मुनिगणैरापृच्छ्य वाचस्पतिं
दिव्येन द्विरदेन निर्मलतरो देवः प्रतस्थे पुरीम् ॥ ८८ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते

शिवलीलार्णवे तृतीयः सर्गः ।

---

१. इन्द्रद्रुः गुन्गुलुवृक्षः.

अथ चतुर्थः सर्गः ।

निवृत्ते वासवे तस्मिन् निवृत्ते चान्तरे मनोः ।
ईन्दाञ्चकार कोऽप्यन्यो वृन्दारकनिकेतने ॥ १॥

अभ्रमातङ्गमारुह्य विभ्रमादमरेश्वरः ।
संवृतः सकलैर्देवैर्निर्जगाम पुराद् बहिः ॥ २ ॥

सर्वासामपि सिद्धीनां दुर्वासा निधिरद्भुतः ।
समगच्छत तेनाग्रे स हि गच्छन् यदृच्छया ॥ ३ ॥
परिपालयितुं रौद्रीं प्रतिसर्गाधिकारिताम् ।
तस्य न ज्वलति क्रोधो यस्यैका जगदाहुतिः ॥ ४ ॥
अग्न्यगारगते तस्मिन्ननाहूतागताः स्वयम् ।
सन्दर्शयन्ति स्वात्मानं देवा आवाहनक्षणे ॥ ५ ॥
नानुगच्छति तस्याग्निर्न विष्यन्दयते हविः ।
नापक्षयति सन्त्रस्तो न निर्मन्थे विळम्बते ॥ ६ ॥
अतप्ततपनाकारमज्वलज्ज्वलनोपमम् ।
दृष्ट्वैव तं मुनिं देवास्तत्रमुस्तत्र सुस्थिताः ॥ ७ ॥
पाणिभ्यामप्रमत्तोऽसौ प्रसादं पद्ममैश्वरम् ।
गजस्कन्धगतायापि ददौ राजेति वज्रिणे ॥ ८ ॥
अनादृत्य स तं मोहान्निदधे मूर्ध्नि दन्तिनः ।
शुण्डया सोऽप्युपादाय निष्पिपेष निसर्गतः ॥ ९
आभुज्य स भ्रुवौ किञ्चिदावर्त्य कपिले दृशौ ।
प्रजज्वालेव कोपेन मुनिः प्रस्फुरिताधरः ॥ १० ॥
पस्पन्दे न सहस्रांशुस्तस्तम्भे मारुतस्तदा ।
चकम्पे सार्णवा पृथ्वी विव्यथे केवलं नभः ॥ ११ ॥
स हस्तिहस्तिपकयोः शापं घोरमवासृजत् ।
वज्रं वज्रिणि दुर्वारमङ्कुशं च निरङ्कुशे ॥ १२ ॥
मौलिं भेत्स्यति पाण्ड्योऽस्य मदान्धस्य दिवस्पतेः ।
सञ्चरत्ववनावेष कुञ्जरः क्षुद्रदन्तिवत् ॥ १३ ॥

---

१. इन्दाञ्चकार इन्द्रत्वं प्रापेत्यर्थः । इदि परमैश्वर्ये.

दत्तशापतया किञ्चिद् दग्धेन्धनमिवानलम् ।
प्रशाम्यन्तममुं* देवाः प्रणिपातैरसान्त्वयन् ॥ १४ ॥

सम्भ्रमोद्वेगकार्पण्यस्तम्भप्रणतिसान्त्वनैः ।
प्रसादाभिमुखस्तेषां प्राह माहेश्वरो मुनिः ॥ १५ ॥

पाण्ड्यो भिनत्तु तर्ह्यस्य मौलिं मकुटलक्षणम् ।
सुन्दरेशार्चनान्तश्च शापः स्वर्दन्तिनोऽस्त्विति ॥ १६ ॥

महेन्द्रसविधावासवासनारसिकश्चिरात् ।
महेन्द्र एव शैलेन्द्रे जन्म लेभे सुराद्विपः ॥ १७ ॥

आमूलमग्नदन्तः स खेलासु विभिदे भुवम् ।
धर्तुकाम इव स्कन्धे तामेवोद्धृत्य सार्णवाम् ॥ १८ ॥

मदगन्धेन धावन्ति येषामन्ये मतङ्गजाः ।
कर्णानिलेन ते तस्य कलभस्यापि दुद्रुवुः ॥ १९ ॥

स सिंहान् शुण्डयादाय चिक्षेप तृणपूलवत् ।
पादैरेव महाग्राहान् भेकमर्दं ममर्द च ॥ २० ॥

ग्राहा ग्रसन्ते हर्यक्षा घ्नन्ति गृह्णन्ति मानवाः ।
इत्युच्यमानं कळभैराश्चर्यमिव सोऽ‡शृणोत् ॥ २१ ॥

सरित्सरांसि पीतानि सकृदाकृष्य शुण्डया ।
मदधारापदेशेन मन्ये तस्य प्रसुस्रुवुः ॥ २२ ॥

स मत्तः सञ्चरन् पृथ्वीं चरणैरपचस्करे[1] ।
लघूकरिष्यन्निव तां दिग्गजानुजिघृक्षया ॥ २३ ॥

अजानिव गजानन्यानादायादाय चिक्षिपे ।
स एव पुङ्गजस्तत्र वशास्तस्याभवन् परे ॥ २४ ॥

स खेलन् सागरस्याम्भः क्षिपन् मन्दाकिनीं प्रति ।
दयया चिरविश्लिष्टौ दम्पती तावयोजयत् ॥ २५ ॥

---

१. अपचस्करे आलिलेख.

---

* 'मुनिं' इति खपुस्तके पाठः. ‡ 'करोत्' इति खपुस्तके पाठः.

पश्यन् मध्यमलोकस्य रामणीयकमद्भुतम् ।
पांसुभिः स करोद्धूतैश्चकारेव दिवं भुवम् ॥ २६ ॥

विद्रवद्भिर्वने* तस्मिन् व्याधव्याघ्रमृगाधिपैः ।
मृगाणां रक्षणादासीन्मृगेन्द्रः सोऽद्भुतः क्षितौ ॥ २७ ॥

महेन्द्रादेष मलयं मलयादपि दर्दरम् ।
सञ्चरन् जातुचित् प्राप कुञ्जरो नीपकाननम् ॥ २८ ॥

मदगन्धाशया प्राप्तैर्मधुपैर्विपिनात् ततः ।
सम्प्रदर्शितवर्त्मेव स ययौ हेमपद्मिनीम् ॥ २९ ॥

गणेशमदनिष्यन्दगन्धसर्वस्ववेदिनः ।
उपेक्षां भ्रमराश्चक्रुरुन्मदास्तन्मदाम्भसि ॥ ३० ॥

स पतन्नेव सरसि क्षीरोद इव मन्दरः ।
कल्लोलैः प्लावयामास कदम्बविपिनान्तरम् ॥ ३१ ॥

मालिनो निर्ममज्जास्मिन्नुन्ममज्जाथ निर्मलः ।
प्रागभूत् केवलो भौमः सार्वभौमोऽथ दन्तिनाम् ॥ ३२ ॥

उत्तीर्य बहिरन्तश्च नीरजा नीरजाकरात् ।
अतीयाय स तं शापमधीयाय[1] मुनेर्गिरः ॥ ३३ ॥

गाङ्गेयैः शैवगाङ्गेयैः[2] कमलैः कमलास्पदैः ।
एकदन्तं चतुर्दन्तः सिन्धुरं सिन्धुरोऽर्चयत् ॥ ३४ ॥

पुष्करैरभिषिच्येशौ पुष्करोपहृतैरयम्[3] ।
पुष्करैरेव चानर्च पुष्करं गाहितुं पुनः ॥ ३५ ॥

सितं हि काञ्चनं पुष्पं शिवस्यैवाभवन्मुदे ।
पिशङ्गं तु तदानीतं प्रीतये शिवयोरभूत् ॥ ३६ ॥

मुक्तशापो गजः पृथ्वीं मुदा यदपचस्करे ।
गजतीर्थमिति ख्यातं तद् बभूव महत् सरः ॥ ३७ ॥

---

१. अधीयाय सस्मार. २. शैवगाङ्गेयैः शिवगङ्गासम्बन्धिभिः. ३. चतुर्णां पुष्करपदानां जलशुण्डापद्मव्योमानि क्रमेणार्थाः. ४. उन्मत्ताख्यम्.

---

* 'वनादस्माद्' इति खपुस्तके पाठः.

ऐरावतेश्वरं लिङ्गमैरावतविनायकम् ।
स तीरे सरसस्तस्य स्थापयित्वाभ्यपूजयत् ॥ ३८ ॥

पुरन्दरेश्वरं नाम पूर्वतः सुन्दरेशितुः ।
स्वामिनामाङ्कितं लिङ्गं स्थापयामास चापरम् ॥ ३९ ॥

प्रहितः सुन्दरेशेन स हि तत्र चिरं वसन् ।
पुनर्जगाम स्वं धाम पुरुहूतेन चादृतः ॥ ४० ॥

कदम्बविपिनात् प्राचि कल्याणनगरे ततः ।
कालेन महता जज्ञे कश्चिद्वैश्यो धनञ्जयः ॥ ४१ ॥

अस्त्राय गत्वा देवेन कृतयुद्धं गतस्पृहः ।
कौरव्यमत्यशेतायमूरव्यस्तु धनञ्जयः ॥ ४२ ॥

तस्य भूमिस्पृशो भक्तिं तरुणेन्दुशिखामणौ ।
भक्तिरागन्तुकान्येषां कथं वानुकरिष्यति ॥ ४३ ॥

(दैशैकादशिकाः?) प्रायो वणिजश्चतुरा अपि ।
एकं दत्वेह सोऽमुत्र तत्सहस्रमुपार्जयत् ॥ ४४ ॥

परक्षेत्रपरामर्शपरिशङ्की धनञ्जयः ।
नोत्ससर्ज बहिर्जातु स गोषड्गवमात्मनः ॥ ४५ ॥

वृत्तिः सा हि विशां यतु भुवमुल्लिख्य जीवनम् ।
स तु तत् कर्म तत्याज दिवमुल्लिख्य केवलाम् ॥ ४६ ॥

अक्रीणीतैव पुण्यानि व्यक्रीणीत न जात्वपि ।
समयेषूपयोगाय *सर्वमेव जुगोप सः ॥ ४७ ॥

स बहून् विषयान् गत्वा वाणिज्याय धनञ्जयः ।
निवृत्तो नीपकान्तारसमीपं सायमाययौ ॥ ४८ ॥

---

१. कौरव्यं कुरुवंश्यं धनञ्जयमर्जुनापरपर्यायम् . २. भक्तिं भूमिस्पृश इति विशेषणादाजन्मसिद्धां भक्तिमित्यर्थः. ३. 'दशकाः शतिकाः' इति पाठो भवेत् । दशभ्यो वृद्धिरायो लाभो वा दीयते दशका दशवृद्ध्याद्युपार्जका इत्यर्थः । एवं शतिकाः शतवृद्ध्याद्युपार्जकाः । दशशतब्दाभ्यां 'चतुर्थ्यर्थ उपसङ्ख्यानम्' (५-१-४७) इति चतुर्थ्यर्थे कन्ठनौ. ४. गोषड्गवं इन्द्रियषट्कम् अथ च पशुषट्कम् । गोशब्दात् 'षट्त्वे षड्गवच्' ५. उल्लिख्याभिसन्धाय.

---

* 'सङ्गृह्यैव' इति स्वपुस्तके पाठः.

अदृश्यत सहस्रांशुरस्तभूधरमस्तके ।
मन्देहयुद्धलब्धासृक्पङ्कदिग्ध इवारुणः ॥ ४९ ॥

अर्कमस्तं गमिष्यन्तमुपेत्यानुचराः कराः ।
अन्वगन्वगलम्बन्त दुद्रुवुर्ये पुरःपुरः ॥ ५० ॥

निन्दन्तो रजनीं कोका नन्दन्तस्तां चकोरिकाः ।
चञ्चूचञ्चवि[1] सायाह्ने सर्वतः सम्प्रजह्रिरे ॥ ५१ ॥

प्रचुक्रुशुर्द्विजाः केचिदपरे मौनमास्थिताः ।
असङ्खातो द्विजानामित्यासीत् तथ्यं तदा वचः ॥ ५२ ॥

प्रतीच्यां दद्दशे रागः स स्थास्यति कियच्चिरम् ।
प्राच्यां दृष्टचरो ह्येष भास्वतो भ्राम्यतः सदा ॥ ५३ ॥

प्रनष्टे महसां राशौ प्रादुर्भूतं हि तारकैः ।
तमसाभ्यावृते लोके तावद्भिरपि किं कृतम् ॥ ५४ ॥

त एव भानवो भानोस्तारकावपुषा स्थिताः ।
तथाप्येकः स नास्तीति तमांसि विजजृम्भिरे ॥ ५५ ॥

प्रायो जात्यनुरोधाय पद्ममात्रे निमीलति ।
भानुहस्तगतेनापि पङ्कजेन निमीलितम् ॥ ५६ ॥

तथा सान्द्रीभवन्ति स्म तमांसि हरितां मुखे ।
व्याप्नुवन्ति हि तान्येव विहन्यन्ते यथा मिथः ॥ ५७ ॥

शैवलोत्पलभृङ्गाणां सरसीषु निशामुखे ।
स्पर्शसौरभकूजाभिः स्वं स्वं रूपमबुध्यत ॥ ५८ ॥

निष्पपातेव गगनं निस्ससारेव सागरः ।
आववारेव निश्शेषमविद्या महती तदा ॥ ५९ ॥

अयश्शृङ्खलवत् क्रष्टुमार्हत्तुं तृणपूलवत् ।
आश्यानपङ्कवच्छेत्तुमासीच्छक्यं तदा तमः ॥ ६० ॥

अनिस्तार्येण मनसाप्यनाव्येन* च रंहसा ।
स्रोतसेवान्धकारस्य स निन्ये नीपकाननम् ॥ ६१ ॥

---

१. चञ्चूचञ्चवीति । 'तत्र तेनेदमिति सरूपे' (२-२-२७) इति बहुव्रीहिः.

---

* 'नाति' इति खपुस्तके पाठः.

सोमवारोपवासेन सोऽध्वखेदेन तावता ।
विप्रयोगेण सार्थाच्च विव्यथे केवलं तदा ॥ ६२ ॥

नोन्नतानि न निम्नानि न नम्रा न च पादपाः ।
सर्वमेकमभात् तस्य सान्निध्यादिव शाम्भवात् ॥ ६३ ॥

अश्रौषीदश्रुतचरममृतस्येव निर्झरम् ।
गानमातोद्यसम्भिन्नं गन्धर्वाणामदूरतः ॥ ६४ ॥

स तच्छब्दानुसारेण सम्प्रसर्पञ्छनैः शनैः ।
दयया देवदेवस्य दिव्यं चक्षुरधारयत् ॥ ६५ ॥

स दिव्यलिङ्गमाभितः सन्ददर्श सुरानृषीन् ।
ध्यायतो गायतः सामान्यर्चतश्चाभिषिञ्चतः ॥ ६६ ॥

ननृतुः प्रमथाः क्वापि जगुः सामानि सामगाः ।
ननृतुर्देवसुदृशो जगुरन्यत्र किन्नराः ॥ ६७ ॥

कमलैः कनकाब्जिन्या विमलैरुभयैरपि ।
स सुरैः सार्धमानर्च शर्वाणीचन्द्रशेखरौ ॥ ६८ ॥

प्रभातायां च शर्वर्यां प्रवृत्ते जनचङ्क्रमे ।
स यत्रैक्षिष्ट देवर्षींस्तत्रैक्षिष्ट तरून् मृगान् ॥ ६९ ॥

स तु तेनाद्भुतेनैव निर्वृत्तामृतपारणः ।
व्रताङ्गं पारणां कर्तुं प्राप नेदीयसीं पुरीम् ॥ ७० ॥

द्रमिडान्वयमूर्धन्यो द्वितीय इव वासवः ।
प्रशशास महीं यत्र पार्थिवः कुलशेखरः ॥ ७१ ॥

सङ्गम्य बन्धुभिः सार्धं विश्रम्य च यथासुखम् ।
वृत्तं विज्ञापयामास राज्ञे सर्वं स्वमद्भुतम् ॥ ७२ ॥

स जातु पुरुषं कञ्चिच्चन्द्रचूडजटाधरम् ।
निद्राणोऽन्तर्दृशाद्राक्षीन्नृपतिः कुलशेखरः ॥ ७३ ॥

नन्वस्ति नगरादस्मात् पश्चिमं नीपकाननम् ।
वन्यैर्मृगगणैः सार्धं वसामोऽत्र चिरं वयम् ॥ ७४ ॥

तद्वनं नगरीकृत्य तदेवाधिवसन् स्वयम् ।
कुलमुद्धृत्य वत्स! त्वं कुरु नामेदमर्थवत् ॥ ७५ ॥

इत्युक्त्वान्तर्हिते तस्मिन्निन्दुचूडे दयानिधौ ।
प्रत्यबुध्यत संहृष्टः प्रत्यूषे कुलशेखरः ॥ ७६ ॥

अद्भुतं स्वप्नवृत्तान्तमात्मने च महत्सु च ।
आवेदयन् नृपः प्रातरभ्यनन्दत तैरपि ॥ ७७ ॥

निश्चित्यानुग्रहं शम्भोर्निर्मित्सुर्विपिनं पुरम् ।
सम्प्रतस्थे महीपालः सावरोधः सबान्धवः ॥ ७८ ॥

प्रस्थितस्याग्रतो वामं प्रवृत्तस्तस्य खञ्जनः ।
कटाक्ष इव मीनाक्ष्याः कलयन् भावि मङ्गळम् ॥ ७९ ॥

स कदम्बवनं प्राप्य सन्ददर्श महाद्भुतम् ।
हैमप्राकारसम्बाधमैन्द्रं धाम महेशितुः ॥ ८० ॥

स दृष्ट्वा साम्बमीशानं सम्प्रार्थ्य च गणाधिपम् ।
न्ययुङ्क्त शिल्पिनो दक्षान्निर्मित्सुर्नगरं नृपः ॥ ८१ ॥

सर्वे ते विश्वकर्माणः सर्वे कुशलतामयाः ।
समेत्य मन्त्रयाञ्चक्रुः शिल्पिनः पुरकर्माणि ॥ ८२ ॥

स्वस्तिकं सर्वतोभद्रं मण्डलं दीर्घवृत्तकम् ।
निर्मित्समाना नगरं ते विप्रावादिषुर्मिथः ॥ ८३ ॥

शिल्पिष्वेक इवागत्य सिद्धः स्वप्नेक्षितः पुरः ।
इतिकर्त्तव्यतां तेषामुपादिक्षत् प्रभोः पुरः ॥ ८४ ॥

स्वप्नदर्शनसंवादि तद्रूपं तस्य चिन्तयन् ।
यावद् ददर्श नृपतिस्तावदन्तरधत्त सः ॥ ८५ ॥

पश्यन्ननुग्रहं शम्भोः स्वप्नजागरयोः समम् ।
उत्सेहे स तु भूयोऽपि पार्थिवः पुरकर्माणि ॥ ८६ ॥

अपि तद्विपिनं सान्द्रमज्ञातालोकसङ्कथम् ।
शासनात् पाण्ड्यनृपतेर्जातं जाङ्गलवत्[1] क्षणात् ॥ ८७ ॥

तपनेन्दुकरालीढे तस्मिन् दिष्ट्या वनोदरे ।
ब्रह्मचर्यं जहुश्चक्रा दुर्भिक्षं* च चकोरिकाः ॥ ८८ ॥

---

१. जाङ्गलवत् तरुशून्यप्रदेशवत्.

---

* 'क्षत्वं' इति खपुस्तके पाठः.

चरन्तो जन्तवो यत्र जाता वनचराः पुरा।
तदेवासीद् [1]वनचरं तत्क्षणं तस्य शासनात् ॥ ८९ ॥

[2]षण्णामप्यध्वनामन्ते शाश्वतं पदमैश्वरम्।
इति श्रुत्वैव सिद्धान्तम[3]ध्वान्तं तदयं व्यधात् ॥ ९० ॥

अप्यान्तरतमो †हर्तुर्बाह्ये तमसि का क्षमा।
लाभोऽयं यच्छिवादारादियन्तं कालमास्त तत् ॥ ९१ ॥

घातंघातमिह व्याघ्रान् ग्राहंग्राहं शुभास्त्वचः।
अहरन् वस्त्रदुर्भिक्षं किङ्कारास्तस्य शाङ्करम् ॥ ९२ ॥

संवर्त्ते तत्र सत्त्वानां समगृह्यन्त कुञ्जराः।
सर्व एव शुभः कालः स्वरूपं यदि सुन्दरम् ॥ ९३ ॥

सालमभ्रङ्कषं चक्रुः सालं छित्वा सहस्रशः।
किं साध्यं बहुभिः क्षुद्रैर्वरमेको महोच्छ्रितः ॥ ९४ ॥

वप्रक्रियासु निर्मग्नैर्दन्तैरमरदन्तिनाम्।
शृङ्गेषु तस्य सालस्य गवाक्षा विप्रतेनिरे ॥ ९५ ॥

परिखां खनतस्तत्र प्रविष्टानारसातलम्।
के यूयं सगराणामित्यन्वयुङ्क्त पन्नगाः ॥ ९६ ॥

परिखारन्ध्रतस्तत्र पाताळाज्जाह्नवीजलम्।
जलयन्त्रादिवोत्तस्थौ भूम्यन्तं भूतलाद्युतम् ॥ ९७ ॥

भगिनीं भगिनीशं च द्रष्टुं प्राकारकैतवात्।
उन्मज्जेव मैनाकः परिखासागरात् ततः ॥ ९८ ॥

राजसिंहैर्नरव्याघ्रैः पूरितं भटकुञ्जरैः।
पुरं यथापुरं जज्ञे का तस्यान्योपमा भवेत् ॥ ९९ ॥

छिन्दद्भिस्तद्वनं तत्र शेषितं यत् क्वचित् क्वचित्।
तान्येव तस्योद्यानानि सर्वतः प्रचकाशिरे ॥ १०० ॥

---

१. वनचरम् अरण्यचारि अथ च वनभूतपूर्वम्. २. तत्त्व-भुवन-मन्त्र-वर्ण-कलारूपाणां षण्णाम्. ३. अध्वान्तम् अध्वनामन्तम् अथ च ध्वान्तशून्यम्.

† 'हर्तुं' इति कपुस्तके पाठः.

वीथिका उत्सवार्था या विहिता विश्वकर्मणा ।
चतुर्णामपि वर्णानां ता एवासन् पृथक्पृथक् ॥ १०१ ॥

पाण्डरैर्भवनैः पूर्णे प्राकारे धाम शाम्भवम् ।
मध्येमौक्तिकताटङ्कं रेजे रत्नमिवार्पिताम् ॥ १०२ ॥

दिशि चोत्तरपूर्वस्यां देवदेवस्य मन्दिरात् ।
निर्मलं भवनं राज्ञो निर्ममुस्तस्य शिल्पिनः ॥ १०३ ॥

प्रासादः शुशुभे तत्र भवने धरणीपतेः ।
भक्त्या महेशितुर्वृद्धः प्रसाद इव निर्मलः ॥ १०४ ॥

दिव्यैः सुधामयैर्मेघैर्देवो जीमूतवाहनः ।
नगरं सेचयामास नवीनं त्रीण्यहानि सः ॥ १०५ ॥

मधुरोदकसंसिक्तां मधुरेयं महापुरी ।
इत्यश्रूयत तत्रत्यैर्दिव्या वागशरीरिणी ॥ १०६ ॥

दुर्गागणेशवटुकेश्वरमातृवर्गै-
रध्यासितां सुविहितेषु निजास्पदेषु ।
सद्यः प्रवर्त्तितमहेशमहोत्सवान्तें
पाण्ड्यो विवेश नगरीं मधुरां प्रहृष्टः ॥ १०७ ॥

अर्थैरर्थिजनाञ्छ्रुतैः श्रुतवतः सम्माननैर्बान्धवान्
सेवाभिर्महतो निसर्गकरुणावत्या स भृत्यान् दृशा ।
आत्मानात्मविवेकतो गिरिशमप्याराधयन् मेदिनीं
भूपालः कुलशेखरोऽत्र बुभुजे सप्तार्णवीवेष्टिताम् ॥ १०८ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते

शिवलीलार्णवे चतुर्थः सर्गः ।

अथ पञ्चमः सर्गः ।

स इत्थमाराधितचन्द्रशेखरप्रसादसम्पत्परिपाकसम्भृतम् ।
कुलावतंसं कुलशेखरो नृपश्चिराय लेभे मलयध्वजं सुतम् ॥ १ ॥

स पांसुकेलीष्वपि शङ्करालयान् प्रकल्पयन् ब्रह्मपुरीश्च सर्वतः ।
प्रपञ्चमातामहतापदोचितं नरेन्द्रसूनुर्व्यहरन्महायशाः ॥ २ ॥

अथोपनीतोऽधिजगे नृपात्मजस्त्रयीं मुनेः कुम्भभवात् पुरोधसः ।
समं महास्त्रैर्धनुरागमं पितुः स्वतश्च भक्तिं शिवयोरचञ्चलाम् ॥ ३ ॥

अशेषविद्यानिधिमात्तयौवनं कुमारमेनं कुलशेखरो नृपः ।
युयोज दारक्रियया कुलार्हया श्रियेव धर्मं क्षमयेव विक्रमम् ॥ ४ ॥

नृपस्य काञ्चीपुरनेतुरात्मजा महाशया काञ्चनमालिकाभिधा ।
नरेन्द्रसूनोर्गृहिणीषु वल्लभा बभूव तारास्विव रोहणी विधोः ॥ ५ ॥

पुरा हि विश्वावसुनामशालिनो बभूव गन्धर्वपतेरियं सुता ।
प्रसाद्य गौरीं जगदेकमातरं ममैधि कन्येत्यवृणीत या वरम् ॥ ६ ॥

सुशीलतां सुन्दरतामिवोज्ज्वलां दयार्द्रतां भृत्यजनेषु ते इव ।
दधे पुनस्ता इव भक्तिमीश्वरे मनस्विनी काञ्चनमालिका तदा ॥ ७ ॥

सुतानिव स्वान् परिपुष्णती जनान् सभाजयन्ती श्वशुरौ शिवाविव ।
पतिं तु पूर्वेद्युरिवापरेद्युरप्युपाचरद् दैवतजीविताधिकम् ॥ ८ ॥

पतिव्रता धर्मपथप्रवर्त्तिका सती च भर्तुर्वपुरर्धमेव सा ।
शरीरमात्मा हृदयं च जीवितं दृशौ च जज्ञे दयितस्य सा पुनः ॥ ९ ॥

महत्सु कार्येष्वमहत्सु वा ययोः कदापि वैमत्यकथापि नाभवत् ।
अभूत् तयोरेव मिथोऽनुरागिणोरनङ्गमूलः कलहः स केवलम् ॥ १० ॥

स युक्तदाम्पत्यसुनिर्वृतं सुतं स्वतो विनीतं गुरुभिश्च सर्वतः ।
त्रिलोकरक्षाक्षमबाहुविक्रमं जनेश्वरः प्रेक्ष्य चिराय निर्ववौ ॥ ११ ॥

धृतां चिराय त्रिजगद्धुरंन्धरे धुरं धरायास्तनयेऽवरोपयन् ।
स्वतः स्थितं धर्मपथेऽपि तं पुनः शशास धर्मं सुतवत्सलो नृपः ॥ १२ ॥

---

† 'महाशयः' इति खपुस्तके पाठः.

महत् कुलं नस्त्वमवैषि विश्रुतं महेशचूडामणिसम्भवं शुचि ।
अनक्षजिह्मिर्मनसापि दुर्भरामवैषि वत्स! त्वमिमामपि क्षमाम् ॥ १३ ॥

नवोढयापि प्रकृतिप्रगल्भया श्रियैव तावत् प्रथमं विमोहिताः ।
न जानते किञ्चिदसाधु साधु वा निसर्गतस्तात! नृपालसूनवः ॥ १४ ॥

प्रसज्जयन्ति प्रथमं विमार्गगांस्ततः क्रमेण स्तुवते च तान् पुनः ।
प्रवर्त्तयन्त्यप्यपथे शनैः प्रभुं खलाः स्वकार्यैकपराः समीपगाः ॥ १५ ॥

उपक्षिपन्तश्चकिता इवादितो निषिध्यमाना इव कैश्चिदन्तरा ।
सुखेन दोषं द्रढयन्ति साधुषु स्तुवन्त एव स्वगिरा दुराशयाः ॥ १६ ॥

परं कृतज्ञा इव पण्डिता इव प्रभोर्हितैकप्रवणा इव स्वतः ।
जगत्तटस्था इव राज्ञि बालिशे जनाः स्वमर्थं घटयन्त्यसाधवः ॥ १७ ॥

स्तुवन्त्यमित्रान् सुहृदं प्रतिक्षिपन्त्यवेक्षितुं भर्त्तुरगाधमाशयम् ।
बहून् विवादानिव कुर्वते मिथो न जातु भिन्दन्ति रहस्स्थितिं खलाः ॥ १८ ॥

इदं ह्युपादेयमिदं तु हेयमित्युभे विविञ्चन् निजयैव मेधया ।
खलान् निगृह्णीष्व तदुक्तिवागुरागृहीतवन्मुग्धवदाचरन् बहिः ॥ १९ ॥

जना जिहासन्ति नृपालमूष्मलं तिरश्चिकीर्षन्ति मृदुन्निसर्गतः ।
अतोऽप्रमत्तस्त्वमनुष्णशीतलो भव प्रजानां शरदीव भास्करः ॥ २० ॥

अलोलुभानात्मविदो जितस्मयान् परीक्षितांश्च व्यसनेषु भूयसा ।
महाकुलीनान् महतो बहुश्रुतान् गृहाण मन्त्रेष्वखिलेषु मन्त्रिणः ॥ २१ ॥

प्रसादकोपैर्भवति क्षमापतेरतिप्रवृत्तैरधरोत्तरं जगत् ।
अतः प्रवर्त्तस्व जनेष्वतन्द्रितो विचारधाराविशदेन चेतसा ॥ २२ ॥

बहुश्रुतो न त्वमिवापरोऽधुना न दीर्घदर्शी न च मन्त्रयोगवित् ।
प्रशासनीयस्तदपि स्वयं भवान् प्रशासितारस्तव सन्तु मन्त्रिणः ॥ २३ ॥

अजातशत्रोरखिलार्थवेदिनः प्रजानुरागैकपदस्य धीमतः ।
तव प्रकृत्या गुरुवृद्धसेविनो मयोपदेश्य किमिवात्र वर्त्तते ॥ २४ ॥

तथापि किञ्चिद् दिगियं प्रदर्शिता श्रुता बहुभ्यो बहुधार्चया मया ।
परस्तु भावो मम तात! वर्त्तते कुरुष्व तं चेतसि मा स्म विस्मरः ॥ २५ ॥

निजावतंसप्रसवोद्भवे कुले न्यधायि लक्ष्मीरियतीयमीदृशी ।
महेश्वरेणेति विदन्न जातुचिद् ममत्वमस्यां कुरु राज्यसम्पदि ॥ २६ ॥

यजाम देवान् जुहवाम पावके ददाम विप्रेष्वपि वा कथं कथम् ।
शिवस्वमादाय भुवीति चिन्तयन् शिवं समाराधय सर्वकर्मभिः ॥ २७ ॥

शिवं यजाग्नौ शिवमर्च भास्करे शिवं स्मरान्तः शिवमेव कीर्तय ।
शिवं द्विजेषु प्रतिपूजयानिशं शिवैकनिष्ठो भव तात! सर्वथा ॥ २८ ॥

शिवात् परं नास्ति यथा तथैव नः शिवोऽपि नान्यो मधुरेश्वरादिति ।
सुनिश्चितालम्बितसुन्दरेश्वरः सुखं महीं पालय शाश्वतीः समाः ॥ २९ ॥

इति क्षितीशः प्रतिबोधयन् सुतं प्रयुज्य चास्मिन् प्रणते जयाशिषः ।
समाः सहस्राणि षडात्मना धृतां धुरं स गुर्वीमवतार्य निर्ववौ ॥ ३० ॥

ततः स योगेन तनुं प्रजेश्वरो विसृज्य नाड्या किल मूर्धलग्नया ।
अतीत्य मायाभुवनानि सर्वतो जगाम शुद्धेऽध्वनि धाम शाश्वतम् ॥ ३१ ॥

उदक्रमीदेष यदा तदा प्रभृत्युपेत्य विज्ञानकलाग्रगण्यताम् ।
अभूत् सहायः करणीयपञ्चकेऽप्यनन्तरुद्रस्य धिया विशुद्धया ॥ ३२ ॥

विदन्ननित्यं जगदेव जन्मवद् विदन्नपि श्लाघ्यतरां गतिं पितुः ।
मनोऽभितप्तं मलयध्वजो नृपः शशाक न स्थापयितुं वशे वशी ॥ ३३ ॥

कथञ्चिदालम्ब्य निजां स धीरतां गुरोरशेषा निरवर्तयन् क्रियाः ।
तथाविधानां तनयाश्चरन्ति यत् तदर्हणं केवलमात्मभूतये ॥ ३४ ॥

पुरोधसा सिन्धुपिवेन योगिना स मन्त्रिवृद्धैः सखिभिश्च बन्धुभिः ।
शुभे मुहूर्ते धुरि सुन्दरेशितुः सितेन फाले भसितेन लाञ्छितः ॥ ३५ ॥

स्वतश्च्युतं लिङ्गशिरस्पदात् सुमं पुरः स्फुलिङ्गानपि दीपनिस्सृतान् ।
प्रशस्यमानं शकुनं महर्षिभिः प्रणम्य मूर्ध्ना जगृहे महीपतिः ॥ ३६ ॥

प्रदक्षिणीकृत्य पुरं पुरन्ध्रिभिः प्रवर्तितारात्रिकमङ्गलो नृपः ।
प्रविश्य राज्ञो भवनं परिष्कृतं द्विजान् प्रभूतैर्द्रविणैरतोषयत् ॥ ३७ ॥

सुभद्रपीठे सचिवैर्निवेशितः सभाजयामास नृपोऽनुजीविनः ।
यथोचितं वाहनभूषणाम्बरैः कटाक्षमन्दस्मितभाषितैरपि ॥ ३८ ॥

भुवं भुजे भूतदयां हृदन्तरे *कथां पुरारेरपि कर्णयोर्द्वयोः ।
अधत्त भूयामनपायिनीमसौ परान्तु सोऽधत्त पुनर्न्यधत्त च ॥ ३९ ॥

---

* 'कथाः' इति स्वपुस्तके पाठः.

यशःप्रतापैर्हरितोऽस्य भूषिताः कुलं त्वनेनैव विभूषितं विभोः ।
अयं तु धृत्या दयया च भूषितः शिवे तु भक्त्या सकलं विभूषितम् ॥ ४० ॥

यशोभिरस्यावदद्विसृत्वरैरपि द्विरेफद्विपकाककोकिलाः ।
स्वतोऽवदातानि तु पूर्वभूभृतां यशांसि सद्यो मलिनानि जज्ञिरे ॥ ४१ ॥

तदीयविश्राणनपोषितद्विजप्रवर्त्यमानाध्वरहव्यभोजिभिः ।
सुधाशवर्गैः परिपोषिताः कथं सुरद्रुमा बिभ्रति तेन तुल्यताम् ॥ ४२ ॥

तदीयदानोदकपूरितोऽर्णवस्ततो निपीयाम्बु दिशन्ति वारिदाः ।
तदम्बुपुष्टौषधिवल्लभः शशीत्यदःप्रसादादखिलस्य दातृता ॥ ४३ ॥

समृद्धिमद्भिर्धरया समृद्धया द्विजातिभिस्तद्विषये निवासिभिः ।
धृता कथञ्चित् तदनुग्रहेच्छया तदीयदानेष्वपि सम्प्रदानता ॥ ४४ ॥

न कोऽपि तस्यातिचचार राष्ट्रगः स यत्र दण्डं विनिपातयेन्नृपः ।
नचापि दण्ड्यः स्वयमात्मनोऽभवन्निवृत्तिशीलैः करणैर्निसर्गतः ॥ ४५ ॥

विनेतरि स्वामिनि वीतकल्मषे विनिग्रियरे तद्विषये प्रजाः स्वतः ।
तपोधने द्वन्द्वजयिन्यवस्थिते तदाश्रमस्था इव हिंस्रजन्तवः ॥ ४६ ॥

विचक्षणेऽस्मिन् व्यसनान्यपोहितुं तटस्थवृत्तौ सरले हितैषिणि ।
अपि प्रजाः स्वान् कलहान् गृहेगृहे निचिक्षिपुर्न्यासमिवाविशङ्किताः ॥ ४७ ॥

अकृष्टपच्यैः कलमैरलंकृता न वृष्टिमप्यस्य चकाङ्क्ष मेदिनी ।
स्मरन् हविः स्वीक्रियमाणमध्वरे ववर्ष कालेषु तथापि वासवः ॥ ४८ ॥

अनिच्छतान्तःकरणेन निर्गमं विना शिवाराधनमन्यकर्मसु ।
स्वराज्यतन्त्रं सकलं च केवलैश्चकार बाह्यैः करणैर्महीपतिः ॥ ४९ ॥

धरा समस्ता द्विजदेवसात्कृता दिवं द्विषभ्योऽपि ददौ सहस्रशः ।
अपि स्वमात्मानमदत्त शम्भवे किमप्यदेयं ददृशेऽस्य न प्रभोः ॥ ५० ॥

अनुस्मरन्नक्षरमक्षरं गुरोः स पार्थिवेन्द्रश्चरमौपदेशिकम् ।
अवाललम्बे भृशमम्बिकापतेः पदं समस्तामरसम्पदां पदम् ॥ ५१ ॥

तपांसि तेपे युयुजे मनो दृढं ददावियाजाधिजगे जुहाव च ।
नृपो निशश्वास मिमेष चान्ततः शिवं यजामीति धियैव नान्यथा ॥ ५२ ॥

• अवदद्भः अवदाता बभूवुः.

प्रपञ्चसर्गस्थितिभङ्गहेतुतापरम्पराविश्रमभूमिमादिमाम् ।
हरीन्द्रवेधोहरमातरं शिवां विशिष्य वव्रे शरणं जनेश्वरः ॥ ५३ ॥

मृगाङ्कचूडामणिमीनलोचनं दयामयं दर्शितसुन्दरस्मितम् ।
उदारभूषाशतमुत्पलाङ्कितं वपुस्तदेवास्य मनस्यवर्त्तत ॥ ५४ ॥

जगत् समस्तं स जडाजडात्मकं ददर्श देवो निमिषान्निमिषन्नपि ।
उपात्तनीलोत्पलमुन्नतस्तनं हसन्मुखं हारकिरीटभूषितम् ॥ ५५ ॥

निमेषनिश्वासवदप्रयत्नतः स राज्यतन्त्रं सकलं च वर्त्तयन् ।
बभूव वाचा मनसापि कर्मणा शिवैकसंस्थो मलयध्वजो नृपः ॥ ५६ ॥

अदृश्यमश्राव्यमचिन्त्यमद्भुतं निरञ्जनं नित्यमनुश्रवाश्रवम् ।
अहंग्रहेणान्तरचिन्तयन्नृपः पराकृतद्वैतकथं परं महः ॥ ५७ ॥

परस्परेणानुपमर्दितं भजन् त्रिवर्गमित्थं समयं विभज्य सः ।
कदाचिदन्तःपुरमास्थितो नृपः प्रचक्रमे काञ्चनमालया कथाम् ॥ ५८ ॥

कुलं किलैतद् विपुलं सुधानिधेः प्रसक्तविच्छेदमिवान्तरा मया ।
अतः कथं स्याच्छिवदाससन्ततेरभङ्ग इत्यस्ति सचिन्तता मम ॥ ५९ ॥

न नः कुलेऽस्मिन् शिवदीक्षयामले सुतान्निवापः पितृभिर्जिवृक्षितः ।
महन्महेशानुचरार्पणव्रतं तथापि मा लोपि मयेति चिन्त्यते ॥ ६० ॥

इदं हि मर्त्यामृतमित्युदीरितं प्रजायते यन्मनुजः प्रजामनु ।
अतः प्रसाध्यैव किलापरामृतं परामृतायोपनमेदिति श्रुतिः[1] ॥ ६१ ॥

शिवार्पिताशेषभरा निराशिषः शिवार्चनामात्रपराधिकारिणः ।
कथं नु याचेमहि लोकमातरं कथं न याचेमहि वा कुलक्षये ॥ ६२ ॥

इति स्वतोऽनध्यवसायमुद्रितं पतिं विषीदन्तमियं पतिव्रता ।
जगाद वाक्यैर्हृदयानुरञ्जिभिर्जगत्तपस्यापरिपाकजन्मभिः ॥ ६३ ॥

भवान् प्रमाणं विशये विपश्चितां भवन्तमस्मिन्ननुशास्तु कोऽपरः ।
विवेक्तुमत्रार्हति मीनलोचना तथाविधः कोऽप्यथ वा तदाश्रितः ॥ ६४ ॥

अनावृतज्योतिषि तेजसां निधावनागतातीतभवद्विवेचिनि ।
तदत्र तिष्ठेमहि कुम्भसम्भवे स खल्विहामुत्र च नः प्रशासिता ॥ ६५ ॥

---

१. 'प्रजामनु प्रजायते, तदु ते मर्त्यामृतम्' यजुः. २. 'प्रकाशनस्थेयाख्ययोश्च' (१-३-२३) इति स्थेयाख्यायां तङ्.

इति प्रियाया हृदयङ्गमं वचा निपीय देवो निभृतेन चेतसा ।
जगाम सद्यः शरणं पुरोधसं स च स्मृतः सन्निदधे तपोधनः ॥ ६६ ॥

तमर्घ्यपाद्यादिकया सपर्यया सभाजयन्तौ प्रणिपत्य तावुभौ ।
निवेश्य पीठे नवरत्ननिर्मिते निषेदतुस्तत्सविधे तदाज्ञया ॥ ६७ ॥

कृताञ्जलिं पार्थिवमग्रतस्स्थितं तथाविधां काञ्चनमालिकामपि ।
दृशानुगृह्णन् करुणार्द्रया मुनिर्गिरं प्रभावानुगुणामुदाहरत् ॥ ६८ ॥

महत् किलेदं शिवयोगिनां कुलं न यत्र शक्यं जानितुं पृथग्जनैः ।
तदत्र मीमांसितमद्भुतं त्वया श्रुतस्य शीलस्य कुलस्य चोचितम् ॥ ६९ ॥

प्रवृत्तिधर्मे कतिचित् क्वचिद्विदुर्निवृत्तिधर्मः सुतरामगोचरः ।
अमुं किलार्थं विमृशन्त आसते महर्षयो ब्रह्मसदस्यहर्निशम् ॥ ७० ॥

न नित्यनैमित्तिककर्मशीलता कदापि नैष्कर्म्यविरोधमर्हति ।
पतेदिमां प्रत्युत सन्त्यजन्निति स्मरन्ति शिष्टाः स्वयमाचरन्ति च ॥ ७१ ॥

ऋणार्थवादैरधिगत्य नित्यतामपत्यवेदाध्यनाग्निकर्मसु ।
समं प्रवृत्ता गृहिणस्तपोधना निवृत्तिनिष्ठा अपि गौतमादयः ॥ ७२ ॥

रहस्यमप्यत्र चिराय गोपितं तवोपदेश्यं हृदि तात ! वर्त्तते ।
समाधिनिर्धूतमलेन चेतसा गृहाण कालोऽयमुपस्थितः शुभः ॥ ७३ ॥

इयं हि पत्नी भवतः पुरा चिरादुपास्त देवीमिह मीनलोचनाम् ।
जगज्जनन्या जननी भवेयमित्यपि प्रपेदे वरमन्यदुर्लभम् ॥ ७४ ॥

पतिस्त्वमस्यै शिवयैव कल्पितः समुल्लिखन्त्यावतरं निजं क्षितौ ।
इदं तु चिन्त्यं निपुणं कथं पुनः परात्परं वस्तु तदाविरस्त्विति ॥ ७५ ॥

क्रियावतामग्निमुपाश्रिता सती ददाति या नैकविधान् मनोरथान् ।
अतोऽद्य वैतानिकहव्यवाहनादुदेतु सेति प्रतिभाति भूयसा ॥ ७६ ॥

इतीरिते तेन विनेदुरुच्चकैरनाहता दुन्दुभयो दिवौकसाम् ।

नृपस्य देव्या अपि दक्षिणेतरे विलोचने प्राम्फुरतां च तत्क्षणम् ॥ ७७ ॥

प्रदक्षिणीकृत्य स विन्ध्यमर्दनं पतिः क्षितेः काञ्चनमालया समम् ।
प्रणम्य रोमाञ्चितविग्रहोऽभवत् प्रमोदबाष्पस्थगिताभिरुक्तिभिः ॥ ७८ ॥

क्व सा चिदानन्दमयी जगत्प्रसूः क्व किम्पचानौ भगवन्निमौ जनौ ।
अहो भवत्पादरजःप्रमार्जनप्रभावसम्पत्परिपाक ईदृशः ॥ ७९ ॥

तवास्मि सूनुस्तव तात! किङ्करस्तव स्वभूतोऽस्मि सहानुबन्धिभिः ।
यथानुगृह्णासि तथाचरेयमित्यसावियानेव मनोरथो मम ॥ ८० ॥

इति प्रपन्नं मलयध्वजं नृपं शताश्वमेधावभृताप्लुतं मुनिः ।
स भाविकर्मण्यधिकारसिद्धये शशास भूयो हयमेधकर्मणि ॥ ८१ ॥

इत्थं प्रसादविहिताशिषि कुम्भयोनौ
याते तपोवनपदं पुनरेतुकामे ।
आराधयत् क्षितिपतिः शिवमश्वमेध-
सम्भारसम्भरणसम्भ्रमतोऽपि तावत् ॥ ८२ ॥

इति श्रीमहाकविनीलकण्ठदीक्षितप्रणीते

शिवलीलार्णवे पञ्चमः सर्गः ।

अथ षष्ठः सर्गः ।

आहर्तुं ययुमभितो ययुर्नियुक्ता मर्त्या ये किल मलयध्वजेन राज्ञा ।
लब्ध्वा ते क्वचिदथ सोमपात्मजं द्रागाजह्रुः स्वयमपि सोमपं तुरङ्गम् ॥ १ ॥

विस्तीर्णामथ तपनीयपङ्कजिन्या व्यातेनुस्तटभुवि तस्य यज्ञशालाम् ।
आरादप्यवनिभुजां महोपकार्यां निस्संख्यानुटजगणांश्च तापसानाम् ॥ २॥

आनीते तुरगवरे समाहृतायां सामग्र्यामतिथिसभाजनोचितायाम् ।
आगच्छत् सह मुनिभिः परावरज्ञैर्ब्रह्मर्षिश्चुलुकितसागरः सशिष्यैः ॥ ३ ॥

आराध्य प्रमथपतिं महोपहारैर्मीनाक्षीमपि मलयध्वजः सदारः ।
आरेभे सवनमनुज्ञया मुनीनामागस्त्यं चरणयुगं प्रणम्य सद्यः ॥ ४ ॥

स्वायत्तामपि दुरतिक्रमात् प्रतापात् संगृह्णन् भुवि जनतां स साङ्ग्रहण्या ।
मुक्ताश्वो धृतनियमः पदेऽस्य होमं कुर्वाणः समवसदग्न्यगार एव ॥ ५ ॥

स्वच्छन्दं हयमभितोऽपि सञ्चरन्तं संगुप्तं नृपपुरुषैः शतैश्चतुर्भिः ।
रोद्धुं यद्यपि न शशाक राजलोकः शक्तोऽभूत् पुनरखिलोऽनुरोद्धुमेनम् ॥ ६ ॥

---

१. 'ययुरश्वोत्सृमेधीयः' इत्यमरः. २. सोमपात्मजं वरुणप्रभवम् । अथ च सोमपीथिसूनुम् .
३. सांग्रहण्येष्टया यजते इमां जनतां संगृह्णातीति' इति यजुर्वेदः.

कीर्त्याविष्कृतसरणिं प्रतापगुप्तं पश्यन्तस्तुरगमितस्ततश्चरन्तम् ।
तद्धव्यग्रहणरसार्द्रतालुमूला वर्षान्तं विबुधगणाः प्रतीक्ष्य तस्थुः ॥ ७ ॥

सर्वैरप्यधिगतवाजिमेधकाण्डैः सम्पूर्णे किल विषयेऽस्य वाजिरक्षाः ।
वृत्त्यर्थं क्वचन किमप्यनाददानाः स्वैः स्वैः स्वैः कथमपि वर्तयाम्बभूवुः ॥ ८ ॥

अश्वत्थे क्षणमवबध्य तं तुरङ्गं सम्पूर्णे शशिनि समेत्य तिप्ययोगम् ।
आवृत्तं नगरमभि प्रचोदयन्तो निन्युस्तं नृपपुरुषा हिमावसाने ॥ ९ ॥

आयाता धरणिभुजो यदासमुद्रादायाताः सकलकलाविदश्च लोकाः ।
आयास्यन्त्यमरगणाश्च हव्यहेतोस्तेनायान् स्वयमपि कौतुकी वसन्तः ॥ १० ॥

निश्शेषोपरतरसालपल्लवाशानिर्विण्णैर्वनभुवि कोकिलैस्तदानीम् ।
आसेदे शिशिरदिनान्तसुप्तबुद्धैराकाशाच्च्युत इव पञ्चमो निनादः ॥ ११ ॥

प्रम्लाना धरणिरुहः स्वतः प्रसेदुर्निष्कान्तो मलयगिरेर्बहिः समीरः ।
वीरश्रीर्विषमशरस्य बाहुकाण्डे विश्रान्ति स्वयमभिरोचयाम्बभूव ॥ १२ ॥

मालिन्यं दधति मषीविलेपनेन प्रावण्यं युवतिषु घोषयन्ति यूनाम् ।
झङ्कुर्वद्भ्रमरनिभेन मीनकेतोः सञ्चेरुर्बहिरिव शासनाक्षराणि ॥ १३ ॥

कूजन्तो मदनपुरोहिता द्विरेफाः पुष्पाणि ध्रुवमभिमन्त्रयाम्बभूवुः ।
स्वस्थानस्थितिमपरित्यजन्त एते विध्येयुः किमितरथा शराः शरव्यम् ॥ १४ ॥

आनङ्गं निगममजस्रमुद्विरन्तो भैक्षेण प्रतितरुवीथि वर्त्तयन्तः ।
निर्निद्रास्त्वहनि निरन्तरं द्विरेफा आचार्यं वटव इवावसन् वसन्ते ॥ १५ ॥

अध्वर्युं मलयसमीरमन्यपुष्टं होतारं वनभुवि सामगं द्विरेफम् ।
ब्रह्माणं मधुमपि सादरं वृणाना आजह्रुर्मदनमहाध्वरं युवानः ॥ १६ ॥

मोहान्धे जगति विपश्चितो यतः केऽप्यग्रीनादधुरयजन्त चास्तशङ्काः ।
तन्मूलं ध्रुवमयशो दिशो दशापि प्रावार्गदसमशरस्य भृङ्गदम्भात् ॥ १७ ॥

आमूलादविरळमाचिते प्रवालैश्चूतेऽपि प्रययुरतोषमन्यपुष्टाः ।
सर्वाणि ग्रसितुमिमानि यत्न शेकुः स्थातुं वा यदपि न शाखिकामपश्यन् ॥ १८ ॥

के भृङ्गाः क इव पिकाः समीरणः कश्चन्द्रः कः क इव मधुर्मनोभवः कः ।
दौर्भाग्याद्विरहिजनस्य दुर्विभेदं हन्तासीत् कथमिदमैकमत्यमेषाम् ॥ १९ ॥

आचूडं कुसुममया मधोः प्रसादाद् वासन्तीविचकिलचूतचम्पकाद्याः ।
धुस्तूरेष्वपि च निरीक्ष्य तां समृद्धिं मन्दाक्षादिव नतमौलयो बभूवुः ॥ २० ॥

उन्मीलन्मधुमदतुन्दिला द्विरेफा उद्दामस्तबकपरिष्कृता लताश्च ।
अन्योन्यं यदिह न किञ्चिदभ्यजानन् सा. सम्पत्सुरभिकटाक्षवीक्षणानाम् ॥ २१ ॥

आक्रम्य क्षितितलमावृतं तुषारैस्तद्वार्त्तामपि न मधुर्यदा विषेहे ।
शीतांशौ हिमवति च द्वयोस्तदानीं लब्धं तैरभयमितो हतावशिष्टैः ॥ २२ ॥

आ द्वन्द्वादपरिगृहीतदेहभेदादा कीटभ्रमरपिपीलिकोद्विजेभ्यः ।
न क्वापि प्रतिहतिरैक्षि शुश्रुवे वा तत्कालं कुसुमशरासशासनस्य ॥ २३ ॥

आस्तां तद्रतिपरिणेतुराधिपत्यं मन्देऽस्मिन्नपि खलु मारुते प्रवृत्ते ।
कत्यन्वक् कति पुरतश्च सम्प्रचेलुर्माद्यन्तः शुकपिकशारिकाद्विरेफाः ॥ २४ ॥

आरामे किसलयमक्षि शीथुरागः कान्तानां कमलवनेषु केसराणि ।
इत्येभिः प्रकटितविश्वरूप एव प्रायेण व्यजयत मान्मथः प्रतापः ॥ २५ ॥

सङ्क्षोप्य भ्रमरशशाङ्ककोकिलेभ्यः सम्प्राप्ते तमसि महत्यधिज्यधन्वा ।
एकाकी रतिपतिरित्वरीरनैषीत् सङ्केतं भुवनभयङ्करे निशीथे ॥ २६ ॥

कान्तानां नखलिखनैर्दृढोपगूहान् सीत्कारान् दशनपदैश्च साधयन्तः ।
प्रेयांसः पुनरुभयानिमानतीतानस्मार्षुर्हिमसमयेष्वयत्नलभ्यान् ॥ २७ ॥

दुर्दान्तं मदनमवेक्ष्य निर्ममे किं वर्मैकं युवसु वधूमयं विधाता ।
यद्योगे मदनशराः प्रसूनमात्रं यत्त्यागे कुलिशदशाममी वहन्ति ॥ २८ ॥

सम्पश्यन् गिरिशतपोविलोपकोपव्यापन्नं सुहृदमनन्यजं वसन्तः ।
शुश्रूषामकृत शिवार्चने मुनीनां प्रत्यग्रैर्दलकुसुमैर्वनद्रुमाणाम् ॥ २९ ॥

आशीताचलमभिगम्य सन्निवृत्ते धन्येऽस्मिन् धरणिभुजस्तुरङ्गवर्ये ।
उत्कण्ठाभरभरिता इवोत्तराशामासेदुः स्वयमहिमत्विषस्तुरङ्गाः ॥ ३० ॥

सम्पूर्णे नियमभरेण वत्सरेऽस्मिन् सम्प्राप्ते स हि सह वाजिना वसन्ते ।
आदिष्टः स मुनिभिरश्वमेधकर्मण्यारादूधुं गिरिशमदीक्षत क्षितीशः ॥ ३१ ॥

अध्वर्युः समजनि तत्र कुम्भजन्मा होतृत्वं प्रतिगतमाश्वलायनेन ।
औद्गात्रं समधृत जैमिनिर्मुनीन्द्रो ब्रह्मासीद् बहुविदरुन्धतीसहायः ॥ ३२ ॥

प्रागन्तःकरणममुष्य केवलं ये प्राजानन् भुवि नवनीतनिर्मितं ते ।
अभ्यक्तं नवनवनीतचर्चिकाभिस्तं विज्ञा बहिरपि तन्मयं विजज्ञुः ॥ ३३ ॥

---

१. अपरिगृहीतदेहभेदाद् अर्धनारीश्वरात्मकादित्यर्थः. २. चर्चिका समालम्भनम्-

आबाल्यादातिथिषु मुक्तहस्त एषः क्षमापालः किल मलयध्वजः प्रकृत्या ।
तज्ज्ञानन्नपि निखिलं निबध्य मुष्टिं दीक्षायु क्षणमपि नासितुं शशाक ॥ ३४ ॥

अध्वर्यौ भगवति तत्र कुम्भजन्मन्यायज्ञं धरणिपतित्वमश्नुवाने ।
दुर्भिक्षं शिथिलमजायत द्विजानामाषाढाजिनतृणमुष्टिविष्टरेषु ॥ ३५ ॥

नीवारान् वपत कुशान् प्रवर्धयध्वं सिञ्चध्व खदिरपलाशविल्वपोतान् ।
सद्यः सञ्चिनुत मृदूनि वल्कलानीत्यादिक्षन् नृपपुरुषानगस्त्यशिष्याः ॥ ३६ ॥

तस्मिन्नप्यददति पार्थिवे निषेधाद् यद् भुक्तं वसितमुपार्जितं च विप्रैः ।
दातारः स्म इति कृताग्रहाः समस्ताः शक्ताः किं शततममंशमत्र दातुम् ॥ ३७ ॥

भुञ्जानानपरिमितान् बहून् पदार्थान् भूदेवानधिसवनं निरीक्ष्य देवाः ।
भागं नः क्रतुषु विधाय विप्रलेभे पापीयान् विधिरिति मन्त्रयाम्बभूवुः ॥ ३८ ॥

तस्याग्रे धरणिभुजः क्रियान्तराळेष्वातेनुः स्वयमृषयो बहून् विवादान् ।
न्यायानुश्रवपदसाङ्ख्ययोगतन्त्रप्रस्थानप्रवचनदेशिका महान्तः ॥ ३९ ॥

यद्यात्यन्तिकमुखदुःखहानिरूपं कैवल्यं कथमशपद् भवानहल्याम् ।
तादृक्षामुपलदशां श्रयेति कोपादित्यूचुः कतिचन गौतमं मुनीन्द्राः ॥ ४० ॥

कं दोषं कथयत सम्प्रसक्तदुःखव्यावृत्तिं फलमुपगच्छतां पुरो नः ।
अज्ञानक्षतिरुपले तवापि किं नेत्याचख्युः प्रतिपदमक्षपादशिष्याः ॥ ४१ ॥

अज्ञानाद्यदि परिकल्पितं जगत् स्यादज्ञानां प्रथमगणेय ईश्वरः स्यात् ।
निस्सीमा तव हि मतेऽस्य मूढतेति व्यासं प्रत्यकृषत केऽपि पूर्वपक्षम् ॥ ४२ ॥

अज्ञानं प्रकृतिमपेक्ष्य विश्वमेतत् सर्वज्ञे सृजति भवेऽपि यत् त्वयोक्तम् ।
अज्ञानं तदिदमनङ्कुशं तवैवेत्याचख्युः सदसि तु बादरायणीयाः ॥ ४३ ॥

जातिश्चेद् भवति पदेषु साधुभावो भाषायां श्रुतिषु च स द्विधा कथं स्यात् ।
गेहे गौर्वनभुवि गर्दभः किमु स्यादित्युच्चैरपजहसुः परे पदज्ञान् ॥ ४४ ॥

अन्येऽन्ये श्रुतिषु जगत्सु चापि शब्दास्तद्भेदं निपुणमजानतां कृते वः ।
अस्माभिः स्फुटमनुशिष्टमात्तमौना वर्त्तध्वं पदपदवी दवीयसी वः ॥ ४५ ॥

अस्मद्व्याकरणगृहीतशक्तियोगानस्मासु प्रथममिमान् प्रयुज्य शब्दान् ।
युक्तादीयत गुरुदक्षिणा किलेति प्रत्यूचुः प्रथमविपश्चितो विपक्षान् ॥ ४६ ॥

हिंसातो यदि दुरितं क्रतुष्वपि स्यात् पुण्यं किं न भवति पारदारिकाणाम् ।
उत्सन्नं किल कुलमुद्धरन्त्यमी(ति व्याजहुः?) कपिलमते कळङ्कमेके ॥ ४७ ॥

शास्त्रं चेत् किमपि तथास्ति साधयामो दुष्कृत्यैरपि सुकृतानि कात्र भीतिः ।
यूयं देवरवरणे यथा गृणीतेत्याहुः स्म प्रतिवचनानि तत्त्वनिष्ठाः ॥ ४८ ॥

योगाख्यं वदसि यमङ्गिनं समाधिं तं ब्रूषे ननु कथमङ्गमष्टमं च ।
अङ्गाङ्गिव्यतिकरदुस्थितं मतं ते को गृह्णात्विति जगदुः परे फणीन्द्रम् ॥ ४९ ॥

सामान्यं किमिह क इष्यते विशेषः को योगः क इव समाधिरित्यबुद्ध्वा ।
अर्वाचां व्यवहरतामयं प्रलापः साधीयानिति जहसुः पतञ्जलीयाः ॥ ५० ॥

आयास्यन्त्यनुपदमत्र हव्यहेतोर्नन्वस्मिन् महति मखे सुराः समस्ताः ।
तान् सर्वानपलपितास्यहो कथं वेत्याचख्युः कतिचन जैमिनिं मुनीन्द्राः ॥ ५१ ॥

ये ह्युच्चावचमवजानते प्रपञ्चं मिथ्येति त्रिभुवनदेशिका महान्तः ।
तच्छिष्या वयमपि शक्तितो वदामेत्याहुस्तान् प्रति चतुरास्तु पूर्वतन्त्रे ॥ ५२ ॥

तत्रेत्थं द्विजसदसि प्रवृत्तजल्पे स्थेयत्वं स्वयमवलम्ब्य भाषमाणः ।
दीक्षाहानुपसदहानपि व्यतीतः सौत्येऽहन्यवतरति स्म पार्थिवेन्द्रः ॥ ५३ ॥

ये षट् त्रिः खदिरपलाशबिल्वरूपा यौ चोदुम्बरतरुजौ सराज्जुदालौ ।
ते यूपा अवतरतां दिवः सुराणां निश्रेण्यो भुवि निहिता इव व्यराजन् ॥ ५४ ॥

अग्निष्ठे समुपनिबध्य राज्जुदाले सन्नद्धं कुशरशनागुणेन गाढम् ।
सम्प्रौक्षन् हयमभितो महर्त्विजस्तं *सिद्धार्थैरपि विधिगौरवेण मन्त्रैः ॥ ५५ ॥

आलब्धे शमितृभिराश्वमेधिकेऽश्वे चन्द्राख्यं कलशभवः प्रगृह्य मेदः ।
शाखायां क्षणमुपसाद्य वेतसस्य सौवाग्र्यादखिलमवद्यति स्म होतुम् ॥ ५६ ॥

आश्राव्य स्वयमृषिराश्वलायिनीये याज्यान्ते हविरजुहोत् स्रुचो मुखेन ।
यज्ञेशे भगवति भावनाप्रकर्षाद् भूपालो जगदजुहोत् स तन्मुखेन ॥ ५७ ॥

अप्यन्तस्तिमिरहरं शरीरभाजामप्राप्यं जनुपि पुरातपोविहीनैः ।
सौरभ्यं हविषि हुते समुज्जिहानं व्याजिघ्रन् सदसि विपश्चितो महान्तः ॥ ५८ ॥

---

१. 'मी इत्याचख्युः' इत्येव महाकवेः पाठः स्यात् । तत्र प्रकृतिभावप्राप्तिमजानता तु केनचिन्नूनमयमपशब्दपाठः कल्पितः । .२ उपसदहान. उपसादिष्टिदिनानि ३. सुत्याया इदं सौत्यम्. ४. राजुदालः श्लेष्मातकः ५. शमितृभिः पशुविशासितृभिः. ३. याज्या होममन्त्रविशेषः.

---

* 'सिद्धान्सैं' इति खपुस्तके पाठः.

बिभ्यत्सु श्रुतिमतिलङ्घ्य सम्प्रदातुं हव्यं तत्तदभिमतं द्विजर्षभेषु ।
पौरोडाशिकचरुपाशुकादिभागान् स्वीचक्रुः स्वयमपमित्य देववर्गाः ॥ ५९ ॥

चन्द्रे तु ज्वलनहुते हयस्य तस्मिन्नासन् ये सलिलमुचस्तदीयधूमात् ।
वर्षन्ति स्वयमधुनापि मौक्तिकानां व्याजात् ते तमिव कणीकृतं वमन्तः ॥ ६० ॥

आगाता किल यजमानकामनानामुद्गीथावयवसमस्युपासनज्ञः ।
उद्गानं व्यतनुत जैमिनिस्तदानीमाकाङ्क्षन्नवतरणं जगज्जनन्याः ॥ ६१ ॥

प्रत्यक्षं विबुधगणेष्वदत्सु हव्यं साकूतस्मितमवलोकितः सदस्यैः ।
सिद्धान्तं स दिविषदामविग्रहत्वं व्याचख्यौ कलहविपर्ययं महर्षिः ॥ ६२ ॥

देया भूरिह खलु दक्षिणेति शास्त्रं सर्वा भूरपि चतुरर्णवापरीता ।
दत्ता नः क्षितिरमण ! त्वयेति हृष्टा आशीर्भिः सदसि तमृत्विजोऽभ्यनन्दन् ॥ ६३ ॥

निष्क्रीय द्विगुणधनैः पुनर्धरित्रीं रक्षायामनधिकृतैर्द्विजैर्वितीर्णाम् ।
भूयोऽपि द्विजकुलसाच्चकार सर्वां स्वां लक्ष्मीमपि मलयध्वजो नृपालः ॥ ६४ ॥

राजर्षेरवभृथकर्म वाजिमेधे स्नातारः सहमुनयो वसिष्ठमुख्याः ।
तीर्थं तु त्रिशिखभवा सरोजिनी सेत्येकैकं त्रिभुवनपावनं तदासीत् ॥ ६५ ॥

तौ मित्रावरुणसुतौ मिथो विमृश्य ब्रह्मर्षी विदितसमस्तवेदितव्यौ ।
अम्बाया अवतरणाय काञ्चिदिष्टिं पुत्रीयां त्वरितमथोपचक्रमाते ॥ ६६ ॥

सङ्कल्पं व्यधित नृपः स यावदिष्टौ तावद् भुव्यवतरितुं शिवापि चक्रे ।
वैतानादुदयमुपेहि पावकादित्यादिष्टा स्वयममृतांशुशेखरेण ॥ ६७ ॥

सम्प्राप्तुं त्रिभुवनमातरं कुमारीं सन्नद्धो ननु यजमान एव पत्न्या ।
इत्यमीदवददुपांशु शासितारं पत्नीसन्नहनविधौ प्रचोद्यमानः ॥ ६८ ॥

प्रासीदज्जगदखिलं प्रदक्षिणार्चिः स्वीचक्रे हविरनलः सुवर्णवर्णः ।
उत्तस्थौ नवलवलीविपाकपाण्डुर्धूमोऽपि स्फुरदरविन्दगन्धमान्द्रः ॥ ६९ ॥

तद् दिव्यं त्रिभुवनधाम धाम शैवं होतव्ये हविषि विभावयन् महर्षिः ।
उद्बोध्य क्षितिपमुदङ्मुखः स तिष्ठन् वैताने ज्वलति जुहाव हव्यवाहे ॥ ७० ॥

---

१. समुद्रशुक्तिष्विति शेषः. २. अविग्रहत्वं नाम न शरीररहितत्वम् । किन्तु कलहरहितत्वमिति स्वसिद्धान्ताभिप्रायं वर्णयामासेत्यर्थः. ३- मित्रावरुणसुतावगस्त्यवसिष्ठौ. ४. सन्नद्धो बद्ध उद्युक्तश्च. ५. अवददिति । वैधे पत्नीसन्नहने प्रस्तोतव्ये यजमानसन्नहनं तद्विपरीतं पत्न्या कृतमिति सन्नद्धशब्दश्लेषालम्बनमग्नीधः सोपहासं वचनमिदम् .

आज्याहुत्यभिपतनप्रवर्धमानादभ्रेस्तत्क्षणमुदियाय कापि कन्या ।
उन्मीलत्कुवलयदामकोमलश्रीर्लावण्यामृतलहरीविवर्त्तमूर्त्तिः ॥ ७१ ॥

चूडासङ्घटितसुवर्णपद्मदामव्यामिश्रग्रथितविलम्बिमौक्तिकौघा ।
प्रालम्बालकनिकरान्तरालदृश्यव्यावल्गच्छफरविलोललोचनश्रीः ॥ ७२ ॥

कर्णाभ्यां मदनकराङ्गुलीयकाभं ताटङ्कं मणिखचितं विभूषयन्ती ।
अव्याजस्मितभणितान्तरालदृश्यप्रत्यग्रप्रसृमरदन्तकुन्दपङ्क्तिः ॥ ७३ ॥

वक्त्रेन्दुव्यतिषजदेणभीतिहेतोर्वैयाघ्रं नखमधिकन्धरं दधाना ।
त्रातुं त्रीनिव तनयान् विधीशविष्णूंस्त्रीन् वक्षोरुहवलयान् समुद्वहन्ती ॥ ७४ ॥

अभ्यग्रोन्मिषदमरद्रुपल्लवाभे कुर्वाणा कुवलयकन्दुकं कराग्रे ।
सौवर्णाम्बरविलसन्नितम्बबिम्बव्यालम्बिस्फुटमणिमेखलाकलापा ॥ ७५ ॥

अम्बाम्बेत्यमृत*रसं गिरा किरन्ती मञ्जीरक्वणितमनोहरं चरन्ती ।
सा बाला स्वयमभजन्नृपालपत्न्याः पर्यङ्कं श्रुतिशिखरैः कृताभ्यसूयम् ॥ ७६ ॥
(कुलकम्)

आलिङ्गन्त्यसकृदनुक्षणं स्पृशन्ती चुम्बन्ती मुखकमलं मुहुर्मुहुश्च ।
पश्यन्ती विकसितपक्ष्मभिः कटाक्षैस्तां बालामभजत निर्वृतिं न माता ॥ ७७ ॥

आनन्दत्रुटितविशीर्णकञ्चुकान्ताद् वक्षोजादथ मलयध्वजप्रियायाः ।
अन्वस्यन्दत मधुरं पयः प्रभूतं बिभ्रत्यास्त्रिभुवनमातरं कुमारीम् ॥ ७८ ॥

प्रेयस्या सविधमुपेत्य दीयमानामुत्प्लुत्य स्वयमुपगृहितुं पतन्तीम् ।
कन्यां तामभृतमयीमिवाददानः कैवल्यं धरणिपतिस्तृणाय मेने ॥ ७९ ॥

मार्जन्तावसकृदुपर्युपर्युदञ्चद्बाष्पाम्भःप्रकरतरङ्गितानपाङ्गान् ।
अव्याजस्मितमधुराक्षरं कुमार्या द्रष्टुं तन्मुखकमलं न शेकतुस्तौ ॥ ८० ॥

न स्मर्तुं प्रमथपतिं न कर्मशेषं निर्वोढुं न च महतो मुनीन् प्रणन्तुम् ।
नान्योन्यं वदनमवेक्ष्य नन्दितुं वा दम्पत्योश्चतुरतया तयोर्बभूवे ॥ ८१ ॥

पश्यन्तावुरसि कुचाङ्कुरत्रयं तौ बालायाः किमपि समाकुलौ यदास्ताम् ।
पर्जन्यस्तनितगभीरमन्द्रघोषा वागेका नभसि तदा समुज्जजृम्भे ॥ ८२ ॥

तटातकां नाम तवात्मजामिमां पतिर्भविष्यन्नवलोकते यदा ।
तदा तृतीयं कुचमण्डलं त्विदं निमग्नमन्तर्नियतं भवेदिति ॥ ८३ ॥

---

* 'रसां गिरम्' इति खपुस्तके पाठः.

श्रुत्वा सुधारसकिरं गिरमद्भुतां तां
निर्वर्त्त्य सर्वधनदक्षिणमध्वरं च ।
पाणौ दिशन् कुलगुरोः परदेवतां तां
तत्पादयुग्ममुपसङ्गृहे सदारः ॥ ८४ ॥

हस्ते गृहीतां कलशोद्भवस्तामध्यात्मविद्यां मुनिमण्डलाय ।
आनन्दबाष्पैः पुलकाङ्कुरैरप्यनक्षरं केवलमाचचक्षे ॥ ८५ ॥

प्रशिथिलकलुषं प्रशान्तमोहं प्रमदतरङ्गपरम्पराधिरूढम् ।
जगदखिलमभूदभूतपूर्वं मनुजकुलावतरे जगज्जनन्याः ॥ ८६ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे षष्ठः सर्गः ।

अथ सप्तमः सर्गः ।

अथ कलशभवः शिवस्य मेधाविभवविवर्त्तमर्यामिमां कुमारीम् ।
मधु मधुरमपाययत् स मेधासमुपजनाय सकाञ्चनं सगव्यम् ॥ १ ॥

उचितमुपनिवेशिताङ्कदेशे सुकृतिनि काञ्चनमालया सुता सा ।
अपरिचितचरीं प्रवृत्तिमाद्यामलभत मातृकुचामृतोपयोगे ॥ २ ॥

समजनि सुखिता कुमारिका सा सकृदुपधाय मुखं स्तने जनन्याः ।
वदनसरसिजं दृशा पिबन्ती न तु दुहितुर्जननी जगाम तृप्तिम् ॥ ३ ॥

अकृतकवचसा नभोविभागात् स्वयमुदितेन कृतं तटातकेति ।
क्षितिपतिरतनिष्ट नाम तस्याश्त्रिभुवनकर्णरसायनाक्षरं तत् ॥ ४ ॥

कनकरजतशृङ्खलावबद्धे मणिशयनीयतले महार्हतल्पे ।
मृदुनि समुपवेश्य तामगायन्नवनिपतेरवरोधगास्तरुण्यः ॥ ५ ॥

प्रचलति यमपेक्ष्य भारतेऽस्मिन् सकलमिदं शुभकर्म भूविभागे ।
अजनि महिभृतस्ततः किलेयं परमहिमालयतो यशोवदातात् ॥ ६ ॥

इयममृतमयी शरीरभाजां बहिरपि बहिर्भवतापतापितानाम् ।
कलमधुरविराविणी च वाणी करकमलोपगृहीतवल्लकीयम् ॥ ७ ॥

---

१. महिभृतो भूपतेः पर्वताच्च. २. परमहिमालयतः परस्य महिम्नः परमस्य हिमस्य चालयात्.

विहरसि यदि देवि! जाग्रतीत्थं जगदखिलं कुशलं प्रकाशते नः ।
निमिषसि यदि निष्क्रिया भवामः प्रलय इवैष निमज्जति प्रपञ्चः ॥ ८ ॥

इति शिशुजनलालितानि गीतान्यवनिपतेरवरोधसुन्दरीणाम् ।
अनुजगदुरिवामरा निगूढाः प्रतिनिनदैः परमात्मभावदृष्टया ॥ ९ ॥

समधृत वलयानि सा †कुमारग्रहपरिहारकृते महीमयानि ।
परिचयमिव कुर्वती भुजेन क्षितिवलयं सकलं सुखेन वोढुम् ॥ १० ॥

विहृतिषु पितरौ सपात्रहस्ताप्यतनुत सा भुजिना विनैव तृप्तौ ।
कथमिव भवति क्षुधा तृषा वा सकृदनुसन्दधतां तथाविधां ताम् ॥ ११ ॥

वियति विधुकलां प्रदर्श्यमानां निभृतमवेक्ष्य नितान्तकौतुकेन ।
शिरसि कुसुममेतदर्पयेति प्रतिमुहुरालपति स्म बालिका सा ॥ १२ ॥

व्यजयत पदकिङ्किणीरवोऽस्या मणिभवनेषु ततस्ततश्चरन्त्याः ।
पदमिदमभितो विचिन्वतीनामुपनिषदामिव हर्षजः प्रणादः ॥ १३ ॥

अवददियमनन्विता इवार्थैरनुपहिता इव याः कथाः सखीभिः ।
कथमपि परमोपदेशदृष्टया जगृहुरिमां मुनयः सुराश्च गूढाः ॥ १४ ॥

कति कति कृतिनः कुरङ्गपोता विहरणसाधनतामवापुरस्याः ।
तरुषु पशुषु वा ध्रुवं जनिष्ये *तदहमहो समयः पुनर्व्यतीतः ॥ १५ ॥

क्रतुरवनिपतेरयं स तस्या यदुपजहार विहारसाधनानि ।
स च परमजपो यदन्ववादीत् कलमधुराणि मुहुस्तदीरितानि ॥ १६ ॥

भवनविनिहितेषु भक्ष्यभोज्येष्वहरत सा कपटेन यत् कुमारी ।
नवनवमपरिक्षयं च भूत्वा प्रकटमजायत सूक्ष्मदर्शिनां तत् ॥ १७ ॥

कतिचन किल कन्तुका महान्तो गुणसमुदायमया निसर्गशुद्धाः ।
अजनिषत कुतूहलाय देव्या निगमपथे चरतां निदर्शनाय ॥ १८ ॥

श्रुतिषु निहितदृष्टयोऽन्यविद्या भगवति शूलिनि ताः स चादिशक्तौ ।
क्वचिदपि किल कन्तुके तु सापीत्यजनि मनागपि योगिनामसूया ॥ १९ ॥

कतिपयदिवसैः कथासु गीतेष्वजनि पटुर्घुटिकासु कन्तुकेषु ।
इति रहसि कथा बभूव पित्रोर्दुहितरि विश्वविधानमातृकायाम् ॥ २० ॥

† 'कुमारी' इति खपुस्तके पाठः.

* 'तदयम्' इति खपुस्तके पाठः.

विहृतिषु नयने पिधाय तस्याः स्वयमभितश्चरितुं कृतोद्यमानाम् ।
त्रिजगति तिमिरावृते सखीनामपि चलितुं स्वपदान्न शक्तिरासीत् ॥ २१ ॥

अथ कुलगुरुमादिदेश मित्रावरुणसुतं मलयध्वजो नृपालः ।
दुहितुरखिललोकमातृकाया विरचयितुं किल मातृकोपदेशम् ॥ २२ ॥

निखिलजनिमतां सदा लिखन्ती निटिलतलेषु शुभाशुभाक्षराणि ।
अलिखदपरिजानतीव बाला कथमपि सा भुवि वर्णमेकमेकम् ॥ २३ ॥

अथ भुवि विलिखन्त्यैवं तुरीयं कलशभवस्य मुनेः पुरः कुमारी ।
सदयमुपादिदेश भक्तियोगात् प्रणमति कामकलारहस्यमस्मिन् ॥ २४ ॥

निरवधिपरमात्मचिन्मयी सा किमपि यदा निदधे कलासु दृष्टिम् ।
अहमहमिकया तदा परीयुः सकलकलाश्च सखीजना इवैनाम् ॥ २५ ॥

विदितमविदितं च यत् किलासीत् प्रथममजातमुखात् गृहीतमैशात् ।
तदखिलमवधारयन्नमुष्याः कलशभवो गुरुदक्षिणां प्रपेदे ॥ २६ ॥

असिकुलिशगदाशरासशक्तिभ्रमरकतोमराभिण्डिपालशूलैः ।
प्रकटितरणकौशलाः खुरल्यां[1] सममिव सा विजहार वीरलक्ष्म्या ॥ २७ ॥

उपनिषदुदिता मतङ्गजा सा प्रियदुहिता मलयध्वजस्य राज्ञः ।
मदभरभरितान् मतङ्गजेन्द्रान् सहजतया वशमानिनाय सद्यः ॥ २८ ॥

हयवरमधिरुह्य सञ्चरन्ती खुरदलितक्षितिधूलिधूसराभ्रम् ।
अवतरणमनक्षरं जगौ सा निजमिव भूमिभरावरोपणार्थम् ॥ २९ ॥

कवचितमवधूतखड्गरेखं नियमितवेणिनिबद्धतूणमन्वक् ।
कतिचन कृतिनः सिषेविरेऽस्यास्तुरगरजोमसृणालकं वपुस्तत् ॥ ३० ॥

अथ शिथिलकुमारिका*दशान्तप्रविरळकन्दलदद्भुताभिरूप्यम् ।
अलमकुरुत यौवनं तदानीं त्रिभुवनमङ्गलमङ्गमङ्गमस्याः ॥ ३१ ॥

हृदि किल निममज्ज यावदन्तः प्रसवशरो मलयध्वजात्मजायाः ।
पिशुन इव स तावदुन्ममज्ज स्तनकलशस्तु हृदो बहिस्तदीयः ॥ ३२ ॥

---

१. ईकारम् . २. शस्त्रशिक्षणशाला खुरली.

---

* 'दशान्तम्' इति कपुस्तके पाठः.

शिथिलमनुससार बाललीलां विरळमपि प्रकटीचकार लज्जाम् ।
अनयदियमहानि पञ्चषाणि प्रतिनवयौवनमारुतावधूता ॥ ३३ ॥

वचसि विहसिते गतेऽवलोके वपुषि च कापि दशा क्षणे क्षणेऽस्याः ।
समजनि मदनैकदर्शनीया मदनजिदेकमनोविभावनीया ॥ ३४ ॥

परिविगलति शैशवे प्रवृत्ते तरुणिमनि प्रतिपन्नसर्वतत्त्वा ।
अजनि पितुरमात्यताधुरीणा परमगुरुश्च परात्मचिन्तने सा ॥ ३५ ॥

दुहितरि नृपतिस्तटातकायां धुरमुभयोरपि लोकयोर्निवेश्य ।
भवममरगणादिवापवर्गादपि परमं गणयन्नहान्यनैषीत् ॥ ३६ ॥

सुमतिमभिधयार्थतोऽपि देवः कुलसचिवं निकटे निवेश्य जातु ।
हृदयगतमिदं समाचचक्षे सविधजुषोः सहधर्मिणीकुमार्योः ॥ ३७ ॥

स्मरसि न सुमते! यथा गुरुर्मामाशिष दिमां श्रियमर्पयन् मयि प्राक् ।
अपहतविमतां भुवं समानामयुतमिमामनुपालयेति हृष्टः ॥ ३८ ॥

इदमवितथयाशिषा गुरूणां तव च धिया धृतमित्थमाधिपत्यम् ।
अयुतमपि समाः समासिमीयुः कुलमपि कुम्भभुवेदमुद्धृतं नः ॥ ३९ ॥

वसति च शिशुतामतीत्य वत्सा वयसि महीवलयानुपालनार्हे ।
अयमपरिणतो मनोरथो यन् कलितकरग्रहमङ्गळा तु नेयम् ॥ ४० ॥

दिवि भुवि धरणीतलेऽपि वास्याः पतिरुचितो न हि कोऽपि भासते नः ।
तमिममपि मनोरथं मदीयं सफलयिता न चिरेण चन्द्रमौलिः ॥ ४१ ॥

अहमिव हितचिन्तने त्वमस्या भवसि च राज्यविधौ परः सहायः ।
भवति च जननी तटातकायाः परिणयकर्मणि भाविनि स्वतन्त्रा ॥ ४२ ॥

अधिगतमधिगम्यमीश्वराणां कुलमपि वीक्षितमुद्धृतं कुमार्या ।
मम तु खलु मनोरथोऽयमेको यदुत लभेय पदं जगज्जनन्याः ॥ ४३ ॥

इति वदति महीपतौ महिष्यां तदनुगमाध्यवसायविज्वरायाम् ।
अगणितगुरुशोकसम्प्रमूढावथ सुमनिश्च तटातकाप्यभूताम् ॥ ४४ ॥

कथमपि शिशिरोपचारभेदैरलभत संविदमम्बिका न यावत् ।
चुलुकितचतुरर्णवो महर्षिः स्वयमभिगम्य स तावदित्थमूचे ॥ ४५ ॥

---

१. भव शिवं ससारं च.

जय जननि! जय त्रिलोकवन्द्ये! जय गलितावरणात्मचित्स्वरूपे!।
किमिह मनुजताभिनीतिमात्राद् भवति तमोभिभवः परस्य धाम्नः ॥ ४६ ॥

अभिनयमवधूय मानुषीणामवसितकल्पमलं प्रपन्नमेनम्।
त्वरितमनुगृहाण तीव्रपातैर्मलिनिमभङ्गनिरङ्कुशैरपाङ्गैः ॥ ४७ ॥

नियमय जननीं दुरूहरूक्षां परिणयकर्मणि ते प्रदानहेतोः।
स्वमृणमियमपाकरोतु गौरीवितरणपुण्यसमुच्चयेन भर्तुः ॥ ४८ ॥

इति कलशभवेन बोधिता सा जगदरणिर्जनकं चिरात् प्रपन्नम्।
अमनुत परमे पदे निधातुं सुलभमियच्छ्रुतरक्षणं हि तस्याः ॥ ४९ ॥

प्रपदनपदवीजुषां जनानामनुपरतेऽप्यपवर्गदानसत्रे।
किमिव हि जनके कृतं मयासीदिति हृदि सा किल जिह्रयाम्बभूव ॥ ५० ॥

प्रवससि यदि तात! हा हताहं न गणय वत्स! भयं कुतश्चनेति।
व्यतिकरितपरावरात्मभावा व्यवहरति स्म परापि देवता सा ॥ ५१ ॥

भुवमथ भुजयोः श्रियं दृगन्ते चरणयुगे हृदयं च जीवितं च।
विनिदधदयमात्मदेवताया विगतभयो मलयध्वजोऽवतस्थे ॥ ५२ ॥

अथ दुहितुरनुग्रहेण तस्मिन् प्रविशति गर्भगृहं शशाङ्कमौलेः।
निभृतमवलुलोकिरे समस्तास्तदनु च तत्र महेशलिङ्गमात्रम् ॥ ५३ ॥

चिरपरिचितभर्तृविप्रयोगव्यसनपराहतिमूर्च्छितां सावित्रीम्।
स्वयमपि परिरभ्य खिद्यमानां कलशभवः पुनराम्बिकां बभाषे ॥ ५४ ॥

किमिदमनुचितं पुनः प्रवृत्तं कियदियता भविता न दुःखमस्याः।
अपनय तमसा कृतं जनन्यामलमभिनीय मनुष्यभूमिकां स्वाम् ॥ ५५ ॥

यदि भवसि शिवे! जगच्छरण्या यदि च भवद्वचनानि वेदवादाः।
‡ त्वयि कृतमनसि त्वयि प्रलीने पितरि च ते किमु सन्ति शोचितारः ॥ ५६ ॥

इति विदितपरावरेण देवी कलशभवेन महर्षिणानुनीता।
अखिलकलुषभञ्जनैरपाङ्गैरनुजगृहे सुमतिं च मातरं च ॥ ५७ ॥

तदनु भुवनमङ्गले मुहूर्ते प्रकृतिभिरासजनैः पुरोधसा च।
सविधमुपगमय्य चन्द्रमौलेर्मणिखचिते निदधे वरासने सा ॥ ५८ ॥

‡ 'अधि' इति खपुस्तके पाठः,

पशुपतिरथ पाण्ड्यकन्यकायै विचकिलपुष्पमयीं वितीर्य मालाम् ।
पुनरपि स तया समर्प्यमाणां हृदि चकमे निभृतं मधूकमालान् ॥ ५९ ॥

कियदपि समवाप्य यत्कटाक्षं क्षितिपतयो भुवने पराक्रमन्ते ।
न्यविशत यदि सैव वीरलक्ष्मीर्नृपतिपदे न कथं नमन्तु भूपाः ॥ ६० ॥

अवनिरफलदद्भुतानि सस्यान्यददुरपां निधयो मणीन् महार्घान् ।
उपददुरुचितान् गजान् वनान्ता भुवि समये समये ववर्ष च द्यौः ॥ ६१ ॥

न यदतिचरितं जनेषु केनाप्यपरिमितं ननु भाग्यमेतदस्याः ।
त्रिभुवनजननी कृतापराधं कमिव नियच्छतु सा कथं दयार्द्रा ॥ ६२ ॥

अवनितलमवन् गुरुः किलास्याः प्रशमयति स्म नृणां परं विवादम् ।
त्रिभुवनजनताविवादशान्तिः परिणमति स्म सदैव हन्त तस्याम् ॥ ६३ ॥

नृपकरमखिलं वितीर्य शिष्टं यदिह शिवाय निरुप्तमस्ति किञ्चित् ।
तदपि ननु हरन्ति तावकीना इति वचनेषु जहास सा जनानाम् ॥ ६४ ॥

अहमहमिकया दिशोऽधिगन्तुं परिचलतां यशसां मिथो विमर्दात् ।
पथि पथि निभृतानि कानिचित् किं रजतहिमाद्रिमिषाद्यशांसि तस्याः ॥ ६५ ॥

कर इति हि जहार षष्ठमंशं परमखिलं तु शिवार्पणैकबुद्ध्या ।
स्वयमुपददिरे त एव चेत् तत् कथमिव कोशसमृद्धिरस्तु नास्याः ॥ ६६ ॥

श्रियमखिलधनाकरेषु वाणीं विशयपदेषु महानसेऽन्नपूर्णाम् ।
करितुरगपदेषु वीरलक्ष्मीं न्यधित सखीरधिकारिणीस्तदा सा ॥ ६७ ॥

धनकनकमतङ्गजादिलक्ष्म्यो धृतवपुषः सकलाः कलाश्च तस्याम् ।
अदधत परिचारिकाधिकारं त्रिभुवनमातरि राज्यपालिकायाम् ॥ ६८ ॥

अनुसमयमशेत यद्यपीयं तदपि सदैव तु जागराम्बभूव ।
परिहृतनिमिषेण पाण्ड्यकन्या तपनशशाङ्कमयेन दृग्द्वयेन ॥ ६९ ॥

अथ नृपतिसुतां कृताभिषेकां विमतजयव्यवसायिनीं विधातुम् ।
शरदुपनिपपात शोषयन्ती पथि पथि पङ्ककळङ्कितान् प्रदेशान् ॥ ७० ॥

तरुगिरिमरुसागराविशेषं जगदखिलं जलरूपतां नयन्तः ।
समुपचितयशोभरा इवासन् सालिलमुचो विमलाः समन्ततोऽपि ॥ ७१ ॥

परिमितपयसः प्रशान्तघोषाः परिगणनीयतटिन्नटीविलासाः ।
यदि सलिलमुचोऽपि ते बभूवुः किमिव हि विश्वसिमः स्थिरं जगत्याम् ॥ ७२ ॥
अजनिषत हि येऽभिनन्दनीयाः स्तनिततटिज्जलमेघमारुताद्याः ।
शरदि तनुमतां त एव निन्द्या ननु समयानुगुणा गुणाः प्रजानाम् ॥ ७३ ॥
शिशिरितमवनीतलं समृद्धं विपिनमपूरिषताशया जलानाम् ।
विरमति जलदेऽपि कस्य हानिः परमिह केचन चातकाः प्रनष्टाः ॥ ७४ ॥
क्षितितलमभिपूर्य वारिपूरैः किसलयिता विरचय्य वृक्षजातीः ।
किमपि फलमनाप्य नष्टमभ्रैः फलभुगयं पुनराविरास कालः ॥ ७५ ॥
घनतिमिरमुखादनेन मुक्तावतरतैव यदर्कशीतभानू ।
तत इव शरकोरकापदेशाद् दिशि दिशि कीर्तिरनेहसो जजृम्भे ॥ ७६ ॥
कथमपि परिभूय मेघबन्धं कियदिव कन्दलिते सुधामयूखे ।
अलिकलभमुखेन[1] हर्षवार्त्ता व्यचलदिवोत्पलिनीकुमुद्वतीनाम् ॥ ७७ ॥
अतिश्रिततमवर्तताम्बुसत्रं सलिलमुचां शरदा निवारितं तत् ।
उदभवदियमेव कीर्तिरस्याः किमिव यशोऽन्यदतिप्रसङ्गभङ्गात् ॥ ७८ ॥
विरमति सति दुर्दिनेऽर्कचन्द्रावनुभवतामभवन्मुदस्तदास्ताम् ।
गगनमपि निरीक्ष्य निष्कलङ्कं कियदिव हन्त शरीरिणोऽभ्यनन्दन् ॥ ७९ ॥
मधुरविमलवारि मत्तभृङ्गं परिणतशालि परास्तपङ्कलेशम् ।
किसलयितवनं समोष्णशीतं क्षितितलमेव दिवोऽपि भोग्यमासीत् ॥ ८० ॥
कणिशकबलनोपजातगर्वाः कलनिनदोपहृतामृताः शुकौघाः ।
समजनिषत सङ्गतश्चरन्तो मदनविसारितवागुरा इवाभ्रे ॥ ८१ ॥
प्रभवति नलिनी प्रसेदुरापो विमलतरा विललास चन्द्रिकेति ।
जहृषुरतितरां जना यदेषा विरहिजनस्य विपत्परम्परासीत् ॥ ८२ ॥
सविधगतपचेलिमेक्षुपर्वप्रसृमरमौक्तिकपातकान्दिशीकाः ।
दिशि दिशि शुकशारिका अधावन् परि[2] परिशालियवाप्रियङ्गुदेशान्[3] ॥ ८३ ॥

---

१. अलिकलभमुखेन भ्रमरश्रेष्ठमुखेन. २. लक्षणेत्थम्भूताख्यानेति (१-४-९०) लक्षणे कर्मप्रवचनीयः परिः. ३. पारेगताः शालियवप्रियङ्गवो धान्यविशेषा येषु ते परिशालियवप्रियङ्गवः. ते च ते देशाश्चेति तथा तान्.

कमलवनमुपाश्रिता जरन्तः करिकटभित्तिमुपस्थिता युवानः ।
इति मधुपगणा द्विधा विभिन्ना अपि खलु कर्मकराः समं स्मरस्य ॥ ८४ ॥

चिरपरिमुषितप्रदेशचिह्नाः समुपगताः सरसीः पुनश्च हंसाः ।
कथमपि रसवर्णगन्धभेदैर्निजनिजमम्बुजकोशमन्वयजानन् ॥ ८५ ॥

अतिविमलमयत्नशीतमम्भः स्फुरदरविन्दसुगन्धयः समीराः ।
निरुपधिकरुणामयी च राज्ञीत्यजनि जनेषु परम्परा शुभानाम् ॥ ८६ ॥

तत्तन्नृपालपरिपालनसम्प्रसूत-
मालिन्यमार्जनसमुज्ज्वलितां धरित्रीम् ।
भूयः स्वयं विमलयन् समयः प्रसादं
मन्ये चकाङ्क मलयध्वजकन्यकायाः ॥ ८७ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे सप्तमः सर्गः ।

अथाष्टमः सर्गः ।

जातुचित् तदनु पाण्ड्यकुमारी चित्रिते सदसि रत्नगणेन ।
दर्शनैरपि च षड्भिरलभ्यं दर्शनं निजमदात् प्रकृतीनाम् ॥ १ ॥

तापसा द्विजवरा धरणीशा बन्धवः परिजना भटमुख्याः ।
पौरजानपदवन्दिगणाश्च प्राविशन् सदसि तत्र विचित्रे ॥ २ ॥

तान् यथायथमथोपचरन्ती सा प्रणामवचनस्मितदृग्भिः ।
अक्षमामजनयत् त्रिदशानां मानवेषु मघवत्प्रभृतीनाम् ॥ ३ ॥

वीज्यमानमभितो युवतिभ्यां चामरद्वयमदृश्यत तस्याः ।
यत्परत्वमथ यत्सुलभत्वं तद्यशोयुगमिवातिविशुद्धम् ॥ ४ ॥

छत्रमेकतरमुच्छ्रितमस्या मूर्ध्नि तेन शिशिरं जगदासीत् ।
एतदत्र हि निदर्शनमेषा यत् प्रपञ्चवपुषा परिणेमे ॥ ५ ॥

अस्तुवन् कचन वन्दिगणास्तामस्तुवन्नपरतः श्रुतिसङ्घाः ।
आद्यमत्र जगृहुर्गुणवत्त्वात् सर्व एव न परं[1] तदभावात्[2] ॥ ६ ॥

सा विसृज्य सकलानपि लोकानानिनाय परमाप्तसखीभिः ।
मातरं रहसि काञ्चनमालां मन्त्रणाय सुमतिं सचिवं च ॥ ७ ॥

सन्निवेश्य जननीं निजपीठे सा च तच्चरणपीठनिषण्णा ।
मन्त्रिणा सुमतिना जयहेतोर्मन्त्रमित्थममममन्त्रत बाला ॥ ८ ॥

यः किलानुशरदं विजयार्थी पार्थिवं त्वरयसे गमनाय ।
स प्रवर्त्तयसि मां न कथं त्वं बालिकेयमिति किं विशयानः ॥ ९ ॥

बालिकास्म्यनवगाढरणास्मि प्रत्युतोपनिहितास्म्यवरोधे ।
आशिषा तदपि तावदमुष्यास्त्वद्धिया च विजयाय यतिष्ये ॥ १० ॥

मैवमालप कदाचन वत्से! मन्त्रिणा सुमतिना विजयो नः ।
स त्ववैति समयोचितमर्थं सर्वमित्यभिदधे जननी ताम् ॥ ११ ॥

स स्म तां सुमतिराह कुमारीं सास्मितां मृदुतया जनयित्र्याः ।
संस्मरन् गुरुमतीतममुष्या बाष्पगद्गदपदं विनयेन ॥ १२ ॥

देवि! मे निगदतः शृणु वत्से! यत् त्वमात्थ मयि सानुजिघृक्षा ।
तत् तथैव परथा न कथञ्चिद् वेदवादसुहृदो हि गिरस्ते ॥ १३ ॥

सत्यमेव विजये यतितव्यं साधनं प्रथममत्र विपक्षः ।
मार्गयेऽहमपि नोपलभे तं न व्यजिज्ञपमतस्त्वयि किञ्चित् ॥ १४ ॥

इत्थमुक्तवति मन्त्रिवरेऽस्मिन् कुम्भभूः स्वयमुपेत्य महर्षिः ।
आशिषो बहुविधा विरचय्य व्याजहार मलयध्वजकन्याम् ॥ १५ ॥

साधयिष्यसि करग्रहणं[3] त्वं सर्वथा चलतु ते जययात्रा ।
भूरियं भवतु पुण्यतमा ते पावनीभिरभितो श्रमणीभिः ॥ १६ ॥

इत्युदीर्य जयनान्नि मुहूर्त्ते तां प्रवेश्य सबलामुपशल्यम् ।
तत्करग्रहमहोत्सववीक्षाकौतुकी स मलयं विजगाहे ॥ १७ ॥

सज्जितैव पृतना सकलेयं किन्त्विमां निशमिह व्यतिलङ्घ्य ।
श्वः प्रयाहि विनिवर्त्त्य निवर्त्त्यानित्युवाच सुमतिर्जननीं ताम् ॥ १८ ॥

---

१. परं श्रुतिसङ्घस्तवनम्. २. तदभावश्च निर्गुणवस्तुपरत्वाद्. ३. करग्रहणं राजभागग्रहणं परिणयं च.

पार्श्वमुत्तरमपि त्रिदशाद्रेः सा प्रयास्यति यतो विजयाय ।
तन्निरीक्षितुमिव प्रथमं तं प्रस्थितो दिनकरश्चरमाद्रौ ॥ १९ ॥

निष्पतन्नपि रविश्चरमाब्धावुद्दधार किरणाननुयातान् ।
ईदृशं व्यसनमस्पृशतः किं लोकबन्धुरिति जीर्यति शब्दः ॥ २० ॥

निर्ममज्ज न जले कति वारानुन्ममज्ज न पुनः कति वारान् ।
अद्य भास्वति मिमङ्क्षति विप्रैरर्पिता बत जलाञ्जलयोऽपि ॥ २१ ॥

नाधुनापि कथमस्तमुपैतीत्यार्द्रकोपपरिपाटलकोणैः ।
वीक्षितो नु नयनैस्तरुणीनामंशुमानरुणिमानमयासीत् ॥ २२ ॥

कर्षणादुपलकण्टकदुर्गेष्वन्तरा शिथिलितास्त्रुटिताश्च ।
† अंशवः कतिचिदंशुमतः किं सान्ध्यरागमपदिश्य निषेदुः ॥ २३ ॥

पश्चिमाचलगुहासु निलीनैः प्रार्थिता[1] नु तिमिरैर्बलवद्भिः ।
सान्ध्यरागनिभतो दिनभर्तुर्भानवः कतिपये पथि लग्नाः ॥ २४ ॥

अध्वखेदशिथिला जरढा ये भानवो दिनमणेः पथि लग्नाः ।
दीपिकाहुतभुजामनुसायं तेऽभवन्नतिथयो भवनेषु ॥ २५ ॥

ये सहैव पतिताः पतताब्धौ ये च दूरतरमेव निवृत्ताः ।
ते द्वयेऽपि सदृशा दिनबन्धोरीदृशः प्रभवतामविवेकः ॥ २६ ॥

सङ्कुचन्नवदलारमूलस्थानदत्तमधुपोपलखण्डाम् ।
अम्बुजोदरकुटीमपिधाय श्रीरपि स्वयमितो निरयासीत् ॥ २७ ॥

आप्रभातमपि नर्तितुकामा व्योमरङ्गभवनेऽवतरन्ती ।
किं निशैव विचकार समन्तादञ्जलीनुडुनिभात् कुसुमानाम् ॥ २८ ॥

मज्जतीव[2] न ममज्ज दिनेशो नांशवोऽस्य निखिलाश्च निवृत्ताः ।
क्व स्थितानि मिलितानि कुतो वा तावदेव तिमिराण्यभिवव्रुः ॥ २९ ॥

आकलय्य धनुराकलितज्यं तस्थुषः सवयसो मदनस्य ।
अञ्चले निशितमादिममस्त्रं चन्द्रमा मुकुलनेन चकार ॥ ३० ॥

---

१. प्रार्थिता युद्धायाहूताः. २. मज्जनक्रिया तावदभिनिर्वर्त्तत एव, न त्वभिनिर्वृत्तेत्यर्थः.

† इदमर्धमारभ्यैकचत्वारिंशश्लोकान्तो ग्रन्थः खपुस्तके न लिखितः.

सर्वरात्रमपि सा जनयित्र्या सँल्लपन्त्यविरलं शफराक्षी ।
पञ्चषक्षणमितामिव मेने ताम्रचूडनिनदेन तमिस्राम् ॥ ३१ ॥

आज्ञया स सुमतेरधिसैन्यं ताडितो विजयदुन्दुभिरस्याः ।
आरवैर्जलदनादगभीरैरावृणोदिव दिवञ्च भुवञ्च ॥ ३२ ॥

निर्जराः किमपि पाणिविहारैः पन्नगास्तु पुनरक्षिनिकोचैः ।
तैर्द्वयैरपि नरा व्यवजह्रुस्तद्रवैर्मुखरिते जगदण्डे ॥ ३३ ॥

उच्छ्रितध्वजमुपस्थितयोधं सज्जवारणतुरङ्गशताङ्गम् ।
सन्ननाह सकलं बलमस्यास्तूर्यघोषमुखरं निमिषेण ॥ ३४ ॥

दिग्जयाय कृतमङ्गलरक्षा सा त्रिलोकजननी जनयित्र्या ।
निर्जगाम शिबिकामधिरूढा सम्प्रचाल्य सकलं बलमग्रे ॥ ३५ ॥

अग्रतो भटगणैरथ वाहैः कुञ्जरैरथ रथैरथ भूत्यैः ।
सौविदल्लनिकरैरथ तस्या दूरतः प्रचलितं शिबिकाग्रे ॥ ३६ ॥

राजचिह्ननिवहैर्मणिवेत्रैर्वल्लकीडमरुवेणुमृदङ्गैः ।
गद्यपद्यपठनैरपि सेवां सुभ्रुवो विदधिरे धुरि तस्याः ॥ ३७ ॥

अग्रतश्चलदसंख्यतुरङ्गोद्धूतभूतलरजःस्थगितार्के ।
दिक्तटेऽपि बुबुधे सरणिः स्वा तद्बलेन पवनैरनुकूलैः ॥ ३८ ॥

सैन्धवैर्धुरि समुद्गमिता ये पांसवो दश दिशः परिवव्रुः ।
तानशीशमदिह द्विरदानां दानशीकरकिरः श्रुतिवातः ॥ ३९ ॥

विश्लथेषु शरदागमयोगाद् विप्वगैक्षत पयोदकुलेषु ।
शातमन्यवशरासनखण्डं हस्तलभ्यमिव हस्तिपकानाम् ॥ ४० ॥

दंशितस्तुरगबद्धनिषङ्गो बाणपाणिरधिरोपितचापः ।
आप्तसैन्यसहितः सुमतिस्तामन्वयाच्चरमतः शरपाते ॥ ४१ ॥

उद्गृहीतविहितैरुपहारैर्वेत्रपातचकिताः कृतसङ्गाः ।
आकुमारमवलोकयितुं तां प्रस्थितां प्रकृतयः परिवव्रुः ॥ ४२ ॥

मुग्धसल्लँपनकौतुकभूम्ना मन्दचालितमणीशिबिका सा ।
सम्प्रवादमशृणोदिति तासां ग्राम्यभावपिशुनं विहसन्ती ॥ ४३ ॥

पश्य! काले! मलयध्वजकन्यां कुब्जिके! जनकवन्मुखमस्याः ।
ज्यायसी हि दुहितुर्मम मासैः पञ्चभिरियमहो शिशुरेव ॥ ४४ ॥

चण्डवातविगमादनु जाता नन्वियं तुरगकर्मणि राज्ञः ।
कीदृशी चतुरता पुनरस्याः कीदृशस्तु भविता गृहमेधी ॥ ४५ ॥

संन्ति नः शतमजा दश गावः पञ्चपाश्च महिषा दयया ते ।
गव्यमेतपदुपयुङ्क्ष्व कदुष्णं दूरमम्बुतृषितासि पथि त्वम् ॥ ४६ ॥

अस्ति पर्युषितमस्ति यवागूः सन्ति वंशशकलाद्युपदंशाः ।
शीतमुष्णमपि वा पिब कामं गच्छ पुत्रि! न पुन*स्तृषिता त्वम् ॥ ४७ ॥

प्रार्थयेमहि वयं भवदर्थे कुक्कुटैश्च पशुभिस्सह देवीम् ।
गच्छ पुत्रि! सुखिनी पुनरेहि त्वां कथं नु मुमुचे जरती सा ॥ ४८ ॥

किं त्वमेव मलयध्वजकन्येत्यालपन्त्यभिमृशन्ति कराग्रैः ।
आशिषश्च ददते शतशो यास्ता यथायथमुपाचरदेषा ॥ ४९ ॥

यत्र यत्र परिपश्यति बाला पादपान् क्षितिभृतः सरितो वा ।
तत्र तत्र निभृतार्पितदृष्टिः कौतुकेन पथि सा चिरमासीत् ॥ ५० ॥

तावती किल चमूरपि तस्याः †पांसुले पथि शनैः प्रचलन्ती ।
पार्श्वतो न निदधे पदमात्रं पात्रमध्यपतिता तटिनीव ॥ ५१ ॥

नाददे पथि फलानि न चेक्षून् का कथावतरणे कलमेषु ।
पुष्पगन्धमपि मारुतनीतं जिघ्रति स्म पृतना चकितास्याः ॥ ५२ ॥

किं धमेम जलधीन् मुखवातैः किं क्षिपेम नखरैर्गिरिकूटान् ।
इत्यखण्डितचलद्रणकण्डूदुर्मदैरगणि तत्र चमूपैः ॥ ५३ ॥

यावदम्बरमणिर्दिनमध्यं नाधिरोहति सुदुर्विषहोष्मा ।
तावदेव सुमतिर्हृदयज्ञो विश्रमाय बलमादिशदस्याः ॥ ५४ ॥

नाळिकेरपनसक्रमुकाम्रस्पर्धमानकदळीक्षुवणायाम् ।
तीरसीमनि कवेरसुतायास्तद् बभूव शिविरं शफराक्ष्याः ॥ ५५ ॥

प्राग्गतैराधिकृतैः प्रविभज्य स्थापितेषु पटवेश्मसु तस्मिन् ।
स्वं +स्वमेत्य विजयध्वजचिह्नं निर्विवादमविशन् बलमुख्याः ॥ ५६ ॥

विस्तृताभिरभितो विपणीभिर्वेश्मभिश्च विपुलैः सकलानाम् ।
अन्वयादिव पुरी मधुरैव स्वामिनीं पटनिकेतमयी ताम् ॥ ५७ ॥

---

* 'क्षुधि' इति खपुस्तके पाठः. †'सङ्कु' इति खपुस्तके पाठः.
+ 'समीक्ष्य' इति खपुस्तके पाठः.

स्वेदरज्यदलिकान्तनिमज्जद्धूसरा*ळकतयाधिकदृश्यम् ।
आननं विकसितेक्षणमस्या ध्यानमङ्गलमभूद् भुवनानाम् ॥ ५८ ॥

सावतीर्य शिबिरप्रातिहारे सैनिकान् समनुगृह्य कटाक्षैः ।
कल्पितं सुमतिना बहुकक्ष्यं पाण्डरं पटगृहं प्रविवेश ॥ ५९ ॥

आवृतं बहुभिरावरणैस्तद् दीर्घिकोपवनशोभितमन्तः ।
सा मणीकलशसम्भृतमुच्चैर्दर्शितं सुमतिना विलुलोके ॥ ६० ॥

अत्युदारमवबद्धवितानं क्लृप्तमञ्चमुपवर्हविशोभि ।
धूपितं कुसुमदामसुगन्धि प्राविशच्छयनमान्दिरमम्बा ॥ ६१ ॥

यत् सहस्रदलमागमगम्यं पङ्कजं विमलचिन्मयमस्ति ।
न्याञ्चितं तदिव कौतुकहेतोः पाण्डरं पटगृहं शुशुभेऽस्याः ॥ ६२ ॥

सा निविश्य मृदुले शयनीये संविसृज्य सुमतिं शुभयोक्त्या ।
अध्वखेदमवरोपितभूषा सल्लँपन्त्यपजहार सखीनाम् ॥ ६३ ॥

विश्रमय्य बलमेतदुपेतं सन्निपात्य च चमूमनुयान्तीम् ।
श्वो निषद्य सुखमत्र परश्वो याम इत्यभिदधे सचिवेन ॥ ६४ ॥

संवृते पयसि सद्मपुताया भित्तिभिर्नवदुकूलमयीभिः ।
क्लृप्तमज्जनविधिः सवयोभिः +सोपसज्य विजहार कुमारी ॥ ६५ ॥

मुक्तपल्ययनाविश्रमिताश्वं स्रस्तबन्धसुखितद्विपसङ्घम् ।
स्नातपीतसुखसुप्तभटं तच्छासनेन सुमतेर्बलमासीत् ॥ ६६ ॥

सापरेद्युरधिरुह्य तुरङ्गं सञ्चरन्त्यवनिपालकुमारी ।
तृप्तिमाप न कवेरसुतायाः कामनीयकमवेक्षमवेक्षम् ॥ ६७ ॥

तत्प्रतीरभुवि केरतरूणां हस्तलभ्यमुपयुज्य फलाम्भः ।
निर्जरा विधुकलामृतभागानापिबन्ति सकृदौषधरीत्या ॥ ६८ ॥

तज्जलं निपतितं क्वचिदन्तः स्तब्धमास्त किल यत्र पयोधेः ।
तत्प्रदेशविषयस्तनुभाजामिक्षुसारजलधिव्यवहारः ॥ ६९ ॥

सा वहेत यदि सर्वपर्थीना किं न सा त्रिपथगार्धममुष्याः ।
अर्थमेनमवबुद्ध्य जनास्तामर्धजह्नुतनयेति गृणन्ति ॥ ७० ॥

---

*'धिकतराळक' इति खपुस्तके पाठः. + 'पभुज्य' इति कपुस्तके पाठः.

तामगस्त्यगृहिणीं परिणम्रां तत्र सिन्धुवपुषा गृणती सा ।
नन्वियं भवति नो गुरुपत्नीत्यादरं दृढमधत्त सखीनाम् ॥ ७१ ॥

सा तु दिव्यसरितोऽपि विशिष्टां प्रीतिमातनुत सद्मसुतायाम् ।
सा ह्यसाविव यतो न सपत्नी तेन तत्र[1] तु गुरोर्गृहिणीति ॥ ७२ ॥

स्वर्गमाहुरवगाहफलं यं सोऽपवर्ग* इति मे मतिरस्याम् ।
स्वर्गतोऽपि मधुरां भजतां तां स्वर्ग इत्यभिमतं किमिवान्यत् ॥ ७३ ॥

सा ह्येन विशदेन चरन्ती सम्परीत्य सकलं कटकं तत् ।
आसदत् पटकुटीमनु सायं सैनिकैः परिमितैरनुयाता ॥ ७४ ॥

प्रस्थितां परिचरन् पथि देवीं सेवया विविधया सुमतिस्ताम् ।
एक एव बहुधा परिणेमे यामिकश्च सचिवश्च भटश्च ॥ ७५ ॥

दिग्जयाय चलितामथ देवीं तां निशम्य शतशो धरणीशाः ।
सम्प्रगृह्य विविधानुपहारानाययुः शरणमर्थयमानाः ॥ ७६ ॥

सूक्तिभिः सुमतिसंक्रमिताभिः स्वां चिरात् प्रवणतां भगवत्याम् ।
ते निवेद्य दयया नुगृहीताः सन्निधिं समुपजग्मुरमुष्याः ॥ ७७ ॥

कीर्णरत्नकुसुमाञ्जलयस्ते वाहनानि च धनान्युपहृत्य ।
सूचितास्पुमतिना स्वयमस्याः पादपीठनिकटे प्रणिपेतुः ॥ ७८ ॥

मा बिभीत सुखिनः प्रतियातेत्याकलय्य मृदुलां गिरमस्याः ।
उत्थिता गिरमवादिषुरित्थं ते निरीक्षितपरस्परवक्राः ॥ ७९ ॥

मादृशेषु मलयध्वजदेवो यामधत्त करुणां करुणाब्धिः ।
सा त्वया शतगुणा निहितैवं किन्तु किञ्चिदिदमस्ति निवेद्यम् ॥ ८० ॥

अर्पितात्मसु सदा कुलदासेष्वस्मदादिषु च सत्सु भटेषु ।
स्वामिनी यदि विधित्सति यात्रां का यशःक्षतिरितोऽपि कुले नः ॥ ८१ ॥

तत् प्रयातु भवती पुनरम्बामस्तु चैष सुमतिः स्थपतिर्नः ।
त्वत्प्रसादकणिकामवलम्ब्य द्योचरानपि समानमयामः ॥ ८२ ॥

---

१. तत् सद्मसुताविषयकप्रीत्यातिशयनम्. २. समानमयामः सम्यगानमतः प्रयोजयामः । समाः सन्तो नमयाम इति वा, समानं यथा भवति तथा अयाम इति वा योजना।

* 'रपवर्ग' इति खपुस्तके पाठः.

ईदृशा भवथ यूयमिमां क्ष्मां द्रष्टुमेव तु वयं चलिताः स्मः ।
कौतुकं तु यदि वः सह यातेत्यन्वशात् सदसि सा नरपालान् ॥ ८३ ॥

भूषणैः सुमतिहस्तवितीर्णैर्वाहनैर्बहुविधैश्च नृपालान् ।
सा यथाक्रममिमान् बहुमत्य व्यादिदेश कटकावतराय ॥ ८४ ॥

तां वाक्येषु गभीरितामथ च तां कालोचितार्थज्ञतां
तां नम्रेषु कृपालुतामपि च तां कीर्त्तौ परं लुब्धताम् ।
सम्पश्यन् प्रमदाद्भुतव्यतिकरस्तब्धस्त्वमात्योऽसकृत्
पादेऽस्याः प्रणनाम वत्सलतया प्रायुङ्क्त चाप्याशिषः ॥ ८५ ॥

त्वत्साचिव्यबलानतान् क्षितिभुजस्त्वच्छिक्षितैरक्षरै-
स्त्वत्सान्निध्यबलात् किलेदमवदं किञ्चिद्यथोपस्थितम् ।
कर्त्तव्यं यदितोऽपि तत्र सुमते! कामं प्रमाणं भवा-
नित्युक्त्येयमपाचकार निखिलं सेवाश्रमं मन्त्रिणः ॥ ८६ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते

शिवलीलार्णवे अष्टमः सर्गः ।

अथ नवमः सर्गः ।

तां गीतसंवलितमर्द्दलवेणुवीणानादामृताधिगमितस्वपनां सखीभिः ।
वैतालिका इव सुशिक्षिततारवाचः प्राबोधयन् मृगदृशः कतिचित् प्रभाते ॥ १ ॥

अम्ब! त्वदभ्युदयतो निहतं पुरैव हन्तुं तमः पुनरसावरुणः समुद्यन् ।
सुप्रातमावहति देवि! रथाङ्गनाम्नां साजात्यरक्तचरणायुधबोधितानाम् ॥ २ ॥

आयास्यतो दिनमणेरभिकस्य वार्त्तां प्राभातिकानिलमुखादवधारयन्ती ।
उद्दण्डपङ्कजतया किल पद्मिनीयमुद्भीविकां वहति वासकसज्जिकेव ॥ ३ ॥

पत्युस्त्विषां प्रथमनिर्गलितैर्मयूखैर्ध्वान्तेर्ष्यया मलिनदर्शमनुद्रवद्भिः[1] ।
उच्चाटिता मधुकृतोऽपि किमुत्पलेभ्यः पर्याकुलास्तत इतोऽपि परिभ्रमन्ति ॥ ४ ॥

१. मलिनदर्शं सर्वाणि मलिनानि दृष्ट्वा । 'कर्मणि दृशिविदोः साकल्ये' (३-४-२९) इति णमुल्.

हंसेषु कञ्चुकिषु षट्चरणेषु कुब्जेष्वादेशहारिषु मरुत्सु च सङ्गतेषु ।
*उद्घाटयन्त्यधिकृता इव शार्ङ्गपाणेरन्तःपुरं घटितमंशुमतो मयूखाः ॥ ५ ॥

उन्मुद्रिते सति मनागरविन्दकोशे भृङ्गैरहम्प्रथमिकाकलितप्रवेशैः ।
आस्कन्द्यमानमपि सौरभमेकतस्तदादाय यान्त्यपरतो मरुतो यथेच्छम् ॥ ६ ॥

भूदेवमन्त्रितविमुक्तजलाञ्जलिभ्यो निर्गत्य दैत्यहननाय समन्ततोऽपि ।
आसीदतामिव रविं महसा पवीनां पौरन्दरी हरिदियं परिपिञ्जरासीत् ॥ ७ ॥

अम्भोनिधेस्तपनवाजिभिरुज्जिहानैराधूतकन्धरसटैरसकृद्विकीर्णा ।
सामुद्रविद्रुमलताशकलावलीयं प्राचीमुखे विजयते नतु सान्ध्यरागः ॥ ८ ॥

निर्जित्य विश्वमखिलं मकरध्वजेन निर्गच्छता शिविरसीमनि दीपितस्य ।
मन्यामहे हुतभुजः प्रथमप्रकाशो मारुत्वते जयति सम्प्रति दिग्विभागे ॥ ९ ॥

जैत्रप्रयाणसमयं त्वयि वक्तुकामः प्रायः प्रबोधसमयं प्रतिपाल्य भानुः ।
उन्मज्ज्य सागरजलादुदयाद्गिशृङ्गे लीनः क्वचिन्न किल दृश्यतेऽधुनापि[1] ॥ १० ॥

आमोदते बत कियत् कमलाकरोऽयमस्मिन्नपि प्रविकसत्यरविन्दकोशे ।
उन्मुद्रय त्वमधुना नयनारविन्दमामोदतामखिलमम्ब! जगत् त्वयेदम् ॥ ११ ॥

सुप्रातमस्तु मलयध्वजकन्यकायाः सुप्रातमस्तु मधुरापुरवल्लभायाः ।
सुप्रातमस्तु विधुवंशपताकिकायाः सुप्रातमस्तु हरितां जगतां त्रयाणाम् ॥ १२ ॥

इत्युक्तिभिर्मृगदृशां प्रतिबोधिता सा निर्वर्त्त्य नैत्यिकविधिं नृपतेः कुमारी ।
सज्जीकृतं सुमतिना सकलं बलं तत् प्रस्थाप्य पार्थिवकुलानुगता प्रतस्थे ॥ १३ ॥

अत्यद्भुतो विजयदुन्दुभिनादमन्त्रस्तस्या नृपालकुलकर्णपथावतीर्णः ।
अस्तम्भयद्यधमदाचकृषे जघान निन्ये वशं व्यघटयच्च यथायथं तान् ॥ १४ ॥

भेरीरवश्चलति योजनमेव यावत् तावत् ततो दशगुणं चलितः प्रतापः ।
कीर्त्तिस्ततो दशगुणं व्यचलत् ततोऽपि चेलुस्ततो दशगुणं विमता विदूरे ॥ १५ ॥

वार्त्ताहरा दिशि दिशि प्रहिता हि यावदागत्य मन्त्रिणि न तं तमुदन्तमाहुः ।
तावत् त एव धरणीपतयः सदाराः सोपायनाः शरणमीयुरिमां सवालाः ॥ १६ ॥

---

१. न किल दृश्यते चक्षुर्गोचरो न भवति । 'णेरणौ' (१-३-६७) इत्यात्मनेपदम्.

---

*'व्याकोचयन्न' इति कपुस्तके पाठः.

आगच्छतां प्रणमतां वदतां प्रियोक्तीरग्रे निधाय विविधानुपहारभेदान् ।
राज्ञामनुग्रहकृते सुमहान् विलम्बो मार्गेऽभवत्प्रतिपदं मधुरेश्वरायाः ॥ १७ ॥

राज्यं प्रशासति पुरा मलयध्वजे ये भूमीभुजः कतिपयेऽपरराधुरज्ञाः ।
तानप्यनन्यशरणान् सयुतान् सदारान् सा चक्षुषानुजगृहे शरणं प्रपन्नान् ॥ १८ ॥

सा तत्र तत्र शरणागतराजलोकविश्राणितानि मणिहेमविभूषणानि ।
मातुः समक्षमखिलान्युपहारयन्ती कीर्त्तिं परां वितरति स्म दिशां मुखेषु ॥ १९ ॥

दुर्गाटवीनगरराष्ट्रपदानि तैस्तैस्त्यक्तानि युद्धनिहतैश्च पलायितैश्च ।
भृत्येषु सा कुलपरम्परयागतेषु न्यासीचकार सचिवानुमतेषु राज्ञी ॥ २० ॥

नासीरसीमपरिवर्त्तिभिरेव योधैर्विद्रावितान् विनिहतानपि वा गृहीतान् ।
सा शृण्वती नरपतीनपि नात्यहृष्यत् संग्रामदर्शनकुतूहलिनी कुमारी ॥ २१ ॥

त्यक्तान् भयात् प्रचलितैः पितृभिः स्वभेरीभाङ्कारनिर्लुठितगर्भपरिच्युतांश्च ।
सा दर्शितान् पथि शनैरवलोकयन्ती स्वे स्वे पदे नृपशिशून् पुनरभ्यषिञ्चत् ॥ २२ ॥

राज्यश्रियं प्रणिपतत्सु नरेश्वरेषु रत्नानि हेमनिवहानपि भूसुरेषु ।
कीर्त्तिं प्रतापमपि सा हरितां मुखेषु राजाधिराजतनया विकिरन्त्ययासीत् ॥ २३ ॥

सम्भ्रान्तनिष्पतिततत्तदरातिराजशुद्धान्तयौवतजनैः पतिपुत्रभिक्षाम् ।
सा भिक्षितानुजगृहे करुणातरङ्गसम्पातशीतलसमुल्लसितैरपाङ्गैः ॥ २४ ॥

पाषण्डसागरनिमज्जदनादिसूक्तिनिस्तारणाय धृतमानुषविग्रहायाः ।
मीनो महान् विरुरुचे विजयध्वजेऽस्या नासीरसीमनि नरेन्द्रकुमारिकायाः ॥ २५ ॥

बाहुप्रतापविजिताभिररातिराजराज्येन्दिराभिरिव राजसुता सखीभिः ।
पर्यावृता पितृपितामहपालितोर्वीसीमापरिष्करणमाप तुषारशैलम् ॥ २६ ॥

प्रालेयशैलशिखरादवनौ निपत्य भागीरथीं कनखलं[1] परितो वहन्तीम् ।
दृष्ट्वैव सा स्वयमभूज्जननान्तरीयसौदर्यताप्रणयविद्रवदन्तरङ्गा ॥ २७ ॥

स्रोतांसि तानि कबलीकृतदिङ्मुखानि यादांसि तत्र च महान्ति समुल्लसन्ति ।
अप्रेक्षितश्रुतचराण्यवितर्कितानि चित्रार्पितेव चिरमैक्षत पाण्ड्यकन्या ॥ २८ ॥

---

१. कनखलं देशविशेषम्.

प्रागेव पाण्ड्यतनयाचरणारविन्दसेवानुभावचिरनिर्हृतकल्मषासु ।
सेनासु तत्र जलमात्रकृतोपयोगा हीणेव सा सरिदवापदवाङ्मुखत्वम् ॥ २९ ॥

आलक्ष्य तामरसिन्धुमपारपूरां स्रोतोदशां स्वयमपि प्रतिपद्य सद्यः ।
अम्भोनिधिर्न्यविशतेव तटे तदीये सेनानिभेन मलयध्वजकन्यकायाः ॥ ३० ॥

सेनां पृथक् पृथगिमां विरलं निवेश्य मायापुरीपरिसरे सुमतिः समस्ताम् ।
आसाद्य पाण्ड्यतनयामिदमाबभाषे गङ्गातरङ्गलतिकाहृतदृक्तरङ्गाम् ॥ ३१ ॥

पश्याम्ब! कीर्त्तिमिव ते भुवनं पुनानामेनां दयामिव तवास्खलितप्रवाहाम् ।
सूक्तिं तवेव च सुधामधुरां गभीरां भागीरथीं भवजटापटलात् प्रवृत्ताम् ॥ ३२ ॥

निश्रेणिकेयमपवर्गपदाधिरोहे नौकेयमम्ब! दुरितार्णवसम्प्रतारे ।
एषा सुधा भवविषज्वलनाभिषङ्गे ज्योत्स्नेयमान्तरतमोभिभवे जनानाम् ॥ ३३ ॥

ब्रह्मर्षिशापनिहतान् भासितावशेषानेषा दिवं सगरराजसुतानजैषीत् ।
एषा च कर्मधरणीघटनानपेक्षा स्रोतस्त्रयेण भुवनत्रितयं पुनीते ॥ ३४ ॥

कर्माणि पश्यत हरेरिति घोषयन्ति यत् सेतुबन्धनमुखानि गिरः पुराण्यः ।
सोऽप्यर्णवो ननु रसातलमाविशन्त्याः पार्श्वाम्बुलेशपरिवर्त्तनपूरितोऽस्याः ॥ ३५ ॥

नीहारभूधराशिलावलयाभिघातनिर्गच्छदच्छजलशीकरनिर्विशेषैः ।
अम्बावधेहि कनकध्वजमात्रलक्ष्यैरेतां वृतां दिविषदामभितो विमानैः ॥ ३६ ॥

आस्तामदृष्टमदसीयमिहानुभाव्यं[1] दृष्टं च किं कचन दृष्टमथ श्रुतं वा ।
या यादृशीयमथ यासि च यादृशी त्वं ते द्वे युवां परामिह व्यतिसंविदाथे ॥ ३७ ॥

एतावती जननि! भारतवर्षभूमिरेषैव ते कुलपरम्परयागता भूः ।
स्नानेन पावनजलामपि पावयित्वा भूयोऽप्यमूं प्रतिनिवर्त्तितुमौचिती वः ॥ ३८ ॥

इत्यालपन्तमियमाह तमेवमेतन्मन्दाकिनीं प्रति यथात्थ महामते! त्वम् ।
लब्धास्थिरीकरणमात्रभवं यशस्तु सञ्चिन्त्यमानमयशःपरिहार एव ॥ ३९ ॥

एनां विगाह्य तदशेषतमोपहन्त्रीमेतद्बलेन सुरसिद्धनिषेवितानि ।
वर्षाणि तावदितराण्यपि साधयेयं सेनामिहैव विनिवेश्य भवत्सहाया ॥ ४० ॥

त्वत्पादसेवनकृतां त्रिदिवे करस्थे का नाम भूमिवलयाक्रमणेऽपि शङ्का ।
साह्याय किं तव चमूरनुयायिनीयं त्याज्या तु नेति समयोचितमाह सेनाम्[3] ॥ ४१ ॥

---

१. आनुभाव्यम् अनुभावः । स्वार्थे ष्यञ्. २. अतो भारतबहिर्देशसाधनेनैव यशोऽर्जनीयमिति. ३. स एनामितिच्छेदः.

अम्बा तथेति गिरमभ्युपगम्य तस्य सन्नद्धतामिति च सा पृतनां नियुज्य ।
सख्यौ भवाङ्गपरिरम्भकृतार्थमम्भस्त्रैस्रोतसं किल पुनश्च कृतार्थयन्ती ॥ ४२ ॥

यद् ब्रह्मणोऽभिभवनं सलिलात्मना प्राग् यश्चाथ शन्तनुभुवां सलिलापवेधः ।
अंहो निरन्वयममृज्यत तत् समस्तं तस्यास्त्रिलोकजननीचरणार्पणेन ॥ ४३ ॥

सा संवृता नृपसुता परितः सखीभिः स्नानाय गाङ्गसलिले कलितावतारा ।
स्रान्तीभिरत्र सुरपन्नगकन्यकाभिः संयुज्य मज्जनकुतूहलिनी विजह्रे ॥ ४४ ॥

सख्यो नृपालदुहितुर्विहृतिच्छलेन नेत्रे पिधाय बधिराः फणिराजकन्याः ।
स्मेराननासु परितः सुरसुन्दरीषु स्वैरं किलापजहसुः श्रवणव्यपायात् ॥ ४५ ॥

संसारासिन्धुतरणिस्तरणिं विनैव सा दूरमप्लवत तत्र समं सखीभिः ।
प्रागार्जितं वितरणित्वकृतं यशो यत् तेनाधुना द्विगुणितं तदभूदमुष्याः ॥ ४६ ॥

उद्दामनिश्वसितसौरभसारलोभादुन्मज्जनावसरमेव चिरं प्रतीक्ष्य ।
तं देशमप्रजहती भ्रमरावलीव स्रान्त्या बहिर्विरुरुचे कबरी श्लथास्याः ॥ ४७ ॥

सा नन्दनोपवनचन्दनमङ्गरागमालिम्पती समुपदर्शितमप्सरोभिः ।
सख्यौ यदा सुरसरित्सलिले तदैव चक्रे सुरद्रुमसमाहरणावसायम् ॥ ४८ ॥

इत्थं विहृत्य सलिले सुचिरं सखीभिरुन्मज्ज्य नौत्यिकविधेरनु पाण्ड्यकन्या ।
तां सेतुना प्रथमतः सरितं ततार नौकासहस्रनिबिडाकलितेन राज्ञी ॥ ४९ ॥

अस्रादपादपि चमूरधिगङ्गमस्या मेने कमप्यातिशयं न तु तावता सा ।
राजीवबान्धवरथे वसतो जनस्य को नाम दीपसमवायकृतः प्रकाशः ॥ ५० ॥

आदाय पुष्करमुखैरमितो विकीर्य यावत् किल व्ययितमम्बु सुरस्रवन्त्याः ।
तावत् ततो द्विगुणमप्यभिवर्षति स्म दानोदकैर्द्विपगणः परितः स्रुतैस्ताम् ॥ ५१ ॥

मातङ्गपुङ्गवतुरङ्गशताङ्गयोधपाणिन्धमे धराणिसेतुपथे चरन्ती ।
नक्तन्दिवैस्त्रिभिरशिश्रयदभ्रसिन्धोः पारं परं निरवशेषमनीकिनी सा ॥ ५२ ॥

सा सन्निपात्य सकलामपि वाहिनीं तामाज्ञां वितीर्य च गिरेराधिरोहणाय ।
आळीजनाकलितसारथिकर्ममुस्थं कर्णीरथं कमपि तु स्वयमारुरोह ॥ ५३ ॥

तां वाहिनीं सुमहतीमपदिश्य तस्या गङ्गैव तं गिरिवरं पुनरारुरोह ।
प्रस्थानसम्भ्रमवशादनिवेदितं प्रागुक्तव्यशेषमिव किञ्चन वक्तुमीशे ॥ ५४ ॥

---

१. वितरणित्वं वितरणवत्त्वं तरणिशून्यत्वं च । तेन कृतम् ।

नीहारशैलशिखरेषु समुत्पतन्तो निम्नोन्नतानि कियदप्यविचारयन्तः ।
जग्मुः शताङ्गयुगसंयमितास्तुरङ्गा देव्याः सुखं नयनरश्मिभिरुद्गृहीताः ॥ ५५ ॥

प्रस्निग्धकाशकुशकाननमेदुराणि भागीरथीसलिलपातपवित्रितानि ।
स्थानानि संयमवतामतिसुन्दराणि सव्यानि सा विदधती शनकैरयासीत् ॥ ५६ ॥

रत्नानि तत्र वणिजो भिषजोऽग्रहीषुर्दिव्यौषधीर्गजवरानपि राजकीयाः ।
अस्मादृशाः क्षितिसुराः पुनराहरन्त भागीरथीतटरुहाणि कुशाङ्कुराणि ॥ ५७ ॥

आमुक्तकञ्चुकमधिज्यशरासकाण्डमुन्नद्धकुन्तलनियन्त्रितवन्यपुष्पम् ।
सेनारजोममृणितालकसुन्दरं तत् तत्त्वं परं वनचरैरपि तत्र दृष्टम् ॥ ५८ ॥

दुर्लङ्घ्यतत्पथविलङ्घनकौतुकिन्याः कोलाहलेन महता परितो ध्वजिन्याः ।
यद्यद्विभिद्य पतितं शिखरं हिमाद्रेस्तत्तन्नवेन यशसा समपूरि तस्याः ॥ ५९ ॥

नासीरसङ्गतभटोद्भटसिंहनादविद्रावितान् गिरिगुहाशयितान् मृगेन्द्रान् ।
वन्यद्विपाः समभिदुद्रुवुरात्मवैरनिर्यातनावसरलाभनितान्तहृष्टाः ॥ ६० ॥

माध्वीकमिश्रनववैणवसक्तुभक्तैः कस्तूरिकाहरिणमांसकृतोपदंशैः ।
आतिथ्यमापुरुचितं शवरालयेषु सेनाभटाश्चमरवालधिवीज्यमानाः ॥ ६१ ॥

पारीन्द्रनिर्दलितकुञ्जरकुम्भमुक्तमुक्ताफलग्रथितहारकृतोपहाराः ।
स्थानानि तत्र विविधान्युपदर्शयन्तो देवीमसेविषत हैमवताः किराताः ॥ ६२ ॥

अत्रैव नः कुलपतिं धनुषा जघान मर्त्यः स कश्चिदिति वृद्धजना वदन्ति ।
दूरे सुवर्णकदलीवनमेतदम्ब! जीर्णः कपिर्वसति यत्र चिराय कोऽपि ॥ ६३ ॥

नाचक्षते न निमिषन्ति न निश्वसन्ति वल्मीकतः प्रमृमरा वपुषा तु मर्त्याः ।
सन्ति द्रुमा इह शतं दलपुष्पहीनाश्छित्वा नयाम यदि देवि! दिदृक्षसे तान् ॥ ६४ ॥

अस्त्यम्बिकेति ननु गोत्रपितामही नः कोदण्डदण्डकुशला गतभाव्यभिज्ञा ।
कान्त्या गिरा करुणया च भुजोष्मणा च दृग्भ्यां शपेमहि महेश्वरि! सैव नस्त्वम् ॥

बाहुस्त्वयावममृशे प्रथमं पुरो नस्तद्बाहुसारविजितो भविता पतिस्ते ।
सत्यानि विद्धि शवरीजनभाषितानि जात्वम्ब! चिन्तय न जानपदानिवास्मान् ॥

इत्थं सदारशबरोक्तिकृतस्मितासु राज्ञी सखीषु कृतनर्मवचोविलासा ।
मा जातु खण्डयत मानुषपादपानित्याज्ञाप्य तानति ययौ *शनकैर्हिमाद्रिम् ॥ ६७ ॥

---

* इतः प्रभृति एकोनसप्ततितमश्लोकान्तो ग्रन्थः खपुस्तके नास्ति.

शार्दूलसिंहशरभद्विरदाच्छभल्लवाहद्विषद्वृकवराहपराहतेषु ।
शृङ्गेषु मार्गरहितेष्वपि सा हिमाद्रेः सेना जगाम सुरसिन्धुमनुद्रवन्ती ॥ ६८ ॥

इत्थं हिमाद्रिशिखरादवतीर्य मन्दं वर्षेऽथ किम्पुरुषनामनि सा विशन्ती ।
नोदन्ययोपससृजे न बुभुक्षया वा नाध्वश्रमेण पृतना न च घर्मतोयैः ॥ ६९ ॥

अज्ञातमेघजलमश्रुतसस्यभेदमर्थोपसङ्ग्रहणदानकथानभिज्ञम् ।
देशं समीक्ष्य सुमति*र्धृतविस्मयोऽपि कामं बभूव स करग्रहणे निराशः ॥ ७० ॥

स्वच्छानि भौमसलिलानि सुधाधिकानि सौरभ्यवन्ति च फलानि महीरुहाणाम् ॥
दृष्ट्वैव तृप्तिभरितेषु चमूचरेषु कौतूहलेन जगृहुः कतिचित्तु तानि ॥ ७१ ॥

सन्त्यद्भुता द्रुमलता मृगपक्षिभेदाः सन्ति स्त्रियोऽपि सुरयौवतनिर्विशेषाः ।
किन्तु क्षितिं विमलसत्त्वमयीं गतास्ता न क्वापि लोभमलभन्त चमूचरास्ते ॥ ७२ ॥

धन्यान् जटापटलनीडसुखप्रसुप्तनानाविहङ्गकुलनादविनीतखेदान् ।
अध्यात्मयोगनिरतानुपगृह्णती सा मन्दं जगाम जननी जगतां त्रयाणाम् ॥ ७३ ॥

कालाद् बहोर्मुनिकुलेन कथञ्चिदन्तर्नीवारशूकवदलक्ष्यत केवलं यत् ।
तद् दृश्यते स्म तरुणारुणकोटिदीप्रं कान्तामयं कलितकार्मुकमात्मतत्त्वम् ॥ ७४ ॥

उच्चावचैः शमधनाः पृतनाचराणां कोलाहलैः श्रुतिगणैरिव बोध्यमानाः ।
कन्दं फलं सलिलमप्युपजह्रिरे यत् तत् सम्प्रगृह्य बुभुजे स्वयमम्बिका सा ॥ ७५ ॥

सा तद्व्यतीत्य समुपेत्य च हेमकूटं तेनाध्वना च हरिवर्षमनुप्रपन्ना ।
तस्योत्तरं निषधभूधरमारुरोह प्राक्पश्चिमार्णवतरङ्गकृताभिषेकम् ॥ ७६ ॥

तस्मिन् गिरौ प्रचलिता पथि पश्चिमे सा मेरुं प्रदक्षिणतया परिवेष्टयन्ती ।
वासं किटेः क्रतुमयस्य हि केतुमालं वर्षं निनाय बलमुच्छ्रितकेतुमालम् ॥ ७७ ॥

भक्त्या प्रणम्य भगवन्तमभिष्टुता सा विज्ञेन तेन वसुधाभरणश्रमाणाम् ।
तद्दर्शितेन च पथा समवाप नीलं शैलं निजेन यशसा विशदं समन्तात् ॥ ७८ ॥

सा रम्यकं समतिलङ्घ्य हिरण्मयं च श्वेतं च शृङ्गिणमतीत्य महीधरौ द्वौ ।
प्राप्तोत्तरानथ कुरून् प्रयता ववन्दे पाण्ड्यात्मजा भगवतः प्रथमावतारम् ॥ ७९ ॥

ये नोदहारिषत वन्दिगणाः स्वकीया जैत्रध्वजो जयति यश्च निजे शताङ्गे ।
तेनाहृता तदुपदर्शितमालुलोके सा तत्र वारिनिधिमुत्तरमुत्तरङ्गम् ॥ ८० ॥

*'तिः कृत' इति खपुस्तके पाठः.

प्रागेव ये कृतपदा यशसां प्रपञ्चाः स्वोपार्जिताः पितृपितामहसम्भृताश्च ।
स्वं द्रष्टुमप्युपगतानिव तानशेषान् सा तत्र तत्र समवैक्षत फेनकूटान् ॥ ८१ ॥

पश्चात् समुद्यति रवौ कुरुषूत्तरेषु प्रागेव दक्षिणमिमं विदती पयोधिम् ।
उन्मज्जतात्र तिमिना नलसेतुनेव निस्संशयं व्यवजहार वरूथिनी सा ॥ ८२ ॥

अभ्युद्यतैस्त्रिभुवनाक्रमणेच्छयेव प्राप्तैः प्रतीरमपि वारिनिधेस्तरङ्गैः ।
लिल्ये समुल्लसदसङ्ख्यचतुरङ्गमस्या वीक्ष्य ह्रियेव विपुलं बलमन्तिकस्थम् ॥ ८३ ॥

अम्भोधरेषु सलिलग्रहणावतीर्णेष्वारात् प्रतिद्विपरुषा चलितान् निहन्तुम् ।
आधोरणा जगृहुरङ्कुशसम्प्रहारैः सेनागजान् धुरि नरेन्द्रकुमारिकायाः ॥ ८४ ॥

तस्मिन् दिशां विजयकर्मणि धाविता ये ये चाहवेष्वभिमुखं निहताः स्वयोधैः ।
तानर्णवे च तटसीम्नि च तत्र राज्ञो लब्धास्पदान् युगपदैक्षत पाण्ड्यकन्या ॥ ८५ ॥

पर्णाशनैः शमधनैः पनसाम्रजम्बूप्लक्षाशनैरपि च जानपदैर्वृतेषु ।
वर्षेषु तेष्वनधिगत्य करं चरन्ती देवी चकाङ्क्ष जलधेरुपदां ग्रहीतुम् ॥ ८६ ॥

यावत् परामृशति सा न करेण मौर्वीं यावद् दधाति च निषङ्गमुखे न दृष्टिम् ।
तावत् प्रगृह्य विविधानुपहारभेदांस्तामर्णवः शरणमेत्य वचो बभाषे ॥ ८७ ॥

मुक्तापगा[1] विशति दक्षिणमम्बुराशिं जम्बूनदी विशति पूर्वमहं तु रिक्तः ।
वेदान् विचेतुमुपशोधितगर्भसारः साक्ष्यत्र मे स भगवान् ननु मत्स्यराजः ॥ ८८ ॥

त्वद्बाहुसारविजितैर्जठरं गतैर्मे भूपालकैरवगता ह्यसि भूयसा त्वम् ।
सत्यप्रियासि शरणागतवत्सलासीत्यानीतमेतदियमम्ब! चिराभिगुप्तम् ॥ ८९ ॥

मैनाकभूधरचरास्त इमे गजेन्द्रा द्वीपे गभस्तिमति रत्नगणोऽयमासीत् ।
शङ्का इमे जननि! पश्चिमसिन्धुनीता येषां प्रकाममवमः स हि पाञ्चजन्यः ॥ ९० ॥

इक्षूदधेरुपहृताः कमठाश्च मत्स्याः पक्का इमे गुडरसाः परिशोषिता वा ।
हैयङ्गवीनमकरा इति सम्प्रतीता एते पुनर्जननि! याचितका[2] घृताब्धेः ॥ ९१ ॥

एषा जरापलितरोगविषादहन्त्री दिव्या सुरोदधिहृता मदिरा सुगन्धिः ।
दध्यर्णवादुपहृतं नवनीतमेतन्नाद्यापि वेद तदिदं नवनीतचोरः ॥ ९२ ॥

क्षीराब्धिनोपददिरे तुरगा गजाश्च क्षीराशिनः सुविमलानवधारयेमान् ।
एकं तु तच्छकलमैन्दवमास्त दत्तं प्रागेव तद् भगवते प्रमथाधिपाय ॥ ९३ ॥

---

१. मुक्तापगा ताम्रपर्णी. २. याचितकाः याच्ञया लब्धाः.

सन्ति स्त्रियः कतिचिदत्र सखीरिमास्ते सम्पश्यता न तु मया समुपाहृतास्ताः ।
त्वं कामधेनुरसि कल्पलतासि च त्वं नाहारि तद्द्वितयमम्ब! विडम्बनेति ॥ ९४ ॥

ताम्रापगासलिलपानसुनिर्वृतानां किं कार्यमस्ति सुधया मधुरोदतो वा ।
मातस्तथाप्युपहृता मणिराशयोऽमी त्वच्छासनश्रमविनोदपदे नतेन ॥ ९५ ॥

सामुद्रदिव्यमणिजातिषु कौस्तुभश्च चिन्तामणिश्च भुवने विदिते मणी द्वे ।
अन्यादृशी जननि! हारलतेयमेनां वैवाहिकोत्सवविधौ वह मद्विभूत्य ॥ ९६ ॥

इत्थं निवेद्य निहितानुपहारभेदान् हारं वितीर्य च करे विनतं पुरस्तात् ।
उत्थाप्य सा सुमतिना पतिमापगानामम्बा जगाद वचनैरमृतावसिक्तैः ॥ ९७ ॥

सख्याः श्रियो मम यतो जनकोऽसि तावत् तद्धर्मतोऽसि जनको मम च त्वमेव ।
दत्तं त्वया हरणमेतदिति ब्रुवाणा सा तं पुपोष नयनाञ्चलचन्द्रिकाभिः ॥ ९८ ॥

सा तं विसृज्य समुपेत्य च पूर्ववर्षं भद्राश्वमत्र च नदीमतिलङ्घ्य सीताम् ।
तत्तीरसीमनि तपो विपुलं चरन्तमश्राननं पुरुषमाद्यमसौ ववन्दे ॥ ९९ ॥

सा च स्वदर्शनकृतार्थतपःप्रबन्धादश्राननाद् भगवतो वरमातिथेयात् ।
आसेदुषी विजयमप्रतिघातमग्रे जम्बूनदीप्रभवमापदिलावृतस्थम् ॥ १०० ॥

यान्युत्तरेषु कुरुषु प्रभवन्ति यानि जम्बूनदीपयसि यानि सुमेरुमूले ।
स्वर्णानि तानि सुमतिः पृथगानिनाय वर्णोत्तराण्यननुभूततया न लोभात् ॥ १०१ ॥

जम्बूनदीपयसि सर्वसुवर्णभूते सेनाभटा अनवधारितवर्णभेदाः ।
शैवालफेनकमलोत्पलशङ्खभृङ्गहंसान् पृथग् जगृहुराकृतिमात्रभेदात् ॥ १०२ ॥

पङ्कानि केचिदपरे सिकताः परे तु पद्मोत्पलानि कतिचित् भ्रमरीमरालान् ।
मण्डूककूर्ममकरानितरे तु तत्र हेमाशया जगृहिरे पृतनासु योधाः ॥ १०३ ॥

प्रतिकरिपरिशङ्कितद्वाहिनीगन्धदन्तावल-
प्रतिहतिशिथिलक्षरज्जम्बुसम्भूतभूरिद्रवा ।
सरिदियमभितोऽपि संप्लावयन्ती वनं तीरयो-
रकृत कृतनिवेशमस्मिन् बलं हैममेवाखिलम् ॥ १०४ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे नवमः सर्गः ।

---

१. हरणं स्त्रीधनम्.

अथ दशमः सर्गः ।

दिक्पतीनथ विजेतुमुत्सुका देवशैलशिखराग्रवर्त्तिनः ।
उत्पपात सह सैनिकैर्दिवं स्यन्दनेन महता तटातका ॥ १ ॥

सज्जसिन्धुरतरङ्गसङ्कुला सा दिवि प्रचलिता पताकिनी ।
आववार सहसामरावतीमप्रतार्कितनिरोधविह्वलाम् ॥ २ ॥

सत्पथोत्पतनजातकौतुकस्तब्धमुक्ततुरगा शनैः शनैः ।
यावदाप न दिवं तटातका तावदत्र ववृते महान् रणः ॥ ३ ॥

तद्भटाश्चिरनिरुद्धदोर्मदाः सम्प्रहारविमुखेषु राजसु ।
तं महाहवमुपस्थितं सुरैर्भागधेयफलमित्यमंसत ॥ ४ ॥

नित्यमुन्मुखचरान् सुरद्विपान् सायकैरिव निपात्य शायितान् ।
कीटपेषमपिषन् ससादिनः पद्धिरेव करिणो मदोद्धताः ॥ ५ ॥

यत्तदाहवभुवि प्रवर्त्तितं लोहितं निपतितं क्षमातले ।
अग्रतः सुरगिरेरिलावृते लोहितोदमिति तच्छ्रुतं सरः ॥ ६ ॥

दिग्जये भुवि हता रणेषु ये द्योचराः समभवन्निरोधिनः ।
ते निपेतुरुपजातमन्यवस्तेजसीव शलभाश्चमूमुखे ॥ ७ ॥

अभ्युपेयुरधरेद्युरेव यान् संप्रसाद्य बहुधा जयाय ये ।
सम्प्रजह्रुरपरेद्युराहवे सैनिकाः सुमनसस्त एव तान् ॥ ८ ॥

भर्त्सिता दिविचराश्चमूचरैस्त्वङ्कृतेन युधि हुङ्कृतेन च ।
देवमानवदशाविपर्ययं वीक्ष्य वीक्ष्य वितथं निशश्वसुः ॥ ९ ॥

स्वे बले परबले च ये हतास्तान् द्वयानपि समेत्य देवताम् ।
तत्क्षणात् पुनरुपस्थितान् रणे वीक्ष्य विस्मयमवाप सा चमूः ॥ १० ॥

तान् निरीक्ष्य समशीर्षिकान् रणे सैनिकेषु कतिचिन्महारथाः ।
सम्प्रबोध्य मलयध्वजात्मजां सन्निपेतुरनपेक्षितासवः ॥ ११ ॥

भूसुरस्वमुपभुज्य केवलं ते हि पुष्टवपुषो दिवौकसः ।
तन्मुखे शिथिलतां जगाहिरे सेतवः पयसि सैकता इव ॥ १२ ॥

---

१. कीटपेषं कीटमिवेत्यर्थः. २. ससादिनः निषादिसहितान् । 'सादी तुरङ्गमातङ्गरथारोहेषु दृश्यते' इति मेदिनी.

यावदस्त्रमभिमन्त्रितं सुरैः सन्निकर्षति न तान् महारथान् ।
तावदेव सह तैः पलायितैस्तत्तदस्त्रमपि धावितं पुरः ॥ १३ ॥

हन्यमानममृतान्धसां बलं वीक्ष्य केऽपि युधि मानवामराः ।
पूर्वबान्धवदशोपदर्शिनस्तेषु सान्त्ववचनानि चक्रिरे ॥ १४ ॥

तां पलायनपरामितस्ततो दुर्ग्रहां दिविषदामनीकिनीम् ।
सङ्ग्रहीतुमपटुः शतक्रतुः सम्मुखीनमचलत् स्वयं पुरः ॥ १५ ॥

तं निरीक्ष्य शतमन्युमग्रतस्तन्मुखे चलितमम्बिकारथम् ।
स्तम्भयन् प्रणतिभिश्च सान्त्वनैः सञ्चचाल सुमतिः स्वयं पुरः ॥ १६ ॥

तां विहाय शतमन्युतां निजां संश्रितं युधि सहस्रमन्युताम् ।
शक्रमेक्ष्य[1] सुमतौ जयाशिषश्चेतसा प्रयुयुजे तटातका ॥ १७ ॥

ये शरा नमुचिजम्भभेदिनो ये च वृत्रवलघातिनो हरेः ।
ते किलार्धपथ एव दारिताः सायकैः सुमतिचापनिस्सृतैः ॥ १८ ॥

आददे जयति मीनलोचनेत्येकमेव मनुमीरयन्नयम् ।
यच्छरानजनि तेन निष्फलं दिव्यमस्त्रमखिलं दिवस्पतेः ॥ १९ ॥

मार्गणाः कतिपये मरुत्वतस्तस्य नर्मसु पतन्ति वा नवा ।
मर्मसु प्रविविशुस्तदाशुगाः सर्व एव तु मघोनि दृङ्मये ॥ २० ॥

अक्षिभिः शरचितैः पुरःस्थितैरक्षतैस्तु चरमाङ्गवर्त्तिभिः ।
निष्फलैः शतमखे तु निष्क्रिये सन्दधे न सुमतिः शिलीमुखान् ॥ २१ ॥

[2]तं निरीक्ष्य समयं चमूचराश्चोरहूणयवनादयो भटाः ।
भूषणैर्मणिमयैः समं हरेरायुधं कुलिशमप्यपाहरन् ॥ २२ ॥

स्थापितो भुवनमातुरग्रतः स प्रसह्य पृतनाग्रचारिभिः ।
लज्जया शररुजा भयेन च स्तम्भवद्बलभिदास्त केवलम् ॥ २३ ॥

सम्प्रणम्य सुमतिस्तटातकां धारयञ्छिरसि तत्पदं चिरात् ।
लालितो बहुविधाभिरुक्तिभिस्तं च तच्चरणयोर्न्यपातयत् ॥ २४ ॥

वीक्षितः स करुणार्द्रया दृशा वासवश्चरणयोर्नतस्तया ।
स्वस्थतामुपगतो यथापुरं प्राह तां सुमतिनानुमोदितः ॥ २५ ॥

---

१. एक्ष्य आङ्पूर्वादीक्षतेः क्त्वो ल्यप्. २. अयं श्लोकः खपुस्तके न दृश्यते.

पश्य देवि! पदमेतदामरं पाल्यते स्म मलयध्वजेन यत् ।
अभ्युपेत्य शतशः सहायतामाहवेषु दनुजान् निगृह्णता ॥ २६ ॥

स्वर्गवीयमयमप्सरोगणः पञ्च देवि! सुरपादपा इमे ।
एष सागरभवो मणिर्महानेष यूथपतिरेष सैन्धवः ॥ २७ ॥

त्वं गृहाण वितरानुयायितां मां नियोजय यथापुरं तु वा ।
त्वं प्रमाणममरश्रिया समं द्यौरियं तव पदे निवेदिता ॥ २८ ॥

आगतां नरचमूमतर्कितां तावकीति कथमप्यजानता ।
प्रत्यवस्थितमिव क्षणं हि यत् तत् क्षमस्व शरणागते मयि ॥ २९ ॥

इत्थमुक्तवति पाकशासने सा जगाद शरणागतप्रिया ।
क्षान्तमेव निखिलं मयाधुना शान्तचेतसि पुरन्दर! त्वयि ॥ ३० ॥

स्वीकृतं तदखिलं त्वयार्पितं स्वीकृतं पुनरिदं मया तव ।
एक एव गतशङ्कमिन्द्रतां वर्त्तय त्वमिह वासरे विधेः ॥ ३१ ॥

सुन्दरेशमभिषेक्तुमर्चितुं स्वर्गवीं सुरतरूंश्च केवलम् ।
मामनु प्रहिणु वासवेति सा तं विसृज्य चलिता ततः †पुरः ॥ ३२ ॥

आनकध्वनिभिरश्वहेषितैः क्ष्वेलितैर्द्विरदबृंहितैरपि ।
प्रज्वलन्नपि शशाम पावकः पाण्ड्यराजदुहितुर्विनिर्गमे ॥ ३३ ॥

मा विधेहि सुमतेऽभिषेणनं रुन्धि रुन्धि चलितां पताकिनीम् ।
मामको हि जनको हुताश इत्यादिदेश मलयध्वजात्मजा ॥ ३४ ॥

यावदित्थमनुशास्ति सा चमूं तावदेव तनयादिदृक्षया ।
मङ्गलान्युपहरन्नुपायनान्याजगाम धुरि हव्यवाहनः ॥ ३५ ॥

सावरुह्य सहसा शताङ्गतः सम्प्रणम्य मुदिता हुताशनम् ।
प्रार्थिता मुहुरनेन तानि च प्राभृतानि विविधान्युपाददे ॥ ३६ ॥

जम्बुसिन्धुतटसम्भवा निशा[२] नीलशैलशिखराहृता मषी ।
अम्बराणि मणयश्च भास्वराः स्वाहया पृथगथोपजह्रिरे ॥ ३७ ॥

---

१. इदं मत्स्वीकृतं पुनः प्राग्वत् मया तव स्वीकृतम् अस्वं स्वं सम्पद्यमानं कृतम् इति पादार्थः । त्वदर्पितं सर्वं स्वीकृत्य मया तुभ्यं प्रत्यर्पितमिति अर्थाभिप्रायः. २. निशा हरिद्रा.

† 'पुरीम्' इति खपुस्तके पाठः.

पाणिपीडनमहोत्सवे तव प्रार्थये सपदि साक्षितामिति ।
ईरिते हुतवहेन सस्मिता तं विसृज्य चलति स्म सा पुरः ॥ ३८ ॥

मा कदापि मधुरापुरीजुषां दृक्पथेषु पततेति बोधिताः ।
नित्यमेव समवर्त्तिना भटास्तां निरीक्ष्य पृतनां प्रदुद्रुवुः ॥ ३९ ॥

तारिताः सुमतिनाग्रगामिना तत्रतत्र निरयस्थिता जनाः ।
मातुरेष महिमा यदीदृशी भक्तदृष्टिपथपातिनां गतिः ॥ ४० ॥

संवृतं मुसलपाशपाणिभिः सर्वतो भटगणैर्गदैरपि ।
पश्यति स्म पथि दूरतः स्थितं प्राञ्जलिं रविसुतं तटातका ॥ ४१ ॥

सोऽभिगम्य सुमतेरनुज्ञया तां प्रणम्य पदयोः समुत्थितः ।
स्वां गदामुपहरन्नविप्लुतां प्रश्रितो वचनमेतदाददे ॥ ४२ ॥

भारत क्षितितले भवद्वशे सन्ति दुष्कृतकृतो न जन्तवः ।
प्राक्स्थिताश्च नरकेषु तारिताः प्राप्त एवमिह विश्रमो मया ॥ ४३ ॥

निष्क्रियोऽस्मि किमिह स्थितेन मे सञ्चरामि सबलश्चमूमुखे ।
ये भवन्ति परिपन्थिनोऽत्र ते तेषु देवि विनियुङ्क्ष्व मामिति ॥ ४४ ॥

संयुगेष्वभिमुखा न सन्ति नः सन्ति चेदतिथयो दिवस्तु ते ।
सर्वथैव तव विश्रमोऽर्ह इत्याह तं सुमतिराहितस्मितः ॥ ४५ ॥

सा निवर्त्त्य समवर्तिनं ततः सञ्चचाल पुरतः शनैः शनैः ।
आययौ निर्ऋतिराहृतोपदस्तावदेव सबलः सबान्धवः ॥ ४६ ॥

अद्य पुण्यजनता ममागतेत्यालपन्तमिममानतं पदे ।
सा विसृज्य सलिलाधिपोन्मुखी सञ्चचाल मलयध्वजात्मजा ॥ ४७ ॥

उल्लसत्तिमितिमिङ्गिलोद्भटं ग्राहकच्छपकुलीरसङ्कुलम् ।
वाहिनी वरुणसैन्यमग्रतः पश्यति स्म सुमतेः पुरस्सरी ॥ ४८ ॥

शस्त्रजालमपविध्य सर्वतो वागुराश्च बडिशानि च स्वयम् ।
सम्प्रगृह्य मृगयाकुतूहलात् सन्ननाह पृतना चिराय सा ॥ ४९ ॥

शङ्खविद्रुमसरोजमौक्तिकप्रायमाप्यमुपहारमण्डलम् ।
आहरन् पुनरपां पतिः क्षणादाजगाम शरणं तटातकाम् ॥ ५० ॥

वारुणीं पलितरोगहारिणीमद्भुतामगुडपिष्टशीधुजाम् ।
वाजिनश्च हरितानपां पतिः सन्निधाप्य निपपात पादयोः ॥९१ ॥

प्राभृतं तदखिलं प्रचेतसः सा निरीक्ष्य सदयेन चेतसा ।
तं विसृज्य विनतं तटातका गन्धवाहनगरोन्मुखी ययौ ॥ ९२ ॥

मारुतैर्मलयजेन्दुगन्धिभिर्मन्दमन्दमुपदर्शितात्मभिः ।
स्वर्धुनीसलिलपातशीतलैः सेव्यते स्म चतुरं वरूथिनी ॥ ९३ ॥

दाक्षिणात्यमनिलं पुरस्सरं ते विधाय मरुतोऽपरे पुनः ।
पारिजातकुसुमोपहारिणस्तां सुमत्यनुमताः सिषेविरे ॥ ९४ ॥

तान् प्रदर्श्य पवनान् पृथक् पृथग् व्याजहार सचिवो नृपात्मजाम् ।
एष जानपद एव देवि नो मारुतो मलयशैलमाश्रितः ॥ ९५ ॥

पश्य चक्रपवनानिमान् पुरः सन्ततोर्ध्वगतिवाददेशिकान् ।
आरसातलममीभिरुद्भ्रमत्यर्णवस्तिमितिमिङ्गिलाकुलः ॥ ९६ ॥

आहरन्ति तरुवन्महागिरीनर्णवान् पृषतवत् किरन्ति च ।
आविरिञ्चिभवनादनर्गलान् पश्य तान् प्रलयमारुतानितः ॥ ९७ ॥

पश्चिमान् द्रुमलताप्रभञ्जनानौत्तरान् घनतुषारवर्षिणः ।
प्राग्भवान् प्रियकचातकप्रियान् यानवैषि त इमे समीरणाः ॥ ९८ ॥

भूतले कबलयन्ति[1] पन्नगा व्योम्नि भारवहने नियुञ्जते ।
तावके तु विषये तटातके! सञ्चरन्ति सुखिनः समीरणाः ॥ ९९ ॥

दर्शिताः सुमतिनेत्थमादृताः प्रेषिताश्च सदयं तयानिलाः ।
स्वस्वचेष्टितकृतः कुतूहलात् स्वां पुरीं प्रति ययुस्तदग्रतः ॥ १०० ॥

प्रस्थिता धनपतेर्जिगीषया पाण्ड्यराजतनया ततः शनैः ।
प्राक् ततोऽपि स पथि व्यवस्थितः प्राभृतैः कनकरत्नराशिभिः ॥ १०१॥

तं निपत्य पदयोः समुत्थितं यक्षकिम्पुरुषराक्षसेश्वरम् ।
अन्वकम्पत दृशा दयार्द्रया प्रश्रयेण कथयन्तमन्तिके ॥ १०२ ॥

अम्ब कश्चिदलमेव मे जये नैगमेषु[2] मधुरानिवासिषु ।
भक्त इत्युपनतं प्रतीच्छ मां पश्य किञ्चिदिदमाहृतं पुरः ॥ १०३ ॥

---

१. कबलयन्तीति । अर्थात् समीरणान् । एवं नियुञ्जत इत्यत्रापि. २. नैगमेषु वणिक्षु.

शङ्खपद्ममकरादयस्त्वमी मातरष्ट निधयो मयाहृताः ।
उत्तमस्तु स वरस्त्वयाग्रतो लभ्यते चल पदानि कानिचित् ॥ ६४ ॥

इत्युदीरितागिरं विसृज्य तं प्रस्थिता प्रमथनाथसन्निधिम् ।
तावतीमविगणय्य वाहिनीं सन्ननाह समराय सा स्वयम् ॥ ६५ ॥

चन्द्रशेखरपुरीसमीपतः सा निविश्य सकला पताकिनी ।
सिंहनादमतनिष्ट बृंहितं बृंहितानकनिनादहेषितैः ॥ ६६ ॥

नादमेनमवकर्ण्य चुक्रुधे नन्दिना पुरभिदा तु प्रिप्रिये ।
नापरोऽस्ति चतुरो महेश्वरान्नादतत्त्वमवबुध्य नन्दितुम् ॥ ६७ ॥

संवृतः प्रमथसेनया *स्वया सन्निकर्षमुपसृत्य शूलिनः ।
व्याहरन्नरचमूसमागमात् प्रज्वलन्निव शिलादनन्दनः ॥ ६८ ॥

गर्भदासकुलदासतां गता ये हि पाण्ड्यविषये नृपास्त्वयि ।
तेषु वेत्सि कुलशेखरं नृपं तत्सुतं च मलयध्वजं ततः ॥ ६९ ॥

तस्य नाम दुहिता तटातका किञ्चिदुच्चलितशैशवा सती ।
सन्निपात्य तृणपूलवच्चमूं मानुषीमित इतोऽभिवर्तते ॥ ७० ॥

सा मनुष्यवशगेषु केषुचित् तादृशेषु विबुधाधमेष्वपि ।
सम्प्रदर्शितपराक्रमा सती मन्यते न हि महेश! मामपि ॥ ७१ ॥

तां प्रधाव्य धरणीतलं ततस्तत्पदानुपदिकान्[1] सुराधमान् ।
तापसांश्च कतिचित् तदाश्रयान् दण्डयेयमिति दण्डवन्नतः ॥ ७२ ॥

तं जगाद गिरिशः कृतस्मितः सा पुनः श्रुतिपथं गतैव नः ।
अप्रमत्तमभिषेणयन्निमां स्वस्तिमान् पुनरुपेहि मामिति ॥ ७३ ॥

तां गिरं तमपि च स्मिताङ्कुरं सोऽविचिन्त्य किमपि स्मरद्विषः ।
निर्जगाम समराग्रही बहिः सप्तभिर्गणचमूपकोटिभिः ॥ ७४ ॥

तत्र सप्तनयनास्त्रिनासिकाः षण्मुखा द्विजठरा दशाङ्घ्रयः ।
षष्टिसप्ततभुजा ज्वलत्कचा मुण्डिता धृतशिखाः कपर्दिनः ॥ ७५ ॥

---

१. तत्पदस्यानुपदं गच्छतः.

---

* 'स्वयम्' इति खपुस्तके पाठः.

वीतबाहुचरणा विमस्तकाः कुक्षिलग्नवदना शिरोङ्घ्रयः ।
विप्फुलिङ्गनयना विषोद्विरा लम्बमानरसनोष्ठनासिकाः ॥ ७६ ॥

श्वेतपीतहरितासितारुणाः शृङ्गिणः सगरुतः सचञ्चवः ।
व्याघ्रदन्तिहयवायसाङ्घ्रयः पादपाचलशिलानखायुधाः ॥ ७७ ॥

ऋक्षवानरतरक्षुपन्नगद्वीपिसिंहशरभद्विपाननाः ।
निर्ययुर्युगपदट्टहासिनः सङ्घशो युधि गणा मदोल्बणाः ॥ ७८ ॥
(चक्कलकम्)

धावदश्वमवघूर्णितद्विपं नष्टयोधमवसन्नसैनिकम् ।
सम्प्रमुग्धसचिवं क्षणादभूत् तादृशं तदपि मानवं बलम् ॥ ७९ ॥

ते पदातिकुलमूरुवेगतः फूत्कृतेन गजवाजिमण्डलम् ।
स्यन्दनांश्च करतालमारुतैर्व्यक्षिपन् रणमुखाद्विदूरतः ॥ ८० ॥

क्षुद्रदीपमिव चण्डमारुतः शुष्कगुल्ममिव दावपावकः ।
ध्वान्तबृन्दमिव भास्करोदयस्तद्बलं नरबलं व्यनीनशत् ॥ ८१ ॥

युद्धदर्शनकुतूहलागताः सिद्धचारणसुपर्वपन्नगाः ।
अप्सरश्चरमभागवर्त्मना दुद्रुवुः प्रमथयूथदक्पथात् ॥ ८२ ॥

तां प्रधाव्य पृतनां गणैः समं सम्प्रसर्पति शिलादनन्दने ।
अग्रतो व्यचलदात्तकार्मुकः सम्प्रहृष्टवदनः सखीजनः ॥ ८३ ॥

बद्धकक्ष्यमपिनद्धकञ्चुक कुञ्चितभ्रुकुटि कोमलाननम् ।
मुग्धभीषणमलक्षि तद्बलं मूर्तमादिमरसद्वयं यथा ॥ ८४ ॥

स्वोचितप्रतिबलानवेक्षणस्रस्तयुद्धकुतुका शनैरिव ।
आददे धनुरधिज्यमम्बिका सा निरीक्षितसखीजनोद्यमा ॥ ८५ ॥

तत्र शक्तिपृतनाधनुश्च्युताः सायकाः कनकपुङ्खशोभिनः ।
सर्वतः प्रमथमण्डलेऽपतञ्छार्वरे[1] दिनमणेरिवांशवः ॥ ८६ ॥

तां पुरैव विकृतां वरूथिनीं स्वाशुगैर्विकृतिमापितां पराम् ।
वीक्ष्य वीक्ष्य समरे विजह्रिरे ता निरीक्षितपरस्परानना: ॥ ८७ ॥

स्रस्तशूलमपविद्धतोमरं ध्वस्तमुद्गरमपास्तकार्मुकम् ।
नन्दिनं शरणमियुराहवे ताडिता गणवरास्तदाशुगैः ॥ ८८ ॥

---

१. शार्वरे तमसि.

धावतो गणवरान्निवारयंस्तर्जयन्युधि च तत्सखीजनान् ।
सन्ददर्श धुरि तां रथे स्थितां स द्वितीय इव शङ्करो गणः ॥ ८९ ॥

निर्दयं प्रविविधुः सखीजना मन्दमन्दमिषुभिस्तमम्बिका ।
मातृहस्तगलिता हि मार्गणाः कस्य मर्मणि निवेष्टुमीशते ॥ ९० ॥

स्वामिनीति जननीति चावशान्निस्सरत्सु वचनेषु चासकृत् ।
पाणिना स युयुधे क्षणं बलादञ्जलिं प्रतिमुहुश्चिकीर्षता ॥ ९१ ॥

पाण्ड्यराजदुहितुः करच्युता नाशुगास्तमसुभिर्व्ययोजयन् ।
तत्त्वतो हि कुसुमानि सायकानीक्षवं च धनुराहुरागमाः ॥ ९२ ॥

सर्ववित् स हि शिलादनन्दनः सान्निवृत्य झटिति स्वयं रणात् ।
स्वामिने तदखिलं व्यजिज्ञपत् पादयोः प्रणिपतन् मुहुर्मुहुः ॥ ९३ ॥

सन्धिरेव भवतस्तयोचितः सङ्गरो न तु महेश! जात्वपि ।
एहि याम इतिवादिनं तु तं सोऽवलम्ब्य निरगात् कृतस्मितः ॥ ९४ ॥

पाण्ड्यराजदुहितुर्हि दक्षिणः प्रास्फुरत् समरकर्मणे भुजः ।
वीक्षिते तु वृषभध्वजे विभोरस्फुरत् स्वयमदक्षिणो भुजः ॥ ९५ ॥

आदिमं रसमिवात्तविग्रहं त्यक्तरौक्ष्यमिव तेजसां निधिम् ।
सा ददर्श शरदिन्दुसुन्दरं पुङ्गवे पुरहरं सनन्दिनम् ॥ ९६ ॥

संसते स्म सशरं धनुः करात् तत्वरे तमुपगूहितुं मनः ।
उन्ममज्ज पुलकोऽभितस्तदा निर्ममज्ज हृदयेऽधिकः कुचः ॥ ९७ ॥

यं प्रहर्तुमवलम्बितं धनुस्तं निरीक्ष्य समरे तदुज्झितम् ।
तत्कटाक्षशरणः समाददे साभिमान इव मीनकेतनः ॥ ९८॥

तद्विलोकविवशीकृते हरे बाणपातचकिते च नन्दिनि ।
रन्ध्रमेतदुपलभ्य दर्पकः स्वां रुषं सफलयाम्बभूव सः ॥ ९९ ॥

युध्यते कथमियं कुमारिका युध्यते कथमसौ हरस्त्विति ।
द्रष्टुमिच्छति जगत्त्रये स्मरस्तावुभौ शरगणैरिवाकिरत् ॥ १०० ॥

यां विदन्ननपराध्यमाशुगं प्रागजीयत कृतश्रमः स्मरः ।
अद्य लब्धमनया महद्यशः काल एव विजयस्य कारणम् ॥ १०१ ॥

तस्तम्भिरे च मुमुहुश्च चकम्पिरे च
यत् त्रासिता युधि तया प्रमथाः समस्ताः ।
सद्यो दशा परिणता ननु सैव तस्यां
कस्यापि जीर्यति न शैवजनापचारः ॥ १०२ ॥

मारस्य चार इव वीक्ष्य हरं पुरस्ता-
दन्तर्यदा प्रविशति स्म कुचस्तृतीयः ।
सम्बोधितः सुमतिना सविधं तदैव
तस्या जगाम तरुणस्तरुणेन्दुमौलिः ॥ १०३ ॥

ददृशे किल पुष्पवर्षमेकं प्रकटं मूर्ध्नि तयोस्तदा प्रवृत्तम् ।
हृदयस्थपरस्परा*धिगम्यं वर्तते चान्तरमाङ्गजं तदन्यत् ॥ १०४ ॥

उन्नमय्य मुखमानतमस्याः पाणिनेदमवदत् प्रमथेशः ।
पश्य देवि! किमपत्रपसे त्वं यत् त्वया युधि वयं विजिताः स्मः ॥ १०५ ॥

घटितमखिलं ज्ञातो भावो न किञ्चन शेषितं
तदपि भवतीं वाचा याचामि काञ्चनमालिकाम् ।
इति निगदति स्मेरे शम्भौ रसोत्तरमुत्तरं
चतुरमवदत् सद्यो बाला तथा क्रियतामिति ॥ १०६ ॥

चातुर्यं तदवेत्य वाक्यसरणौ चन्द्रार्धचूडामणि-
र्बाले! तत् क्रियते तथैव भवती सद्यः परावर्त्तताम् ।
आसन्ने विधुवार एव मधुरामेतास्मि सज्जीभवे-
त्याभाष्य स्मितमन्थरं स्वयमसावन्तर्दधे[1] तामपि ॥ १०७ ॥

सद्यः करग्रहफला तव जैत्रयात्रेत्युक्तं न विस्मर वचः कलशीभुवेति ।
सा बोधिता सुमतिना सविलज्जमन्तः स्मित्वा तदैव मधुराभिमुखी प्रतस्थे ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे दशमः सर्गः ।

१. अन्तर्दधे तिरोहितः अन्तर्हृदये धृतवांश्च.

* 'भिगम्यम्' इति खपुस्तके पाठः

अथैकादशः सर्गः ।

अथोत्थितां तामनुगृह्णती चमूं सुखप्रसुप्तप्रतिबोधितामिव ।
विहाय सा भूमिपथं सखीवृता विहायसा प्रास्थित पुष्पकाश्रिता ॥ १ ॥

ददर्श वल्मीकवदुन्नतान् गिरीन् महान्त्यरण्यान्यपि शाड्वलानिव ।
सुरापगाद्याः सरितोऽपि तन्तुवद् विदूरभावादवनौ नृपात्मजा ॥ २ ॥

पुरोपशल्योपवनेऽवतीर्य सा शुभे मुहूर्त्ते सुमतिप्रवेदिते ।
विवेश राज्ञो भवनं परिष्कृतं गजेन दुग्धार्णवजन्मना शनैः ॥ ३ ॥

प्रविश्य गेहं सदसि क्षणं स्थिता विसृज्य पौराननुयायिनोऽपि च ।
सखीसमेता सुमतौ पुरस्सरे जगाम मातुः सदनं तटातका ॥ ४ ॥

अभिद्रवन्तीं द्रुतमासनान्निजात् प्रमोदबाष्पस्थगितेक्षणामियम् ।
ननाम नाम स्वमुदीर्य पादयोर्विकीर्णपुष्पा विनयेन मातरम् ॥ ५ ॥

सुतां विनम्रां परिरभ्य निर्भरं शिरस्युपाघ्राय चुचुम्ब चानने ।
पुनश्च माता परिषस्वजे चिरं पुनश्च जघ्रौ सुचिरं शिरस्पदे ॥ ६ ॥

नियन्त्रितानन्दतरङ्गसम्भवां निरुद्धहर्षाश्रुलवां कथञ्चन ।
समेत्य सख्यः सुमतिश्च पादयोर्मुहुः प्रणेमुर्महिषीं महीपतेः ॥ ७ ॥

इयं नदीभर्त्तुरियं सुधान्धसामियं नृपाणामुपदेति मन्त्रिणा ।
निवेद्यमानेऽपि सुतामुखार्पितां न दृष्टिमावर्त्तयितुं शशाक सा ॥ ८ ॥

इयान् जयस्ते सुमतेः प्रभावतः सखीभिराभिः सुखमस्मि पोषिता ।
इमान् समालोकय देवि! तावदित्यबोधयन्मातरमम्बिका स्वयम् ॥ ९ ॥

तथेति सा मन्त्रिनिवेदितां पृथग् ददर्श दिव्यामुपदां च पार्थिवीम् ।
सुरद्रुमान् स्वर्गगवीं च पूजितान् प्रणम्य जग्राह नृपालभामिनी ॥ १० ॥

वरः सुराणां जगतां च यो वरो वरः स एव स्वयमम्बयार्जितः ।
किमेभिरद्येत्यवदन्महत्प्रियं समेत्य सख्यः सुमतिश्च तां प्रति ॥ ११ ॥

किमेतदित्यप्रतिपत्तिमन्थरां विशिष्य देवीं सुमतिर्विबोधयन् ।
स संविधित्सुः सकलं तदाज्ञया बहिः प्रतस्थे बहुधा तयादृतः ॥ १२ ॥

उपस्थितेशानविवाहमङ्गलामुदीक्ष्य पुत्रीं मुमुदे न सा तथा ।
यथा व्यषीदत् तनयोत्सवप्रियं पतिं स्मरन्ती मलयध्वजं नृपम् ॥ १३ ॥

परीत्य हेमाम्बररत्नभूषणैः प्रवर्त्तितारात्रिकमङ्गला स्वयम् ।
चकार रक्षां जननी तनूभुवः सितेन फाले भसितेन शूलिनः ॥ १४ ॥

अथोपकार्या विविधाः सुधान्धसां धराभुजां तत्र तपस्विनामपि ।
समस्तवस्तूपचिताः समन्ततश्चकार सज्जाः सुमतिः क्षणादिव ॥ १५ ॥

सुगन्धिगन्धद्रवलिप्तभित्तिकं सुवर्णरम्भाधटितं गृहे गृहे ।
नियन्त्रितच्छत्रमुदञ्चितध्वजं पुरं स्वतः पौरजनैरलंकृतम् ॥ १६ ॥

विनिर्गतः सुन्दरनाथलिङ्गतो महेश्वरो मानुषमास्थितो वपुः ।
पुरोपशल्येऽवततार संवृतो गणैः सुरैर्मातृगणैश्च सर्वतः ॥ १७ ॥

स पाण्ड्यदेवीप्रहितेन मन्त्रिणा निवेदितासन्नमुहूर्त्तमङ्गलः ।
प्रभुर्विवाहोचितवेषसुन्दरः प्रवेष्टुकामो मधुरां विनिर्ययौ ॥ १८ ॥

किरीटकोटीघटितोऽस्य पाटलो मणिर्बभौ वासुकिनोपदीकृतः ।
निकृत्य बालं विधुमुच्चकैस्ततः परिस्फुरन् बाल इव त्विषां पतिः ॥ १९ ॥

विजित्य मारं जगदेकधन्विनं यदाप कीर्त्तिं महतीं महेशितुः ।
तदक्षि तस्मिन्नधुना विजृम्भिते ममज्ज मन्दाक्षवशादिव स्वयम् ॥ २० ॥

प्रसक्तमङ्कं विमले कथञ्चन प्रमार्ष्टुमीष्टे न शिवोऽपि सर्वथा ।
मृगेण हीनोऽप्यलिकेऽस्य यत् क्वचित् बभौ मुखेन्दुर्मृगनाभिलाञ्छितः ॥ २१ ॥

कपोलसौन्दर्यममुष्य पश्यतः कटाक्षरेखाः पतिता जनस्य याः ।
नवोद्गतश्मश्रुनिभादिहैव ता निषेदुरत्यादरकीलिता इव ॥ २२ ॥

विशुद्धमुक्ताफलकुण्डलाङ्कितं विकीर्णमन्दस्मितसुन्दराधरम् ।
विशालनेत्रं वदनं निरीक्षितुं तदस्य सैवार्हति मीनलोचना ॥ २३ ॥

विशुद्धहेमत्विषि विश्वमङ्गले वपुष्यमुष्याद्भुतकुङ्कुमाङ्किते ।
अलक्षि सूक्ष्मो विशदश्च कञ्चुकोऽवतंसितेन्दोरिव चन्द्रिकाङ्कुरः ॥ २४ ॥

मुहूर्त्तपर्यन्तविलम्बनाक्षमाविजृम्भमाणस्मरसञ्ज्वरार्जितः ।
विनालिमेव व्यरुचद् भुजान्तरे तनुस्तदीये मृगनाभिचर्चिका ॥ २५ ॥

पृथग्विधाभिर्मणिहारयष्टिभिः परिष्कृतं तद्वपुरैन्दुशेखरम् ।
अलक्ष्यताखण्डलचापमण्डितः पयोधरः सान्ध्यरुचेव पाटलः ॥ २६ ॥

मणीमयैरङ्गदकङ्कणादिभिर्भरं न मेने मृदुलोऽपि तद्भुजः ।
महीधराणां महतां फणाभृतां विरोपणासादितलाघवोत्सवः ॥ २७ ॥

दिगम्बरः काञ्चनमम्बरं हरः कथं बभारेति न विस्मयाय नः ।
तनुत्विषा तस्य दिशो दशापि यत् प्रतप्तकार्त्तस्वरभास्वरीकृताः ॥ २८ ॥

किमस्य मञ्जीरपदे कृतालयाः परीत्य मुक्ताश्चरणं सिषेविरे ।
महोत्सवं द्रष्टुमिमं महेश! नः सकृत् पुनः संसरणं भवत्विति ॥ २९ ॥

वपुश्चिदानन्दमयं यदद्भुतं तदावृतं तावदविद्ययाद्यया ।
इदं ततस्सुन्दरमित्थमावृतं मणित्विषेति व्यषदन्महर्षयः ॥ ३० ॥

विभूषितस्यास्य पुरः पुरन्दरो विशालमेकं मुकुरं समाददे ।
न[1] तत्समश्चेति गिरं पुरातनीमपाकरिष्यन्निव बिम्बलम्भनात् ॥ ३१ ॥

स नन्दिना सङ्घटितं पदाब्जयोः पुनन् पुरारिर्मणिपादुकायुगम् ।
करौ कृतार्थौ कमलाक्षवेधसोः सलीलमालम्ब्य शनैर्बहिर्ययौ ॥ ३२ ॥

मदालसाभिक्रमणाक्षिमीलनैः करार्पणाकुञ्चितकर्णचापलैः ।
गजाननात् तत्क्षणशिक्षितैर्दृढं स पुङ्गवः कुञ्जरपुङ्गवोऽभवत् ॥ ३३ ॥

उदञ्चिताकुञ्चिततत्पुरःपदक्षणार्पिताङ्घ्रिः श्रवणावलम्बनः ।
सलीलमुन्नम्य स पूर्वपर्वतं पतिस्त्विषां बाल इवारुरोह तम् ॥ ३४ ॥

निगृह्यमाणौ करिणौ मुहुर्मुहुः पुनर्नयन्तौ सममाज्ञया विभोः ।
कृतानुलापौ विधिकेशवौ तदा प्रचेलतुस्तस्य तु पार्श्वयोर्द्वयोः ॥ ३५ ॥

क्वचिन्महाकालमुखान् गणेश्वरान् क्वचिच्च देवासुरसिद्धचारणान् ।
नियन्त्रयन् दूरत एव पार्श्वयोश्चचाल नन्दी पुरतः सवासवः ॥ ३६ ॥

स्मृतीतिहासैर्निगमास्तमेकतः शिवागमास्तन्त्रगणैस्ततोऽन्यतः ।
ववन्दिरे वन्दिदशामुपाश्रिता विमिश्रिता योगिभिरात्मदर्शिभिः ॥ ३७ ॥

पुरः पुरः पाण्ड्यनृपालवाहिनी ततोऽनु देवाः प्रमथास्ततोऽनु च ।
ततोऽनु भेरीजयकाहलादयस्ततोऽनु चेलुर्विविधा जयध्वजाः ॥ ३८ ॥

---

१. 'न तत्समश्चाभ्यधिकश्च लोके' इति.

शचीमुखैर्निर्जरकामिनीजनैः समावृते मातृगणैश्च सर्वतः ।
महार्हकर्णीरथमध्यगे रमावचोऽधिदेव्यौ तमनु प्रचेलतुः ॥ ३९ ॥

श्रियं नृपाणामवरोधसुभ्रुवो द्विजातिपत्न्यो दयितां हविर्भुजः ।
गिरं गृहिण्यो विदुषां च सादरं विशिष्य भक्त्यावनता ववन्दिरे ॥ ४० ॥

समुद्धृतं मूर्धनि तस्य पाण्डरं प्रकाशते स्मातपवारणं महत् ।
शिरस्स्थितं स्वं शिशुमस्य वीक्षितुं समागतः पूर्ण इव क्षपाकरः ॥ ४१ ॥

सितातपत्रान्तरसम्मितं विभोः शिरस्पदं वीक्षितुमुन्मना मनाक् ।
विधातृहंसः परितः पतन्निव व्यलोकि धूतं दिवि चामरद्वयम् ॥ ४२ ॥

अयं स राज्ञीपतिरेति पश्यतेत्यनुद्रवज्ज्ञानपदोक्तिभङ्गिभिः ।
कृताभ्यसूयेषु गणेषु सस्मितौ हरिर्विरिञ्चश्च तमन्वपश्यताम् ॥ ४३ ॥

पराक्रमं स्वं प्रकटीचिकीर्षता समाहृतं शम्बरवैरिणा शिवे ।
बलं निजं मौलमिवाङ्गनाजनस्तमीक्षितुं सन्निपपात सर्वतः ॥ ४४ ॥

तमेकवक्त्रं द्विभुजं द्विनेत्रमप्यमानुषं भावमिवास्थितं त्विषा ।
निरीक्षमाणा निभृतैर्विलोचनैः परस्परामित्थमवादिषुः स्त्रियः ॥ ४५ ॥

अहो मुखाम्भोजमहो युगं दृशोरहो भुजद्वन्द्वमहो भुजान्तरम् ।
अहो महत्कौशलमस्य वीक्षितेष्वहो विचित्रा मदवारणे स्थितिः ॥ ४६ ॥

जिता त्वया यत् पृथिवी न तज्जितं जिताश्च यद्देवि! सुरा न तज्जितम् ।
अनेन यूना यदनन्यनिर्जितं जितं वधूजन्म तदूर्जितं जितम् ॥ ४७ ॥

अमुं समालोक्य युगेन सा दृशोरमुं समाश्लिष्य भुजद्वयेन वा ।
कथं पुनर्निर्वृणुयात् तटातकाप्यपूर्णकामाः सकला वयं ततः ॥ ४८ ॥

हृतं मनोऽनेन हृते विलोचने सहैव नीताः सखि! पञ्च चासवः ।
इदं वपुर्नः परमत्र पातितं गतत्रपो विध्यति तच्च मन्मथः ॥ ४९ ॥

त्वदीक्षणायोपगतास्त्वदाश्रिता हिनस्ति नस्त्वय्यपि पश्यति स्मरः ।
इतीरयामो वयमस्य सन्निधौ प्रभुः किलायं नगरस्य चास्य नः ॥ ५० ॥

मयाम्बुजाक्षः सविशेषमीक्षितो मयाद्य दृष्टः सविधे चतुर्मुखः ।
अमुं युवानं प्रथमं विलोकयन्त्यहं तु मुग्धा न कमप्यवोदिषम् ॥ ५१ ॥

मयास्य दृष्टे विपुलायते दृशौ मयास्य मन्दस्मितमीक्षितं शुचि ।
अहं द्वयं प्रैक्षिषि साधु साध्वियं पशुर्हि नः पुच्छविषाणवर्जितः ॥ ५२ ॥

अनङ्गसर्वस्वमनन्यवीक्षितं न्यधायि यत् पाण्ड्यकुमारिकावशे ।
तदप्यवस्कन्तुमुपागतः स्वयं युवा किलायं चतुरो जितस्मरः ॥ ५३ ॥

इति प्रवृत्ताः प्रतिवीथि सङ्कथा मृगीदृशामाकलयन् कृतस्मितः ।
विकीर्यमाणः पथि लाजमौक्तिकैः पुराङ्गनाभिः पुरशासनो ययौ ॥ ५४ ॥

स राजगेहं समया मतङ्गजं नियन्त्रयन्नादिशति स्म नन्दिनम् ।
श्रियं च वाणीमपि राजमन्दिरं प्रवेशय प्रागमरीगणैरिति ॥ ५५ ॥

ततः शिलादात्मजवेत्रताडितद्रवन्नभोभूचरसंसदा पथा ।
समं समस्तामरसुन्दरीजनैर्जगज्जनन्यौ ययतुर्नृपालयम् ॥ ५६ ॥

पुरस्कृते स्वोचितया सपर्यया पुरोधसा कुम्भभवेन ते उभे ।
अभिद्रुता काञ्चनमालिका जवाद् विकीर्णपुष्पा पदयोरवन्दत ॥ ५७ ॥

पृथक् पृथक् सा परिरभ्य लालिता शचीरमावाग्जननीभिरादरात् ।
श्रिये सरोजं शुकमुज्ज्वलं गिरे मणिं च शच्यै विनयादुपाहरत् ॥ ५८ ॥

उपेहि मातामहि! कुत्र सा वधूः प्रदर्शयास्मज्जननीमितीरिता ।
निनाय ताः काञ्चनमालिका शनैस्तमालयं यत्र तटातकास्थितिः ॥ ५९ ॥

विसृज्य भद्रासनमात्तपादुकां समायतीं प्रश्रयगन्धिभिः पदैः ।
वधूं विवाहोचितवेषकोमळां निरीक्ष्य तस्थुर्निभृताः सुरस्त्रियः ॥ ६० ॥

अलक्ष्यतास्या मणिपादुकाञ्चले समन्ततो मौक्तिकपङ्क्तिरुज्ज्वला ।
अदूरलग्ना चरणारविन्दयोरनुश्रवाणामिव वर्णपद्धतिः ॥ ६१ ॥

अतीत्य लाक्षारसमाहितं नवं माणिप्रभां पादुकयोश्च तावतीम् ।
अकृत्रिमः पाटलिमा पदाब्जयोरलक्ष्यतास्या विसरन् बहिः स्फुटम् ॥ ६२ ॥

प्रबोधयन्ती श्रियमक्षिसंज्ञया सरस्वती तच्चरणाम्बुजद्वयम् ।
क्षणं निदध्यौ विकचेक्षणा ततश्चिरं तु दध्यौ मुकुळीकृतेक्षणा ॥ ६३ ॥

समापतन्त्याः सविलासमाबभौ मनोहरोऽस्या मणिमेखलारवः ।
विजित्य शम्भुं मदनेन गर्जता प्रवर्त्तितोच्चैरिव वीरघोषणा ॥ ६४ ॥

प्रतिक्षणोन्मेषिपयोधरोन्नतिप्रतिस्फुटत्कञ्चुकसन्धिपूरणैः ।
उरोजनिश्शेषसमावृते बभावुरस्यमुष्या मणिहारकोरकः ॥ ६५ ॥

परस्परस्पर्ध्यपि तत् कुचद्वयं विजेतुकामं किल मेरुमन्दरौ ।
तथा समेतं समये मिथः स्वयं यथोपलभ्येत न किञ्चिदन्तरम् ॥ ६६ ॥

कृपाणचापग्रहकन्दुकाहतिप्रपन्नकोटीरतटार्पणादिभिः ।
करो न काठिन्यमवाप हेतुभिर्वदान्यतावासनयेव सुभ्रुवः ॥ ६७ ॥

त्रिलोकजेतुर्जयलाञ्छनेन सा त्रिभङ्गिसङ्घट्टितमौक्तिकात्मना ।
करारविन्दं कटकेन बालिका विभूषयामास मनोभवाज्ञया ॥ ६८ ॥

उपासितुं सा पतिमुत्पलप्रियं करे च कर्णे च निवेशितोत्पला ।
बभार भूयो नयनोत्पले ततः स्वयं बभूवोत्पलदामकोमला ॥ ६९ ॥

अलक्षि ताटङ्कयुगान्तरार्पितो विनिर्मितो मौक्तिकरत्नमण्डलः ।
स्वयंवरायोपगतस्त्यजन् विधुं तदाननेन्दोरिव तारकागणः ॥ ७० ॥

अलक्ष्यतासन्नकरग्रहोत्सवप्रमोदजोऽस्या विशदः स्मिताङ्कुरः ।
विसृत्य नासामणिचन्द्रिका बहिर्विभूषयन्तीव रदच्छदान्तरम् ॥ ७१ ॥

प्रचीयमानं मुखरामणीयकप्रवाहमित्थं वयसा नवं नवम् ।
अवेक्ष्य मीनाविव जातवल्गनावशोभिषातां चपले तदीक्षणे ॥ ७२ ॥

विधुं चतुर्धा प्रविभज्य तन्मुखे त्रिभिः कपोलौ निटिलं च कल्पयन् ।
तुरीयमंशं विनियोगवर्जितं न्यवेदयत् स्वामिनि शङ्करे विधिः ॥ ७३ ॥

विशषयामास यदर्धचन्द्रतो ललाटमस्या मृगनाभिरेखिका ।
विशेषकत्वं वहति स्म तेन सा ततोऽन्यतस्तत्पदमौपचारिकम् ॥ ७४ ॥

रराज तद्वेणिलतावलम्बिनी प्रसूनपङ्क्तिश्चरमाङ्कसीमनि ।
प्रहर्तुमीशं समये मनोभुवा निवेशिता गूढमिवेषुसंहतिः ॥ ७५ ॥

हरस्य शृङ्गाररसाधिदेवतामवेक्ष्य तां मन्थरमायतीं पुरः ।
अलज्जत श्रीर्जगदादिसुन्दरी ललज्जिरे लज्जितुमप्सरोगणाः ॥ ७६ ॥

पदैरिमां प्राकृतवस्तुसंहतिप्रसक्तसङ्केतमलीमसीकृतैः ।
अवर्णयन्ती विववार भारता स्ववैदुषीं मौनत एव केवलम् ॥ ७७ ॥

शची तदीयाद्भुतरूपदर्शने सहस्रमक्ष्णां स्वयमिच्छती सती ।
सकृत्प्रवृत्त्यापि चकाङ्क्ष गौतमे बलादहल्याकृतशापमात्मनः ॥ ७८ ॥

ततः शनैर्भूषणगौरवेण सा सखीजनालम्बितहारमण्डला ।
ननाम वाणीकमले नता स्वयं सुराङ्गनाभिः परिषस्वजे शचीम् ॥ ७९ ॥

अयं प्रणामो ननु लाभ एव नो विवाहदीक्षावभृथे तु देवि! ते ।
न हि प्रणामावसरं लभेवहीत्यवोचतां तां परिरभ्य ते दृढम् ॥ ८० ॥

अथावतीर्य द्विरदादलङ्कृतादनुद्रुतः पारिषदैः सुरैरपि ।
विरिञ्चवैकुण्ठकरावलम्बनो विवेश राज्ञो भवनं महेश्वरः ॥ ८१ ॥

तमर्घ्यपाद्याचमनीयपूर्वया सपर्यया कुम्भभवः सभाजयन् ।
प्रवेशयामास वरं महर्षिभिः प्रसन्नया तस्य दृशा कृतार्थितः ॥ ८२ ॥

स पाण्ड्यशुद्धान्तविलासिनीजनैर्विकीर्यमाणः शुभलाजमुष्टिभिः ।
जटाभिघातोत्पतदभ्रवाहिनीपयःकणाकीर्ण इवाबभौ वरः ॥ ८३ ॥

प्रविष्टमन्तः प्रतिहारसीमनि प्रतीक्ष्य जामातरमिन्दुशेखरम् ।
प्रचोदिता काञ्चनमालया रमा चकार पाद्यं पयसास्य पादयोः ॥ ८४ ॥

प्रदीपहस्ता वचसामधीश्वरा प्रदक्षिणीकृत्य शचीसमन्विता ।
प्रवेशयामास शशाङ्कशेखरं पुरस्सरन्ती दिविषत्पुरन्ध्रिभिः ॥ ८५ ॥

स विद्रुमस्तम्भचतुष्कशोभितां विचित्रवैदूर्यविटङ्कलाञ्छिताम् ।
विलम्बिमुक्तामणिदामकोमलां विवेश देवोऽथ विवाहवेदिकाम् ॥ ८६ ॥

भेरीभाङ्कारसान्द्रं बहिरबहिरपि प्रौढशुद्धान्तकान्ता-
पाणिव्याविद्धतूर्यध्वनिजनितचमत्कारसङ्गीतरम्यम् ।
जामातृश्लाघनोक्तिव्यतिकरितवधूबान्धवोल्लासहासं
जज्ञे राज्ञो गृहं तन्मुनिजनरचितोत्तुङ्गमङ्गल्यपाठम् ॥ ८७ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे एकादशः सर्गः ।

अथासने रत्नमये निषण्णमाद्यं युवानं मुनयः पुराणाः ।
आशीर्वचोभिर्विविधैरपुष्पन्ननाहतातोद्यनिनादमिश्रैः ॥ १ ॥

प्रकीर्य पुष्पाणि मणीमयानि पत्नीं नमन्तीं मलयध्वजस्य ।
श्रिया च वाण्या च निवेद्यमानां श्वश्रूं हरः प्रैक्षत गौरवेण ॥ २ ॥

अगस्त्यमामन्त्र्य ततो विधातुरादेशतः श्रीश्च सरस्वती च ।
निवेशयामासतुरासनार्धे वधूं ह्रिया नम्रमुखीं वरस्य ॥ ३ ॥

दाने स्वसुर्दानवमर्दनोऽपि नियुज्यमानः कमलासनेन ।
श्रिया समं काञ्चनमालिकायाः समक्षमान्निषसाद वध्वाः ॥ ४ ॥

प्रस्थापितः प्राग् गिरिजाविवाहे यत् कुम्भजन्मा तदृणं विनेतुम् ।
ब्रह्माणमीशस्तु विवाहहोमे वव्रे तमध्वर्युमथाब्जयोनिम् ॥ ५ ॥

यत्नादपि प्रागनवेक्षितं यत् तच्छाम्भवं पादतलं मुकुन्दः ।
पद्माकरावर्जितपाद्यधौतमानर्च पश्यन्निभृतं प्रसूनैः ॥ ६ ॥

आरोपयन्नङ्कतलं हरिस्तामाचक्षते स्वं परमं पदं याम् ।
राज्यश्रिया दक्षिणया सहैव ददौ त्रिवेदीकवये वराय ॥ ७ ॥

दातुर्ग्रहीतुश्च किमस्ति गोत्रं को वा पिता कश्च पितामहो वा ।
अतोऽद्भुतस्तुभ्यमिमां ददामीत्यासीदियानेव तु दानमन्त्रः ॥ ८ ॥

तत्पूर्वमुत्तानदशागृहीतसङ्केतके पाणितले पुरारेः ।
न्यस्तः करः पाण्ड्यकुमारिकायाः सर्वोत्तरत्वं प्रकटीचकार ॥ ९ ॥

करो गृहीतः पृथिवीपतिभ्यो दिक्पालकेभ्यश्च यया जयन्त्या ।
तस्यास्त्वयाग्राहि करोऽधुनेति देवी गिरां सस्मितमाह देवम् ॥ १० ॥

परस्परस्योपरि मन्मथेन प्रयुक्तमस्त्रं समयं प्रतीक्ष्य ।
सन्दर्शयन्ताविव चक्रतुस्तौ माल्यार्पणव्यत्ययमङ्गलानि ॥ ११ ॥

गृह्णन् वरः स्वाञ्जलिना मृगाक्ष्या लाजाञ्जलिं होमविधौ चकाशे ।
माल्यापवेधग्लपनापराधनिर्मार्जनायानुनयन्निवेमाम् ॥ १२ ॥

अश्मानमारोपयितुं पदाब्जमालम्बमाने दयिते मृगाक्ष्याः ।
पादग्रहः प्राथमिकोऽयमस्याः प्रचीयतामित्यवदन्मुकुन्दः ॥ १३ ॥

---

१. तत्पूर्वमित्यादि । इदम्प्रथममुत्तानिते इति विशेषणार्थः.

कान्तः शरण्यो जगतां त्रयाणां तस्याः करस्थे चरणारविन्दे ।
ऐश्वर्यमुर्व्यादि सदाशिवान्तमव्याहतं तद् बुबुधे करस्थम् ॥ १४ ॥

आमुक्तमञ्जीरमलक्तकाङ्कमाकुञ्चितं किञ्चिदिव ह्रियान्तः ।
स्विन्नं करे स्विद्यति लग्नमैशे धन्याः पदं तद् ददृशुर्जनन्याः ॥ १५ ॥

आसीत् तदाविष्कृतहर्षबाष्पमाक्षिद्वयं काञ्चनमालिकायाः ।
आ मानुषादा च महेश्वरीयादानन्द†साम्राज्य इवाभिषिक्तम् ॥ १६ ॥

आधीयमानेऽश्मनि तत्पदाब्जे मञ्जीरघोषो मधुरो जजृम्भे ।
सद्यः समास्फालितदोर्द्वयेन मुक्तः स्मरेणेव जयाट्टहासः ॥ १७ ॥

प्रदक्षिणीकुर्वति* हव्यवाहं द्वन्द्वे जगन्मङ्गलधाम्नि तस्मिन् ।
प्रदक्षिणीचक्रुरिव प्रजानां दृशस्तदीयोत्पलदामदम्भात् ॥ १८ ॥

निर्वर्त्त्य वैवाहिकहोमशेषमम्भोजभूः कुम्भभुवोपदिष्टः ।
न्यवेशयद्रत्नमयेऽथ पीठे वामे वधूं दक्षिणतो वरञ्च ॥ १९ ॥

आसन्नमप्यन्तरलेशशून्यं मिथो न तृप्तिं मिथुनं तदूहे ।
अतृप्तयोरेकशरीरभावेऽप्यासत्तिरेषा कतमा तयोः स्यात् ॥ २० ॥

आशीर्भिरानुश्रविकीभिराद्यामाचारपद्यामनुपालयन्तः ।
संवर्धयामासुरिमौ समेता ब्रह्मर्षयो ब्रह्ममुखा हसन्तः ॥ २१ ॥

स दक्षिणाभिः परितोष्य विप्रान् सम्मान्य देवानुचितोपचारैः ।
विश्रान्तिहेतोरवरोधगेहं विवेश देवोऽथ तटातकायाः ॥ २२ ॥

धैर्योपदेशादसकृत् सखीभ्यां वाणीरमाभ्यां प्रतिबोधितायाः ।
आलम्बमानः करमम्बिकाया मञ्चे परार्ध्ये निषसाद देवः ॥ २३ ॥

ताम्राधरोष्ठं तरलायताक्षमास्विन्नमीषत्रपयावनम्रम् ।
वक्त्रं शनैरुन्नमयाम्बभूव मार्जन्निव स्वेदलवान् स तस्याः ॥ २४ ॥

ताम्बूलमासन्नसखीवितीर्णमादाय पर्याकुलितां ह्रिया ताम् ।
आलक्षयन्ती कमला सलीलमाह स्म पत्ये प्रतिपादयेति ॥ २५ ॥

कुतो गृहीता बलयास्त्वयेमे केनोपहारीकृत एष हारः ।
इत्यङ्गमङ्गं पतिराममर्श जिज्ञासयेवाभरणेषु तस्याः ॥ २६ ॥

---

† साम्राज्येत्यादिर्मेधुर इत्यन्तोऽशः खपुस्तके न लिखितः.

* ति हव्येत्यादिर्दृशइत्यन्तोऽशः खपुस्तके न लिखितः.

आपृच्छ्यमाना[1] दयितेन तत् तदवाङ्मुखी नोत्तरमाचचक्षे ।
निर्बन्धपृष्टा तु कथञ्चिदेषा मन्दस्मितेनोत्तरयाम्बभूव ॥ २७ ॥

माता तवेयं मलयध्वजस्य किं भोगिनी किं गृहिणीषु काचित् ।
इत्युक्तिभिः कोपयतापि पत्या प्रत्युत्तरं भ्रूकुटिरेव लेभे ॥ २८ ॥

तदिङ्गितानामयथावबोधात् समाचरन्तीभिरिवान्यदन्यत् ।
सलीँपयामास रुषा सखीभिः सङ्केतिताभिः स हसन् नवोढाम् ॥ २९ ॥

यदाह यत् प्रैक्षत यज्जहास यदास्त जोषं यदपि न्यषेधत् ।
सा तेन तेनैव शरीरलाभसाफल्यमापादयति स्म यूनः ॥ ३० ॥

स यावदित्थं समयाचकार[2] नवोढया नर्मपरो महेशः ।
तावज्जना भक्तकराः[3] समेत्य निर्वर्तितं पाकविधिं शशंसुः ॥ ३१ ॥

ते शासनात् तत्र महेश्वरस्य प्राक् ब्राह्मणान् भोजयितुं समेतान् ।
सम्मेलयन्ति स्म समन्ततोऽपि स्वयं तु भक्त्या सुमतिर्महर्षीन् ॥ ३२ ॥

असेवमानौ नटनं पुरारेरपोऽपि यौ जात्वपि नाददाते ।
तौ व्याघ्रपादश्च पतञ्जलिश्च सन्नेहतुर्हेमसभां प्रयातुम् ॥ ३३ ॥

आकर्ण्य तन्निश्चयमानिनाय तौ योगिनौ सुन्दरपाण्ड्यदेवः ।
आचष्ट चैनावभिगम्य भक्त्या पादे स्पृशन् प्रश्रयपूर्वमित्थम् ॥ ३४ ॥

सभानटः काञ्चनसंसदीव संसेव्यमानः सुरसिद्धसङ्घैः ।
हालास्यनाथोऽपि करोति नृत्तमस्मिन् सदा रूप्यसभान्तराले ॥ ३५ ॥

अत्रैव नृत्तं तरुणेन्दुमौलेरासेव्य माध्याह्निकमद्भुतं तत् ।
आगच्छतं क्षिप्रमनुग्रहीतुं प्राणाग्निहोत्राचरणादिहास्मान् ॥ ३६ ॥

इतीरितौ पाशुपतौ मुनी तौ तथेति गत्वा कनकाम्बुजिन्याम् ।
निर्वर्त्तयन्तौ नियमाभिषेकमासेदतुर्नृत्तसभां पुरारेः ॥ ३७ ॥

अन्तर्हितब्रह्मकपालजालमाबध्य दृश्येन्दुकलं कपर्दम् ।
आमुक्तवैयाकरणाङ्गदाङ्घ्रिरवातरत् तत्र तदा नटेशः ॥ ३८ ॥

मुरं पुरा यः स्वयमाजघान स एव देवो मुरजं तदानीम् ।
ससर्ज यस्तोलमसेवनीयं स एव तालं जगृहे तु वेधाः ॥ ३९ ॥

---

१. आपृच्छ्यमाना ईषत् पृच्छ्यमाना. २. समयाचकार समयं यापितवान्. ३. भक्तकरा अन्नकाराः. ४. तालं वृक्षविशेषम्.

प्रागेव यः पाण्ड्यसुतोपलम्भान्नाथः स्थितो नर्त्तितुकाम एव ।
भक्तानुकम्पामपदिश्य तस्य नृत्तं तदावर्त्तत निर्विशङ्कम् ॥ ४० ॥

आतोद्यगीतानुगपादतालमाविर्भवद्भावरसोत्तरङ्गम् ।
आवर्त्तवेगत्रुटिताङ्गहारमनृत्यदीशो ललिताङ्गहारम् ॥ ४१ ॥

उदञ्चितोऽङ्घ्रिश्चिरमुल्ललास नृत्ते स्थितावर्त्तकनाम्नि शम्भोः ।
चित्ते विलीने जतुवन्मुनीनां न्यासादिव स्पन्दयितुं न शक्यः ॥ ४२ ॥

वृत्तौ चकारेव विलम्बितायां मञ्जीरनादैः प्रणवोपदेशम् ।
तस्यां द्रुतायां स तदूर्ध्वलग्नां तुर्यामुपादीक्षदिवार्धमात्राम् ॥ ४३ ॥

स्वभावरम्याणि यथा यथासन् स्वाच्छन्द्यतस्तस्य विचेष्टितानि ।
तथा तथा पप्रथिरे जगत्यां शैलूषतन्त्रोपनिषद्प्रभेदाः ॥ ४४ ॥

तालान्तनृत्तारभटीषु तस्य निर्गच्छतां निश्वसितागमानाम् ।
आदौ महाव्याहृतितामवापुर्भूषाभुजङ्गेश्वरफूत्कृतानि ॥ ४५ ॥

उद्भिन्नरोमाञ्चमुदश्रुपूरमाश्चर्यसम्मूढमनन्यवृत्ति ।
आलेख्यविन्यस्तमिवास्त विश्वमानन्दनृत्तावसरे पुरारेः ॥ ४६ ॥

संव्यानसम्मृष्टमुखं भवान्या विस्रस्तचन्द्रार्धविलोभनीयम् ।
नृत्तान्तरम्यं वपुरिन्दुमौलेर्निध्याय तौ तुष्टुवतुर्मुनीन्द्रौ ॥ ४७ ॥

नम्रेषु चित्तान्नवनीतवृत्तेर्नाथ! त्वदीयादपि कोमलौ यौ ।
अस्मत्कृते तौ चरणौ यदित्थमायासितौ तत् प्रथमं क्षमेथाः ॥ ४८ ॥

त्वयीश! नृत्ताद्विरतेऽपि चित्तं त्वदास्पदं नौ परमाद्भुतेन ।
नाद्यापि नृत्ताद्विरतिं प्रयाति ततो नं किञ्चिन् प्रतिभां भजावः ॥ ४९ ॥

आवां प्रसादेन कृतार्थितौ ते याचावहे लोकहिताय किञ्चित् ।
नृत्तोत्सवः काञ्चनसंसदीव नित्योऽस्त्वमुष्यामपि संसदीति ॥ ५० ॥

तथेति दत्वाभिमतं तयोस्तन् प्रसेदिवान् लोकहितार्थनेन ।
देवोऽनुजग्राह पुनः स्वयं तौ दत्वा शिवज्ञानमनन्यलभ्यम् ॥ ५१ ॥

सेवावसाने पुरशासनस्य समागतान् भूमिसुरान् सुरांश्च ।
हैमेषु पीठेषु वितीर्णपाद्यानस्थापयत् कुम्भभवोऽथ भोक्तुम् ॥ ५२ ॥

ते भाविताश्चन्दनचर्चिकाभिः कर्पूरकाश्मीरकरम्बिताभिः ।
अभ्यर्चिता दक्षिणया च माल्यैरभुञ्जतान्नानि रसोत्तराणि ॥ ९३ ॥

शाकौदनव्यञ्जनसूपयूषैरसायनक्वाथरसप्रभेदैः ।
भक्ष्यैरसङ्ख्यैर्घृतशर्कराढ्यैः फलैर्विचित्रैरपि तृप्तिमापुः ॥ ९४ ॥

ते भक्ष्यभोज्यैः खलचूर्णलेह्यानिर्यूहपानीयगणैश्च चित्रैः ।
विस्मापिताः स्वां विधिवञ्चितेति जातिं निनिन्दुः शतशः सुधाशाः ॥

आपृच्छमाना विबुधा मनुष्यानास्वादभङ्गीमभिधां रसं च ।
अत्यादरादभ्यवजहुरित्थमाश्चर्यमग्ना इव तान् पदार्थान् ॥ ९६ ॥

आकर्ण्य गर्हाममृताशनत्वे तपःफले तत्र सुरैः प्रयुक्ताम् ।
वाताम्बुपर्णाशनवृत्तयोऽपि वाचंयमाः स्वानि जहुर्व्रतानि ॥ ५७ ॥

अनेकवक्त्रोदरपाणिचिह्नानालक्ष्य भूतेशगणानसङ्ख्यान् ।
तद्भिक्रियार्थं स्पृहयाम्बभूवुस्तत्र प्रजाः प्रत्यवसानसक्ताः ॥ ५८ ॥

इत्थं जगत् तर्पितमिन्दुमौलिर्निशम्य निर्वर्तितनित्यकर्मा ।
वध्वा समं भोजनवेदिकायामुपाविशन्मङ्गलतूर्यघोषैः ॥ ५९ ॥

वाणीविरिञ्चौ कमलामुकुन्दौ शचीमहेन्द्रौ च निषेदुरग्रे ।
हेरम्बषण्मातुरनन्दिनस्तु पार्श्वे निदेशेन शशाङ्कमौलेः ॥ ६० ॥

अथान्नपूर्णापरिविष्यमाणमन्नं शुचि स्वादु बहुप्रकारम् ।
आमोदयन् नर्मभिरान्तिकस्थानभुङ्क्त वध्वा सह चन्द्रचूडः ॥ ६१ ॥

स भुक्तशेषं कवलं प्रियायै समन्त्रमेकं प्रथमं ददौ यत् ।
हेतुस्तदासीदिव भाविनीनां तद्भुक्तशेषग्रहसन्ततीनाम् ॥ ६२ ॥

पक्वं फलं मान्मथमेतदद्य जामातुरेवार्हमिति ब्रुवाणम् ।
सत्यं प्रसादेन तु माधवस्य तल्लब्धमित्याह हसन् स शौरिम् ॥ ६३ ॥

पत्युः प्रियं बिम्बफलं विनैव फलान्यसंख्यानि मुधाहृतानि ।
अतः पिपासा विरतास्य नेति वाणी वधूमाक्षिपति स्म राज्ञीम् ॥ ६४ ॥

भोज्यानि यानि त्रिदिवेऽद्भुतानि तान्याददानः स्वयमीषदीषत् ।
सासूययोरात्मजयोर्महेशः शैलादये तत्र दयाम्बभूव ॥ ६५ ॥

---

१. यूषो रसः. २. क्वाथः कषायः. ३. खलं दधिघनः. ४. निर्यूहः कषायः. ५. मान्मथं दाधित्थं अथ च पात्रशरम्. ६. माधवस्य वसन्तमासस्याथ च विष्णोः. ७. दय दाने.

भुक्तोत्थितो नमकथाभिरित्थं विसृज्य विश्रान्तिकृते वयस्यान् ।
सज्जीकृतं प्राप तटातकायाः शय्यागृहं सुन्दरपाण्ड्यदेवः ॥ ६६ ॥

ततो जनाः पाकगृहे नियुक्तास्तत्रान्नराशीन् शतशोऽवशिष्टान् ।
आवेदयामासुरनुक्रमेण देव्याः पुरः काञ्चनमालिकायाः ॥ ६७ ॥

कोट्यस्त्रयस्त्रिंशदिति प्रतीता सङ्ख्या त्वियं काचन देवतानाम् ।
सङ्ख्या गणानामपि मानवानां सङ्ख्यायते भुक्तवतां न कैश्चित् ॥ ६८ ॥

शाकेषु सूपेषु फलेष्वपूपेष्वन्नेषु माध्वीगुडशर्करासु ।
शिष्टानि शक्ता न वय प्रवक्तुं शाधि त्वमेषामुपयोगयोगम् ॥ ६९ ॥

इतीरितं काञ्चनमालिका तच्चेटीभिरासूचयदात्मजायाः ।
सा च प्रियं किं क्रियतामिहेति मन्दाक्षमन्दाक्षरमन्वयुङ्क्त ॥ ७० ॥

तामाह देवस्त्वमसीह राज्ञी दवी त्रयाणामपि विष्टपानाम् ।
तत्तावकीमन्नसमृद्धिमेतां भोक्तुं जनाः के मम सम्भवेयुः ॥ ७१ ॥

कुण्डोदरो नाम गणोऽयमेकस्तथापि शिष्टः परिचर्यया मे ।
भोक्तुं न यस्यावसरः पुराभूत् तं भोजय स्वोदरपूरमेनम् ॥ ७२ ॥

इत्यादिशन्नन्नसमृद्धिगर्वमपाचिकीर्षुः स नृपालपत्न्याः ।
देवो गणस्य त्रिजगच्छरीरवैश्वानरात्मा जठरं विवेश ॥ ७३ ॥

पौरोगवास्तत्र तया नियुक्ताः प्रवेश्य तं भोजनमण्डपान्तः ।
विस्तार्य पत्राणि विशङ्कटानि भक्ष्याणि भोज्यानि ततोऽभ्यवर्षन् ॥ ७४ ॥

प्राणाहुतेः पर्युपयुक्तमन्नमप्यत्र दृष्ट्योपलभे न यावत् ।
तावत् कथं भोक्तुमुपक्रमेयेत्यूचे स भुङ्क्ष्वेति वदत्सु रोषात् ॥ ७५ ॥

सा पाण्ड्यदेवी सुमतिश्च तत्र समेत्य विस्मेरविलोचनान्तौ ।
आपूपिकैरान्धसिकैश्च भूयोऽप्यदापयेतां मुहुरन्नराशीन् ॥ ७६ ॥

पात्राधिकं प्रेक्ष्य स भक्तराशिं व्यामिश्रितं व्यञ्जनशाकभेदैः ।
प्राणाहुतिं प्राथमिकीं कथञ्चिन्निर्वर्त्य तस्थौ निभृतं क्षुधार्त्तः ॥ ७७ ॥

सम्भ्रम्य दास्योऽथ नृपालपत्न्याः सम्भूय सम्भूय यथोपलब्धम् ।
भक्ष्याणि भोज्यान्यदुरक्रमेण पक्वान्यपक्वान्यपि धावमानाः ॥ ७८ ॥

---

१. 'चर्मोदरयोः पूरेः' (३-४-२१) इति णमुल्.

प्राणाहुतीः पञ्च ततः कथञ्चित् प्रसाध्य खिन्नः क्षुधया महत्या ।
स तावतीनां परिवेषिणीनां न चक्षमे तत्र गणो विलम्बम् ॥ ७९ ॥

अथान्नकूटैरभितोऽप्यसंख्यैरपूपशैलैश्च निरन्तरालम् ।
महानसं स स्वयमाविवेश महाह्रदं मत्त इव द्विपेन्द्रः ॥ ८० ॥

तत्रान्नकूटान् सह भक्ष्यवर्गैरालोडयन् दृष्टिपथं प्रविष्टान् ।
षष्ट्या नवत्या च शतेन चैषां स एकमेकं कबलं चकार ॥ ८१ ॥

अन्नोच्चयानास्तरणैः सहैव दुग्धानि भाण्डैर्दृतिभिर्धृतानि ।
स्वीकुर्वतोऽस्माच्चकिताः समन्तात् प्रदुद्रुवुः पाकगृहे नियुक्ताः ॥ ८२ ॥

सुरद्रुमाः स्वर्गगवी च तत्र सम्प्रार्थ्यमाना नरपालपत्न्या ।
यान् यानसंख्यानसृजन् पदार्थांस्ते तेऽभवन्नस्य किलोपदंशाः ॥ ८३ ॥

गोधूममाषाढकमुद्गशालिश्यामाकनीवारतिलादिमानि ।
धान्यानि चान्यानि स चर्वति स्म कुड्यैः कुसूलैर्मणिकैश्च[1] कुम्भैः ॥ ८४ ॥

सम्भ्रान्तचेटीशतघुष्यमाणतच्चेष्टिताकर्णनजातलज्जाम् ।
अभिद्रवन्तीं स्वयमेव देवीमपाङ्गयन् सस्मितमास्त देवः ॥ ८५ ॥

अथ क्षणादक्षयमन्नगर्त्तं ससर्ज तस्मै शफरेक्षणा यम् ।
तमप्यसौ स्थण्डिलमात्रशेषं चक्रे महद्भिः कबलैश्चतुर्भिः ॥ ८६ ॥

अपूर्णमन्नैरुदरं ममेदमापूरयिष्ये सलिलेन वेति ।
कुण्डोदरे याचति पाण्ड्यकन्या सस्मार गङ्गां तरलोर्मिसङ्घाम् ॥ ८७ ॥

अथाभ्रसिन्धुर्मलयाद्रिशृङ्गादाविर्भवन्ती विपुलैस्तरङ्गैः ।
आप्लावयन्तीव भुवं समस्तामभ्यर्णमागान्मधुरानगर्याः ॥ ८८ ॥

स पाणिना वक्त्रनिवेशितेन तथा पपौ तामपि दिव्यसिन्धुम् ।
कौतूहलात् प्रेरयतस्तमासीद् गङ्गाधरस्यापि यथानुतापः ॥ ८९ ॥

स्वीकुर्वतस्तां सिकतावशेषां सकृद्वयीमालिहतश्च भूयः ।
सा तस्य तां ग्लानिमवेक्षमाणा गौरी सलज्जा गिरिशं बभाषे ॥ ९० ॥

अजानती यद् भवतः प्रभावमन्नोच्चयोच्छेषमवादिषं प्राक् ।
तन्मर्षयन् मानद! तर्षमेनं कुण्डोदरस्यास्य निवारयेति ॥ ९१ ॥

---

१. मणिकैर्बृहद्भाण्डैः.

व्याजेन केनापि गिरं त्वदीयां शुश्रूषमाणो यदकार्षमित्थम् ।
तत् संहृतं देवि! तव प्रभावादश्रान्तपूरास्तु वियन्नदीयम् ॥ ९२ ॥

वेगागता वेगवतीति नाम्ना ख्याता नदीयं भविता भुवीति ।
प्रसादयन् पाण्ड्यसुतां मृदूक्त्या रेमे तया सुन्दरपाण्ड्यदेवः ॥ ९३ ॥

अथापरेद्युस्त्रिदशैः समस्तैरगस्त्यमुख्यैः परमर्षिभिश्च ।
पाण्ड्याधिराज्ये कलिताभिषेकः शशास पृथ्वीं स तया महिष्या ॥ ९४॥

इत्थं स पाण्ड्यतनयाचरणावलम्बसौभाग्यसम्पदुपपन्नसमस्तराज्यः ।
देवान् विसृज्य निखिलानुचितोपचारैर्देवः ससागरवनां बुभुजे धरित्रीम् ॥ ९५ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते

शिवलीलार्णवे द्वादशः सर्गः ।

अथ त्रयोदशः सर्गः ।

सम्प्राप्येत्थं पाण्ड्यराज्याभिषेकं सार्धं देव्या सुन्दरः पाण्ड्यदेवः ।
आसीमाद्रेर्निर्हृताराति शल्यां पृथ्वीं रेमे विभ्रदेकातपत्राम् ॥ १ ॥

साब्धिद्वीपा साटवीदुर्गशैला सर्वाप्युर्वी यत्तुलाकोटिमूर्ध्नि ।
लग्ना दृष्टा रत्नवद् बाहुना तां तस्येदानीं बिभ्रतः कः प्रयासः ॥ २ ॥

या भूयोभिः पाण्डरैरातपत्रैः सञ्छन्ना भूराप सन्तापमन्तः ।
सैवाहृप्यच्छाद्यमाना तदानीमेकच्छत्रच्छायया तस्य राज्ञः ॥ ३ ॥

नायष्टारो नाकृतब्रह्मविद्या नादातारो नाप्यधर्मे प्रसक्ताः ।
विप्राः किन्तु त्यक्तपाण्डित्ययोगाः स्थातुं बाल्ये तस्य राष्ट्रे चकाङ्क्षुः ॥ ४ ॥

चातुर्वर्ण्यं चातुराश्रम्यरम्यं चातुर्वैद्यं तच्चतुर्वर्गयोगम् ।
दृष्ट्वा तेन स्थापितं निर्विशङ्कं तस्थौ धर्मस्तत्र पौदश्चतुर्भिः ॥ ५ ॥

गावो धान्यं भूषणान्यम्बराणि स्वर्णं रूप्यं यानि चैवंविधानि ।
स्वामिन्यादौ विप्रलब्धे तदीयं सर्वं जज्ञे विप्रलब्धं तदानीम् ॥ ६ ॥

---

१. वाञ्छिते अथ च विप्रैः लब्धे.

कैलासाद्रिं शासतः कल्पकोटीः पूर्णः कोशो यस्य भिक्षाकपालैः ।
प्राप्तेनेत्थं पाण्ड्यराज्याधिपत्यं लब्धा सद्यस्तेन लक्ष्मीरपारा ॥ ७ ॥

शैवाः शाक्ता वैष्णवाः सांख्यनिष्ठा योगाचार्या ब्रह्मविद्याविदोऽपि ।
गत्वा गत्वा तं यथैकं प्रपन्नास्तद्वत् तास्ताः कीर्त्तयोऽपि त्रिलोक्याम् ॥ ८ ॥

येऽस्मिन्नग्रास्तेजसा तं प्रपन्ना ये तु द्विष्टास्ते हताः सङ्गरेषु ।
भित्त्वा भानोर्बिम्बमूर्ध्वं पतन्तः पर्यावृत्य प्रापुरन्ते तमेव ॥ ९ ॥

वक्त्राम्भोजान्निस्सृतं वाक्यमात्रं पश्यन् देवो वेदवादायमानम् ।
सङ्कुचाधिक्याद्वेदशाखासु भीतः स्तोकस्तोकं व्याजहाराप्रमत्तः ॥ १० ॥

सीमन्यम्भोविप्लवे सेतुबन्धे गोसञ्चारे सार्थसम्मेलने वा ।
या मीनाक्ष्या स्थापिता प्राक् प्रजानां तां मर्यादां स प्रमाणीचकार ॥ ११ ॥

कोशान् पञ्चैवाहुरन्नादिरूपान् यस्याशेषं शासतोऽमुं प्रपञ्चम् ।
संख्यातीता हेमरत्नादिरूपास्तस्येदानीं तेऽभवन् पाण्ड्यभर्तुः ॥ १२ ॥

पाण्ड्याध्यक्षः पाण्ड्यजामातृदेवः प्रेयान् राज्ञ्याः पालको द्रामिडानाम् ।
इत्याख्याभिः प्रीतिरस्याधिकासीदात्मब्रह्मज्योतिरादिश्रुतिभ्यः[1] ॥ १३ ॥

या मीनाक्ष्यास्तावती राज्यशक्तिः सा सङ्क्रान्ता तत्र भूयश्चकाशे ।
प्राप्तोत्कर्षा सानुनि स्फाटिकाद्रेः पत्युर्भासां भास्वरेवांशुरेखा ॥ १४ ॥

स्वे स्वे धर्मे स्थापिताः सर्व एव क्ष्मापालत्वं बिभ्रता तेन लोकाः ।
कालस्त्वेकश्च्यावितः स्वाधिकाराद् धर्मैकान्त्यं तन्वता मानवेषु[2] ॥ १५ ॥

इत्थं राज्यं बिभ्रता तेन राज्ञा देवी जातु स्फारचिन्तानिमग्ना ।
भूयो भूयो हेतुमत्रानुयुक्ता प्राह स्मेदं प्राणनाथं मृगाक्षी ॥ १६ ॥

सञ्चिन्वाना तावकीनात् प्रसादाद् धर्मं तं तं नाथ! माता मदीया ।
जातौत्सुक्या तीर्थयात्राविधाने स्नातुं सिन्धौ श्वः प्रतिष्ठासते सा ॥ १७ ॥

इत्याकर्ण्य प्रेयसीखेदमूलं तत्रानेष्यन् सागरान् सप्त देवः ।
सस्मारात्रे सद्य एवास्य तेऽपि प्रादुर्भूता मूर्त्तिमन्तः प्रणेमुः ॥ १८ ॥

प्राचि स्थाने सोमसौन्दर्यनेतुः प्रागेवास्ते कश्चिदेकस्तटाकः ।
सर्वे तस्मिन् सन्निधत्तेति देवो †नामादेशं[3] सागरानादिदेश ॥ १९ ॥

---

१. श्रुतयो व्यपदेशाः ताभ्यः. २. कालो वैवस्वतः. ३. नामादेशं नामग्राहं । 'नम्न्यः दिशिग्रहोः' (३-४-५८) इति णमुल् .

† 'रामादेशम्' इति खपुस्तके पाठः,

पश्यन्तीनामग्रतस्ते प्रजानां त्यक्त्वा रूपं पौरुषं सिन्धुराजाः ।
दृश्यन्ते स्म व्योम्नि दूरे तरङ्गैराजिघ्रन्तो दिक्तटानुत्तरङ्गैः ॥ २० ॥

स्वं स्वं रूपं संक्षिपन्तोऽपि ते ते कासारान्तस्सम्भवार्हं समुद्राः ।
आलक्ष्यन्त स्पष्टमत्यद्भुताभिर्वल्गन्तीभिः पङ्क्तिभिर्वीचिकानाम् ॥ २१ ॥

आक्रामद्भिर्व्योमकक्ष्यामकाण्डे स्रोतोभिस्तैः स्वीकृताः सागराणाम् ।
जग्मुर्मेघास्तत्र शैवालभावं विद्युल्लेखा विद्रुमत्वं च तेषाम् ॥ २२ ॥

आसप्तर्षिस्थानमाक्रान्तिहेतोः संवर्त्तेषु द्यामिव द्रष्टुकामैः ।
आरूढे व्योम्न्यर्णवैरभ्रसिन्धोः सव्यं चक्षुः शश्वदस्पन्दतोच्चैः ॥ २३ ॥

भागीरथ्या जातु लेभेऽभिषेकं पर्याप्तं यः प्राग्युगे व्योमकेशः ।
द्रव्यैस्तैस्तैर्दुग्धदध्याज्यमुख्यैर्द्वैतीयीकः सोऽस्य जज्ञेऽभिषेकः ॥ २४ ॥

पश्यत्यग्रे पाण्ड्यदेवे ततस्ते पारावाराः पल्वले तत्र पेतुः ।
पार्श्वस्थास्रोर्ऋत्विजः कुम्भयोनेः प्रायस्तालुन्यार्द्रतामावहन्तः ॥ २५ ॥

क्षीरं सर्पिर्वारुणीमिक्षुसारं दध्यप्यभ्रे दुर्लभं पातुकामाः ।
विप्वग् देवाः सम्पतन्तो विमानैः स्रोतस्येषां कीटमज्जं ममज्जुः ॥ २६ ॥

क्षारं वारि क्षीरमुख्यानि वस्तून्येकं सर्वाण्येकदैवाजघान ।
मौढ्यं ह्येकं हन्ति राशिं गुणानां शौर्यौदार्यस्थैर्यगाम्भीर्यमुख्यम् ॥ २७ ॥

शब्दस्पर्शौ रूपगन्धौ रसश्च प्राप्तास्तीर्थे चित्रतां तत्र सद्यः ।
आस्तामेतन्मज्जतामत्र नृणां स्वर्गेऽप्यासीच्चित्रता यद्विचित्रा ॥ २८ ॥

सर्वे गन्धा यत्र सर्वे रसाश्च प्रादुर्भूतास्तीर्थराजे हि तस्मिन् ।
स्नानालभ्ये तादृशि ब्रह्मभावे न्यायज्ञानां नागमाः पर्युपास्याः ॥ २९ ॥

नीरक्षीरे द्वे विवेक्तुं प्रगल्भा हंसास्तस्मिन् सर्वसङ्घातरूपे ।
भग्नोत्साहा मत्स्यमण्डूककूर्मैः प्राप्ताः साम्यं न प्रचेलुर्विलज्जाः ॥ ३० ॥

पत्या सार्धं योषितोऽधिक्रियन्ते तीर्थे स्नातुं पुत्रवत्योऽथवेति ।
श्रुत्वा शास्त्रं चिन्तया दूयमानां श्वश्रूमन्तस्तत्र शुश्राव देवः ॥ ३१ ॥

आवर्त्तार्हं स्थानमुल्लङ्घ्य सर्वे सम्प्राप्तास्तच्छाश्वतं धाम शम्भोः ।
प्रत्यानेयो वल्लभोऽस्याः कथं वेत्यन्ताश्चिन्तामाप देवस्ततोऽपि ॥ ३२ ॥

---

१. कीटमज्जं ममज्जुः कीटा इव मग्नाः, 'उपमाने कर्मणि च' (३-४-४५) इति णमुल्.

पत्युश्छायां पाण्ड्यदेव्याः स कामप्यानीयाग्रे दर्शयन् प्रेयसीं स्वाम् ।
तद्वृत्तान्तस्मेरदृष्ट्यानया तां वृत्तान्तं तं वेदयामास देवः ॥ ३३ ॥

सा संहृष्टा तां निशम्य प्रवृत्तिं पश्यन्ती च प्राणनाथं विमाने ।
आलिङ्गन्ती निभरं मीननेत्रां भूयो भूयो मूर्ध्नि चैनामजिघ्रत् ॥ ३४ ॥

त्वन्मातृत्वात् सिद्धमेवापवर्गं मन्वानाहं तेन हृष्टा न तावत् ।
यावत् तातं वीक्षमाणा तवेति स्तावंस्तावं सा बभाषे कुमारीम् ॥ ३५ ॥

लब्ध्वा योगं लज्जमाना विमानादाप्लुत्यारादागतेन प्रियेण ।
दत्तानुज्ञा देवपाण्ड्येन देवी सस्नौ तीर्थे संप्तरत्नाकरे सा ॥ ३६ ॥

दीनं रूपं प्रेयसा विप्रयोगाद् देव्याः क्षान्त्यास्तत्र दृष्टं जनैर्यत् ।
उन्मज्जन्त्यास्तत् ततः पर्यणंसीच्चन्द्रापीडं चारुहासं त्रिणेत्रम् ॥ ३७ ॥

सा गच्छन्ती शाश्वतं धाम शम्भोः सार्धं पत्या सर्वसौभाग्यधाम ।
क्लेशं कन्याविप्रयोगप्रसक्तं किञ्चिच्चित्ते धारयन्तीदमूचे ॥ ३८ ॥

अद्य ज्ञातं ब्रह्म पूर्णं युवामित्यद्योत्सन्नः पाशवर्गोऽखिलो मे ।
दूयेऽथापि त्वर्धविच्छिन्नमासीत् त्वत्सौभाग्यालोकभाग्यं किलेति ॥ ३९ ॥

शुश्रूषस्व प्रेयसः पादपद्मं क्षान्त्या धृत्या प्रेमवत्या च भक्त्या ।
लब्ध्वा पुत्रं राज्यभारेऽभिषिच्य द्रष्टास्मि त्वां स्वं पदं प्रत्युपेताम् ॥ ४० ॥

इत्यादिश्य प्रस्थितायां जनन्यां सर्वोत्तीर्णं शाङ्करं धाम दिव्यम् ।
आनन्दोत्थैः शोकजैश्चाश्रुपूरैर्वक्त्रं देव्या दूषितं भूषितं च ॥ ४१ ॥

ताभिस्ताभिस्तत्प्रसङ्गोचिताभिर्मार्जन् वाग्भिर्मानसं क्लेशमस्याः ।
वारिक्रीडां वारिजाक्ष्यानयासावानन्दाब्धावाचचार प्रवीरः ॥ ४२ ॥

दीनान् दानैर्देवता यज्ञभागैरार्त्तानार्तिच्छेदनैस्तत्तदर्हैः ।
जिज्ञासूनप्यात्मविज्ञानदानैर्देवो रक्षन् पालयामास पृथ्वीम् ॥ ४३ ॥

अन्तर्वत्नीं जातु कालेन पत्नीं दर्शं दर्शं पिप्रिये देवपाण्ड्यः ।
केकीवाम्भस्सम्भृतां मेघमालां माध्वीगर्भां पद्मिनीमप्यळीव ॥ ४४ ॥

यत् कार्तस्वं यौवनेनाक्ष्णि दत्तं यच्चानीतं दौहृदेनाथ तस्याः ।
प्रागल्भ्याय प्राभवत् सर्वमेतत् तत्सम्भूतेरद्भुतं मीनकेतोः ॥ ४५ ॥

---

१. सप्तानां रत्नाकराणां समाहारः सप्तरत्नाकरं तस्मिन् . बहुव्रीहिर्वा.

पुष्टान्यङ्गान्यापुरस्याः कृशत्वं नित्यं कार्श्यं निर्जहौ मध्यदेशः ।
पर्यायेण ह्रासवृद्ध्योः प्रवृत्तिस्तत्राप्यासीदीदृशः कालभेदः ॥ ४६ ॥

अन्योन्येन स्पर्धमानावुरोजावास्तामस्या यौवनोपक्रमं यौ ।
स्पर्धा मुख्यामद्य तावन्वभूतां सङ्घर्षणान्योन्यमासादितेन ॥ ४७ ॥

शक्तिः ख्याता यावती या च तस्याः सर्वाप्येषालम्भि गर्भेण नूनम् ।
नो चेदित्थं स्यात् कथङ्कारमस्याः स्रातुं पातुं स्पन्दितुं चाप्यशक्तिः ॥ ४८ ॥

केन्द्रे[2] चन्द्रे देशिके चामराणामृक्षे रौद्रे गौद्रवृत्तिः परेषु ।
प्रादुर्भूतः पाण्ड्यवंशस्य भूत्यै तस्या गर्भात् तारकारिः कुमारः ॥ ४९ ॥

आनेष्यन्ते यानि तेनात्मजेन स्वर्णान्यग्रे मेरुमूलादमीषाम् ।
चक्रे देवः कोशगेहेऽवकाशं भूदेवानां भूरिदानच्छलेन ॥ ५० ॥

राज्ञां पश्यन् राज्यतन्त्रस्थितानां बालो दोषान् बाहुमुख्यप्रयुक्तान्[3] ।
साब्धिद्वीपां पालयिष्यन् धरित्रीं चक्रे देवः षण्मुखोऽप्येकमुख्यम्[4] ॥ ५१ ॥

उग्रस्यर्क्षे जातमुग्रं प्रकृत्याप्युद्गन्तारं तेजसा च श्रिया च ।
जानन् बालं शासनात् कुम्भयोनेश्चक्रे नाम्नाप्युग्र इत्येव देवः ॥ ५२ ॥

मीमांसाङ्गन्यायधर्मेतिहासैः सार्धं वेदाः स्वस्वशाखासमेताः ।
प्राप्ते काले प्रत्यभुः पाण्ड्यसूनोर्द्वारं कृत्वा देशिकस्योपदेशम् ॥ ५३ ॥

दैतेयारिर्येन खड्गे विनीतश्चापे शिष्यो जामदग्न्यो यदीयः ।
साक्षादासीन्मेरुधन्वा स देवः शस्त्रास्त्राणां शासिता तस्य यूनः ॥ ५४ ॥

कन्या ख्याता कान्तिमत्याख्ययासीद् भास्वद्वंश्या सोमचूडस्य राज्ञः ।
पित्रा दत्तां तामुपानीय देवः पाणौ तेन ग्राहयामास यूना ॥ ५५ ॥

शक्तिर्दण्डश्चक्रमित्यायुधानि त्रीणि प्रौढज्वालमालाकुलानि ।
दत्वा तस्मै देवदेवोऽभ्यषिञ्चत् प्रह्लीभूतं पाण्ड्यराज्ये कुमारम् ॥ ५६ ॥

प्रागासीद्यो देवसेनापतिः स प्रापेदानीं पाण्ड्यसेनापतित्वम् ।
दैतेयः प्राक् तारको निर्जितोऽद्य त्वज्ञानाद्वेस्तारकस्तात एव ॥ ५७ ॥

१- 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' (२ ४-२१) इति नपुंसकता । यौवनोपक्रम्यमाणमिति स्पर्धनक्रियाविशेषणम् . २ केन्द्रे लग्नस्थे सतीत्यर्थः. ३. बाहुमुख्यप्रयुक्तान् बाहुभिर्मुख्यं यथा भवति तथा प्रयुक्तान् अथ च बहुमुख्यत्वेन प्रयुक्तान् ४. ऐकमुख्यं एकमुखत्वम् .

पृथ्वीं सर्वामर्पयित्वा कुमारे पृथ्वीं कीर्त्तिं केवलं गृह्णतः स्वाम् ।
सार्धं देव्या वत्सराणां सहस्राण्येवं षष्टिः षट् च तस्य व्यतीयुः ॥ ५८ ॥

इत्थं पाल्या भूमिरित्थं विजेया दृष्टा इत्थं वर्त्तितव्यं त्वयेति ।
आदिश्योग्रं दम्पती मूलालिङ्गे मीनाक्ष्यां च प्रापतुस्तौ प्रवेशम् ॥ ५९ ॥

तौ मीनाक्षीसुन्दरेशात्मनाथच्छन्नौ किञ्चित् प्रत्यहं सेवमानः ।
चक्रे राज्यं नामयन् राजवंश्यानुग्रंपश्यैः शासनैरुग्रपाण्ड्यः ॥ ६० ॥

ईजे शम्भुं यच्छतेनाश्वमेधैर्यश्चाभुङ्क्त स्वर्गभोगान् स भूमौ ।
तेनासूयां तत्र शक्रो बबन्ध प्रायेणायं पामराणां स्वभावः ॥ ६१ ॥

आक्रम्याम्भस्सम्प्लवै राजधानीमुन्मर्यादैरुग्रपाण्ड्यस्य राज्ञः ।
राष्ट्रं चास्य स्वीकुरुष्वेति शक्रो नेदीयांसं दक्षिणाढिंध न्ययुङ्क्त ॥ ६२ ॥

अर्धे रात्रेरप्रसक्ते कथञ्चिद् वर्षे वाते दुर्दिने वा क्षणेन ।
सन्नद्धद्धिः सर्वतो वीचिसङ्घैः पारावारः स्वात् पदादुच्चचाल ॥ ६३ ॥

एकैकोर्मिस्पन्दमात्रादपि क्ष्मां क्रोशं क्रोशद्वन्द्वमप्यावृणानः ।
भीमैर्घोषैर्भीषयन्नम्बुराशिर्ग्रामं ग्रामं मज्जयन् निर्जगाम ॥ ६४ ॥

उच्चैरुच्चैरुत्पतन्तः पतन्तो घ्नन्तो जन्तून् गण्डशैलान् क्षिपन्तः ।
आवृण्वानाः सैकतैरद्रिकूटानभ्यक्रामन्नूर्मयो वारिराशेः ॥ ६५ ॥

वल्गन्तोऽग्रे दुर्ग्रहा वीचिकानां जातोत्साहा जन्तवः सागरीयाः ।
व्यादायास्यं व्याघ्रसिंहद्विपादीन् वन्यान् सत्त्वान् लीलयैवाग्रहीषुः ॥ ६६ ॥

इत्थं पुर्या योजने योजनार्धं यावत् सिन्धुर्नाजिहीते निशीथे ।
तावत् स्वप्ने बोधितस्तां प्रवृत्तिं सूक्त्या शम्भोर्जागरामास देवः ॥ ६७ ॥

आरुह्य द्रागभ्रमातङ्गकल्पं क्रुद्धो देवः कुञ्जरं किञ्चिदुच्चैः ।
पाणौ कुर्वन् शक्तिमीशेन दत्तां पाण्ड्यः पारावारमभ्युज्जगाम ॥ ६८ ॥

शैलेनेवोत्सर्पता कज्जलानां व्योम्नेवाधो धावता सन्निपत्य ।
सोऽभूत् तेन स्रोतसा वारिराशेर्हृष्टो देवः सद्य एवाथ रुष्टः ॥ ६९ ॥

नायं कालः कौतुकं कर्तुमस्मिन् नश्यत्स्वेवं प्राणिषूच्चावचेषु ।
इत्यालोच्य प्रज्वलन् प्रज्वलन्तीं पाण्ड्यः शक्तिं पातयामास सिन्धौ ॥ ७० ॥

शीत्कुर्वाणा सा विशन्ती समुद्रे सर्वं पाथः सम्भ्रमत्कूर्मनक्रम् ।
उच्छ्वासेनैकेन यान्ती पिबन्ती जह्रे भूमेः प्राक्तनं चार्द्रभावम् ॥ ७१ ॥

मर्यादाब्धेर्मा विलोपीति शक्तिं प्रत्याहृत्य प्रज्वलन्तीं स भूयः ।
तत्संसिद्धां तावतीमप्यदत्त क्षोणीं देवः सुन्दरेशाय सद्यः ॥ ७२ ॥

आकैलासादा च लङ्कोपकण्ठाज्जाते दैवाज्जात्वनावृष्टियोगे ।
राज्ञः सर्वान् मेलयन् पर्यपृच्छद् राजा पाण्ड्यः कुम्भयोनिं विधेयम् ॥ ७३ ॥

तस्यादेशादर्चनाभिः प्रणामैस्ते ते वृष्टिं देवराजं ययाचुः ।
दैन्यं त्वेतन्मीननेत्रात्मजस्य स्वान्ते जातु स्वादुतां नाबभार ॥ ७४ ॥

अभ्यर्णेऽसौ जातुचिच्चन्दनाद्रेराखेटार्थं पर्यटन् पाण्ड्यदेवः ।
स्वच्छासीनान् पुष्कलावर्तकादीन् शृङ्गोत्सङ्गे तस्य मेघानपश्यत् ॥ ७५ ॥

कः सुत्रामा कात्र याच्ञा वराके वृष्टिर्लभ्या विक्रमेणेति देवः ।
मत्वा भृत्यैर्ग्राहयन्नम्बुवाहान् कारागारे वासयामास बद्धान् ॥ ७६ ॥

केचिन्मेघास्तत्र चोद्यानपालैः केचिच्छेकान्[2] पालयद्भिर्मयूरान् ।
आकृष्यन्त स्वैरमारक्षकाणां[3] सौहार्देन द्विस्सकृद् गूढमह्नाम् ॥ ७७ ॥

नश्यद्गर्जा लुप्तविद्युद्विलासाः संशुष्यन्तः साध्वसेनाम्बुवाहाः ।
धूलीजालैर्धूसरा धूमशेषास्तत्रावात्सुः शासनात् तस्य राज्ञः ॥ ७८ ॥

आपातालादा च सप्तर्षिलोकादम्भोभिर्यैं विश्वमाप्लावयन्ते ।
तानम्भोदांस्तत्र रुद्धान् निशम्य क्रुध्यन्निन्द्रस्तेन योद्धुं प्रतस्थे ॥ ७९ ॥

ज्यानिर्घोषच्छादिताशावकाशं बाणासारध्वस्तहस्त्यश्वयोधम् ।
रक्तस्रोतःपातरक्तं समन्ताज्जज्ञे युद्धं तस्य चाखण्डलस्य ॥ ८० ॥

चापोन्मुक्तैः सायकौघैरमोघैर्वेधं वेधं व्योमयानादमर्त्यान् ।
यूथंयूथं पातयन् कौतुकेन श्येनम्पातामाचचारेव वीरः ॥ ८१ ॥

येऽवागृह्णन् खेचरा वृष्टिमुर्व्यां तेषामेवोज्जासयन्नङ्गमङ्गम् ।
मर्माविद्धिर्मार्गणैरुग्रपाण्ड्यश्चक्रे वृष्टिं मज्जमांसास्रविस्राम् ॥ ८२ ॥

उन्मर्यादैरुत्पतद्भिस्तदस्रैः कीर्णे विप्वक् कण्टकौघैरिवाग्रे ।
स्थातुं यातुं स्पन्दितुं चाप्यशक्ता तस्तम्भेऽसौ वाहिनी जम्भहन्तुः ॥ ८३ ॥

---

१. अयं श्लोकः खपुस्तके नास्ति. २. छेकान् गृहाश्रितान्. ३. नगररक्षिणाम्. ४. श्येनपातोऽस्त्यस्यां क्रीडायामिति श्येनम्पा॰ नाम. 'घञः सास्यां क्रियेति ञः' (४-२-५२) इति ञः. ५. जासिनिप्रहणेति (२-३-५६) षष्ठी.

तत्कोदण्डोन्मुक्तनाराचधारासद्यःकृत्तभ्रश्यदश्वेभयोधम् ।
हाहाकुर्वत्सिद्धगन्धर्ववर्गं शौनासीरं तत्र नासीरमासीत् ॥ ८४ ॥

मर्त्त्यां युद्धे पातिता देवभावं लब्ध्वा देवीर्धावमाना वरीतुम् ।
धावद्देवस्त्रैणमुद्भ्रान्तपालं* चक्रुः स्वर्गं सम्प्रवृत्तापवर्गम् ॥ ८५ ॥

अस्त्रैरस्त्रं वारयन्नुग्रपाण्ड्यः शस्त्रैः शस्त्रं शास्त्रिणश्चावभिन्दन् ।
जातस्तातस्याक्षिकोणात् तृतीयाज्ज्वालोच्चैर्जातवेदा इवान्ते ॥ ८६ ॥

पश्यन् पाण्ड्यो वज्रमिन्द्रेण दत्तं प्रायुङ्क्तोग्रं चक्रमीशादवाप्तम् ।
तद् दम्भोलिं स्तम्भयत् तस्य मौलिं भित्त्वा भूयः पाणिमस्याजगाम ॥८७ ॥

भग्ने शक्रे भग्नकोटीरकोटौ धावत्यग्रे मुक्तकेशं सुधाशाः ।
चेलुर्विष्वक् चण्डवातावधूता दूरे दूरे तूलपिण्डा इवाग्रे ॥ ८८ ॥

क्रन्दद्गन्धद्विपमपसरत्सैन्धवोद्धूतयोध-
प्रत्युद्धारव्यसनविमुखापेतपादातजातम् ।
धावद्देवप्रवरसमरोदन्तयाथार्थ्यबोध-
भ्राम्यत्पौरं नगरमभवज्जर्जरं निर्जराणाम् ॥ ८९ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे त्रयोदशः सर्गः ।

अथ चतुर्दशः सर्गः ।

तस्मिन् कुमारे मीनाक्ष्यास्तथा शासति मेदिनीम् ।
ताराग्रहाणां पञ्चानां जाता जात्वपि वक्रता ॥ १ ॥

अवागृह्णत ते वृष्टिमासेतोराहिमाचलात् ।
जलदुर्भिक्षतश्चात्र जग्ले जानपदैर्जनैः ॥ २ ॥

सोमवारव्रतेनाथ सोमसुन्दरमीश्वरम् ।
स समाराधयाञ्चक्रे शासनात् कुम्भजन्मनः ॥ ३ ॥

तस्य चिन्तयतः स्वप्ने तरुणेन्दुशिखामणिः ।
आविर्भूय दयासिन्धुरनुजग्राह पार्थिवम् ॥ ४ ॥

* 'बालम्' इति स्वपुस्तके पाठः.

वार्षिकीयमनावृष्टिर्वक्रैः शुक्रादिभिः कृता ।
किं करिष्यति वर्षान्ते किंकरिष्यन्ति ते ग्रहाः ॥ ५ ॥

दण्डश्चण्डायुधाख्यो यो दत्तोऽस्माभिः पुरा तव ।
कनकं तेन हेमाद्रेः कर्णेहत्योपनीयताम् ॥ ६ ॥

इति सम्बोधितस्तेन प्रतिबुद्धो महीपतिः ।
प्रयाणं रोचयामास प्रातर्हेमाचलं प्रति ॥ ७ ॥

चण्डायुधं समादाय स गच्छन्निरवर्णयत् ।
भूपद्मकर्णिकाकारं भूपालः कनकाचलम् ॥ ८ ॥

निकषे व्योम्नि यं घर्षन् वेधा जलदसिक्थके ।
संयोज्यालोकतेऽद्यापि वर्णं सौदामनीच्छलात् ॥ ९ ॥

श्रीकण्ठकार्मुके यत्र शृङ्गलग्ना वियन्नदी ।
वलयीकृत्य विन्यस्ता वासुकिज्येव दृश्यते ॥ १० ॥

सर्वरत्नाकरं हैमं संरक्षितुमहर्निशम् ।
यामिकाविव चन्द्रार्कौ यं न जातु विमुञ्चतः ॥ ११ ॥

प्रस्तरा यत्र रत्नानि मृत्तिका यत्र काञ्चनम् ।
निर्झरो जाह्नवी यत्र लुब्धको यत्र शङ्करः ॥ १२ ॥

यजन्ति च तपस्यन्ति यमुद्दिश्यैव देहिनः ।
यत्परं निगमस्यार्धं योऽपवर्गादनन्तरः ॥ १३ ॥

ये केचिद् द्विपदा ये च षट्पदा ये चतुष्पदाः ।
सर्वेऽप्यष्टापदमयाः सम्बन्धाद्यस्य विश्रुताः ॥ १४ ॥

द्यौर्मूर्धा पृथिवी मध्यं पादः पातालमण्डलम् ।
यस्य गङ्गाधरस्येयं युक्ता त्रैलोक्यरूपता ॥ १५ ॥

द्रवीभवत्सु शृङ्गेषु यत्र दावाग्निसङ्गमात् ।
स्वर्गास्थिरत्ववादानां प्रत्यक्षैव प्रमाणता ॥ १६ ॥

काञ्चने यत्र मृद्बुद्धे कामिन्यस्त्रिदिवौकसाम् ।
कुतूहलिन्यो भूषासु कुलालान् पर्युपासते ॥ १७ ॥

---

१. कर्णेहत्य यावत्तर्षनिवृत्ति. २. सिक्थकं मधूच्छिष्टम्. ३. निगमस्यार्धं कर्मकाण्डः. ४. गङ्गाधरस्य गङ्गाधारिणः अथ च शिवस्य.

पल्लवं जीर्णपत्रं च प्रत्यभिज्ञातुमक्षमाः ।
हैमेषु सहकारेषु खिद्यन्ते यत्र कोकिलाः ॥ १८ ॥

चामीकरैकरूपेषु सर्वेषु कुसुमेष्वपि ।
व्युत्पन्ना एव यत्रत्या गन्धेषु न मधुव्रताः ॥ १९ ॥

स तं प्रदक्षिणीकृत्य सर्वदेवालयं गिरिम् ।
तस्थौ पाण्ड्यः पुरोभागे तस्य काङ्क्षन्ननुग्रहम् ॥ २० ॥

उदासामास हेमाद्रिरुग्र‡पाण्ड्येऽपि पार्थिवे ।
किं चकारार्णवो रामे निसर्गोऽयं जडात्मनाम् ॥ २१ ॥

प्रकृत्यापि विनीतस्य पाण्ड्यस्योग्रस्य दण्डिनः ।
अभिख्यानुगुणं वृत्तमान्तरं करणं तदा ॥ २२ ॥

माहेश्वरं स तं दण्डं मकरद्वयलाञ्छितम् ।
आवर्त्त्य रुषितो वेगादाजघान सुरालयम् ॥ २३ ॥

स्थिरधन्वेति भूतेशः श्रूयते येन धन्वना ।
चकम्पे स हतस्तेन चामीकरमयो गिरिः ॥ २४ ॥

तापिते तपनालोकैस्ताडिते तेन दण्डतः ।
आसीद् दिष्ट्यात्र वैपुल्यमसम्बाधाय नाकिनाम् ॥ २५ ॥

कम्पिते दण्डघातेन काञ्चने तत्र भूधरे ।
पौलस्त्यतुलितस्यार्द्रेः परिलुप्तामिवं ह्रिया ॥ २६ ॥

हालास्यनाथतनयमवबुध्य ततः स तम् ।
स्वं रूपं दर्शयन्नाह सुविनीतं सुरालयः ॥ २७ ॥

अज्ञासिषमहं न त्वामास्थितः स्थावरं वपुः ।
जानन्निह जगत्तत्त्वं जातु न क्रोद्धुमर्हसि ॥ २८ ॥

चूर्णीकुर्या अपि त्वं मां चापं चेत् पितुरेव ते ।
स्वामिनस्तस्य*सा हानिः स्वस्य किं परिहीयते ॥ २९ ॥

अस्ति मे बहुशः स्वर्णमत्यल्पमिदमुच्यते ।
अहमेव तवास्मि स्वं मनोहत्योपयुङ्क्ष्व माम् ॥ ३० ॥

---

१. मनोहत्य यावत्तर्षानिवृत्ति.

---

‡ 'वीरपाण्ड्ये' इति खपुस्तके पाठः. * 'ते' इति खपुस्तके पाठः.

इति प्रसादितस्तेन दर्शितश्च महाखनिम् ।
जग्राह विविधं हेम भित्त्वा चण्डायुधेन सः ॥ ३१ ॥

नभश्चरहयाकृष्टैर्नरदेवः परश्शतैः ।
मनोभिरपि दुष्प्रापमनोभिस्तदुपाहरत् ॥ ३२ ॥

स चामीकरवर्षेण सर्वं प्रकृतिमण्डलम् ।
पालयामास नृपतिः पाण्ड्यो यावदवग्रहम् ॥ ३३ ॥

तथा ववर्ष कनकं भूयोभूयः स भूतले ।
अवग्रहं यथा नित्यमाचकाङ्क्षुः शरीरिणः ॥ ३४ ॥

स कान्तिमत्यां प्रेयस्यां चन्द्रमौलेरनुग्रहात् ।
पुत्रं यथार्थनामानं वीरपाण्ड्यमविन्दत ॥ ३५ ॥

विन्यस्य सकलां पृथ्वीं वीरपाण्ड्ये महीपतिः ।
प्रविवेश परं धाम परमानन्दलक्षणम् ॥ ३६ ॥

तस्मिन् भक्त्या च पूजाभिस्तपसा चाम्बिकापतेः ।
पुत्रादपि विशेषेण पौत्रे प्रीतिरवर्धत ॥ ३७ ॥

जिज्ञासमानाः श्रुत्यर्थं सेवया सुन्दरेशितुः ।
कण्वादयो मुनिवराः कदम्बवनमाययुः ॥ ३८ ॥

तपोभिः कर्मभिर्ध्यानैर्दानैरपि पृथग्विधैः ।
निन्युः संवत्सरं पूर्णं नियतास्ते शिवान्तिके ॥ ३९ ॥

प्रसन्नः सुन्दरेशोऽथ भक्तिलेशवशंवदः ।
विप्ररूपेण विप्रेभ्यो विववार निजं वपुः ॥ ४० ॥

उपसन्नः स मुनिभिः सन्निधौ सुन्दरेशितुः ।
व्याघ्रचर्मासनो वेदान् व्याख्यातुमुपचक्रमे ॥ ४१ ॥

अस्ति वाग्ब्रह्म तत् किञ्चिदखिलोत्पत्तिकारणम् ।
प्रणवोङ्कारतारादिपर्यायगणघोषितम् ॥ ४२ ॥

तदेकधा त्रिधा विप्राश्चतुर्धा पञ्चधा स्थितम् ।
अपि द्वादशधा भिन्नमागमेषूपदिश्यते ॥ ४३ ॥

---

२. अनोभिः शकटैः.

ततो व्याहृतयस्ताभ्यो गायत्री विश्वपावनी ।
ततो वेदाः सोपभेदास्तेभ्यः सर्वं च वाङ्मयम् ॥ ४४ ॥

प्रभावं तस्य तारस्य ब्रूयां शब्देन केन वः ।
तत्प्रसूता गिरः सर्वास्तद्व्याप्या व्यापकस्तु सः ॥ ४५ ॥

एकमातृप्रसूतानामैकमत्यप्रवर्त्तिनाम् ।
स्ववैमत्येन वैमत्यं शास्त्राणां बालिशा जगुः ॥ ४६ ॥

अस्ति यत् परमं ज्योतिरस्मिन् लिङ्गे तिरोहितम् ।
तदेव सकलैः शब्दैस्तात्पर्यविषयीकृतम् ॥ ४७ ॥

अङ्गानि मन्त्रास्तन्त्राणि शास्त्राणि निगमा अपि ।
अन्ततो लोकगाथा अप्यत्रैवायान्ति विश्रमम् ॥ ४८ ॥

इमा गिरः समस्ताश्च रुद्राय स्थिरधन्वने ।
इति ब्रुवाणा वाणी वः प्रमाणमकुतोभवा ॥ ४९ ॥

सर्वानुग्राहिणी शक्तिः शम्भोरनतिरेकिणी ।
तामप्रपद्य तत्तत्त्वं न शब्दैरवधार्यते ॥ ५० ॥

आरोहन्त इव स्तोकमवरोहन्ति भूयसा ।
जानन्त इव मुह्यन्ति तत्पादविमुखा जनाः ॥ ५१ ॥

सा वक्ति सा वाचयति सा चेतयति सा चितिः ।
सा गतिः सा गमयति सैवेयं मीनलोचना ॥ ५२ ॥

तामनन्याः प्रपद्यध्वं तपोदानाध्वरादिभिः ।
वाङ्मयं सर्वमेकस्थं ततो वः प्रतिभास्यति ॥ ५३ ॥

अनुगृह्यैवमीशस्तान् मस्तन्यस्तेन पाणिना ।
मिषतामग्रतस्तेषां मूललिङ्गे तिरोदधे ॥ ५४ ॥

अथ कालेन महता वीरपाण्ड्यो महीपतिः ।
भूयसस्तनयान् लेभे भोगस्त्रीषु दुराशयान् ॥ ५५ ॥

समाराध्याथ बहुधा साम्बं हालास्यवल्लभम् ।
देवो वंशकरं पुत्रं देव्यां समुदपादयत् ॥ ५६ ॥

---

१. 'इमा रुद्राय स्थिरधन्वन गिरः' यजुः.

44398

सर्वदा मृगयासक्तः स जातु विपिनान्तरे ।
सञ्चरन् राजशार्दूलः शार्दूलेन निपातितः ॥ ५७ ॥

तदेव रन्ध्रमासाद्य तस्य भोगवधूसुताः ।
परिलुण्टितसर्वस्वाः पलायन्त ततस्ततः ॥ ५८ ॥

कुलवृद्धास्ततस्तस्य कुमारं पञ्चवार्षिकम् ।
अभिषेक्तुं पदे तस्मिन्नन्योन्यं सममन्त्रयन् ॥ ५९ ॥

मकुटेनाभिषेक्तव्यमभिषेकेण सुस्थिरे ।
राज्ये रत्नानि सम्पाद्य मकुटं कर्तुमीश्महे ॥ ६० ॥

अन्योन्याश्रयदुस्स्थोऽयमभिषेकोऽस्य भाति नः ।
न मिथ्यानुग्रहः शम्भोर्न विद्मः पुनरायतिम् ॥ ६१ ॥

इति चिन्तयतां तेषामग्रतः पाण्ड्यमन्त्रिणाम् ।
आविरासीत् तदा शम्भुराश्रितो वैश्यविग्रहम् ॥ ६२ ॥

स भृत्यैर्बहुभिर्वीतः समृद्ध्या परया ज्वलन् ।
रत्नानां वणिगस्मीति राजभृत्यानुपासदत् ॥ ६३ ॥

सं भृत्यैराहृतां रत्नपेटीमुद्घाटयन् पुरः ।
वैदग्ध्यं रत्नशास्त्रेषु व्याकुर्वन्नाददे गिरम् ॥ ६४ ॥

सर्वे पश्यन्ति रत्नानि सर्वे बिभ्रति च स्वयम् ।
तत्त्वं तु ब्रह्मण इव तेषां नावैति कश्चन ॥ ६५ ॥

पशुभावं प्रपन्नस्य पाकशासितुरध्वरे ।
वलस्य देहधातुभ्यो वराद्धातुर्यदुद्भवः ॥ ६६ ॥

या वीर्याच्चन्द्रचूडस्य रत्नजातिः पुराजनि ।
या च यज्ञवराहस्य फेननिष्यन्दबिन्दुभिः ॥ ६७ ॥

या दृङ्मलान्महेन्द्रस्य या दधीच्यस्थिमण्डलात् ।
ये चाकरा भुवि स्वर्गे पाताले च पृथग्विधाः ॥ ६८ ॥

या छाया याकृतेर्निष्ठा यः स्पर्शो यच्च गौरवम् ।
यन्मानं यानि मूल्यानि ये दोषा ये च वा गुणाः ॥ ६९ ॥

---

१ इतः श्लोकद्वयं न लिखितं स्वपुस्तके.

ये जातिभेदा विविधा जात्याभासाश्च ये पुनः ।
ये रागकृत्रिमाः केचिद् ये च सर्वात्मकृत्रिमाः ॥ ७० ॥

यदा धार्यं यथा धार्यं यैर्धार्यं यत्र वा पुनः ।
यथा क्रयो विक्रयो वा यथा दानप्रतिग्रहौ ॥ ७१ ॥

यश्चैषां रक्षणोपायो यः परीक्षाविधिक्रमः ।
या चाप्येषामुपनिषदध्यात्ममधिदैवतम् ॥ ७२ ॥

चातुर्वर्ण्यव्यवस्था या या स्त्रीपुंसविकल्पना ।
जीवाजीवविभागो यो या मर्त्यामरभोग्यता ॥ ७३ ॥

ये च दौर्लभ्यसौलभ्ये येषामौत्पातिकी जनिः ।
यदौषधोपयोगित्वं याश्च संज्ञाः परश्शताः ॥ ७४ ॥

शक्तः को वेदितुमिदं सर्वमेकं तमन्तरा ।
रत्नं समस्तदेवानां रत्नसानुशरासनम् ॥ ७५ ॥

नप्तायं देवपाण्ड्यस्य नन्वसौ पार्थिवात्मजः ।
अर्हतीदं रत्नजातममूल्यं मदुपाहृतम् ॥ ७६ ॥

अभिनिर्वर्त्य कोटीरमभिषिच्य च पार्थिवम् ।
राज्ये स्वस्थीकृते दत्त रत्नमूल्यं यथोचितम् ॥ ७७ ॥

इत्युदीर्य मणीन् दिव्यान् दत्वा तेभ्यः स काङ्क्षितान् ।
सद्यस्तिरोदधे तेषां समक्षं सपरिच्छदः ॥ ७८ ॥

चिह्नेन तेन ते सर्वे चिन्तयन्तस्तमीश्वरम् ।
प्रशशंसुः शिशोर्भाग्यं बाष्पगद्गदया गिरा ॥ ७९ ॥

सद्यो निर्माप्य ते मौलिं शास्त्रदृष्टेन वर्त्मना ।
अभ्यषिञ्चन् नृपं बालमखिला राजमन्त्रिणः ॥ ८० ॥

दृष्ट्या दयार्द्रयैवायं देवदेवस्य शूलिनः ।
अभिषिक्तः पुरा पश्चादभ्यषिच्यत मन्त्रिभिः ॥ ८१ ॥

तस्याभिषेकपाण्ड्याख्या तदादि भुवि पप्रथे ।
ईदृशं भक्तसौलभ्यमिन्दुचूडस्य देहिषु ॥ ८२ ॥

यदचेष्टत यत्प्राह स बालः पाण्ड्यभूपतिः ।
तत्सर्वं वरिवस्येति जग्राह मधुरेश्वरः ॥ ८३ ॥

यदवस्त यदाजघ्रौ यदभुङ्क्त यदालिपत् ।
यद् दधौ च स सर्वं तच्छिव एव निवेदितम् ॥ ॥ ८४ ॥

दिदृक्षा शिवलिङ्गेषु शुश्रूषा शिववैभवे ।
चिकीर्षा शिवपूजासु शिशोरेवास्य कौतुकम् ॥ ८५ ॥

रत्नदस्य विभोर्लिङ्गं रत्नैरेवाभ्यपूजयत् ।
अधमर्णं स्वमात्मानं स जानन् शाश्वतीः समाः ॥ ८६ ॥

देवस्तस्मै शिलास्वेव ददौ रत्नानि कानिचित् ।
सर्ववस्तुषु रत्नानि स तस्मै समुपाहरत् ॥ ८७ ॥

वासवो जातुचित् कर्तुं वार्षिकं कमलार्चनम् ।
प्राप्तस्तेन कृतां शम्भोः पश्यन् पूजामलज्जत ॥ ८८ ॥

कथान्तरे कदाचित् स कथयामास पाशिने ।
भक्तवात्सल्यमीशस्य भक्तिं पाण्ड्यशिशोश्च ताम् ॥ ८९ ॥

परीक्ष्य तद् द्वयमपि शक्रभाषितं ततः शिवं स्वयमपि तत्र सेवितुम् ।
जलग्रहामयमृदितो जलेश्वरः पुरं निजं पुनरगमत् सविस्मयः ॥ ९० ॥

कस्तूरीहिमवालुकाहिमपयःश्रीगन्धगोरोचना-
काश्मीरैरनुलेपितः पशुपतिः पाण्ड्यात्मजेनासकृत् ।
कस्तूरीघनसारसुन्दर इति ख्यातिं तदादि श्रितो
येनाद्यापि समीहते तनुभृतां तामेव सेवां *पराम् ॥ ९१ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे चतुर्दशः सर्गः ।

अथ पञ्चदशः सर्गः ।

सलिलाधिपतिप्रचोदितः सरिदीशो मधुराजिघृक्षया ।
ववृधे विजितोऽपि सन् पुरा समये कस्य न सम्भवेद् भ्रमः ॥ १ ॥

समभिद्रवता शनैः शनैः सलिलानां निधिनातिभीषिताः ।
शरणं नृपतिं ययुः प्रजाः स च हालास्यनिकेतनं हरम् ॥ २ ॥

* 'वराम्' इति खपुस्तके पाठः.

चतुरश्चिकुरान् जटापदाच्चतुरः स्वानवचित्य शङ्करः ।
परिपश्यति पाण्ड्यभूपतौ विचकार त्वरितं विहायसि ॥ ३ ॥

अपिबन्नधिगत्य मेघतां सकलं ते सलिलं सरस्वतः ।
परिशुष्क इवास्तृतः पटः प्रदरस्थानगतं जलाञ्जलिम् ॥ ४ ॥

अपि वीक्ष्य तदद्भुतं महद् वरुणो न व्यरमत् परीक्षणात् ।
विबुधेष्वपि चेदियं दशा मतिभेदो मनुजेषु नाद्भुतः ॥ ५ ॥

प्रहिता वरुणेन तोयदाः कृतवैरप्रतियातनेच्छवः ।
प्रलयागमभैरवै रवैः कबलीचक्रुरिवाखिलं नभः ॥ ६ ॥

मुदृशां कलहस्पृशामपि स्वयमालिङ्गननर्महेतुभिः ।
कटुभिर्मर्मभृजे घनारवैस्तरुणानामपराधभीरुता ॥ ७ ॥

अपराद्धशरं शरव्यतः सकृदाकर्षणसन्नदोर्लतम् ।
मदनस्य चिरोज्झितं धनुः परिचेतव्यमिवाभवत् पुनः ॥ ८ ॥

यदुपैक्षि यदर्धदर्शितं यदपि प्रागथवास्ति विस्मृतम् ।
अनुतप्त इवाधुना व्यधादखिलं कर्म तदद्भुतं स्मरः ॥ ९ ॥

विधिरभ्रजलैः पुरोऽनिलैर्वियता कैतकगर्भवर्त्तिना ।
तटिता नवनीपपांसुना व्यसृजद् घर्महतं पुनः स्मरम् ॥ १० ॥

विधुतं पवनेन चातकाः पतितं चञ्चुपुटे कथञ्चन ।
क्षुधिताः क्षुधिते पुरः शिशौ नवमम्भो न ददुर्न वा पपुः ॥ ११ ॥

चलितेषु सितच्छदेषु यैः सरसि स्थातुमचिन्ति षट्पदैः ।
विरताब्जतया न तैः स्थितं विपदन्यव्यसनार्थिनां पुरः ॥ १२ ॥

कमलं न चकास्ति कैतकं कलहंसा नहि सन्ति कोकिनः ।
न शशी ननु चास्ति मन्मथः किमभावादिह किं विहीयते ॥ १३ ॥

कटु भेकगणेन चुक्रुशे कलकेकामुखरेषु केकिषु ।
कवयः कवयन्तु तावता कविपाशः किमुपैति मूकताम् ॥ १४ ॥

सरसी चिरकालशीलनाद्जहद्भिर्भ्रमरैरदृश्यत ।
क्षुभितोद्गतगर्भकर्दमच्छुरितेवाम्बुजिनीनिमज्जनात् ॥ १५ ॥

अवधूय दुकूलपल्लवानलकानप्यवमृश्य विस्रथान् ।
तरुणैरिव मेघमारुतैस्तरुणीनां ममृजे रतिश्रमः ॥ १६ ॥

चिरसम्भृतचातकोदरज्वलनोज्ज्वासनलब्धजन्मभिः ।
विततैरिव धूममण्डलैर्विषदापूरितमम्बुदैर्नवैः ॥ १७ ॥

निबिडे चरमाङ्गमण्डले निपतन्ती जलदस्य चन्द्रिका ।
स्थगिता चिरमक्षरत् क्षितौ कणशः किं करकोपलात्मना ॥ १८ ॥

अतिथेरपि भाग्यतो भवत्यभिवृद्धिर्भवने कुडुम्बिनाम् ।
कलहंसकुले विनिर्गते कथमासन् कमलाकरश्रियः ॥ १९ ॥

विरमत्कमलोत्पलं सरो व्यरुचत् पुष्पितकैतकैस्तटैः ।
गजवाजिसमाकुलं बहिर्भवनं राज्ञ इवान्ततोऽधनम् ॥ २० ॥

कमलैर्विरतं कलानिधिः कलहंसाश्च न गोचरे दृशाम् ।
शनिरास्त ककारमस्तके समये तत्र कलापिनं विना ॥ २१ ॥

महिषा जहृषुर्मदागमे महिषैस्तुल्यधियश्च कर्षकाः ।
अभवन्तु न हंसगृह्य इत्ययशोनैल्यमिवावहद् घनः ॥ २२ ॥

बभुरुल्लसितास्तटिल्लता जगदन्धङ्करणीषु रात्रिषु ।
पथि चारयतोऽभिसारिकाः प्रसवेषोः करदीपिका इव ॥ २३ ॥

परिलुप्तरवीन्दुतारके समये सन्तमसावृते सदा ।
द्युनिशोरुपदेशदेशिका युवतीनां गृहचक्रवाकिकाः ॥ २४ ॥

स्तनिते स्तनिते पयोमुचां कलकेकामुखराः कलापिनीः ।
अभिलक्ष्य भृशं ललज्जिरे रभसालिङ्गितवल्लभाः स्त्रियः ॥ २५ ॥

स्थगितार्ककरैः पयोधरैः परिलुप्तप्रसवासु वल्लिषु ।
पवनापहृताः पयःकणा मदनस्यास्त्रपदेऽभिषेचिताः ॥ २६ ॥

नवतोयनिपातहर्षितां नगरीं तामवलोक्य कुप्यतः ।
अथ ते वरुणस्य शासनादतिमात्रं ववृषुः पयोमुचः ॥ २७ ॥

परमां सखितां प्रचेतसः प्रतिपेदेऽग्निसखः समीरणः ।
समयानुगुणैव शत्रुता सखिता वा त्रिदिवौकसामपि ॥ २८ ॥

परिपाटितकाननद्रुमाः परिकृष्टेभगवाश्वमानवाः ।
सरितः परितो जजृम्भिरे विकटावर्त्ततरङ्गसङ्कुलाः ॥ २९ ॥

गणशः पशुपक्षिमानवान् गणशो ग्रामपुराश्रमालयान् ।
पवमानसखाः पयोमुचः पणबन्धादिव पर्यपातयन् ॥ ३० ॥

---

१. अन्ततः अन्तर्भागे.

न दिशो विदिशो न पादपा न समुद्राः सरितो न पर्वताः ।
न दिवा न निशा न चान्ततो जगदप्यैक्षत मध्यमं तदा ॥ ३१ ॥

अथ पाण्ड्यसुते समं जनैः शरणं जग्मुषि चन्द्रशेखरः ।
स्वकपर्दभवैः पयोधरैः स्थगयामास स वर्षतो घनान् ॥ ३२ ॥

पटमण्डपवद्व्यवस्थिताः परितस्ते मधुरां पयोमुचः ।
रुरुधुर्भुवि वारिसम्प्लवं जगृहुश्चोपरि निष्पतत् पयः ॥ ३३ ॥

पटगर्भगता इव प्रजाः कियदप्यश्रुतवर्षनिस्वनाः ।
व्यजनैरुपवीज्य लेभिरे नगरस्था मरुतं कथञ्चन ॥ ३४ ॥

अपि यत् प्रलयेषु वर्षितुं समरक्षन् सलिलं वलाहकाः ।
अभिवृष्य तदप्यशेषतो गृहधूमा इव खे चकाशिरे ॥ ३५ ॥

प्रथमं पतितैः पयोभरैः परमम्भोधिरपूरि शोषितः ।
चरमं पतितं तु तत्पयो जगृहुः शैवकपर्दवारिदाः ॥ ३६ ॥

जलदा जलदैर्निराकृताः प्रतियान्तः परितो यथागतम् ।
वरुणेन न सम्बभाषिरे वरुणस्तैरपि लज्जया मिथः ॥ ३७ ॥

परितो विनिवेशितान् घनान् प्रतिसंहृत्य निजान् महेश्वरः ।
परिदर्शयति स्म नागरैः प्रकृतिस्थं निखिलं महीतलम् ॥ ३८ ॥

चतसृष्वपि दिक्षु कूटवज्जलदान् न्यस्य ररक्ष यत् पुरीम् ।
तदुपक्रममभ्ययोजयत् स चतुष्कूटसमाख्ययापि ताम् ॥ ३९ ॥

अतिमानुषदेवदानवं वरुणो वीक्ष्य तदद्भुतद्वयम् ।
मघवोदितमीशवैभवं मनसामन्यत †दिक्प्रदर्शनम् ॥ ४० ॥

स समेत्य सुवर्णपद्मिनीसलिलस्नानगलज्जलग्रहः ।
कनकाम्बुरुहैस्तदुद्भवैः कलयामास महेश्वरार्चनम् ॥ ४१ ॥

स्तुतिभिर्बहुभिः प्रसादयन् स महेशं शफरेक्षणामपि ।
कृतपाण्ड्यनृपालसौहृदः कृतकृत्यः स्वपुरं पुनर्ययौ ॥ ४२ ॥

अथ जात्वभिषेकपाण्ड्यभूरमणे शासति राज्यमूर्जितम् ।
समदृश्यत सिद्धवेषभृत् सह शिष्यैर्मधुरापुरे हरः ॥ ४३ ॥

† 'दक्प्रदर्शनम्' इति कपुस्तके पाठः,

जपदामकरो जटाधरः कलयन् काञ्चनवेत्रमुज्ज्वलम् ।
विचचार युवातिसुन्दरो भसितालेपनपाण्डरच्छविः ॥ ४४ ॥

करुणैकमयः कलानिधिः सुलभः सुन्दरमूर्त्तिरुज्ज्वलः ।
अवलोकित एव देहिनामहरद् वाङ्मनसे स तापसः ॥ ४५ ॥

बहुशः कुणिमूकलोहला[1] बधिरक्लीबजडान्धपङ्गवः ।
जटिलेन कृतार्थिता जनाश्चरणाम्भोजरजोऽनुषङ्गतः ॥ ४६ ॥

चरणोदकसेवया हरन्नपि वन्ध्यत्वमनेकधा स्थितम् ।
अवसन्नतरं हराश्रिरादनुजग्राह कुलं कुडुम्बिनाम् ॥ ४७ ॥

जरतस्तरुणान् प्रकल्पयन् युवभावं युवसु स्थिरं दिशन् ।
अपि वर्षगणानुवर्त्तिनीः शमयामास रुजः स भस्मना ॥ ४८ ॥

भसितं रसनासु निक्षिपन् कवयामास जडाननेकधा ।
वितनार परां विरक्ततां विषयासङ्गमलीमसात्मनाम् ॥ ४९ ॥

अपि दुर्लभभैक्ष्यजीवनानकरोदाढ्यतरान् गिरैव सः ।
उदजीवयदुक्षणादपामुरगक्ष्वेलहतानपि क्षणात् ॥ ५० ॥

पतिवल्लभतां मृगीदृशां प्रमदासु प्रियतां विलासिनाम् ।
व्यतरद् भिषजां च मूलिका विविधप्रत्ययकारिणीर्हरः ॥ ५१ ॥

घुटिकांशुकखड्गपादुकारसलेपाञ्जनमुख्यसिद्धयः ।
तमनुस्मरतां शरीरिणां स्वत एव प्रचकाशिरे तदा ॥ ५२ ॥

ग्रहभूतपिशाचयक्षिणीगणकूष्माण्डविनायकादयः ।
अभिदुद्रुवुरादिसिद्ध इत्यभिधानाक्षरकीर्त्तनान्नृणाम् ॥ ५३ ॥

स जगाद दृशोरगोचरः कथयन्नेव कथास्तिरोदधे ।
स्थविरस्तरुणोऽथ मुण्डितो जटिलश्चैष जनैरदृश्यत ॥ ५४ ॥

समदर्शयदुन्नतान् गिरीन् सविधे वारिनिधीन् वनानि च ।
स्तुवतां हसतां प्रधावतां मिषतामेव तदुन्ममार्ज सः ॥ ५५ ॥

कियदित्यभिदध्महेऽद्भुतं किमितीदं चरितं स्तुवीम वा ।
वयमप्युपदर्शयेम तद्यदि हि स्याम जगच्छरीरिणः ॥ ५६ ॥

---

१. लोहलोऽस्फुटवाक् . २. तद् दर्शितम् .

इति केलिकलाकुतूहली विजहारैष यथा यथा पुरे ।
अशृणोदखिलं तथा तथा प्रकृतिभ्यो नृपतिः पदे पदे ॥ ५७ ॥

स कदाचन सुन्दरेशितुर्विततेऽधिष्णि विमानपश्चिमे ।
उपविष्टममुं यदृच्छया नृपतिः प्रैक्षत सेवितुं गतः ॥ ५८ ॥

दृशमस्य तृणीकृतामरां गिरमज्ञातपरानुवर्त्तनाम् ।
स्थितमीप्सितगन्धदुर्विधं परिपश्यन् नृपतिर्विसिष्मिये ॥ ५९ ॥

अतिवाङ्मनसैर्महोभरैरपि तत्त्वं परमस्य सूचितम् ।
अधिगन्तुमनाः स्वयं मनागनुयुङ्क्ते स्म स गोत्रनामनी ॥ ६० ॥

श्रवणे दधदक्षमालिकां शिथिलीकृत्य स पद्ममासनम् ।
अमृतस्रपितैरिवाक्षरैरिदमाह स्म नृपं तपोधनः ॥ ६१ ॥

न कुलं न गृहं न बान्धवा नच वर्णाश्रमयन्त्रणापि नः ।
अवधूतपदे निषेदुषामभिधा सिद्ध इति स्फुटैव ते ॥ ६२ ॥

चतुरुत्तरषष्टिभेदतः प्रथिता या भुवने कला इति ।
यदि तासु कुतूहली भवानभिसम्पश्यतु सिद्धिमद्भुताम् ॥ ६३ ॥

इति वादिनि योगिनां वरे पुनरूचे नृपतिः कुतूहली ।
उपदीकृतमिक्षुमायतं कमनीयं कलयन् करेण तम् ॥ ६४ ॥

अयमस्ति विमानधारको द्विरदो यः किल दार्षदः पुरः ।
इममिक्षुमसौ गिलत्विति स्मयमानः स तदन्वमन्यत ॥ ६५ ॥

स ततः पुरतः शिलागजः स्तनितस्निग्धगभीरबृंहितः ।
नरपालकराग्रवर्त्तिनं नवमिक्षुं विचकर्ष शुण्डया ॥ ६६ ॥

कबलीकृतकोमलेक्षुणा करिणा तत्र विमानवर्त्तिना ।
जगृहे नृपकण्ठमालिकामणिहारोऽपि मृणालकोमलः ॥ ६७ ॥

चकिताः स्तिमिताः पलायिता रुषिताश्चानुचरा महीपतेः ।
उपलद्विरदस्य चेष्टितान्युपलभ्य क्षुभिताः प्रचुक्रुशुः ॥ ६८ ॥

न निकर्षचिकीर्षया कृतं न परीचिक्षिषया न गर्वतः ।
कुतुकेन तु वृत्तमेतदित्यसकृत् तं प्रणमन्नसान्त्वयत् ॥ ६९ ॥

नमते धरणीभृते वरं तनयं वंशकरं प्रसादयन् ।
स्मयमानमुखाम्बुजो हरो मिषतस्तस्य पुरस्तिरोदधे ॥ ७० ॥

अथ विक्रमपाण्ड्यभूपतिस्तनयोऽभूदभिषेकपाण्ड्यतः ।
उदितोदितमुद्वहन् कुलं कुलदासः कुसुमायुधद्विषः ॥ ७१ ॥

स पितुः परलोकमेयुषश्चरमाज्ञां शिरसोपधारयन् ।
अनुपाधिमनन्यगामिनीमचलां भक्तिमधत्त शङ्करे ॥ ७२ ॥

शिवनामपरः शिवाश्रयः शिवविन्यस्तभरः शिवाश्रमी ।
जगदाकलयन् शिवात्मकं जननाथो बुभुजे वसुन्धराम् ॥ ७३ ॥

शशिनीव समस्तवल्लभे नृपतौ भूतपतेः प्रणश्वरि ।
पितरीव सुता महीभुजो बिभरामासुरविप्लुतां मतिम् ॥ ७४ ॥

कुलशेखरपाण्ड्यसप्तमं नृपतिं तं किल चोलपार्थिवः ।
न ममर्ष शरद्विनिर्मलं शशिनं चोर इव स्वदोषतः ॥ ७५ ॥

अतिवर्त्तितुमेनमक्षमः स वराकः समरे भुजोष्मणा ।
क्षपणैः क्रतुमाभिचारिकं कलयामास पयःस्विनीतटे ॥ ७६ ॥

तत उच्चलितो दुरध्वराद् द्विरदः कोऽपि गिरीन्द्रभीषणः ।
समया मधुरामुपाद्रवत् कलयन् मुद्गरमायसं करे ॥ ७७ ॥

तमुदन्तमयं विचारयन् शरणं प्राप शशाङ्कशेखरम् ।
स च तत्र किरातरूपभृत् परिचक्राम निजालयाद् बहिः ॥ ७८ ॥

वनपल्लवभङ्गशेखरं वरगुञ्जाफलपुञ्जभूषणम् ।
अधिरोपितकार्मुकं जना ददृशुर्दिव्यममुं वनेचरम् ॥ ७९ ॥

उपलभ्य गजं तमुद्धतं पथि गव्यूतियुगे व्यवस्थितम् ।
नरसिंहमयोजयच्छरे नरसिंहस्य मुदे वनेचरः ॥ ८० ॥

त्रिपुरेषु गतेषु लक्ष्यतां हसितेनास्मि पुराप्यपोदितः ।
इति सत्वरमीशकार्मुकादुदयासीद् दनुजान्तकः शरः ॥ ८१ ॥

स हसन्नचलेन धन्वना विशिखेन स्वयमच्युतेन च ।
जगदेकधनुर्धरः क्षणादभिनत् सिन्धुरमाभिचारिकम् ॥ ८२ ॥

नरकेसरिणास्त्ररूपिणा शमिते हस्तिनि शैलतां गते ।
तमनु प्रहितास्तथागता न समैक्ष्यन्त यथा तथा गताः ॥ ८३ ॥

सुगतान् सुगतात्मनेषुणा स विजिग्ये चतुरो वनेचरः ।
अहिरेव हि वेत्त्यहेः पदं कथमन्येन घटेत तज्जयः ॥ ८४ ॥

विदितः किल सर्वदेहिनां विजयः पञ्चमुखेन हस्तिनः ।
गुणगृह्यतया तदप्यसौ मुमुदे विक्रमपाण्ड्यपार्थिवः ॥ ८५ ॥

अनुगृह्य दयार्द्रया दृशा प्रणतं भूतपतिः प्रजेश्वरम् ।
तनयं च तदन्वयोचितं वरमस्मै वितरंस्तिरोदधे ॥ ८६ ॥

अजनिष्ट विभोरनुग्रहात् तनयस्तस्य च राजशेखरः ।
यदुपाहितभूभरो गुरुः प्रतिपेदे पदमैश्वरं परम् ॥ ८७ ॥

सप्तमो मलयध्वजस्य स सप्तसप्तिसमद्युति-
बिभ्रदङ्गदनिर्विशेषमशेषमेव महीतलम् ।
आरराध सभाजनैरतिमानुषैर्मधुरेश्वरं
रञ्जयन् जनताः सुतानिव राजशेखरपार्थिवः ॥ ८८ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे पञ्चदशः सर्गः ।

अथ षोडशः सर्गः ।

अथ क्षितिं बिभ्रति राजशेखरे द्विजो विरूपाक्ष इति प्रथां गतः ।
चिराय शम्भुं तपसा प्रसादयन्नवाप गौरीत्यभिविश्रुतां सुताम् ॥ १ ॥

स कन्यया जात्वपि पञ्चवर्षया समेत्य तातस्तपसेऽभियाचितः ।
अदेयमप्येवमपत्यसौहृदाददिक्षदेकाक्षरमम्बिकामनुम् ॥ २ ॥

भवप्रवाहप्रतिपन्नवासनाप्रबन्धयोगेन कुमारिकापि सा ।
असाधयन्मन्त्रमशेषसिद्धिदं जगन्निदानं जपयज्ञनिष्ठया ॥ ३ ॥

गुरौ वसन्तं कृतभैक्षवृत्तिकं कदाचिदेकं गृहमागतं वटुम् ।
अवेक्ष्य तस्मै गुरुरात्मजामदादचिन्तयित्वा कुलशीलबन्धुताः ॥ ४ ॥

दुरागमाभ्यासविलुप्तसत्पथे महेश्वरद्वेषमलीमसात्मनि ।
दधीचिशापोपहते द्विजान्वये प्रसूतमेनं बुबुधे ततस्तु सः ॥ ५ ॥

अलङ्घनीयं शिवशासनं सुरैरपि स्वयम्भूविबुधेश्वरादिभिः ।
स चिन्तयन् स्वोचितदानसत्कृतां सहोपयन्त्रा प्रजिघाय कन्यकाम् ॥ ६ ॥

अथ स्नुषामात्मभुवा स्वयं हृतामवेक्ष्य फाले भासितेन लाञ्छिताम् ।
शिवद्विषौ तच्छ्वशुरौ ज्वलद्रुषौ निवेशयामासतुरालये पृथक् ॥ ७ ॥

शिवार्चनध्यानकथाविवर्जिते श्मशानतुल्ये सदने तु तत्र सा ।
अमङ्गले सत्यपि सर्वमङ्गलामनुस्मरन्ती दिवसानि चिक्षिपे ॥ ८ ॥

ततः सदारे श्वशुरे बहिर्गते कदाचिदेनां सदने निषेदुषीम् ।
प्रहर्षयन् प्रादुरभूद् द्विजात्मना विभूतिरुद्राक्षविभूषितो हरः ॥ ९ ॥

तमातिथेयीभिरसौ सभाजयन्त्युपास्त यावज्जरठं द्विजर्षभम् ।
विवेश तावच्छ्वशुरस्तमालयं स च द्विजोऽदृश्यत सुन्दरो युवा ॥ १० ॥

ततः शिवानुस्मरणैकसाधनां स वेपमानामभिलक्ष्य तां हरः ।
स्तनन्धयोऽदृश्यत तत्समीपतः स्वरेण तस्याः श्वशुरावमर्षयन् ॥ ११ ॥

ततस्तु पृष्ट्वा प्रतिवेशिनीमुतं तमालपन्ती श्वशुरेण कुप्यता ।
बहिर्निरस्ता शिशुनामुना समं निनाय पर्यश्रुमुखी निशामसौ ॥ १२ ॥

भवस्य तं पश्चिमवक्त्ररूपिणं शिशुं स्मरन्तीं हृदि विप्रकन्यकाम् ।
निनाय कल्ये निजमास्पदं शिवो वृषेण विस्मापितविष्टपत्रयः ॥ १३ ॥

स्तनन्धयं देवमुपास्य सा जहौ स्तनन्धयत्वं भवसङ्गसञ्चितम् ।
क्रमेत शम्भावितर्क्यवैभवे क्व तत्क्रतुन्यायविदुक्तिपद्धतिः ॥ १४ ॥

मनुं किल द्व्यक्षरमाचचक्षिरे प्रभुं प्रजासर्गविधौ पुराविदः ।
अयं तु सृष्टिस्थितिसंहृतिक्षमो मनुं यमेकाक्षरमारराध सा ॥ १५ ॥

कदापि देवः करिकालचोलतो निशम्य नृत्तानभियुक्ततां निजाम् ।
बभूव सद्यो नटसूत्रपारगः किमादिशैलप्रकुले तदद्भुतम् ॥ १६ ॥

शिवे प्रसक्ते सति शैवरात्रके महाव्रते मन्दिरमैशमाश्रितः ।
प्रसन्नमभ्यर्चनया हरं पुनः प्रसादयिष्यन् प्रणनर्त्त पार्थिवः ॥ १७ ॥

उदञ्चिताकुञ्चितसव्यपादिकाचिरानुवृत्तिश्रमखिन्नमानसः ।
श्रमं तमीशेऽपि समं व्यचिन्तयत् स हि स्वयं पश्यति शम्भुमात्मवत् ॥ १८ ॥

निधाय सव्यं निभृतं पदं क्षितावुदञ्चयन् दक्षिणमङ्घ्रिमुच्चकैः ।
नटन्नुदस्व श्रममित्यनुक्षणं नटेश्वरं प्रार्थयते स्म पार्थिवः ॥ १९ ॥

अदर्शितस्पन्दमथेषदप्यमुं नटेशबिम्बं कलयन् नरेश्वरः ।
कृपाणकृत्तेन निजेन मौलिना स देवमाराधयितुं समैहत ॥ २० ॥

न किञ्चिदानन्दमयं स वेद तं न वा किमर्चास्वनपायिनीं स्थितिम् ।
तथापि तस्याभवदीदृशी मतिस्तथा हि भक्तिस्तपसापि दुर्लभा ॥ २१ ॥

अवेत्य दुर्भेदममुष्य निश्चयं तथा स देवः प्रससाद नर्त्तितुम् ।
न दुर्लभा तस्य कदापि वश्यता सुदुर्लभा तु स्थिरशीलतैव नः ॥ २२ ॥

अनन्यथात्वव्रतमात्मकर्मणामपि त्यजन् दूरत एव शङ्करः ।
यथा स मेने हृदि राजशेखरस्तथा विपर्यस्य ननर्त्त तत्क्षणम् ॥ २३ ॥

निधाय सव्ये निखिलं भरं तनोः पदे यदास्त प्रकृतिस्तु तस्य सा ।
प्रपञ्चसर्गस्थितिभङ्गभारमप्ययं तु तत्रैव निवेश्य निर्वृतः ॥ २४ ॥

तदद्भुतं ताण्डवमैन्दुशेखरं प्रसादतस्तस्य सिषेविरे जनाः ।
गणेश्वरास्ते विषये महीपतेर्वसन्ति ये शङ्करभक्तिशालिनः ॥ २५ ॥

बबन्ध भक्तिं स्वकृते कृते नृपो विशिष्य तस्मिन् विपरीतताण्डवे ।
तदादि तद्वंशभुवोऽपि पार्थिवास्तमेव देवं शरणं प्रपेदिरे ॥ २६ ॥

प्रमार्ष्टुमागः शतशः समर्पयन् पतिः प्रजानां मणिभूषणानि सः ।
सुतं कुलोत्तुङ्ग इति श्रुतं ततो वरेण लेभे नचिरेण शूलिनः ॥ २७ ॥

गते धरित्रीभृति राजशेखरे गतिं समाख्याविधयैव सूचिताम् ।
कुलोचितोत्तुङ्गगुणाकरश्चिराद् दधौ कुलोत्तुङ्गमहीपतिः क्षितिम् ॥ २८ ॥

गुणेन शीलेन कुलेन चोन्नतं तमीक्षमाणाः क्षितिपास्ततस्ततः ।
उपाहरन् स्वस्वकुमारिकाः स्वतस्ततोऽयुतं तस्य बभूवुरङ्गनाः ॥ २९ ॥

स तासु लेभे सकलासु पार्थिवः समानरूपान्वयशीलवृत्तिषु ।
कुलोचितौदार्यविवेकशालिनां कुमारकाणामयुतानि षट् ततः ॥ ३० ॥

अजायतानन्तगुणाख्यया श्रुतस्तनूभवानां प्रथमो धरापतेः ।
तदाश्रिताश्चरणार्पितासवः परेऽपि तत्तुल्यगुणा विजह्रिरे ॥ ३१ ॥

यदीदृशी दारसमृद्धिरीदृशी कुलाभिवृद्धिश्च बभूव भूपतेः ।
इदं हि लीलायितमिन्दुशेखरप्रसादलेशप्रतिलम्भसम्पदः ॥ ३२ ॥

स वीरभद्रः स्वशरीरसम्भवैः स्वतुल्यतेजोनिधिभिर्गणैरिव ।
समं कुलोत्तुङ्गमहीपतिः सुतैः शशास सर्वाञ्छिवशासनद्विषः ॥ ३३ ॥

अथ द्विजः कश्चन बालपुत्रया समं गृहिण्या मधुरां समासदत् ।
तले वटस्यास्त विशालशीतले क्वचित् कठोरातपतापतापितः ॥ ३४ ॥

असच्चरत्पान्थमनालपद्द्विजं सरोजकोशोदरलीनषट्पदम् ।
प्रतप्तहेमप्रतिमं समस्तमप्यभूदहर्मध्यगते जगद् रवौ ॥ ३५ ॥

ज्वलद् विनापि ज्वलनेन भूतले मदान्धभद्रेभनखंपचं रजः ।
अवेक्षमाणैर्नयनैः शरीरिणामतिप्रतेपे दहनाहतैरिव ॥ ३६ ॥

स गेहिनीं बाहुलतोपधायिना कुचाग्रविन्यस्तमुखेन सूनुना ।
तले शयानां तृषयार्दितां तरोरवेक्ष्य हर्तुं सलिलं ययौ बहिः ॥ ३७ ॥

स किञ्चिदासाद्य सरोऽतिनिर्मलं हरन् जलं पद्मदलेन शीतलम् ।
ददर्श विद्धां दयितां महेषुणा रुदन्तमस्याः शिशुमप्युरस्स्थले ॥ ३८ ॥

प्रियावियोगव्यसनाभिमूर्च्छितः स यावदन्विष्यति तत्र कारणम् ।
ददर्श तावन्मृगयाविहारिणं धनुर्धरं लुब्धकमेकमन्तिके ॥ ३९ ॥

अनेन नूनं दयिता ममाहतेत्यवेत्य केशेषु परामृशन्नमुम् ।
उपेत्य राज्ञः प्रतिहारमुच्चकैर्द्विजः प्रचुक्रोश विषादविह्वलः ॥ ४० ॥

ततः कुलोत्तुङ्गनृपस्तदद्भुतं निशम्य खिन्नः पृथगन्वयुङ्क्त तौ ।
न निश्चिकायैकमघाभियोक्तरि द्विजे किराते च दृढं मृषोत्तरे ॥ ४१ ॥

न तत्त्वमत्र व्यवसातुमीश्महे विना प्रसादाद् गिरिजापतेरिति ।
निरुध्य लुब्धं शमयन् द्विजं गिरा नृपः प्रपेदे शरणं पिनाकिनम् ॥ ४२ ॥

द्विजद्विनीयो नगराद् बहिश्चरन् निशि त्वमस्यामुपलप्स्यसेऽखिलम् ।
इतीरितो भूपतिरिन्दुमौलिना स वैश्यवीथ्यामचरत् क्वचिद्बहिः ॥ ४३ ॥

ततः क्वचित् संवदतोर्द्वयोर्मिथः कथां स शुश्राव कृतान्तदूतयोः ।
निनीषतोर्वैश्यगृहे वरं क्षणात् प्रवृत्तवैवाहिकमङ्गलावधौ ॥ ४४ ॥

शरव्यमुद्दिश्य शकुन्तमेककं पुरा पुलिन्देन चिरार्पितः शरः ।
वटद्रुलग्नः पवनाहतः पतन् यथावधीद् विप्रवधूमतर्कितम् ॥ ४५ ॥

तथाद्य वैवाहिकतूर्यनिस्वनैः परिभ्रमन्त्यात्र गवा निपातितम् ।
वरं समादाय करग्रहावधौ पुनर्निवर्त्तेवहि तत्क्षणादिति ॥ ४६ ॥

सुविस्मितस्तेन सह द्विजन्मना स्वसंशयच्छेदकरीं गिरं तयोः ।
निशम्य संवादकृते नृपः क्षणं प्रतीक्ष्य तस्थौ वरपातनक्षणम् ॥ ४७ ॥

तथैव वृत्तेऽत्र कृतान्तचेष्टिते धनैः प्रभूतैः परितोष्य स द्विजम् ।
विसृज्य च व्याधमनुग्रहं विभोरशेषमावेदयति स्म मन्त्रिषु ॥ ४८ ॥

विधुः कलङ्की वियति भ्रमन्नसौ कलङ्कशङ्कापि न शङ्कराश्रिते ।
अतो न ते स्यादपवादभीरिति प्रशंसितः पाण्ड्यनृपः स मन्त्रिभिः ॥ ४९ ॥

निवेशितोऽनन्तगुणोऽथ मन्त्रिभिः पदे पितुः शाङ्करमेयुषः पदम् ।
स रत्नकेयूरवदावहद् भुजे चतुस्समुद्रीपरिवेष्टितां भुवम् ॥ ५० ॥

द्विजाधमः कश्चिदवन्तिषु स्थितः स्वमातृसक्तस्तदमार्षिणं गुरुम् ।
निहत्य हृत्वा निखिलं च तद्धनं निशि प्रतस्थे सह मातृपाशया[1] ॥ ५१ ॥

तमध्वनि व्याधभटा मदोद्भटाः प्रहृत्य सर्वस्वमथापहृत्य च ।
अपि स्त्रियं तामवरुध्य सुन्दरीमहासिपुस्तं तनुमात्रशेषितम् ॥ ५२ ॥

कदन्नभिक्षाधिगमाव्यवस्थया कृशो रुजार्तः कृपणो दिगम्बरः ।
परिभ्रमन् दिक्षु कदाचिदानशे स भाग्ययोगेन कदम्बकाननम् ॥ ५३ ॥

अयत्नमाच्छादनमन्नमप्यसौ प्रविष्टमात्रो नगरीमविन्दत ।
अनुग्रहान्मीनदृशोऽधुनापि यत्र तत्र कश्चित् क्षुधितो न दुःखितः ॥ ५४ ॥

स सञ्चरन् जातु किरातदम्पती विलासिनौ विश्वविलक्षणश्रियौ ।
ददर्श दिष्ट्या निशि नर्मतत्परौ महेशधामप्रतिहारसीमनि ॥ ५५ ॥

---

१. मातृपाशया निन्दितया मात्रा.

स तत्र विस्रम्भमवाप्य सँल्लपन् न्यवेदयत् स्वं निखिलं विचेष्टितम् ।
ततः किरातीवचनानुवर्त्तिना किरातयूनेत्थमबोधि निष्कृतिम् ॥ ५६ ॥

न कर्मयोगैर्न तपश्शतेन वा विनेतुमंहस्तव विप्र! पार्यते ।
दुरुत्तरं दुष्कृतमप्यमुं शिवं प्रपद्य वर्षैस्त्रिभिरुत्तरिष्यसि ॥ ५७ ॥

इतीरयित्वैव तिरोहितं क्षणादवेक्ष्य तद् द्वन्द्वमपास्तसंशयः ।
अवाललम्बे दृढमम्बिकासखं स विप्रबन्धुः शरणं शरीरिणाम् ॥ ५८ ॥

जपार्चनध्याननतिप्रदिक्षिणस्तवैः स तिस्रः शरदो निरन्तरम् ।
प्रसाद्य देवं प्रमथैः पुरौकसां समक्षमानीयत शाङ्करं पुरम् ॥ ५९ ॥

विशन् पुरीमेव विधूतपातकः सकृत् प्रणम्यैव शिवं गणोऽभवत् ।
परन्तु वैदेशिक एष वत्सरान् प्रतारितस्त्रीनिति पौरवागभूत् ॥ ६० ॥

अनुस्मरन् स्वं चरितं विसिष्मिये स नीयमानः प्रमथैः शिवान्तिकम् ।
विमृष्टमर्मा तु शिवे न्यवेशयत् ततस्त्रिवर्षार्चनयाधमर्णताम् ॥ ६१ ॥

अथाङ्क इत्यस्त्रविदां पुरोगमो गुरुर्भटानां खुरलीषु विश्रुतः ।
बहून् समध्यापयदस्त्रसंहितां प्रयोगसंहाररहस्यकोविदः ॥ ६२ ॥

बभूव शिष्येष्वमितेषु सिद्ध इत्यभिख्यया कश्चन तस्य वल्लभः ।
तमस्त्रशस्त्रेषु विशिष्य पुत्रवद् गुरुर्व्यनैषीदविदन् दुराशयम् ॥ ६३ ॥

स दुर्मतिः स्वं गुरुमप्रकाशयन् प्रकाशयन् स्वां पटुतां तदाहिताम् ।
अपि स्वशिष्या इति शस्त्रकोविदान् भटान् सतीर्थ्यान् प्रलपंश्चचार सः ॥

कदाचिदङ्कस्य सदा सदाशिवप्रणामहेतोर्वसतः शिवालये ।
उपेत्य गेहं युवतिं च तत्प्रियां रहो जिघृक्षन्ननयावधीरितः ॥ ६५ ॥

तमङ्करूपं परिगृह्य जातुचिद् दुराशयं द्वन्द्वरणे निबर्हितुम् ।
पुराद् बहिः पश्यति पौरमण्डले कृपाणपाणिर्युयुधेऽमुना हरः ॥ ६६ ॥

स वञ्चयन् †वेगममुष्य लीलया कदापि मर्म स्वकमप्रदर्शयन् ।
अपक्रमाभिक्रमसम्प्लुतोत्प्लुतैर्विचित्रमीशो व्यचरद् रणाङ्गणे ॥ ६७ ॥

अवस्थितः स्थाणुवदग्रतो रिपोर्निपातयन्निश्चलमायुधं क्षितौ ।
अपि प्रहाराञ्छतशोऽस्य निस्सृतानवञ्चयत् किञ्चिदिवाङ्गकुञ्चनैः ॥ ६८ ॥

† 'खड्गम्' इति खपुस्तके पाठः,

हसन्नवज्ञामसृणैर्विलोचनैरवेक्षमाणस्तृणवत् तमुद्भटम्।
किमप्यभिक्रम्य चकार हुङ्कृतैः कृपाणमुष्टिं शिथिलं स वैरिणः ॥ ६९ ॥

उदस्यतीवासिमधो निपातयत्यधो दधातीव निहन्ति मूर्धनि।
प्रमत्तवत् तिष्ठति नाभिगम्यते परेण तस्यैवमवर्त्ततारवः ॥ ७० ॥

असिं विधून्वन् भ्रमयन्नुदञ्चयन् निपातयन्निश्चलमावहन् पुनः।
करोऽस्य दुर्योधमनोभयङ्करो निमेषमप्यैक्षत नैकचेष्टितः ॥ ७१ ॥

अविक्षतः काप्यसिधेनुधारया विभिद्य तस्योदरमाहरन् शिरः।
प्रकाशयन्नङ्कजयं दिशां मुखे तिरोदधे तद्वपुरिन्दुशेखरः ॥ ७२ ॥

अहो जिगायाङ्क इति प्रशंसतां ततो जनानामवकर्णयन् गिरः।
विसिष्मियेऽङ्कः शिवसन्निधौ वसन्नबुद्धतत्सङ्गरसङ्कथः स्वयम् ॥ ७३ ॥

विचित्रमेतत् किल वृत्तमीशितुः प्रवृत्तमङ्के परभक्तिशालिनि।
इति स्तुवन्तो मधुरौकसः शिवादनन्यमैक्षन्त तमस्त्रकोविदम् ॥ ७४ ॥

किमेतदङ्केन शिवे निवेदितं किमन्ततो वेत्ति स तं व्यतिक्रमम्।
अहो दयालुत्वमनङ्गहन्तुरित्यभूच्चलानामपि निश्चलं मनः ॥ ७५ ॥

ततः स कालेन शशाङ्कशेखरः सदारमेनं प्रमथेष्वयोजयत्।
तरन्ति नाद्यापि तपोधना द्विजाः क ईश्वराणामवधारयेन्मनः ॥ ७६ ॥

तदादि भूयश्शिवभक्तिगौरवे विजृम्भमाणे विषये महीभुजः।
तथागताः केऽप्यभिचर्य पन्नगं न्ययुञ्जतोद्दामविषाग्निभीषणम् ॥ ७७ ॥

तमद्रिकूटप्रतिमं महोरगं समापतन्तं नृपतिर्विचारयन्।
पुराद्विनिर्गत्य पुराहितं स्मरन् शरं शरासे समधत्त दारुणम् ॥ ७८ ॥

महेशभूषान्वययोगशङ्कितः क्षणं विनिश्चित्य स मायिकं ततः।
अताडयत् पन्नगपाशमाशुगैः स चावमत् तद्व्यथया विषानलम् ॥ ७९ ॥

हालाहलेनेव पुरा विनिर्यता विषेण तेन ज्वलताभितापिताः।
जनाः क्षितीशेन समं समाययुः शरण्यमीशं शरणं समाकुलाः ॥ ८० ॥

कृतस्मितो नीपवनेश्वरस्ततः कियत्तदस्तीति गिरा प्रहर्षयन्।
उपेत्य लिङ्गादुरगान्तिकं गतः समन्ततः प्रैक्षत शान्तया दृशा ॥ ८१ ॥

ततः पुरैवोन्मथिते फणाधरे धराधरत्वं प्रतिपद्य तस्थुषि ।
विषाग्निसप्तान् मनुजान् द्रुमानपि व्यधत्त देवः करुणामृताप्लुतान् ॥ ८२ ॥

तथा गते भोगिनि गां सुदुर्जयां तथागताः काश्चिदथाभिचारिकीम् ।
अकल्पयञ्जेतुमिमां समादिशद् दयानिधिर्वाहवृषं वृषध्वजः ॥ ८३ ॥

स तुङ्गशृङ्गव्यतिषङ्गनिर्दलद्घनाघनस्रस्तघनाम्बुवृष्टिभिः ।
खुरक्षतक्षोणिरजः शमं नयन् महावृषः प्रास्थित तज्जिगीषया ॥ ८४ ॥

पदैः स यद् ध्यानतपोध्वरांहतिप्रभेदभिन्नैर्विददार मेदिनीम् ।
रजोभिरुद्धूलितसर्वविग्रहा बभूवुरेतत्प्रभवैर्महर्षयः ॥ ८५ ॥

वृषस्तदुद्धूय विषाणयोर्युगं प्रसह्य तस्या हृदयं विभेद गोः ।
जरद्गवीनां हृदयं विविच्यते यदन्तराश्चर्यगवाक्ष†वर्त्मना ॥ ८६ ॥

स तां पतन्तीमवनीधरात्मना समीक्ष्य शैलः स्वयमप्यभूद् वृषः ।
उदग्रशृङ्गः पुरमुत्तरेण यो विराजतेऽद्यापि वृषाचलाख्यया ॥ ८७ ॥

ततः कुमारं कुलभूषणाभिधं तपोभिरासाद्य कुलार्हविक्रमम् ।
तदर्पिताशेषधुरो धरापतिः पदं प्रपेदे परमैन्दुशेखरम् ॥ ८८ ॥

गाम्भीर्येण निषङ्गतां विशिखतां धर्मद्रुहां निग्रहा-
दुच्छ्रायेण शरासतां कटकतामुच्चावचैर्वाङ्मुखैः ।
विश्वेषामनुरञ्जनैरनुपमैरुत्तंसतामप्यसौ
बिभ्राणः कुलभूषणः कुलपतिं देवः सिषेवे शिवम् ॥ ८९ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे षोडशः सर्गः ।

अथ सप्तदशः सर्गः ।

कुलभूषणस्तदनु भूमिपतिः कुलदैवतस्य मधुराधिपतेः
चरणं सदा परिचरन्नशिषच्चतुरर्णवीवलयितामवनिम् ॥ १ ॥

† 'मात्म' इति स्वपुस्तके पाठः.

अजनिष्ट सुन्दर इति प्रथितो नृपतेरमुष्य पृतनाधिपतिः ।
अतनिष्ट भक्तिमयमष्टविधामपि सुन्दरेशपदपङ्कजयोः ॥ २ ॥

अभिषेणनाय कृतसन्नहने शबरेश्वरे बलिनि चेदिपतौ ।
भटसंग्रहाय स बहु द्रविणं प्रददौ चमूपतिवशे नृपतिः ॥ ३ ॥
स शिवे निवेद्य शबरेन्द्रजये प्रतिभूर्भवानवनिभर्तुरिति ।
अविचिन्त्य किञ्चिदपि पर्यचरद्द्रविणैस्तु तैर्द्रविणनाथसखम् ॥ ४ ॥

अतिनूत्नमातनुत धाम विभोः स सुधार्पणस्फुटितसङ्कटनैः ।
रथमूर्जितं क्षितिरथस्य हयान् करिणश्च काञ्चनमयानकरोत् ॥ ५ ॥

बलमानयेयमिति मन्त्रिवरान् बहुधा तु सोऽतिसमधत्त गिरा ।
कुलभूषणाय परिपृष्टवते कथयाम्बभूव पृतनां मिलिताम् ॥ ६ ॥

सचिवोदितश्रवणजातरुषं नृपमिङ्गितैस्समवबुध्य ततः ।
बहिरानिनाय स महीरमणं बलदर्शनाय सह तैः पिशुनैः ॥ ७ ॥

समये शशाङ्कशकलाभरणः सहितो गणैर्मनुजरूपधरैः ।
स्वयमाजगाम पृतनारजसा स्थगयन् दिशश्च विदिशश्च पुरः ॥ ८ ॥

रथवाजिसिन्धुरपदातिभिदाप्रविभक्तमप्युपसमेत्य मिथः ।
चलितं बलं नृपतिना ददृशे चतुरम्बुराशिसमवाय इव ॥ ९ ॥

असिचर्मचापशरकुन्तगदापरिघत्रिशूलनलिकादिकराम् ।
अतिभीषणाकृतिमदृष्टचरीं परिपश्यति स्म स पदातिचमूम् ॥ १० ॥

प्रलयान्तघोरपवनाभिहतप्रचलद्धराधरकुलप्रतिमम् ।
प्रसमीक्ष्य तं मदगजप्रकरं परिदुद्रुवुर्नरपतेः करिणः ॥ ११ ॥

करभोष्ट्रपुङ्गवकरीन्द्रधृतैर्विविधायुधोपकरणैश्च रथैः ।
विविधध्वजैर्धुरि विभोश्चलिता रथिकाः शिलादतनयप्रमुखाः ॥ १२ ॥

कुरुविन्दकज्जलकुसुम्भनिशाशरकाण्डवासवशरासरुचः ।
मसृणोन्नतांसलमहाहनवस्तुरगाः प्रचेलुरथ तस्य पुरः ॥ १३ ॥

सुरवाहिनीलहरिशुभ्रपटीपरिवीतमौलिरसिचर्मधरः ।
परिनर्त्तयंस्तुरगमिन्दुधरो निरगादनादिरपि सादिवपुः ॥ १४ ॥

असकृद्विरिञ्चमुखमन्दुरिकाकुतुकादिवोत्पतितुमभ्रपथे ।
त्वरमाणमागमतुरङ्गवरं शमयन्निगालकरघट्टनया ॥ १५ ॥

हयमुत्पतन्तमिषुव*द्रभसादवरुध्य सव्यमपसव्यमपि ।
भ्रमयन्नयत्नलवमूरुयुगद्रढिमैकदेशहतदुर्विनयम् ॥ १६ ॥

अभिगच्छति क्षितिभृति स्वयमप्यभिगम्य मूर्त्त इव वीररसः ।
अवधूय खड्गमवरुध्य हयं प्रणनाम तं प्रणतमेष पुरः ॥ १७ ॥

अवितर्क्यवैभवमदृष्टचरं तमवेक्ष्य तामपि चमूं महतीम् ।
तदुदाररूपहृतवाङ्मनसः क्षणमास्त पाण्ड्यनृपतिस्तिमितः ॥ १८ ॥

वचनैरमुं प्रकटितप्रणयैर्वसनैर्विभूषणगणैश्च नृपः ।
परितोषयन् प्रतिमुहुः प्रणमन् परिषस्वजे दृढमभीक्ष्णमपि ॥ १९ ॥

मशकं विजेतुमनुचिन्तयता मदसिन्धुरोऽयमुपलब्ध इति ।
कथयन् नृपश्चरमुखादशृणोन्मृगयासु सिंहनिहतं विमतम् ॥ २० ॥

अथ पार्थिवः प्रमुदितस्तमसावनुमन्यते स्म शिबिराय यदा ।
स तिरोदधे सतुरगः सबलो गिरिशस्तदैव धुरि भूमिभुजः ॥ २१ ॥

तदवेत्य केलिषु कुतूहलिनो मधुरेश्वरस्य महिमायमिति ।
पिशुनान् निगृह्य पृतनाधिपतिं बहुमन्यते स्म बहुधा नृपतिः ॥ २२ ॥

निखिलं पुरा निजधनं गिरिशे व्ययितं यथा किल चमूपतिना ।
सकलं तथा व्ययितुमेव नृपश्चकमे तदादि मधुराधिपतौ ॥ २३ ॥

गजवाजिगोमहिषधान्यधनक्षितिभृत्यमित्रसुतदारमुखम् ।
सकलं शिवाय न ममेति वदन् क्रतुनाराध महताथ शिवम् ॥ २४ ॥

अवलोक्य रिक्तमथ कोशगृहं नृपतेर्दयानिधिरनङ्गरिपुः ।
धनमक्षयं वितरति स्म तथा स यथा न पारयति तद् व्ययितुम् ॥ २५ ॥

धनमक्षयं धनपतेर्दिशतो विगता शिवस्य नहि भिक्षुकता ।
कुलभूषणेऽद्य तु तदर्पयतः सदनं सुवर्णमणिचित्रमभूत् ॥ २६ ॥

---

* 'त्रसभा'दिति खपुस्तके पाठः.

अथ कन्यकाः किल कुलेषु विशामतिसुन्दरेण वपुषा शतशः ।
अलभन्त जन्म मधुरानगरे समयेन शङ्करकथानिरताः ॥ २७ ॥

परपुंसि दारुवनचारिणि याः परमं बबन्धुरभिलाषभिमाः ।
मुनिसुभ्रुवो हि पतिशापवशादभजन् विशां पुनरपत्यदशाम् ॥ २८ ॥

अथ तासु तत्र कलितावतरे तरुणिम्नि वैश्यतनयासु शनैः ।
मनसि स्मरस्मरजितौ युगपत् सुहृदाविव प्रविशतः स्म तदा ॥ २९ ॥

अथ वैश्यवीथिषु वणिक्तरुणो विमलाम्बरो विविधभूषणभृत् ।
अतिसुन्दरो वलयविक्रयिणामवलम्ब्य रूपमचरद् गिरिशः ॥ ३० ॥

वितथेषु पुष्पविशिखेषु शिवे वलयायुधानि बहुधा कलयन् ।
अयमालि! सञ्चरति पञ्चशरो न मृषेति तत्र जगदुः सुदृशः ॥ ३१ ॥

वणिजस्ततो वलयविक्रयिणो भवति स्म वैश्यसुदृशां च तदा ।
इतरेतराशयचमत्करणी सरसा वचःप्रतिवचस्सरणिः ॥ ३२ ॥

वितरन्तु पक्वमिह तालफलं यदि वापि जम्बलफलं विपुलम् ।
वलयानिमान् दधतु वामदृशः कनकेन किं मम गिरौ वसतः ॥ ३३ ॥

क्व नु काञ्चिदेशमपहाय गतिर्मम वः कदाचिदिति मत्सविधे ।
अधरेद्युरुक्तमधुना तु कथं वसतिं निजामभिदधासि गिरौ ॥ ३४ ॥

अतनुज्वरादभिहतोऽस्मि चिरात् तृषितोऽस्मि कापि यदि बिम्बफलैः ।
तरुणी भिषज्यति ममार्त्तिमिमां पथिकस्य मे भवति सा शरणम् ॥ ३५ ॥

उचितोपयोगविरहादफलं वितरामि तावदिह बिम्बफलम् ।
मदनाश्रवस्य परितश्चरतो भवतः कथं भवतु विज्वरता ॥ ३६ ॥

सुदृढास्तवैव करयोरुचिता इति ये त्वया सुघटिता वलयाः ।
त्वयि निर्गते सपदि तैर्गलितं वचनं कथं नु तव विश्वसिमः ॥ ३७ ॥

वलयान् प्रदाय करिदन्तमयान् न मणिर्न काञ्चनमयाचि मया ।
अपि काञ्चिकार्थनमभूद् विफलं त्वयि मे प्रतिश्रुतमपीह कथम् ॥ ३८ ॥

मम देहि विद्रुममयान् वलयान् मम देहि विद्रुममणिं प्रथमम् ।
मम देहि दन्तवलयान् विमलांस्तव तन्वि! वेद्मि न हि दन्तपदम् ॥ ३९ ॥

---

१. काञ्चेकस्य आरनालस्य अथ च काञ्चिकाया अर्थनम् ।

इति सँल्लपन् सरसमिन्दुधरो विचरन् गृहेषु विविधेषु विशाम् ।
करपल्लवव्यतिकरेण तदा सफलीचकार जननं सुदृशाम् ॥ ४० ॥

अथ ता मुनीन्द्रदयिता न चिरात् तनयोपलम्भमुदिताः शतशः ।
परिमृष्टशापकलुषाः प्रमथैर्गिरिशो निनाय कलधौतगिरिम् ॥ ४१ ॥

स कदाचिदास्त वटमूलतले सनकादिभिः शमधनैर्नियतैः ।
अणिमादिसिद्धिकृतमद्रिसुताचरणार्चनोपनिषदं कथयन् ॥ ४२ ॥

उपदेशमेनमतिभक्तिवशादुपशृण्वतां शमवतां सविधे ।
अपि यक्षिणीरनवधानपराः कुपितः शशाप कुसुमास्त्रहरः ॥ ४३ ॥

क्वचिदत्र पाण्ड्यविषये विपिने विजने तले वटतरोर्महतः ।
उपलत्वमेत्य वसतेति ततः प्रससाद ताभिरसकृत् प्रणतः ॥ ४४ ॥

स समाः सहस्रमतिलङ्घ्य ततः परिगृह्य देशिकतनुं गिरिशः ।
अणिमादिसिद्धिमनुगृह्य पुनर्नयति स्म यक्षवनितास्त्रिदिवम् ॥ ४५ ॥

कुलभूषणोऽपि धरणीरमणः शफरेक्षणासहचरार्चनया ।
अथ राजपूर्वपदमिन्द्रमसौ लभते स्म शिक्षितनयं तनयम् ॥ ४६ ॥

अपि राजसिंह इति कश्चिदभूदनुजोऽस्य दुर्विषयलुप्तमतिः ।
समनन्तरं पितुरयं सहजं सुतवद् ररक्ष तमपि क्षितिपः ॥ ४७ ॥

समयेऽत्र चोलनृपतिः प्रथितः कुलशत्रुरस्य किल पाण्ड्यविभोः ।
मधुरेशदर्शनकुतूहलिना मनसान्वतप्यत तपांसि चरन् ॥ ४८ ॥

स्वपने कदाचिदथ चोलनृपं प्रतिबोध्य गूढमुपयातमिमम् ।
विघटय्य गोपुरकवाटयुगं निजमानिनाय निशि धाम शिवः ॥ ४९ ॥

स निमज्ज्य हेमनलिनीसलिले प्रणिपत्य मीननयनागिरिशौ ।
तदनुग्रहेण नगराच्च बहिर्निरगात् तदैव निशि चोलनृपः ॥ ५० ॥

स पुनश्च गोपुरकवाटयुगं घटयञ्छिवो वृषभमुद्रिकया ।
परिचिह्नयन् मनसि पाण्ड्यविभोरतनिष्ट संशयमभेद्यतरम् ॥ ५१ ॥

स परेद्युरात्तसचिवैर्विमृशन्नपि किञ्चिदध्यवसतौ न यदा ।
नृपतिस्तदा निखिलमोहहरं शरणं ययौ शशिकलाभरणम् ॥ ५२ ॥

अपदानमेतदधिगत्य नृपः सकलं गिरा गगनसम्भवया ।
सखितामियेष गुणगृह्यतया स तदैव चोलधरणीपतिना ॥ ५३ ॥

अथ राजसिंहनृपतिर्नृपतेरनुजो विगृह्य कियदप्यपदे ।
उपयम्य चोलनृपतेस्तनयामपि तेन सख्यमकरोत् सुदृढम् ॥ ५४ ॥

अथ तौ समेत्य मधुरानगरीमभिजग्मतुर्बहुचमूसहितौ ।
ददृशे निदाघसमयोऽपि तदा परिशोषयन् सलिलशब्दमपि ॥ ५५ ॥

अपि शुष्यति त्रिदिवसिन्धुजले तृषया हृतेषु तुरगेषु भृशम् ।
गतिमान्यतो गगनसीम्नि रवेर्दिवसेषु दैर्घ्यमजनिष्ट तदा ॥ ५६ ॥

तपने जगत् तपति निष्करुणं समये समस्तमयशो निहितम् ।
सचिवः खलः शिथिलयन् प्रकृतीर्नृपतिं किलापदि निमज्जयति ॥ ५७ ॥

बिततेषु विश्वजयिनः कुसुमेष्वतनोः शिरीषमवशिष्टमिदम् ।
तदपि प्रणश्यतु किमस्य गतं प्रभवोऽपि किं परमुखादरिणः ॥ ५८ ॥

कुचकुम्भमेव मदनः सुदृशामवलम्ब्य पूर्वमजयद् भुवनम् ।
अधुनापि चेत् स कुशली तदलं किमनेन धर्महतकेन शुना ॥ ५९ ॥

अविचारितारिसममित्रकथे समये जगत् तपति दुर्ललिते ।
मदनस्तदाशुगहताश्च समं शरणं ययुः स्तनगिरिं सुदृशाम् ॥ ६० ॥

मदने प्रवर्त्तयति वारयति श्रमवारिशीकरकिरे समये ।
अलभन्त कामिषु गतागतिकामसकृच्चरा इव दृशः सुदृशाम् ॥ ६१ ॥

अनवेक्ष्य नाथमियमम्बुजिनी शिशिरे यदास्त विदितं किल तत् ।
परया श्रिया ज्वलति तत्र रवौ कथमद्य जीवनकथापि गता ॥ ६२ ॥

विकचेषु सूरकिरणोष्मभिया मुकुलीकृतेषु च निवाततया ।
कमलोदरेषु शयितुं भ्रमरो न शशाक तप्तमधुसेवनतः ॥ ६३ ॥

अपि नारिकेलसलिलेक्षुरसैरजहत् तृषो रविकरकथितैः ।
अपिबन्नहःपरिणतौ सुदृशामधरं प्रियाः प्रणयशीतलितम् ॥ ६४ ॥

करिणोऽपि कर्णवलयानसकृच्चलयाम्बभूवुरनिलाय मुधा ।
ववृते न फूत्कृतिषु वामदृशां व्यजनेऽपि लुप्त इव गन्धवहः ॥ ६५ ॥

अनवग्रहैरपरदिक्पवनैः समुदस्यमानमपदिश्य रजः ।
सलिलाशया मरुमरीचिषु किं धरणी दिगन्तमगमत् तृषिता ॥ ६६ ॥

अतिचण्डपश्चिमसमीरहृतैरभितोऽपि तिग्ममहसः किरणैः ।
अनुषञ्जिता इव वनावलयो दवसङ्गता ददृशिरे शतशः ॥ ६७ ॥

सरसीषु पल्वलदशा ददृशे भुवि पल्वलेष्वपि च शाद्वलता ।
अपि शाद्वलेषु चिरजाङ्गलता परतो वयं न वदितुं प्रभवः ॥ ६८ ॥

पवनेन संवलित एव शिखी परिजृम्भते न परथेत्ययशः ।
परिमार्ष्टुमेव पवने विरमत्यदहद् वनं वनमहो दहनः ॥ ६९ ॥

क्वथितं जलं क्षितितलं ज्वलितं मरुतश्च मुर्मुरकिरः परितः ।
गगनं च दुर्विषहमर्ककरैरिति पर्यणंस्त जगदग्निमयम् ॥ ७० ॥

अपनीय कञ्चुकमहर्विरमे मरुदाशया रहसि मुग्धवधूः ।
समवस्थिताः समुपलभ्य हठात् परिरेभिरे सुकृतिनस्तरुणाः ॥ ७१ ॥

रजनीमुखाहृतमृणाललतादलयैः शशाङ्ककिरणस्पर्शितैः ।
उषसि स्वयं प्रियतमोपहृतैः सरसीष्ववर्तयत चक्रगणः ॥ ७२ ॥

इयतापि तावदिदमापतितं प्रलयं तरेम पयसेति दृढम् ।
अवगत्य यत्र शफरैरुषितं लुलितं सरस्तदपदे महिषैः ॥ ७३ ॥

अवगाह्य पद्ममकरन्दझरीष्वहिमद्युतावनुदिते भ्रमराः ।
अजपन्नुपांशु कृतझङ्करणा मदनापमृत्युहरमन्त्रमिव ॥ ७४ ॥

धृतमल्लिकाकुसुमहारलता, घनसारचन्दनरसार्द्रकुचाः ।
वनिता दुकूलवसनाभरणास्तरुणानुपासत दिनापगमे ॥ ७५ ॥

कटकं प्रविष्टवति चण्डकरे कटकं तदव्यथत चोळपतेः ।
ववृधे तु पाण्ड्यनृपतेः समये महसां निधेरिव महः परुषम् ॥ ७६ ॥

अथ सुन्दरेशमभिवन्द्य नृपः कलयन् प्रसादबलमस्य बलम् ।
निरगाद्यथोपनतसैन्यवृतो नगरादरातिविजयाय तदा ॥ ७७ ॥

चिरसम्प्ररूढदृढमत्सरयोरजनिष्ट जन्यमथ तत्र तयोः ।
अपि विस्मयाय हृदि यद् द्युसदामपि नारदस्य यदलम्मतये ॥ ७८ ॥

असिकुन्तशूलपरशुच्छुरिकापरिघाभिघातविगलद्रुधिरम् ।
अविचारितस्वपरसैन्यमभूत् प्रथनं तदस्थिरजयापजयम् ॥ ७९ ॥

समरे भुजाभुजि कचाकचि च प्रहरद्वयं चलति तद्बलयोः ।
तदवेक्षितुं गगनमध्यतलं रविरध्यरोहदतितुङ्गमिव ॥ ८० ॥

मधुमासपुष्पितपलाशवनप्रतिमं तुरङ्गखुरधूलिवृतम् ।
तदुदन्यया परुषयाभिहतं बलयोर्द्वयं सममभूद् विरतम् ॥ ८१ ॥

परिपूरितां शिशिरकुम्भशतैर्विपुलां प्रपां क्वचन पाण्ड्यबले ।
अधिरुह्य मौलिसरिदम्बुभरैस्तृषितानतर्पयत भूतपतिः ॥ ८२ ॥

करुणामृतेन मधुराधिपतेर्मधुरैश्च मौलितटिनीसलिलैः ।
परिपोषिताः सपदि पाण्ड्यभटाः पुनराहवाय मतिमादधिरे ॥ ८३ ॥

अथ सिंहनादमुखरा युगपन्नृपतेर्भटाः परिनिपत्य रणे ।
सह राजसिंहधरणीपतिना जगृहुः करे सपदि चोलनृपम् ॥ ८४ ॥

जयं समासाद्य निवर्त्तमानः प्रपां पुनः क्वाप्यनवेक्षमाणः ।
राजेन्द्रपाण्ड्यो मधुरेश्वरस्य लीलायितं तत् कलयाम्बभूव ॥ ८५ ॥

सरूयं प्रदाय मधुरेश्वरभक्तियोगात् सत्कृत्य चोलनृपतिं विससर्ज पाण्ड्यः ।
तं राजसिंहमपि दुर्मदमुन्मदिष्णुं भ्रातेति जातकरुणो बिभराम्बभूव ॥ ८६ ॥

अम्भोभिः केवलैरप्यवनिपतिचमूं तर्पयन् जातु तस्यां
ख्यातिं धत्ते यदीशः कियदिव न यशो नित्यमन्नप्रदायाः ।
देव्या मीनेक्षणाया इति नगरजुषामद्भुतान् भक्तिवादान्
शृण्वन् राजेन्द्रपाण्ड्यः सकलमपि महीचक्रमेकः शशास ॥ ८७ ॥

ततो राजेशपाण्ड्योऽभूद्राजगम्भीर इत्यतः ।
पुरुहूतजिदप्यस्मादस्मादासीत् कुलध्वजः ॥ ८८ ॥
सुन्दरेशप्रसादेन सुन्दरेशाङ्घ्रिशेखरः ।
ततो जज्ञे यतो जज्ञे तारेन्दुविमलं यशः ॥ ८९ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवे सप्तदशः सर्गः ।

अथाष्टादशः सर्गः ।

स हयान् सहस्रमयुतं भटोत्तमान् करिणः शतं दश महारथानपि ।
परिगृह्य सैन्यमुचितं व्ययं चरन्नवशिष्टमन्यदखिलं शिवे ददौ ॥ १ ॥

अथ धान्नि पुष्पवननाम्नि धूर्जटेरविदूरवर्त्तिनि कदम्बकाननात् ।
अजनिष्ट कापि किल हेमनायिकेत्यभिविश्रुता जगति रुद्रकन्यका[1] ॥ २ ॥

शिवभक्तपूजनपरा शिवव्रता शिवबिम्बमेकमखिलोत्सवोचितम् ।
परिकल्प्य सिक्थकमयं प्रचक्रमे परिशुद्धताम्रकणसञ्चयाय सा ॥ ३ ॥

अथ नाचिरादनुपलब्धसाधना दधती तमेव सुदृढं मनोरथम् ।
मधुरेशमेव धृतसिद्धविग्रहं मदिरेक्षणालभत भाग्यतोऽतिथिम् ॥ ४ ॥

प्रणिपत्य तं परिचरन्त्यनेकधा रससिद्धिदर्शनपरेण तेन सा ।
अनुकम्पिता सकलमायसं गृहे भसितेन तस्य नयति स्म हेमताम् ॥ ५ ॥

कृतविस्मयाथ गिरिशे तिरोहिते परिकल्प्य तां प्रतिकृतिं हिरण्मयीम् ।
अवलम्ब्य गण्डतलमङ्गुलीमुखैः परिचुम्बति स्म गणिकातिसुन्दरम् ॥ ६ ॥

अधुनापि तन्नखपदं यदीक्ष्यते विमले कपालफलके महेशितुः ।
श्रमवारिलेशवति तत्र सङ्गतं शकलं विधोरिव जटापरिच्युतम् ॥ ७ ॥

अपि यन्महाक्रतुभिराप्तदक्षिणैरपि वा त्रयीपरिचयैरहर्निशम् ।
अनवाप्यमस्ति पदमैन्दुशेखरं तदवाप सा तदनुकम्पिता ततः ॥ ८ ॥

गजवाजियोधरथयूथभीषणां परिगृह्य चोलनृपतौ पताकिनीम् ।
अभिगच्छति स्वयमनन्यसाधनः शिवमाराध शिवपादशेखरः ॥ ९ ॥

तमुवाच वागथ नभस्समुद्भवा न बिभीहि तस्य महती चमूरिति ।
अभिषेणय त्वमरिमल्पसैनिको विजयस्तवैव भवितेति पार्थिवम् ॥ १० ॥

अथ पाण्ड्यमल्पबलमभ्ययात् बली सरितं समुद्र इव चोलपार्थिवः ।
नृपतिश्च निश्चलमतिर्व्यवस्थितः कलयन् पुरः कनकशैलकार्मुकम् ॥ ११ ॥

अथ युद्धमुद्धतमवर्धत क्षणाद् दृढरूढगूढतरवैरयोस्तयोः ।
असिपातपाटितपतन्मतङ्गजस्रवदस्रसिन्धुहृतसैन्धवव्रजम् ॥ १२ ॥

---

१. देवदासी.

निशितेषु तत्र निपतत्सु सायकेष्वभितो भयादतिविदूरवर्त्तिनः ।
निहतान् हयद्विपभटान् निनीषवो मुहुराह्वयन् यमभटाः प्रसान्त्वनैः ॥ १३ ॥

वपुरानिलं न पिशिताशनक्षमं यदि पार्थिवं शरशतैर्विभेत्स्यते ।
इदमुत्तरेम कथमर्थकृच्छ्रमित्यवलन्त दूरमभितः पिशाचिकाः ॥ १४ ॥

प्रथमं हता युधि दिवं समुद्गताः पुनरर्धवर्त्मनि शरैर्निपातिताः ।
पुनरुद्गता द्विगुणभागभाजिनः कतिचिद् भटा दिवि कृताः सुधाशनैः ॥ १५ ॥

अगृहीतशक्तिकतया मिथः कथास्ववबद्धमौनकृतहस्तचेष्टिताः ।
अमरस्त्रियो रणहताश्च तद्भटाः पशुवत् सुखं निखिलमप्यभुञ्जत ॥ १६ ॥

धवलातपत्रवलयाश्चकाशिरे रदनाश्च मत्तकरिणां निपातिताः ।
यशसो दिगन्तमभिपूरयिष्यतः प्रथमोद्गता रणतलेऽङ्कुरा इव ॥ १७ ॥

तुरगैः समं तुरगसादिनो हता दिवमुद्ययुः समधिरुह्य तान् पुनः ।
अतिसाहसेन दिवमभ्युपेयुषामपि वाह्यवाहकदशा न शाम्यति ॥ १८ ॥

अवभिद्य बिम्बमहिमद्युतेर्दिवं प्रति गच्छतां युधि भटाश्वदन्तिनाम् ।
गणनाममर्त्यगणका वितेनिरे चरमाङ्गसीम्नि निभृता विवस्वतः ॥ १९ ॥

शरपञ्जरस्थगितभूनभोन्तरे समराङ्गणे घनतमस्समावृते ।
अभिसारिकेव विजयेन्दिरा चरन्त्यवृणीत तं तमविशेषदर्शिनी ॥ २० ॥

बलयोर्द्वयोरपि मदोद्भटा भटा बहवस्तथा रणमुखे निपातिताः ।
सकलं यथाजनि पुरं शतक्रतोर्हृतदारमन्दिरविमानभूषणम् ॥ २१ ॥

हतशिष्टमल्पमवलोकयन् बलं प्रचचाल पाण्ड्यनृपतिर्यदा पुरः ।
तरसावपत्य हयसादिरूपतः पुरतश्चचाल पुरशासनस्तदा ॥ २२ ॥

परुषं रुषा परिरटन् करेण च भ्रमयन् युधि त्रिशिखमुन्मिषच्छिखम् ।
प्रचलन् पदानि कतिचित् पुराहितः शिथिलीचकार निखिलं बलं द्विषाम् ॥ २३ ॥

अपविद्धकुन्तलमचिन्तिताटवीसलिलानलप्रदरगर्त्तकण्टकम् ।
अनवेक्षितस्वजनमानशे दिशो बधिरान्धमूकमिव तद् बलं द्विषाम् ॥ २४ ॥

सह धावतो निजजनान् परभ्रमादभिगम्य केचिदभयं ययाचिरे ।
अपरे क्षताः स्म इति मूर्च्छिताः स्वयं क्षतजोक्षितान् पथि समीक्ष्य धावतः ॥

अधियुद्धरङ्गमसवस्तृणीकृताः शिवपादशेखरवरूथिनीभटैः ।
इति किं प्रतीक्ष्य रुषिताखिलं तृणं पृतना चचर्व पथि चोलभूभृतः ॥ २६ ॥

अथ मुक्तकेशमपथेन विद्रवन् सरसि क्वचित् सतुरगः ससैनिकः ।
निममज्ज चोलनृपतिर्निमज्जयन्नखिलं कुलं स्वमयशःपयोनिधौ ॥ २७ ॥

अतुलानि हेममणिभूषणाम्बराण्युपहृत्य तस्य कटकान्महीपतिः ।
अखिलानि तान्युपददे महाशयो हरिणाङ्कचूडचरणारविन्दयोः ॥ २८ ॥

अथ भक्तसौम्य इति कश्चिदर्चयन्ननिशान्नदाननियमेन शङ्करम् ।
अनुवर्तयन् व्रतमृणार्णधारयाप्यवसीदति स्म विधनः स सर्वथा ॥ २९ ॥

व्रतभङ्गखेदविवशं तमग्रतः पतितं जिहासुमपि दुर्लभानसून् ।
प्रतिपाद्य तण्डुलनिधानमक्षयं परिरक्षति स्म मधुरेश्वरो हरः ॥ ३० ॥

अथ कश्चिदर्थपतिरित्याभिख्यया विदितो विशामधिपतिः पुरे वसन् ।
असुतो धनानि भगिनीसुते दिशन् दशमी जगाम तपसे वनाश्रमम् ॥ ३१ ॥

अखिलं धनं तदपहर्तुमिच्छवो भगिनीसुते विनिहितं सनाभयः ।
पृथुकं यदा तमधिकं बबाधिरे शरणं ययौ स मधुरेश्वरं तदा ॥ ३२ ॥

अथ तस्य मातुलवपुः परो भवन्नभिजित्य तान् नृपसभे विरोधिनः ।
सहसा यदा पुरहरस्तिरोदधे सकलैस्तदा सदसि विस्मितं जनैः ॥ ३३ ॥

तनयं ततो वरगुणं तपोबलाच्छिवभक्तमेत्य शिवपादशेखरः ।
अखिलं महीवलयमर्पयन् सुते शफरेक्षणाचरणयोरलीयत ॥ ३४ ॥

स कदाचिदेत्य मृगयां परापतन् शयितं क्वचिद् द्रुमतले पथि द्विजम् ।
निहतं तुरङ्गखुरघट्टनैर्विदन् बिभयाम्बभूव जगृहे च हत्यया ॥ ३५ ॥

वसुधेश्वरो वरगुणोऽथ दुःखितः सकलं निनाय सचिवेषु भूभरम् ।
जपदानहोमविधिभिर्जगत्पतिं सततं यजन्नपि न शान्तिमाप सः ॥ ३६ ॥

अशृणोत् स वाचमशरीरिणीं ततः करुणालयस्य हरिणाङ्कधारिणः ।
मधुराकृतस्य हि महत्त्वमंहसः सुकृतस्य वा न पथि वर्तते गिराम् ॥ ३७ ॥

मम लिङ्गमर्जुनतरोरधस्तले महदस्ति सह्यतनयातटे शुभे ।
तदुपासनेन तव तात! दुष्कृतं सकलं प्रयाति विलयं क्षणादिति ॥ ३८ ॥

स तथेति कार्यमवधार्य निस्सरन्नपदिश्य चोळनरपालविग्रहम् ।
शिवमर्जुनेशमभिवन्द्य तत्क्षणादभवन्निवृत्तकलुषो महीपतिः ॥ ३९ ॥

स पुनः समेत्य नगरीमकल्मषः फणिवक्त्रमुक्त इव पार्विको विधुः ।
प्रशशास वासव इव त्रिविष्टपं वसुधेश्वरो वरगुणः क्षमातलम् ॥ ४० ॥

अथ भद्र इत्यभिमतः क्षमापतेरतिविश्रुतश्च भुवि गायकाग्रणीः ।
उपवीणयन्ननिशमुत्पलप्रियं चिरमास्त कश्चन कदम्बकानने ॥ ४१ ॥

अथ तं विजेतुमपरस्तु गायकः प्रथयन् यशो विरुदडिण्डिमस्वनैः ।
नृपतिं ददर्श स यदा तदा शिवः स्वयमेव भक्तमवितुं मनो दधे ॥ ४२ ॥

स निधाय मूर्ध्नि शशिखण्डमण्डने सुमहान्तमिन्धनभरं नराकृतिः ।
दिवसावसानसमयावधि भ्रमन् परितश्चचार मधुरापुरे हरः ॥ ४३ ॥

इदमिन्धनं धनमिवाहृतं चिरादतिशुष्कमव्रणमकण्टकं गुरु ।
क्षममस्य मूल्यमुपकल्प्य गृह्यतामिति घोषयन् परिचचार शङ्करः ॥ ४४ ॥

उपगायतोऽस्य पथि गानवैभवादुपजातपल्लवतयातिकोमलम् ।
अपि मस्तकस्थसरिदम्भसार्दितं न तदिन्धनं जगृहिरे पुरौकसः ॥ ४५ ॥

चरतोऽस्य तत्र नगरे ततस्ततश्चरणाब्जविन्यसनभावितं रजः ।
चतुराननप्रभृतिभिः समं सुरैः प्रणिपत्य सञ्जगृहिरे महर्षयः ॥ ४६ ॥

करयुग्मसङ्गमितभारमन्थरं घटितश्रमाम्बुकणमस्य वीथिषु ।
क्रयवादनादजितकोकिलारवं गतमागतं च न गतं ममाशयात् ॥ ४७ ॥

अथ काष्ठभारमवरोप्य दुर्भरं स बहिर्गृहादभिनवस्य गायतः ।
उपविश्य वीतभरणश्रमः शनैरुपगायति स्म मधुरं यदृच्छया ॥ ४८ ॥

अथ षाडवौडवविभेदि सर्वमप्यवलम्ब्य रागकुलमस्तसङ्करम् ।
स जगावनुल्लिखिततानधोरणीमधुरं हृिये हृदि भिये च गायताम् ॥ ४९ ॥

अथ विस्मयादभिनवस्य गायतो गुरुसम्प्रदायमभिगम्य पृच्छतः ।
स जगाद भद्रसदने गतागतैरदसीयगीतिगुणरीतिमाहृताम् ॥ ५० ॥

तदुदीरितश्रवणलब्धसाध्वसे प्रपलायिते सपदि तत्र गायके ।
उप*गम्य भद्रमुचितैर्विभूषणैर्बहुमन्यते स्म नृपतिर्धनैरपि ॥ ५१ ॥

---

१. षाडवः षट्स्वरो रागः । औडवस्तु पञ्चस्वरः.

---

* 'चर्य' इति खपुस्तके पाठः.

स ददौ समस्तमपि तन्महेश्वरे वितितार यद् वरगुणोऽस्य पार्थिवः ।
अपि सञ्चितं वसु दिशन् शिवाश्रमिप्वधनो बभूव बहुधार्जयन्नपि ॥ ५२ ॥

कविगायकाभिमतकल्पशाखिनः सविधे कदाचिदथ चेरभूपतेः ।
प्रवितीर्य पुत्रमपि भक्तमात्मनः प्रजिघाय भद्रममृतांशुशेखरः ॥ ५३ ॥

स्वपने पुरैव स च तत्समागमं प्रतिबोधितः पुरहरेण पार्थिवः ।
अभिगम्य भद्रममितैर्विभूषणद्रविणाम्बरैः सपदि पर्यपूजयत् ॥ ५४ ॥

इति कन्दलत्यहरहर्दयारसे शफरेक्षणासहचरस्य गायके ।
भवति स्म भक्तिरपि तस्य तावती चरमं शरीरमधितष्ठुषस्तदा ॥ ५५ ॥

उषसि प्रगे तदनु सङ्गवे ततो दिनमध्यगे दिनमणौ निशामुखे ।
रजनीदले च नियमादसेवत प्रमथाधिनाथमुपवीणयन्नयम् ॥ ५६ ॥

समयेषु षट्सु नियमेन यज्जगौ स बहिर्वृषात् स्वयमनावृते वसन् ।
द्रढिमानमस्य नियमे परीक्षितुं जलदानचोदयत वृष्टये हरः ॥ ५७ ॥

स्तनितारवैर्वधिरतामगुर्दिशस्तटितां त्विषा तनुभृतां हृता दृशः ।
अपतन् क्षितावशनयः पदे पदे तिमिरं निरन्तरमरुद्ध रोदसी ॥ ५८ ॥

जगदास्त बद्धमिव जातसाध्वसं समये यदा स तु तदैव गायकः ।
अवगाह्य हेमकमलाकरे शनैरभिगम्य सन्निधिमगायदैश्वरम् ॥ ५९ ॥

अथ मेघरञ्जिमहिरञ्जिमुख्यतन्मृदुगानसंवलितरागवैभवात् ।
द्रवतां प्रपन्नमिव भूनभोन्तरं ददृशे तदा जलधरैर्निशात्यये ॥ ६० ॥

करकोपलैर्विघटिता विपञ्चिका करजा न तस्य वशवर्त्तिनोऽभवन् ।
अपि कम्पमानवपुरप्रकम्पिनीमवलम्ब्य भक्तिमयमुज्जगौ पुनः ॥ ६१ ॥

घनकर्दमद्रवनिमग्नमग्रतश्चरणद्वयं चलयितुं च नाशकत् ।
स यदा तदास्य विपुलं समुन्नतं स्वयमुद्बभूव मणिचित्रमासनम् ॥ ६२ ॥

स निविश्य तत्र शिवसक्तया दृशा निरवर्त्तयन्नियममत्वरो यदा ।
विरतं घनैर्विमलमम्बरं बभौ विललास दिक्षु च तदैव कौमुदी ॥ ६३ ॥

फलकं तदद्भुतमवेक्ष्य पार्थिवः प्रणिपत्य भद्रमसकृत् प्रशस्य च ।
शिवलिङ्गतोऽपि शिवयोगिषु स्थिरां शिवभावनामकृत तत्प्रभृत्ययम् ॥ ६४ ॥

अथ राजराज इति दिक्षु विश्रुतं तनयं बहुश्रुतमसावविन्दत ।
तपसा प्रसाद्य तरुणेन्दुशेखरं मलयध्वजान्वयमहानिधिं नृपः ॥ ६५ ॥

अवरोप्य भारमखिलं भुवः सुते लघुरुत्पतन् वरगुणः शिवान्तिकम् ।
अवनीभृतः पुनरधात् फणाधरानियमस्य भूभरणवासनेदृशी ॥ ६६ ॥

उदितोदितं विविधया सपर्यया भजतां स्वमेव भुवि पाण्ड्यभूभुजाम् ।
अपवर्गमेकविधमर्पयन्नयं मधुरेश्वरोऽपि महतीं ह्रियं दधे ॥ ६७ ॥

अथ राजराज इति लब्धमाख्यया पुरभित्सखत्वमतिशय्य वर्त्तितुम् ।
पितरौ गुरुं सुहृदमात्मनः प्रभुं कुलदैवतं च कुरुते स्म तं नृपः ॥ ६८ ॥

निममज्ज तस्य हृदयं निसर्गतः शफरेक्षणासहचराङ्घ्रिपद्मयोः ।
कुलशेखरान्वयभुवां शिवव्रते कुत एष कारणगवेषणश्रमः ॥ ६९ ॥

अथ भद्रनामनि चिराय गायके शिवलोकमेयुषि तदीयगेहिनी ।
चतुरा ततोऽपि किल गानविद्यया शिवमाराध समयेषु षट्स्वपि ॥ ७० ॥

अवरोधगेहमधिजग्मुषी विभोरवनीपतेर्दयितया कयाचन ।
कलहायते स्म निजगानविद्यया दृढया महेशदयया च जातु सा ॥ ७१ ॥

तदुपक्रमं धरणिवल्लभोऽपि तामवमन्तुमाहितकुतूहलश्चिरात् ।
स्वयमानिनाय जलराशिमध्यतः सुदृशं स काञ्चिदथ गानकोविदाम् ॥ ७२ ॥

जगतुस्ततः सदसि ते महीपतेरधिकेत्यगृह्यत तु तत्र नूतना ।
मनसाधिगम्य मधुरेश्वरं शुचा भणति स्म भद्रगृहिणी पुनर्नृपम् ॥ ७३ ॥

सदसि स्थिता मयि चिरादमर्षिणो यदि किञ्चिदाहुरिह किं ततः क्षतम् ।
अभिगम्य सन्निधिमनङ्गशासितुः कथयन्त्वमी तरतमत्वमावयोः ॥ ७४ ॥

विजयेत या भवतु सात्र भट्टिनी विजिता तु मा भवतु सात्र किङ्करा ।
इति सा यदाह तदनिच्छतोऽप्यभूदभिनन्दनीयमवनीभुजस्तदा ॥ ७५ ॥

अथ ते समेत्य सविधं महेशितुः सह पार्थिवेन सदसि स्थितैरपि ।
जगतुर्गिरा मधुरयादितस्ततः परिवादिनीमुरलिकाविपञ्चिभिः ॥ ७६ ॥

अधिका तु यद्यपि नवैव तत्त्वतस्तदपि प्रपन्नजनपक्षपातिनः ।
मधुरेश्वरस्य किल मायया वृता बहुधा समस्तुवत भद्रगेहिनीम् ॥ ७७ ॥

---

१. शिवसायुज्यप्राप्त्या शेषादिनागभूषणोऽभवदिति तात्पर्यम् ।

जयभङ्गयोर्विदितयोर्विपर्ययादपि तत्र नीपवनभर्तुराज्ञया ।
विजिता नवैव विजितं तु भद्रयेत्यगदीदभीक्ष्णमवशो महीपतिः ॥ ७८ ॥

अवलम्ब्य दास्यमथ सिंहलागता सदसि स्वयं परिचचार भद्रिकाम् ।
स च पार्थिवः कनकभूषणाम्बरैर्विविधैरपूजयत विस्मयेन ताम् ॥ ७९ ॥

इति राजराजधरणीपतेः क्षितिं परिरक्षतः प्रणिहितेन चेतसा ।
विनयो विवेकत इवातिविश्रुतस्तनयोऽभवत् सुगुण इत्यभिख्यया ॥ ८० ॥

तारुण्य एव विनयावनतं कुमारं
तं राजराजनृपतिः सकलागमज्ञम् ।
पश्यन्नखण्डितपराक्रममभ्यषिञ्चत्
सम्प्रार्थितः प्रकृतिभिः किल यौवराज्ये ॥ ८१ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णवेऽष्टादशः सर्गः ।

अथैकोनविंशः सर्गः ।

तनूभवे वहति ततो वसुन्धरां चिरादसौ नृपतिरुपेत्य विश्रमम् ।
वनेचरैः सह मृगयाकुतूहली वनंवनं व्यचरदधिज्यकार्मुकः ॥ १ ॥

परिभ्रमच्छ्वगणविकृष्टशृङ्खलावलीघनध्वनिजनितप्रबोधनाः ।
ततस्ततस्तरुतलकुञ्जपुञ्जतो विनिर्ययुर्विवृतमुखा मृगादनाः ॥ २ ॥

पुनः पुनः परिपततः शुनः क्रुधा जिघृक्षवः खरनखरास्तरक्षवः ।
प्रचक्रमुः किमपि यदा तदा शरैर्निरन्तरानकृततरामिमान् नृपः ॥ ३ ॥

स्तनग्रहग्रहिलतया निरुन्धतस्तनन्धयान् सपदि विलङ्घ्य सम्भृता ।
मृगी मृगं क्षितिपतिपाणिगोचरादपालयत् स्वयमभिपेतुषी पुरः ॥ ४ ॥

स्वसायकादपि चललक्ष्यपातिनः स्वयं पुरः परिचलता महीभृता ।
अरुध्यत प्रथममविध्यत त्वथ त्वरोच्चलत्तुरगखुरक्षता मृगी ॥ ५ ॥

सटासु तच्छबरभटावलम्बितः प्रकम्प्रितुं किमपि न चक्षमे स्वतः ।
अवैक्षत भ्रुकुटिविटङ्कभीमया दृशा पुनस्तदपि मृगान् मृगाधिपः ॥ ६ ॥

वृथा नयन् विपिनचरान् शराहतान् विषादमावहत यमन्तरन्तकः ।
स तस्य तं महिषगणान् निपातयन्नपाहरद् वनभुवि वाहनार्पणात् ॥ ७ ॥

गणंगणं चमरवराहगण्डकान् वृकानपि क्षपयति तत्र पार्थिवे ।
किटिर्झटित्युपनिपपात कश्चन क्रुधा ज्वलन्नचलगुहागृहात् ततः ॥ ८ ॥

स दंष्ट्रया कुलिशनिशातधारया परिक्षिपन् शबरभटानितस्ततः ।
गणं शुनामविगणयन् पदेपदे धरापतेस्तुरगसमीपमापतत् ॥ ९ ॥

अवस्थितं धुरि तमवेक्ष्य पार्थिवः स सन्दधे धनुषि न यावदाशुगम् ।
स तावदुच्चलितविषाणकोणतो व्यदारयच्चरणतले तुरङ्गमम् ॥ १० ॥

अवप्लुतः सपदि तुरङ्गमात् ततः पतिः क्षिते रथमधिरुह्य तं पुरः ।
अवाकिरज्ज्वलितमुखैः शिलीमुखैर्धराधरं जलद इवाम्बुवृष्टिभिः ॥ ११ ॥

स तद्धनुर्वलयविनिस्सृतैः शरैः समाचितः शललगणैरिवाभितः ।
अचूर्णयन्मुखमसकृद् विधूर्णयन् ससारथिं सतुरगमस्य तं रथम् ॥ १२ ॥

ततः प्लुतः सपदि रथान्महारथस्तमुद्धतं गिरिमिव जङ्गमं किटिम् ।
अनुद्रुतं प्रियतमया नृपो रयादपातयत् स भुवि कृपाणपाटितम् ॥ १३ ॥

ततः प्रभृत्यजनि वराहशैल इत्यभिख्यया धरणिधरः स विश्रुतः ।
उपत्यकामुपरुरुधे स यस्य तां पतन् किटिः पृथुरिव पादपर्वतः ॥ १४ ॥

गते पुरं धरणिपतौ सविस्मये क्षुधार्दितास्तदनु वराहपोतकाः ।
प्रसूस्तनप्रणयकृतातिकूजिता दशापतन् द्विसमधिकास्तदावशाः ॥ १५ ॥

तपस्विनामवनकृते तपस्यतां गिरेस्तटे कृतरतिरत्र शङ्करः ।
कृपालयः किटिपृथुकानपालयत् स तत्प्रसूतनुरमितैः स्तनामृतैः ॥ १६ ॥

पुरा युगे वृषलकुमारका हि ते तदाश्रिताः शमधनशापतो वपुः ।
समुद्धृताः पुरमथनस्तनामृतैः क्षणाद् दधुः किटिवदना मनुष्यताम् ॥ १७ ॥

कलासु ते दधुरखिलासु कौशलं विशिष्य च क्षितिपतितन्त्रवैदुषीम् ।
न सूकरः शिवचरणे कृताशयः स सूकरः पुरभिदि यः पराङ्मुखः ॥ १८ ॥

वराहताभरणविलासवासनावशादिव श्रुतिशतमौलिलालितम् ।
विमार्गितुं चरणयुगं पुराद्विषः कुतूहलं सततममी वितेनिरे ॥ १९ ॥

---

१. विषाणं वराहदन्तः.

अनुज्ञया तदनु कदापि धूर्जटेरवस्थितानचलगुहासु तान् नृपः ।
समानयन् सचिवपदे न्यवेशयद् वचस्विनो नरपतितन्त्रकोविदान् ॥ २० ॥

सभाजिता नृपतिवरेण सर्वथा चिरायुषो द्विसमधिका दशापि ते ।
शिवाश्रमव्यतिकरधूतकल्मषाः शिवं ययुः प्रणतशिवङ्करं ततः ॥ २१ ॥

ततो गते पितरि पदं महेशितुस्तदात्मजः सुगुणनृपालशेखरः ।
अपालयच्चिरमवनीं ससागरामचञ्चलामकृत च भक्तिमीश्वरे ॥ २२ ॥

बहिर्भ्रमन् क्षुदुपशमाय सर्वदा बलीयसा करटकुलेन ताडितः ।
अचञ्चलं चरणयुगं शिवस्य कोऽप्यकिञ्चनः शरणयति स्म खञ्जनः ॥ २३ ॥

विहङ्गमः करटभिया शिवालये निलीय स ककचन विटङ्कसीमनि ।
सकृत् पतन् कनकसरोजिनीपयस्युपोषितः कतिचिदुवास वासरान् ॥ २४ ॥

जुहाव किं किमयमयष्ट किं ददौ जजाप किं मलिनतनुर्विहङ्गमः ।
तपस्तदप्यजनि तदस्य चेष्टितं परन्तपप्रपदनतः किमन्ततः ॥ २५ ॥

स मृत्युभीशमनमनूपदेशतो बलीयसामपि बलिनं चकार तम् ।
बलान्यमी किल बलवत्सु विश्रुताः प्रसादशीकरपरमाणवोऽस्य ये ॥ २६ ॥

स सर्वमध्यकुरुत पक्षिमण्डलं परिग्रहात् प्रमथपतेर्विहङ्गमः ।
तदादि खल्विदमधुनापि लक्ष्यते तदन्वये विहगकुलाधिकं बलम् ॥ २७ ॥

ततस्ततः सरसि निरीक्ष्य यादसां परस्परप्रतिहतिपातकं बकः ।
निवृत्तजात्युचितविचेष्टितः स कोऽप्यगाहत प्रियकवनं कदाचन ॥ २८ ॥

विगाहते कनकसरोजिनीजले विलोकते न तु शफरान् दृशापि सः ।
बिभर्त्ति तु स्वकमुदरं बिसाङ्कुरैः प्रदक्षिणं भ्रमति सदा च शूलिनः ॥ २९ ॥

इति व्रतं दृढतरमेष धारयन्नुपास्त तं त्रिपुरहरं यदा चिरम् ।
तदा स्वयं तरुणशशाङ्कमौलिना सरः कृतं विगतसरोजसङ्कथम् ॥ ३० ॥

स वल्गतो नवनवनीतकोमलान् समर्पितः शफराशिशून् विलोकयन् ।
क्षुधा किल क्षुभितमना मनागिव प्रचक्रमे पिशितपरिग्रहक्रमे ॥ ३१ ॥

समुत्क्षुतं वदनपुटे स्वयं ततः शरारिरादित शफरार्भकं यदा ।
तदा झटित्यवबुबुधे व्रतक्षतिं विवेकिषु प्रभवति किं चिरं तमः ॥ ३२ ॥

परित्यजन्नपि पललं झटित्ययं प्रवर्त्तनात् क्षणमपथे कृतव्यथः ।
असूनपि व्ययितुमियेष दुस्त्यजानहो सतां प्रकृतिरपत्रपिष्णुता ॥ ३३ ॥

स रक्षितुं बकमकरोद्यथापुरं सरस्तदुल्लसितमृणालपल्लवम् ।
तदादि चाकृत तपनीयपक्षिनीं विवर्जितां कियदपि यादसां गणैः ॥ ३४ ॥

स खञ्जनः स च बकशावकः प्रभोरनुग्रहात् परममवापतुः पदम् ।
द्विजे द्विजो यदि दयते क्षमं हि तद् द्विजो ह्ययं विबुधगणेषु गीयते ॥ ३५ ॥

दिवं गते सुगुणनृपे दयानिधावुपर्युपर्युपचितसद्गुणोत्तराः ।
तदन्वये धरणिभुजो महारथाः परश्शता धरणिमिमामपालयन् ॥ ३६ ॥

युगे युगे कुलमुदितोदितं हि तत् प्रवर्त्तितं प्रथममनङ्गवैरिणा ।
प्रियङ्करं प्रियकवनीपतेरभूदभग्नमादिवसपरिक्षयं विधेः ॥ ३७ ॥

उपस्थिते युगविगमे पृथग्विधाः समुद्गता दिशि दिशि धूमकेतवः ।
अरुद्ध च द्युमणिमहर्मुखे सदा कबन्धवत् किमपि निरन्तरं तमः ॥ ३८ ॥

समन्ततोऽजनि शतवार्षिकः क्षिताववग्रहः स्वयमनवग्रहस्ततः ।
चतुर्विधं जनुरपि भूतसंसदां विलुप्यते जगति निरन्वयं यथा ॥ ३९ ॥

विवस्वतो विदधति सप्त रश्मयो जगत्सु ये जलतुहिनाभिवर्षणम् ।
समेऽपि ते तपनतया पृथक्पृथक् प्रतापने प्रववृतिरे समन्ततः ॥ ४० ॥

द्रवीकृतैः प्रथममथोपशोषितैः स्थलीकृतैर्हिमशिखरैः समन्ततः ।
हिमालयो मृदुपलमात्रशेषितो विदिद्युते भुवि किल वेत्रदण्डवत् ॥ ४१ ॥

प्रतापिताः प्रथममबिन्धनाग्निना विशोषितास्तदनु करैर्विवस्वताम् ।
उपर्यधः क्वथितजलौघपाचितैस्तिमिङ्गलैर्जलनिधयः कषायिताः ॥ ४२ ॥

विशोषिताम्भसि विधुमण्डले तदा विसृत्वरा अपि किरणा विवस्वतः ।
खरातपा निशि परिणम्य चन्द्रिकाप्रवर्त्तनप्रतिहतशक्तयोऽदहन् ॥ ४३ ॥

पराकृतद्रुमतृणगुल्मसङ्कथे पयोधरस्मृतिविधुरे युगात्यये ।
अपि त्रिवृत्करणपथोपपादितं पयः क्षितावजनि कथावशेषितम् ॥ ४४ ॥

फणाशितुर्वदनसहस्रनिस्सृता विषानलोद्गमनविशेषभीषणाः ।
समीरणाः सरभसताडितस्खलत्परस्परा ववुरपरस्परास्ततः ॥ ४५ ॥

---

१. त्रिवृत्करणं तेजोवन्नानां व्यात्मकत्वकरणम् उपनिषत्प्रसिद्धम्.

विषानलव्यतिकरशोषितान्तरद्रवत्स्फुटद्दृढतरसन्धिबन्धनाः ।
शिलोच्चया अपि हि रजश्छटात्मना दिशंदिशं पवनवशेन निन्यिरे ॥ ४६ ॥

प्रदीपिता इव पवनेन ताडिताः प्रतिक्षणावसितपुनस्समुद्गताः ।
प्रजज्वलुः कथमपि चण्डरश्मयः पदे पदे स्खलितरथा वियत्पथे ॥ ४७ ॥

पयः किल प्रतिहतकल्मषं सुधेत्युदारहन्त्युदकरहस्यकोविदाः ।
पयःकथामपि पवनेन लुम्पता सुधान्धसोऽप्यजहुरसून् गतान्धसः ॥ ४८ ॥

प्रसर्पता धरणितलाद्रसातलं महोष्मणा युगविगमाहिमत्विषाम् ।
प्रतापिताः पुनरशनातिमात्रयाप्यसूनहो जहुरहयो महानिलैः ॥ ४९ ॥

अधस्पदे कमठवराहभोगिनामवस्थितस्तदनु ललाटलोचनः ।
किमेतदित्युपरि दृशं द्वयाधिकामवाकिरद् दरदलितामवज्ञया ॥ ५० ॥

ततोऽग्निना कमलभवाण्डमूलभूनिविष्टधूर्जटिनिटिलाक्षिजन्मना ।
चटच्चटच्चटदिति भूर्भुवस्स्वरित्यदह्यत त्रिजगदपि प्रसह्य तत् ॥ ५१ ॥

उदन्वतामुदरतलेषु शोषितास्तदीरिता लवणमया महाद्रयः ।
समन्ततः सदसि विधातुरुद्ययुर्महोपला इव युधि यन्त्रनिस्सृताः ॥ ५२ ॥

नभस्स्वतामजनि विवस्वतामपि क्षणादहो भसितदशा तदर्चिषा ।
बलीयसामपि बलिभिर्ध्रुवः क्षयः परं त्वसौ भवति कियद्विलम्बितः ॥ ५३ ॥

तदर्चिषा गिरिशिखरस्फुलिङ्गया जना महःप्रभृतिषु जातसञ्ज्वराः ।
चिरायुषः सनकसनन्दनादयः प्रदुद्रुवुः पदमकुतोभयं विधेः ॥ ५४ ॥

अवस्थिताः प्रियकवने युगात्ययेऽप्यविक्रिया मदनाजितः प्रभावतः ।
विशङ्कटे कनकसरोजिनीतटे विशृङ्खलाः प्रमथगणा विजह्रिरे ॥ ५५ ॥

कपर्दिनस्तदनु कपर्दमण्डलात् समुद्गता नभसि घना घनाघनाः ।
जजृम्भिरे जगदखिलं हविर्भुजा परिश्रितं प्रशमयितुं समन्ततः ॥ ५६ ॥

कणानपां करिकलभानिव च्युतान् पटत्पटद्ध्वनिमुखरान् पयोमुचाम् ।
प्रसारयन्निव रसनां शिखाच्छलात् पपौ शनैस्सिमिसिमिति क्षयानलः ॥ ५७ ॥

पयःकणप्रशमितकल्पपावकप्रसृत्वरप्रतिनवधूममण्डलैः ।
समन्ततः पुनरपि सान्द्रतां गता बलाहका ववृषुरपो निरन्तरम् ॥ ५८ ॥

ततस्ततो जलदकुले तटिद्गणाश्चकाशिरे चपलमरीचिवीचयः ।
विहाय भूतलमिव तद्विधक्षया विनिस्सृताः प्रलयहुताशनार्चिषः ॥ ५९ ॥

ततोऽयुतायुतयुगयोजनोन्नतास्तदर्चिषः सलिलनिपातकुण्ठिताः ।
ह्रसीयसीमुपगमिता दशां तदा निरीक्षिताः प्रियकवनाश्रितैर्गणैः ॥ ६० ॥

परस्परं प्रलयहुताशमेघयोर्भयानके प्रचलति साम्परायिके ।
समागता भुवि समये हविर्भुजा सनाभयः किमशनयः पयोमुचः ॥ ६१ ॥

उभावपि प्रलयदशानिरङ्कुशावुभावपि त्रिपुरहरस्य गात्रजौ ।
तथापि तु व्यजयत वारिदोऽनलं जयः कथं जगदुपतापिनो भवेत् ॥ ६२ ॥

भयानकैरशनिनिपातनिस्वनैः प्रतिक्षणक्षुभितहृदः पयोमुचाम् ।
अपि क्षपामनुभवतः पदे निजे प्रजागरः परिणमति स्म वेधसः ॥ ६३ ॥

अचन्द्रमस्तपनमपेततारकं प्रशान्तपावकमवसन्नमारुतम् ।
अकालदिग्भुवनमसच्छुभाशुभं तमोमयं पयसि ममज्ज तज्जगत् ॥ ६४ ॥

यदण्डतो बहिरबहिश्च यज्जलं तदेकतां गतमिव सर्वतस्तदा ।
अगाधमप्रचलमपारमस्वनं प्रवृद्धमाध्रुवपदमारसातलम् ॥ ६५ ॥

जडाजडे जगति गते रसातलक्षमानभस्मुरनरतिर्यगात्मनि ।
जलास्तरे वटदलतल्पमाश्रितो जगन्निधिर्व्यहरत कोऽपि बालकः ॥ ६६ ॥

समन्ततो जगति समावृतेऽम्भसाप्यमज्जति प्रियकवने निजाज्ञया ।
स बुद्बुदोदर इव सार्धमम्बया समं गणैरपि विजहार शङ्करः ॥ ६७ ॥

चतुर्मुखे स्वपति विलुप्तसङ्कथे चराचरे विरमति कालकल्पने ।
अनुश्रवैः परमधिगम्य तुष्टुवुर्महर्षयः कतिचन तं महीं गतम् ॥ ६८ ॥

जलप्लवैर्बहिरबहिश्च धूर्जटेर्जटाटवीहिमकरचन्द्रिकाङ्कुरैः ।
जडीकृते सति मधुरेश्वरालये जगुर्गणा जहसुरनर्त्तिषुः सुखम् ॥ ६९ ॥

परिक्षये प्रलयनिशस्ततश्चिरात् पयोजभूः सलिलशयस्य शार्ङ्गिणः ।
निदेशतो निखिलमिदं जगत्त्रयं यथापुरं पुनरसृजत् प्रयत्नतः ॥ ७० ॥

प्रकल्पयन् प्रथममहर्निशाकरौ प्रणाशयन् कवलितविष्टपं तमः ।
विशोषयन् सलिलमशेषमुत्थितं विनिर्ममे विधिरमरालयं पुनः ॥ ७१ ॥

ततः क्षितौ कथमपि धाम शाङ्करं तदेकमक्षतमभिजानतामुना ।
सरिद्गिरिस्थलसरिदीश्वरादिकं सुमेधसा निखिलमकल्पि वेधसा ॥ ७२ ॥

ततः सृजन् स विबुधमर्त्यभोगिनो निवेशयन् निजनिजधामसु स्थिरम् ।
प्रवर्त्तयन् सुपरिचितेषु कर्मसु व्यधत्त तच्छयितामिवोत्थितं जगत् ॥ ७३ ॥

ततश्चिरादजनि तु वंशशेखरो महीपतिर्द्रमिडकुलेषु कश्चन ।
प्रभुत्वमावहत स पाण्ड्यमण्डले महेश्वरार्पितहृदयो महाशयः ॥ ७४ ॥

स सुन्दरेश्वरसदनैकशेषिणीं भजन् पुरीं भुवि मधुरेति विश्रुताम् ।
निवेशयन् क्वचिदपि काश्चन प्रजाः क्वचित् स्वयं न्यविशत कल्पितालयः ॥ ७५ ॥

दिनेदिने मदनजितः सपर्यया समृद्धया स धरणिवल्लभश्रिया ।
यथापुरं पुरमचिकीर्षदुच्छ्रितैः समन्ततो नृपगृहसालगोपुरैः ॥ ७६ ॥

स वेदितुं पुरपरिमाणमुत्सुको जडे जगत्यविदिततत्पुरस्थितौ ।
दृढव्रतो द्रमिडकुलाब्धिचन्द्रमाः समाहितः शरणयति स्म शङ्करम् ॥ ७७ ॥

कृपानिधिस्तदनु शशाङ्कशेखरः कृतादरः क्षितिभृति वंशशेखरे ।
प्रदर्शय स्थलपरिमाणमित्यशाद् विभूषणं भुजगवरं विनिक्षिपन् ॥ ७८ ॥

स पुष्पकाननभुवि वालमर्पयन् प्रदक्षिणं परिचलितः फणीश्वरः ।
शिरस्पदं पुनरपि तत्र योजयन्नदर्शयत् पुरपरिमाणमद्भुतम् ॥ ७९ ॥

हरित्स्वसौ चतसृषु पुष्पकाननं गुहाचलं भुजगगिरिं वृषाचलम् ।
अनुक्रमादहितिलकः प्रदर्शयन् द्वियोजनं पुरमवदत् समन्ततः ॥ ८० ॥

तिरोहिते पुरहरभूषणोरगे तदाकृतिं वरणमयं प्रकल्पयन् ।
विशङ्कटैर्विपणिपथैः शिरोगृहैरलङ्कृतं पुरमकरोद् यथापुरम् ॥ ८१ ॥

हालाहलास्यपरिवेष्टनलब्धसीमं
हालास्यमित्यभिधया नगरं तदासीत् ।
भोगाभिवेष्टिततयापि च भोगभूमिः
कैवल्यभूरपि बभूव महीविभागे ॥ ८२ ॥

आसादयन्नश्वपतिं सहायमथैकदा विक्रमचोलदेवः ।
विचार्य विस्रब्धममुं नृपालमायोधनायोपजगाम सैन्यैः ॥ ८३ ॥

अतर्कितासन्नमरातिसैन्यमाकर्णयन् पाण्ड्यनृपो विशङ्कः ।
कृताभ्यनुज्ञो मधुरेश्वरेण जयं करस्थं कलयन् प्रतस्थे ॥ ८४ ॥

धनुर्धरेष्वेकतमो भवन् हरः शितैः शरौघैः शिवनामलाञ्छितैः ।
अवाकिरत् सैन्यमदृश्यपातिभिर्विशृङ्खलं विक्रमचोलभूपतेः ॥ ८५ ॥

अनुग्रहं स तमनवग्रहं विभोर्विचिन्तयन् क्षितिभृति वंशशेखरे ।
परित्यजन् गजतुरगान् पलायितो विना रणं कियदपि चोलभूपतिः ॥ ८६ ॥

पराक्रमेणाप्रतिमेन पार्थिवान् गिरा सुधासारकिरा कवीनपि ।
जयन्नयं सप्तसमुद्रमुद्रितां बभार पृथ्वीं मधुरेश्वरार्पिताम् ॥ ८७ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णव एकोनविंशः सर्गः ।

अथ विंशः सर्गः ।

कपिलकीरमुखाः कवयस्ततः कतिचिदासत ताम्रनदीतटे ।
द्रुहिणशापवशाज्जननी गिरामवततार पुरा हि यदात्मना ॥ १ ॥

अथ चतुर्गुणिता व्यधिका दश त्रिदशदेशिकधिक्करणक्षमाः ।
प्रति ययुर्मधुरामभिवन्दितुं प्रमथनाथममी कविपुङ्गवाः ॥ २ ॥

कविशरीरभृता कवयस्तु ते समधिगम्य हरेण पुरस्कृताः ।
समवगाह्य सुवर्णसरोजिनीं ददृशुरद्रिसुतादयितं महः ॥ ३ ॥

दृढविनीतधियः सुधियस्तु ते द्रमिडसूत्ररहस्यविवेचने ।
मृदुसुगन्धिवचःकुसुमस्रजा विविधया मधुरेशमपूजयन् ॥ ४ ॥

अकवयः कतिचिद् विबुधाधमाः कुकवयश्च परे कृतसंविदः ।
कविभिरप्रतिमैर्भुवनेषु तैः कलहमादधिरेऽथ वितण्डया ॥ ५ ॥

शब्दार्थौ दोषनिर्मुक्तौ सालङ्कारौ गुणोत्तरौ ।
काव्यमातिष्ठमानेभ्यः कविभ्योऽयं कृतोऽञ्जलिः ॥ ६ ॥

आद्यं हि शब्ददोषाणामसाधुत्वं मतं च वः ।
स्वरमश्रद्दधानानां स्वरूपे केव साधुता ॥ ७ ॥

काव्यार्थादपि किं दुष्टं कामिदुश्चरितोत्तरात् ।
अत एव हि काव्यानामालापः सद्भिरुज्झितः ॥ ८ ॥

अथान्य एव कल्प्यन्ते गुणदोषा निजेच्छया ।
काकदन्ताः परीक्ष्यन्तां गृह्यन्तां ग्राम्यसूक्तयः ॥ ९ ॥

तत्र तत्र पुराणेषु तन्त्रेषु च यदि स्फुटम् ।
काव्यालापानुवादोऽस्ति का जिगीषा ततोऽपि वः ॥ १० ॥

सर्वा वाचो वदन्तीति सप्ततन्तौ महाव्रते ।
ग्राम्योक्तयोऽपि किं शास्त्रे कृत्वङ्गत्वेन नोदिताः ॥ ११ ॥

अयोग्यानां हि काव्यानामग्निसेकादिवाक्यवत् ।
मूकतैव हि दुर्भेदा मुह्यन्त्येषु कथं जनाः ॥ १२ ॥

कथञ्चिद्यदि सार्थक्यं कथञ्चित्तैव दूषणम् ।
सफलः क्लेश इति च सम्प्रदायागतो भ्रमः ॥ १३ ॥

अक्लेशेन फले लभ्ये न क्लेशो युक्तिमर्हति ।
यस्मै फलाय सा गौणी तदेव स्फुटमीर्यताम् ॥ १४ ॥

अर्थानपि व्याप्नुवती हतसर्वनियन्त्रणा ।
व्यञ्जना शब्दवृत्तिश्चेद् वेश्या पत्नी न किं भवेत् ॥ १५ ॥

धूमेन ध्वन्यतां वह्निश्चक्षुषा ध्वन्यतां घटः ।
अर्थश्चेद् ध्वनयेदर्थं का प्रमाणव्यवस्थितिः ॥ १६ ॥

दुःखतोऽपि तु काव्योक्तः सुखायार्थो भवेद्यदि ।
सुखं भवन्तः शृण्वन्तु स्वनिन्दां कविभिः कृताम् ॥ १७ ॥

अहो भावव्यक्तेः परिणतिरहो गूढरस इ-
त्यलीकव्यामीलन्नयनविगलद्बाष्पसलिलैः ।
उदञ्चद्रोमाञ्चैरुदरलुलितामैरिव मुहुः
कथं व्याप्ता भूमिः कविभिरपटुज्ञानपशुभिः ॥ १८ ॥

इति निगदितमेवाभीक्ष्णमावर्त्तयद्भिः
प्रतिकथकवचांसि काप्यनाकर्णयद्भिः ।
अपथचिरविनीतैर्बालिशैरात्तगन्धाः
शरणमभिसमीयुश्चन्द्रचूडं कवीन्द्राः ॥ १९ ॥

नान्धाश्चक्षुस्समेता न च खलु बधिरा आक्षिपन्तः परोक्षीः
नाप्येते नाथ! मूका विफलमविरलं यत् तदुच्चैः स्वनन्तः ।

तत्तत्सैद्धान्तिकोक्तीरभिदधत इव काप्यनाघाततत्त्वा
दृश्यन्ते केचिदेते शिव शिव कुधियामेष सर्गोऽद्भुतस्ते ॥ २० ॥

काव्यागमज्ञाः सुखमाक्षिपन्तु का तत्र चिन्ता भवतः प्रसादात् ।
अहो वयं प्रव्यथिता अमीभिः काव्याध्वदुष्टश्वभिरेडमूकैः ॥ २१ ॥

दन्तोल्लेखनखक्षतादिदयितव्यापारपारम्परी-
निर्ग्लानापि हि कामिनी दिनमुखे निस्सीममानन्दति ।
मार्जारी नखराङ्कुरास्तुदशनव्याविध्यमाना मना-
गायुर्वेदविदोऽभिगच्छति रुदत्यासन्नमृत्युर्यथा ॥ २२ ॥

तदलं तरुणेन्दुचूड! नः परितापार्त्तिपरीक्षयानया ।
परिवर्जय पण्डिताधमैरिदमैकाधिकरण्यमद्य नः ॥ २३ ॥

विज्ञापितः कविवरैरिति सुन्दरेशः
स्मित्वा ददौ फलकमेकमदृष्टपूर्वम् ।
यत्रासते कवय एव यथाभिलाष-
मन्ये तु नाङ्घ्रिमपि विन्यसितुं क्षमन्ते ॥ २४ ॥

अध्यारूढाः पीठमीशादवाप्तं दुर्दर्शं तद् दुर्धियां दूरतोऽपि ।
अष्टाचत्वारिंशदाद्याः कवीन्द्राश्चक्रुर्भक्तिं भूयसीं चन्द्रचूडे ॥ २५ ॥

वंशचूडामणिः पाण्ड्यो वंशशेखरकस्ततः ।
जज्ञे यत्र भुवं न्यस्य जज्ञौ स परमामृतम् ॥ २६ ॥

स तु कदाचन चम्पककोरकैः परिचरन् प्रमथाधिपतिं मधौ ।
अजनि चम्पकपाण्ड्य इति प्रथामभिवहन् कविलोकशिखामणिः ॥ २७ ॥

स कामिनीरत्नसहस्रभोगभाग्योन्नतश्चम्पकपाण्ड्यदेवः ।
मासे मधौ मन्मथमारराध नवोढया नर्मपरो महिष्या ॥ २८ ॥

अपारयन्ती त्रपया गलन्तीं नीवीं नियन्तुं समुपेक्षितुं वा ।
पत्युर्मुखं नाभिपदं च बाला पर्यायतः केवलमाकुलोके ॥ २९ ॥

आलिङ्गितुं चुम्बितुमन्ततस्तं स्प्रष्टुं समाभाषितुमीक्षितुं वा ।
नार्यै ददौ नावसरं कदाचिद् व्रीडा सपत्नीव निबद्धवैरा ॥ ३० ॥

आच्छाद्य बिम्बाधरमङ्गुलीभिरावद्धमुग्धाञ्जलिना करेण ।
मा मेति मन्दाक्षरमर्थितं यदतः किमस्या मधुरोऽधरोष्ठः । ३१ ॥

एकत्र विस्रम्भकथाविघातः पक्षोऽपरः शङ्कितुमेव नार्हः ।
कृच्छ्रे तदस्मिन्नधरं कृशाङ्गचा गृह्णातु वा मुञ्चतु वा युवायम् ॥ ३२ ॥

दष्टाधरोष्ठा सुदृढं पुरैव पत्युः पुनश्चुम्बनलालसस्य ।
चाटूसहस्रं शपथाञ्छतं च तन्वी विशश्वास न लेशतोऽपि ॥ ३३ ॥

आबद्धसप्ताष्टनिषङ्गमन्वगासञ्जितद्वित्रकराङ्गुलित्रम् ।
आमर्दितैकद्वशरासमासीदन्यादृगूष्मायितमङ्गजस्य ॥ ३४ ॥

विन्यस्य गाढं भुजयोर्भुजौ सा मुखं मुखे वक्षसि चापि वक्षः ।
आलिङ्गति स्म स्मरबाणवर्षादाच्छादयन्तीव तनुं प्रियस्य ॥ ३५ ॥

सकृन्नखाग्रोल्लसितः कचौघः श्लथाश्लथं संयमिता च नीवी ।
सा चाङ्गयष्टिर्मृदिता तरुण्याः सत्यं मुनीनानामपि मोहहेतुः ३६ ॥

एकाकिना तामपहाय लज्जा याता पुरा यत् किल मारयुद्धे ।
ततोऽपराधादिव तामुपेतां पुरेव तन्वी न पुरश्चकार ॥ ३७ ॥

सा गन्तुमैच्छच्छयितुं स काल्ये साधत्त संव्यानमयं जहार ।
सा नीविमामुञ्चदयं व्यमुञ्चद् भावेऽपि तुल्ये विभिदे क्रियाभिः ॥ ३८ ॥

ससर्ज तस्यां कियतो विलासांश्चक्रे कथं नाम निशां त्रियामाम् ।
शृङ्गारसारं कलयापि वेधाः किं वेद वेदाक्षरजीर्णकोशः ॥ ३९ ॥

अनन्यजे वर्षति काममित्थमपव्यवस्थं शरमण्डलानि ।
आदिर्निशादिः सुरतस्य यूनोरन्तो निशान्तोऽपि च पर्यणंसीत् ॥ ४० ॥

स जातु प्रासादे शयनमधिगच्छन् क्षितिपतिः
समाजघ्रौ गन्धं कुसुमकुलदुष्प्रापमतुलम् ।
महिष्याः पद्मिन्या मलयपवमानैरुपहृतं
प्रसूतं केशान्तात् प्रशिथिलदृढग्रन्थिशिथिलात् ॥ ४१ ॥

पद्मसौरभ्यजातीयं पद्मिनीकेशसम्भवम् ।
अनाघ्रातचरं गन्धमवासासीत् स त नृपः ॥ ४२ ॥

मनोगतं मे कवयत्यवेत्य यः स एतदग्रयं लभतां सुधीरिति ।
अलम्बयद् द्वारि सुवर्णमुद्रिकासहस्रमाबध्य स पाण्ड्यभूपतिः ॥ ४३ ॥

उच्चावचाभिरपि भङ्गिभिरुल्लिखन्तो
नाद्राक्षुरस्य हृदयं कवयो महान्तः ।
आसाद्य कञ्चन वटुः पुनरादिशैवः
पद्यं प्रभोरधिसभं पठति स्म हृद्यम् ॥ ४४ ॥

तस्मै किलार्थितवते सुचिरं प्रसाद्य
दारक्रियार्थमधनाय धनं समग्रम् ।
पद्यं ददौ नृपतिभावनिबन्धहृद्य-
मार्यामयं तदखिलाशयविन्महेशः ॥ ४५ ॥

जानासि पुष्पगन्धान् भ्रमर! त्वं ब्रूहि तत्त्वतो मेऽद्य ।
देव्याः केशकलापे तुल्यो गन्धेन किं गन्धः ॥ ४६ ॥

इति तावदिमामार्यामिन्दुकलाभरणवदननिर्गलिताम् ।
पठति द्विजे सभायां प्रभोरभूद् विस्मयो भूयान् ॥ ४७ ॥

तदनुज्ञया स वर्णी तत् कनकं सदसि यावदादत्ते ।
तावत् तदसहमानः प्रत्यवतस्थे कविः कीरः ॥ ४८ ॥

अपरिष्कृते प्रसूनैरस्ति कचेऽपि किमसृङ्मले गन्धः ।
किं चिन्तितमवनिभृता किं दृष्टं धीमता भवता ॥ ४९ ॥

इति तस्य दुराक्षेपादप्रतिभे ब्रह्मचारिणि स्तब्धे ।
प्रादुर्भूयाह हरः कविवेषधरः पुरस्तेषाम् ॥ ५० ॥

केन कुधिया सभायामन्तेवासी ममायमाक्षिप्तः ।
प्रकृतिः सा पद्मिन्याः पङ्कजगन्धः शरीरे यः ॥ ५१ ॥

पार्थिवकुसुमविहीने भवति शचीकुन्तले कथं गन्धः? ।
कः शङ्कितोऽप्युपाधिः क्रमते कबरीपरीमले गौर्याः ॥ ५२ ॥

कार्मणमलात्ममूर्त्तिषु घटते यदि पार्थिवेषु सौरभ्यम् ।
किमिव खलु पद्मिनीनामपकृतमसृजां मलैः केशैः ॥ ५३ ॥

इति विजित्य तमुद्धतमुद्धतैः कविवरे परिगर्जति भाषितैः ।
अलभत द्रविणं स वटुर्झटित्यवनिपोऽप्यवरोधगृहं ययौ ॥ ५४ ॥

कविष्वेकीभूय स्वयमपि हरः सद्विषु चरन्
कथाः कुर्वन् हृद्याः स्वयमपि वसन् सङ्घफलके ।
वृतस्तैः स्वामित्वे विविधरचनाभिर्भणितिभिः
कदाचिद् गौरीशः कलहमभजत् कीरकविना ॥ ९५ ॥

अविश्रान्ते स कीरेऽस्मिन्नाक्षेपाभासदुर्ग्रहात् ।
प्रादर्शयत् स्वमात्मानं पञ्चवक्त्रं त्रिलोचनम् ॥ ९६ ॥

भक्तोऽपि कीरः परमाद्भुतं तत् पश्यन्नपि प्रत्युत दुर्बभाषे ।
मौढ्यान्निरूढादपि पामराणां मौढ्यं चिदाभासगतं गरीयः ॥ ५७ ॥

चतसृष्वपि दिक्षु पश्यता चतुरेणापि महेश्वर! त्वया ।
कविकर्माणि नैक्षि दूषणं कथमुद्भावितमप्यहो मुहुः ॥ ९८ ॥

भावत्क्यः कृतयः श्रुतिः श्रुतिरिति प्रौढिं परां प्रापिता
अध्याहारविपर्ययप्रकरणोत्कर्षानुषङ्गादिभिः ।
तात्पर्यान्तरवर्णनेन च समर्थ्यन्ते यदस्माद्दृशै-
स्तज्जानन् कवितासु नः पशुपते! दोषेक्षिकां मा कृथाः ॥ ५९ ॥

ईश! त्वमसि ननु ध्रुवमीशानः सर्वविद्यानाम् ।
कीरकृते त्वाक्षेपे कीरवदनुभाषणं ज्यायः ॥ ६० ॥

ज्ञानाज्ञानव्यतिकरपरीणाममीशोऽस्य पश्यन्
भक्ताज्ञानप्रशममकृतं चिन्तयित्वा स्वमागः ।
कालेनास्य स्मृतिकलुषतामुद्दिधीर्षुस्तिरोऽभू-
देतावन्तो यदि हि न गुणाः कः स नश्चन्द्रचूडः ॥ ६१ ॥

शिवातिवादप्रभवेन पाप्मना स तापितो दुर्विषहेण दुर्मतिः ।
पपात गाङ्गेयपयोजिनीजले तदेव जानन्नभिपज्यभेषजम् ॥ ६२ ॥

नित्याधमर्णस्य सकृत्प्रणत्या नीपाटवीसन्निहितस्य धाम्नः ।
कारुण्यतः सञ्जनितानुतापस्तुष्टाव कीरस्तुहिनांशुचूडम् ॥ ६३ ॥

अपि प्रणेता निगमागमानामाद्यः कविस्तस्य तुतोष सद्यः ।
विज्ञानखद्योतविजृम्भिताभिर्वाग्भिः स लुभ्यन् गुणगन्धतोऽपि ॥ ६४ ॥

उत्तार्यमाणे कनकाम्बुजिन्याः कीरे करालम्बसमर्पणेन ।
उत्तारितं तं भवसागरादप्यूहाम्बभूवुर्मुनयः पुराणाः ॥ ६५ ॥

अज्ञानमस्य कवितापदसम्प्ररूढ-
माद्यः कविः शमयितुं कलशोद्भवेन ।
उद्बोधयन् द्रमिडसूत्ररहस्यसार-
मुच्चैर्यशो जगति कीरकवेर्व्यतारीत् ॥ ६६ ॥

अधीत्य कीराद् द्रमिडागमार्थमथापरे सङ्घकविप्रवेकाः ।
वृत्तीर्विचित्राः स्वयमारचय्य पस्पर्धिरे ते तु परस्परेण ॥ ६७ ॥

स्वस्य प्रबन्धोत्तममध्यमत्वे संशय्य सर्वे कृतसंविदस्ते ।
सर्वज्ञमीशं शरणं प्रपन्नास्तस्मिन्नतिष्ठन्त कृतप्रणामाः ॥ ६८ ॥

आविर्भूय ततो लिङ्गादाह तान् मधुरेश्वरः ।
तदीयेषु प्रबन्धेषु तारतम्यविवेचने ॥ ६९ ॥

अस्ति रुद्र इति ख्यातो वैश्यः स्कन्दांशसम्भवः ।
शापान्मे मूकतां प्राप्तः स वश्छेत्स्यति संशयम् ॥ ७० ॥

शृण्वतस्तस्य यां हर्षात् स्यन्दते बाष्पनिर्झरः ।
सकण्टकानि चाङ्गानि सा वृत्तिर्गृह्यतामिति ॥ ७१ ॥

तदनु तमुपगम्य श्रावयन्तः स्वसूक्तीः
पृथगुपचितबाष्पाः कण्टकोद्भेदरम्याः ।
कपिलभरणकीरैः कल्पिता एव वृत्तीः
परिजगृहुरथान्यास्तत्यजुर्दूरतस्ते ॥ ७२ ॥

दिवं गते चम्पकपाण्ड्यदेवे ततश्चिरात् कोऽपि तदन्ववाये ।
राजा कवीनामपि पार्थिवानां राजा कुलेशो धरणीं बभार ॥ ७३ ॥

अथ सङ्घिषु कस्यचित् कवेरवमेने स यदा सरस्वतीम् ।
मधुराधिपतेर्मनस्यभूत् प्रतिघो भक्तदयानिधेस्तदा ॥ ७४ ॥

कदम्बमूलमुत्सृज्य कविभिः सह शङ्करः ।
स्थानमुत्तरहालास्यं प्राप वेगवतीतटे ॥ ७५ ॥

क्षितिपतिरथेशानं जानन् रुषा परिनिर्गतं
कविकुलमशेषं कविभिः सह शङ्करः ।
प्रतिनवसुधाधारासारास्पदैर्वचनैः स्तुवन्
नगरमनयद् भूयः श्रेयस्करं जगतां हरम् ॥ ७६ ॥

कालेन केनापि तु कारणेन देवीं क्वचिद् दाशकुलेऽवतीर्णाम् ।
पाणौ ग्रहीष्यन् प्रमथाधिनाथस्तीरं ययौ दक्षिणवारिराशेः ॥ ७७ ॥

स दाशमाशंसितकन्यकावरं समेत्य देवो मधुरेश्वरो युवा ।
सुतां ययाचे स्वयमुद्गिरन् गिरा स्वमद्भुतं वागुरिकत्वकौशलम् ॥ ७८ ॥

अदृष्टचरमद्भुतं वपुरमुष्य पश्यन्नपि
प्रभावमवधारयन्नपि ततः स्फुटं धीवरः ।
परीक्षितुममुं पुनर्जलधिगर्भसञ्चारिणं
मया समुपदर्शितं मकरमाहरेत्यादिशत् ॥ ७९ ॥

आसाद्य वैसारिणतां चरन्तमम्भोनिधौ नन्दिनमात्मशापात् ।
सन्दर्शितं दाशकुलेश्वरेण सानन्दमालोकत चन्द्रचूडः ॥ ८० ॥

महामायाजालं महदपि निजं स्वप्रपदनाद्
विजित्य स्वच्छन्दं पयसि विहरन्तं जलनिधेः ।
ग्रहीतुं शैलादिं किल करुणया वागुरिकया
विशालं चिक्षेप त्रिपुरमथनो जालमुदधौ ॥ ८१ ॥

तद्भक्तिवागुराबद्धस्तरुणेन्दुशिखामणिः ।
आक्षिप्य करुणाजालमाचकर्ष तमर्णवात् ॥ ८२ ॥

मीनग्रहायापि कृतप्रवृत्तिं मृगाङ्कमौलिं वनितादरेण ।
पश्यन्ननङ्गो विजयध्वजं स्वं प्रायेण चक्रे तदुपक्रमं तम्[1] ॥ ८३ ॥

आसाद्य सञ्चरं[2] देहमागमान्वेषणोचितम् ।
आलुलोके परं तत्त्वमागमान्विष्टमैश्वरम् ॥ ८४ ॥

पर्युपासितपादोऽयं प्रकृतिस्थेन नन्दिना ।
कैवर्त्तकन्यां जग्राह कैरवप्रियशेखरः ॥ ८५ ॥

समुत्सृजन् स मत्स्यतां ननन्द नन्दिकेश्वरः
स धीवरश्च भूतले सुधीवरत्वमागतः ।
विमानमागमय्य तां समागते पुरं शिवे
तदा तदाशये मुदं ददाश दाशकन्यका ॥ ८६ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलालार्णवे विंशः सर्गः ।

---

१. तं मीनम् . २. सञ्चरं देहम् । 'देहम्' इति पदं तु 'दिव्यं' इति पठनीयं स्यात्। कर्ता तु नन्दी गम्यः। अन्यथा 'सञ्चरम्' इत्यस्य स्थाने 'स चिरं' इति वा 'स चिराद्' इति वा पाठः स्यात्.

अथैकविंशः सर्गः ।

कुलेशमाराधयतो महेशं कुलेशपाण्ड्यादभवत् कुमारः ।
अन्वयर्थन् स्वामरिमर्दनाख्यां बभार पित्रा विधृतां भुवं यः ॥ १ ॥

आस्थानभूषामणिरस्य राज्ञः सर्वागमज्ञः सचिवः सुमेधाः ।
आसीद् द्विजो वातपुरीशनामा वाचस्पतिर्वासवसंसदीव ॥ २ ॥

स सञ्जिघृक्षुस्तुरगानुदारान् सर्वैर्धनौघैरपि पाण्ड्यदेवः ।
तमादिशद् वातपुरीशमेव चोलेषु गन्तुं तटमम्बुराशेः ॥ ३ ॥

लब्धाभ्यनुज्ञः सचिवः स गच्छन् द्वित्रैर्दिनैः प्रैक्षत चोलदेशम् ।
स्तोतुं प्रसक्ते विषयान्तरेऽपि जागर्त्ति यस्मिन्नुपमानभावः ॥ ४ ॥

कान्तासहस्रोपगतस्य सिन्धोः का वा रतिः प्रावृषि सेवयेति ।
सङ्गच्छते तेन निदाघ एव सह्यात्मजा यत्र हि निस्सपत्नम् ॥ ५ ॥

वर्षास्ववज्ञैव शरद्युपेक्षा द्वेषो हिमे वाथ हिमात्यये वा ।
यत्राप्सु रागः सुरभौ शुचौ च तत्रैव यस्मिन् सरितो वहन्ति ॥ ६ ॥

प्रावृड्भिमर्दो दिशि पश्चिमायामुत्पीडपीडा पुनरुत्तरस्याम् ।
स्वैरोपयोगो यदि सह्यजाया यत्रैव सौभाग्यमितः किमस्य ॥ ७ ॥

प्रत्यग्रपू(रा?)गाभिगतेषु यस्मिन् प्रस्निग्धरम्भावनमेदुरेषु ।
कवेरकन्यातटकाननेषु कामः समुन्मीलति घर्म एव ॥ ८ ॥

हव्याय यत्रापततां सुराणामातिथ्यनिर्वर्त्तनतोऽनुवेलम् ।
गन्धर्वविद्याधरकिन्नराद्या निर्विद्य निन्दन्ति पथि स्थितिं स्वाम् ॥ ९ ॥

अध्येतुमध्यापयितुं च तन्त्राण्याहर्तुमर्थानथ चोपभोक्तुम् ।
स्वर्गापवर्गौ च वशे विधातुं जात्यैव यस्मिन् द्रमिडा निरूढाः ॥ १० ॥

स्वादीयसी यत्र कवेरजैव ततस्तरां केरफलोदकानि ।
ततस्तमां चाथ गिरां विलासाः प्रसन्नगम्भीरपदाः कवीनाम् ॥ ११ ॥

द्रष्टुं न रम्भापनसाम्रकेरच्छायावृते यत्र हि शक्यमर्कम् ।
शक्यं तु सम्भावयितुं सरोजसौरभ्यसम्भारहरैः समीरैः ॥ १२ ॥

ये जातिभेदाः क्रमुकाम्रकेरशालीक्षुरम्भाफणिवल्लरीणाम् ।
व्युत्पित्सवस्तेषु चरन्ति पान्था विश्रम्य विश्रम्य चिराय यस्मिन् ॥ १३ ॥

आदाय शस्त्राण्यवगाह्य सिन्धुं तपांसि विक्रीय च तन्न्वयन्ते ।
यत्रान्यतस्तत्र कलौ यदीया यजन्त्यविच्छिन्नमधीयते च ॥ १४ ॥

सान्यत्र सिन्धुर्ननु यात्र कुल्या तेऽन्यत्र धन्या इह ये कदर्याः ।
अभ्यस्तविद्या इव येऽत्र किञ्चिदन्यत्र विद्यागुरवस्त एव ॥ १५ ॥

गच्छन्नहोभिः कतिभिश्चिदस्मिन् स पश्चिमे योजनतः पयोधेः ।
माकन्दरम्भावनसान्द्रमेकं माहेश्वरं धाम समालुलोके ॥ १६ ॥

अध्यासितं पाशुपतैर्महद्भिरालोक्य वल्मीकपतेः पदं तत् ।
अप्राकृतीं भाग्यवशात् ततोऽयमाध्यात्मिकीं तामपि शुद्धिमूहे ॥ १७ ॥

आस्थाय कारुण्यरसैकरूपामाचार्यमूर्त्तिं मधुरैर्वचोभिः ।
प्रबोधयन्तं शतशो महर्षीन् प्रत्यक्षमैक्षिष्ट स चन्द्रचूडम् ॥ १८ ॥

अङ्गैः क्षितावष्टभिरानमन्तं तं दूरतो बाष्पतरङ्गिताक्षम् ।
दृष्ट्वा दयाशीलतयानुगृह्णन् देवः समीपस्थितिमादिदेश ॥ १९ ॥

उत्प्रेक्षितस्योद्गणशक्तिपातं शुद्धाध्वलिप्सासुभगैर्वचोभिः ।
सम्भावयन् नैष्ठिकदीक्षया तं चन्द्रार्धचूडः स्वयमन्वगृह्णात् ॥ २० ॥

आरुह्य माहेश्वरमाश्रमं सः सञ्छिन्नपाशः सचिवः क्षणेन ।
अध्याय नीतैर्द्रविणैर्महेशमाराधयन् पार्थिवमप्यरक्षत् ॥ २१ ॥

आकारितो दूतमुखेन राज्ञा कर्णेजपालापकलङ्कितेन ।
अश्वैः सहैवागमनं स्वकीयं शम्भोर्निदेशेन स सन्दिदेश ॥ २२ ॥

अश्वानसङ्ख्यानहमानयेयमासीद राजानमपेतशङ्कः ।
इति स्थिरं व्याहृतमिन्दुमौलेर्विश्वस्य भूयः स पुरीमविक्षत् ॥ २३ ॥

अश्वानमूल्यानमितान् समीपमासादितानप्यरिमर्दनाय ।
निवेदयन् वृत्तमिदं स सर्वं न्यवेदयन्नीपवनेश्वरेऽपि ॥ २४ ॥

पन्थानमालक्ष्य तुरङ्गमाणां पाण्ड्ये परेद्युः स्वयमादिनान्तात् ।
क्रुध्यत्युदाकुर्वत राजभृत्याः क्रूराशया मन्त्रिणि लब्धरन्ध्राः ॥ २५ ॥

कृताभ्यनुज्ञैः कुपितेन राज्ञा क्रूरैश्चिरद्वेषिभिरस्य भृत्यैः ।
कदर्थ्यमानः करुणं स भूयो विसृज्य धैर्यं विललाप धीरः ॥ २६ ॥

व्यासज्जसे किमधुना विधिकेशवाद्यै-
व्यर्थासज्जसे किमथवा ललितैर्भवान्याः ।
क्रन्दन्ति कत्यशरणा इह मादृशोऽन्ये
कर्णातिथिर्भवतु कस्य तवार्त्तनादः ॥ २७ ॥

बद्धस्य दुष्परिहरैर्मलकर्ममाया-
बन्धैस्त्रिभिर्मम चिरादपि दीनबन्धो! ।
बन्धं हरिष्यसि किलेति धृतक्षणस्य
बन्धं तुरीयमपि हा कथमद्य दत्से ॥ २८ ॥

कर्मेति काल इति वापदिशन्ति येऽन्ये
किं तैरिति त्रिजगतीं तृणवद् विचिन्त्य ।
त्वामेव संश्रितवतोऽपि दशा यदीयं
त्वं बुध्यसे कनु भवत्ययशो यशो वा ॥ २९ ॥

नाहं बिभेमि नृपतेर्नच तद्भटेभ्यः
कुर्वन्ति नाम किममी परतोऽपि मृत्योः ।
इत्थं कृतान्तवशगेऽपि हि मय्युपेक्षा
किं ते भवेदिति विषीदति किन्तु चेतः ॥ ३० ॥

एकं विधेयमवलम्बनमित्युपेक्ष्य
नीतिं श्रितोऽस्मि चरणौ तव चन्द्रमौले! ।
आतः किमित्थमियमापदि मे महत्या-
मन्योन्यदत्तभरयोरनयोरुपेक्षा ॥ ३१ ॥

किं ज्ञानयोगविभवैः शिव! किं तपोभिः
किं कर्मभिश्च हृदयं तव रञ्जयेयम् ।
क्रन्दल्लुठत्कृपणदर्शनकौतुकं वा
निर्वर्त्त्य दास्यपदवीं तव निर्वहेयम् ॥ ३२ ॥

प्रारब्धकर्मणि चलत्यविलङ्घनीये
भक्तिः करिष्यति किमीशपदार्पितेति ।
दुर्निश्चयो हतधियामिह दुःश्रवोऽयं
निन्देव ते मनसि मे परिवर्तमानः ॥ ३३ ॥

किं मत्कृतेऽवतरितव्यमशिक्षितं ते
किं वा भुजाभुजि परैः कलहायितव्यम् ।
सङ्कल्पमात्रमपि चेन्न चिकीर्षसि त्वं
शम्भो! ममैव तु जितं दुरितैर्दुरन्तैः ॥ ३४ ॥

भक्तिर्दृढा यदि ममास्ति भवेत् किमेवं
को वेद तत्त्वमिदमस्ति तु मेऽन्तरङ्गे ।
लोकास्तु भक्त इति मां जगृहुर्यथा ते
त्वां भक्तवश्यमवयन्ति तथा दयेथाः ॥ ३५ ॥

कः स्वापराधिषु पराक्रमते न लोकः
शृङ्गेण हन्ति ननु गारिपै दण्डहस्तम् ।
भक्तापदक्षमतयैव तवेश्वरत्वं
तां नाशय द्रढय वा समयस्तवायम् ॥ ३६ ॥

यत् प्रालपं चरणयोस्तव यत्तदित्थं
मुग्धो विदग्ध इव मुग्धशशाङ्कमौले! ।
तत् क्षम्यतां मम तु को वचनेऽधिकारः
स्वामी परामृशतु वा स्वमुपेक्षतां वा ॥ ३७ ॥

इति निशम्य स वातपुरीशितुः करुणमालपितं करुणानिधिः ।
तुरगलक्षखुरक्षतरेणुभिः परिपतन् ददृशे विधुशेखरः ॥ ३८ ॥

शिवे तुरगसादित्वं श्रिते भक्तानुकम्पया ।
शिवा[1] स्वयं तुरगतां शिश्राय बहुधा तदा ॥ ३९ ॥

कुमुदकज्जलकुङ्कुमदाडिमीकुसुमहेमकुवेलसमत्विषः ।
परुषहेषितभीषितशात्रवा ददृशिरे दिशि दिश्यपि सैन्धवाः ॥ ४० ॥

समुत्तुङ्गत्वङ्गत्तरतुरगरिङ्खाशतहत-
क्षमारेणुश्रेणिक्षणचुलुकितैरम्बुनिधिभिः ।
स्थलीभूतैः सद्यः सति धरणिभागे द्विगुणिते
भविष्यन् कैमुत्यादजनि विशदस्तस्य विजयः ॥ ४१ ॥

यदि मरुद् विजितं विजितं मनो यदि मनो विजितं विजितं जगत् ।
जितवतां मरुतं च तदर्वतां किमभिधेयमतस्त्रिजगज्जये ॥ ४२ ॥

---

१. शिवा जम्बुकः अथ च पार्वती. २. अयं श्लोकः खपुस्तके न दृश्यते.

उदात्तेष्वारोहन् प्रसभमनुदात्तेष्ववतर-
ञ्छनैः क्रामन्नेव स्वरितपथमेकश्रुतिमपि
समुद्यन्मीमांसाद्वयमयखलीनैकविधृतः
पुरः प्रादुर्भूतः पुरमथितुराम्नायतुरगः ॥ ४३ ॥

तत्र कञ्चिदतिचित्रतेजसं सादिनं प्रपतनप्रसादिनम् ।
पश्यति स्म बहुमानविस्मयस्मेरदृष्टिररिमर्दनो नृपः ॥ ४४ ॥

व्रीडानुतापव्यथितोऽथ पाण्ड्यः प्रकाशयन् वातपुरीशमग्रे ।
समीपमासेदुषि सादिवर्ये प्रत्युद्ययौ तेन समं प्रहृष्टः ॥ ४५ ॥

कृतप्रणामेन कृतप्रणामः स्तुवन् नृपेण स्तुवता स भूयः ।
कृताः कथाः काश्चिदथान्ततोऽश्वान् विक्रीय यच्छन्निदमाचचक्षे ॥ ४६ ॥

आनीतमासीद् धनमश्वहेतोरनेन यत् ते सचिवेन राजन्! ।
तत् सर्वमादाय तवैव भूत्यै मयाहृताः पश्य शिवास्तुरङ्गाः ॥ ४७ ॥

गुल्मेषु कुञ्जेषु वनोदरेषु केदारकेषूपवनेषु चामी ।
स्वच्छन्दचारा लघुविक्रमाश्च तरन्ति तोयेष्वपि दुस्तरेषु ॥ ४८ ॥

न श्वोऽयमस्तीति किलाश्वशब्दस्तन्त्रैर्निरुक्तो विदितस्तवापि ।
सम्यक् परीक्ष्य त्वमिमं गृहाण धनं ममैतत् तुरगास्तवेमे ॥ ४९ ॥

तथेति तस्य प्रतिनन्द्य वाचं तं भूषणैर्हेमभिरम्बरैश्च ।
सम्भाव्य सद्यो विसृजन् नृपालस्तृप्तिं न लेभे तुरगान् स पश्यन् ॥ ५० ॥

आज्ञापिता द्रागरिमर्दनेन पाण्ड्येन भृत्याः परितो भ्रमन्तः ।
बबन्धुरश्वानथ मन्दुरासु सार्धं विनीतैस्तुरगैः पुराणैः ॥ ५१ ॥

परेद्युरश्वावसथे नियुक्ताः प्रातः समैक्षन्त नृपालभृत्याः ।
समन्ततोऽश्वान् दशतः पुराणाञ् शब्दायमानाञ् शतशः सृगालान् ॥ ५२ ॥

आकर्ण्य वृत्तं महदद्भुतं तत् पाण्ड्यः प्रजज्वाल रुषा स भूयः ।
इत्थं किलेदं कृतमिन्द्रजालमनेन नूनं मयि मन्त्रिणेति ॥ ५३ ॥

दुष्टैः स्वतो राजनिदेशरूक्षैः कदर्थितो राजभटैः स भूयः ।
आत्मानमात्मन्यनुसन्दधानो न क्लेशलेशं गणयाम्बभूव ॥ ५४ ॥

अत्रान्तरे भक्तमनुग्रहीतुमालोच्य कारुण्यनिधिर्महेशः ।
भयानकां दुर्ललितैस्तरङ्गैः प्रावर्त्तयद् वेगवतीमकाण्डे ॥ ५५ ॥

सा निष्पतन्त्येव पुरं समस्तं कल्लोलजालैः कबलीचकार ।
संरुध्य ये मन्त्रिणमभ्यहिंसन् सम्भ्रम्य दूरे परिदुद्रुवुस्ते ॥ ५६ ॥

पूरेण तस्याः पुरशासनस्य कारुण्यपूरेण विनिर्यतेव ।
निर्मोचितो वातपुरीश्वरोऽपि हालास्यनाथान्तिकमाससाद ॥ ५७ ॥

तां बध्यमानां शतशोऽपि मर्त्यैः पात्रोदरे वेगवतीममान्तीम् ।
आलक्ष्य बन्धुं नृपतिः स पौरानाबालवृद्धाञ्जनमादिदेश ॥ ५८ ॥

बध्नत्सु पौरेषु विभज्य सीमामापूपिकी काचिदतीव जीर्णा ।
निर्बध्यमाना नृपतेर्भुजिष्यैर्विचिन्वती कर्मकरं चचार ॥ ५९ ॥

सा पिष्टकानेव सदा पचन्ती निवेदयन्ती मनसा महेशे ।
तद्भिक्षयेणापि च वर्त्तयन्ती दयास्पदं भूतपतेर्बभूव ॥ ६० ॥

गवेषयन्ती जरती समन्ताद् गवेष्यमाणं निगमैः समस्तैः ।
ऐक्षिष्ट सा कर्मकरं युवानमंसोपरिन्यस्तखनित्रमेकम् ॥ ६१ ॥

तामाह वृद्धामभिगम्य देवः किं कर्म कुर्यां तव शंस मातः! ।
अनाश्रयः कर्मकरो जनानामासे चिरादत्र हि नाथकामः ॥ ६२ ॥

आपूपिकीं किं धनमर्थयिष्ये भक्ष्येण मे कर्मकृतो हि भाव्यम् ।
विक्रीय पूर्णान् वितरत्वपूपान् क्षामानथामाञ्छिथिलांश्च मह्यम् ॥ ६३ ॥

कियानयं वेगवतीनिरोधः कियानयं राजभटानुरोधः ।
प्रतीहि मातः! पच पिष्टकं त्वं विन्यस्य भारं मयि वीतशङ्का ॥ ६४ ॥

आमन्त्रणैरेव विमोहयंस्तामम्बेति देवीति पितामहीति ।
विस्रंसयन्नूष्मलमूष्मलं स जग्राह तत् सर्वमपूपजातम् ॥ ६५ ॥

जगौ जहास प्रणनर्त्त चित्रं ववलग वल्गूनि वचांस्यभाणीत् ।
व्यासञ्जयन् कर्मकृतः समस्तान् विस्रब्धमेको विजहार देवः ॥ ६६ ॥

इदं खनित्रं पिटकोऽयमेष राशिर्मृदामद्य मयोपनीतः ।
पश्येति राज्ञो गणकान् समेतान् प्रसारयंस्तानहसीन्निवृत्तान् ॥ ६७ ॥

उच्छृङ्खलैरूर्मिभिरुत्पतन्तीं भूयोऽप्यमान्तीं तटयोः स्रवन्तीम् ।
भीता भटा भूमिभुजे शशंसुः पाण्ड्योऽपि तां प्रेक्षितुमाजगाम ॥ ६८ ॥

आलक्ष्य राजागममप्रमत्तान् कर्मान्तिकान् कर्मकृतः स पश्यन् ।
खनन्निव क्ष्मां मृदमापगायां क्षिपन्निवान्तः स्वयमप्यचारीत् ॥ ६९ ॥

ततस्ततस्तत्र तटीर्निबद्धाः परामृशन् पाण्ड्यनृपोऽतिरुष्टः ।
अपूरितं क्वापि स वीक्ष्य निम्नं केनेदमित्थं कृतमित्यपृच्छत् ॥ ७० ॥

आपूपिकीकर्मकरं युवानमालक्षयन्तो गणकास्ततस्तम् ।
हस्ते गृहीत्वा पुरतः क्षिपन्तो विवव्रिरे तस्य विचेष्टितानि ॥ ७१ ॥

आपूपिकी काचिदतीव जीर्णा सेयं दृढं कर्मकरं न्ययुङ्क्त ।
अयं नियुक्तोऽपि भृतोऽपि सम्यङ् न स्पन्दते किञ्चन दुर्विनीतः ॥ ७२ ॥

ब्रूते पुरस्ताद् विनयोक्तिमेव किञ्चिन्निवृत्ते गणके तु भूयः ।
विडम्बयन् भाषितचेष्टितैस्तं पार्श्वस्थितान् हासयते विशङ्कः ॥ ७३ ॥

दत्तं कियद् दारुणया जरत्या दत्ते तु किञ्चिच्छिथिलानपूपान् ।
अहो ममाभाग्यमियं किलासीन्नाथेति शेते मुहुरात्तशोकः ॥ ७४ ॥

किं मेऽस्ति तातो जननी किमास्ते किमास्पदं किं धनमस्ति किञ्चित् ।
किं राजभृत्याः कृपणेषु कुर्युर्यातेति नोऽधःकुरुते कदापि ॥ ७५ ॥

अन्यायवृत्ते नृपतावमुष्मिन्नाह्वाय्यते किन्नगरं न तोयैः ।
किं ताडितैः कर्मकरैरिहेति तत्त्वं ब्रवीतीव कदापि मन्दम् ॥ ७६ ॥

आकर्णयन् वृत्तमिदं स सर्वमन्तर्हसन्तं च तमीक्षमाणः ।
आवर्त्य वेत्रेण तमाजघान पाण्ड्यः क्रुधा प्रस्फुरिताधरोष्ठः ॥ ७७ ॥

अङ्गं त्रिलोकीमयमिन्दुमौलेरभ्याहतं तेन यदा तदैव ।
वक्ता च हन्ता च निरीक्षिता च वेत्राहतं विश्वमभूत् समस्तम् ॥ ७८ ॥

आलम्ब्य संज्ञां कथमप्यथैनमालोकते यावदयं नरेन्द्रः ।
तावत् तिरोऽभूत् तरुणेन्दुमौलिः सा च स्रवन्ती विरराम सद्यः ॥ ७९ ॥

आलोक्य लीलायितमद्भुतं तदानन्दबाष्पस्थगितैर्वचोभिः ।
अस्ताविषुः स्वस्वधियोऽनुरूपैः पौराः सपाण्ड्याः पतिमम्बिकायाः ॥ ८० ॥

चूडाबद्धभुजङ्गपुङ्गवशिरोविन्यस्तपृथ्वीभर-
प्रान्तप्रस्खलितैः कणैः कतिपयैरीषत्करे पूरणे ।
मिथ्यारोपितयत्नगौरवकथाविज्ञापनाचातुरी-
सम्मुह्यज्जरतीगृहीतशिथिलापूपाय तुभ्यं नमः ॥ ८१ ॥

योगक्षेमभरः समस्तजगतां न्यस्तस्तवाङ्घ्रिद्वये
कुक्षौ त्रीणि जगन्ति मूर्ध्नि शशभृद्ब्रह्मकपालस्रजः ।
वोढव्यस्तदुपर्ययं यदि मृदां भारोऽपि गौरीपते!
कस्ते मद्भरणे श्रमः क इव मे त्रासस्तदभ्यर्थने ॥ ८२ ॥

हे सन्तः शृणुताधुनैव मिलितैरस्माभिरेतच्छिवे
वाच्यं वेत्रहतिं विभज्य न वयं भोक्तुं समर्था इति ।
नो चेत् पाद्प्रहतिः शिलाप्रहरणं कोदण्डदण्डाहति-
र्गण्डूषोदकसेक इत्यपि भवेत् सर्वं विभाज्यं हि नः ॥ ८३ ॥

ध्यायंध्यायमुपायकोटिभिरहं त्वत्प्राप्त्युपायं चिरं
निर्विण्णो निरचैषमेकमधुना हालास्यचूडामणे! ।
दिष्ट्या वेगवतीतटे यदि पतेदेतद्वपुर्मामकं
संरोहेदपि जातु तत्तटमृदा साकं त्वदीयं शिरः ॥ ८४ ॥

धूलीधूसरितं शशाङ्कशकलं जम्बालिता जाह्नवी
भग्नं ब्रह्मकपालदाम फणिनो भूषोचिताः क्लेशिताः ।
मृद्भारोद्वहनं कुतोऽभ्युपगतं को वा गुणः पिष्टके
सा दुष्टा जरती किमौषधमदात् तत्रेति न ज्ञायते ॥ ८५ ॥

पद्भ्यां किन्निहतः सुतो दिनमणेर्भग्नाश्चपेटाहतै-
र्दन्ताः किं तरणेः किमित्यपहृतं धातुः शिरः पञ्चमम् ।
कामं त्वं जगदी*श्वरो भव ततः कर्मापि किं जीर्यति
प्रत्यक्षं †ननु पाण्ड्यवेत्रलतिकाघातोऽयमासादितः ॥ ८६ ॥

देवा दूरतरं प्रयात मुनयो गृह्णीत मौनं क्षणं
मातुः शंसत मा चिरं गणवरा देवस्य दृष्टां दशाम् ।
पुष्पैश्चन्दनसम्भृतैरपि सुरैर्यन्मन्दमभ्यर्च्यते
तद् दिव्यं वपुरैश्वरं विलुलितं पाण्ड्यस्य वेत्राहतैः ॥ ८७ ॥

अम्ब! स्विद्यति वक्त्रमम्ब! किमपि श्रान्त्या गतिर्मन्थरा
मातः! सीदति शङ्करे प्रहृतवान् वेत्रेण पाण्ड्यो विभुः ।
इत्यावेदयतां मुखादनुपदं श्रुत्वा गणानां शिवा
प्रेमोद्दीर्णपतिव्रतप्रशमितक्रोधा कथं वर्त्तते ॥ ८८ ॥

---

* 'श्वरोऽसि भवतः' इति खपुस्तके पाठः. † 'खलु' इति खपुस्तके पाठः.

म्राणे थोऽधिकृतः समस्तजगतां तस्याम्बुराशौ सुखं
निद्राणस्य तथाविधेऽपि समये प्रष्टैव नालक्ष्यते ।
[1]विष्टिं कुर्वति ताम्यति श्रमभराद्वेत्राहतिस्त्वय्यभूत्
कस्याग्रे कथयिष्यसीममनयं स्वामिन्ननाथो ह्यसि ॥ ८९ ॥

लीलाधारितसिन्धुतीरसिकताभारान्तरालस्थितो
भूयासं मशकोऽप्यहं पशुपते! तावच्च नार्हामि किम् ।
यत् कीदृग्विधमैश्वरं शिर इति प्रष्टुं प्रवृत्ते विधा-
वीदृक् तादृगिदं तदित्युपदिशंस्तस्यापि च स्यां गुरुः ॥ ९० ॥

पाण्ड्यो दण्डयितास्तु पाण्ड्यतनया द्रष्टी कथं वर्त्तते
कामं सा जननी ममैव किमतो युक्तं तु वाच्यं मया ।
सव्ये स्थापय मूर्ध्नि मृद्भरमुं सव्यं वपुर्दर्शय
प्राप्ते वेत्रलताहते च तदनु द्रक्ष्यामि देव्याः स्थितिम् ॥ ९१ ॥

वोढुं प्रवृत्ते त्वयि वेगवत्याः शर्षिणेण शम्भो! सिकतावितानम् ।
भारं द्वयोः पर्यवसन्नमूहे चित्ते यतीनां शिरसि श्रुतीनाम् ॥ ९२ ॥

अर्धं पौरुषमर्धमेव भवति स्त्रैणं च यत् तावकं
साम्राज्यं गृहकर्म वा किमपि तन्नायाति निर्व्यूढताम् ।
त्वं राज्ञी मधुरापुरस्य दयितस्तत्रैव ते ताड्यते
त्वं मातः! स्वयमन्नदासि जगतां कान्तस्तु ते भिक्षते ॥ ९३ ॥

आखेटधर्ममनुपालयतानुभूतः
पार्थप्रहार इति यत् तदवैमि युक्तम् ।
आयासवृत्त्यनुगुणां भृतिमप्यविन्द-
न्नङ्गीकरोषि किमपार्थमुं प्रहारम् ॥ ९४ ॥

वेत्राहतिं विभक्तुं विश्वात्मकता प्रदर्शिता भवता ।
करगतकबलग्रासे पुनरभिनीतं शिवाद्वैतम् ॥ ९५ ॥

वेत्राहतिमतिघोरां विभज्य ये भुञ्जते जना नियतम् ।
भवतापतापितेष्वपि तेषूपेक्षैव ते कथं लीला ॥ ९६ ॥

---

१. विष्टिर्वेतनकर्म.

आनम्यानम्य मौलिं त्वयि किरति मृदं स्रंसते मूर्ध्नि गङ्गा
बद्ध्वाबद्ध्वा कपर्दं स्पृशति फणधरा दारुणं निश्श्वसन्ति ।
औत्सुक्यात् ताड्यमाने त्वयि जगदखिलं ताड्यते वेत्रयष्ट्या
भक्तस्यैकस्य रक्षा भवति पशुपते! सर्वलोकस्य शिक्षा ॥ ९७ ॥

अस्मत्तो बहुधा गृहीतमधुनाप्यस्मद्भवस्रोतसां
संरोधे न किमप्ययं प्रयतते देवः प्रमाणं ततः ।
इत्यग्रे विनिपत्य पाण्ड्यनृपतेर्ब्रूमो वयं चेत् ततः
कोपात् कोपमुपेयुषः क्षितिपतेः किं भावि सम्भाव्यताम् ॥ ९८ ॥

वोढव्यानि वहानि ते सुरनदीवेधःकपालादिका-
न्यात्मानं च निवेदयाम्यथ भवद्भक्त्यामृतेनाप्लुतम् ।
इत्यभ्यर्थयमानमीषदपि मामप्रेक्षमाणो भवान्
पिष्टापूपकृते मृदं वहसि चेद् देवः प्रमाणं ततः ॥ ९९ ॥

प्रहृतं प्रहृतमिति त्वं पाण्ड्य! विषीदसि किमम्बिकारमणे ।
प्रहृतं यदि साधु कृतं पाशुपतं गणय सिद्धमस्त्रं तत् ॥ १०० ॥

पाण्ड्येन प्रहृतोऽसि वेत्रलतया पार्थेन गाण्डीवतः
पादेनापि किरातकेन वटुना केनापि च प्रस्तरैः ।
तत्तत् प्रत्युत तेषु तेषु तप इत्यग्राहि मत्पूजने
त्वागांस्येव पदे पदे गणयसे दैवं ममैवंविधम् ॥ १०१ ॥

इत्थं स्तवोक्त्या मुखरेषु पौरेष्वाश्चर्यमग्नेषु गणाः पुरारेः ।
आपूपिकीमद्भुतवेषरूपां निन्युर्दिवं दिव्यविमानरूढाम् ॥ १०२ ॥

अथावसीदन्नरिमर्दनोऽपि पाण्ड्यः स्वयं पाशुपतापचारात् ।
पादप्रणामैः प्रियभाषितैश्च प्रसादयामास स मन्त्रिवर्यम् ॥ १०३ ॥

वैहायसीं गिरमथाकलयन् पुरारेर्भीतस्तदैव सचिवं प्रजिघाय पाण्ड्यः ।
वैराग्यमेव हृदि वातपुरीश्वरोऽपि कृत्वा चिदम्बरमगाहत सर्ववेदी ॥ १०४ ॥

इति महाकविश्रीनीलकण्ठदीक्षितप्रणीते
शिवलीलार्णव एकविंशः सर्गः ।

अथ द्वाविंशः सर्गः ।

अथाविरासीदरिमर्दनस्य कुले नृपः कोऽपि गुणैरुदारः ।
अप्युन्नतं स्फारतरैर्यशोभिराचक्षते यं किल कुब्जपाण्ड्यम् ॥ १ ॥

स पाण्ड्यवंशप्रभवोऽपि देवः संसर्गदोषाच्चिरमार्हतानाम् ।
अवाप दीक्षामपि तन्मतेन दुरुत्तरो दुर्जनसम्प्रयोगः ॥ २ ॥

आशङ्कनीयोऽपि न वेदवेद्योराब्रह्मणो यत्र किलान्तरायः ।
तस्मिन् विशुद्धे शिवदासवंशे सम्बन्ध इत्याविरभूत् कुमारः ॥ ३ ॥

तं मातृहीनं शिशुमुल्लुलन्तं स्तन्येन गौरी बिभराम्बभूव ।
यं ज्ञानपूर्णापरनामधेयं तदादि लोकाः समुदाहरन्ति ॥ ४ ॥

स्कन्दांशजः स द्विजसार्वभौमस्तारुण्य एवाखिलतन्त्रवेदी ।
त्रय्यन्तसिद्धान्तदृशा पुरारेरुत्कर्षमुच्चैर्विशदीचकार ॥ ५ ॥

तं भस्मरुद्राक्षषडक्षराणां तत्त्वावबोधैकनिधिं महान्तम् ।
आराध्य केचित् कलिमभ्यजैषुः पचेलिमप्राक्तनपुण्ययोगात् ॥ ६ ॥

तथागताचार्यकदुर्विपाकतमोवृते राजकुले तदानीम् ।
मन्त्री च राज्ञो महिषी च तस्य भक्तिं परामूहतुरिन्दुचूडे ॥ ७ ॥

सम्बन्धनाथाङ्घ्रिसरोजयोस्तावाबध्य भक्तिं महतीमनन्याम् ।
प्रायस्यतां त्रातुममुं प्रदर्श्य मग्नं नृपं बाह्यमतान्धकूपे ॥ ८ ॥

कदाचिदासीदथ कुब्जपाण्ड्यस्तापज्वरेण ज्वलताभिभूतः ।
यत्नार्हतानां नृपदेशिकानां यत्नः समस्तो विफलीबभूव ॥ ९ ॥

देवी तदा देशिकसार्वभौममारोग्यहेतोरवनीश्वरस्य ।
सर्वज्ञमभ्यर्थनया महत्या सम्बन्धनाथं स्वयमानिनाय ॥ १० ॥

स ज्ञानपूर्णः प्रविशन् दृशा तं सम्भावयामास रुजाभितप्तम् ।
कोटीरकोटीन्दुगलत्सुधार्द्रमन्तःस्मरन् देवमहंग्रहेण ॥ ११ ॥

अत्याश्रमस्थो मुनिरस्य राज्ञो भाग्येन फाले भसितं निधाय ।
पस्पर्श हस्तेन च तं महेशपादारविन्दार्चनभावितेन ॥ १२ ॥

स स्पृष्टमात्रो भगवत्तरेण शिवाभिमर्शेन गुरोः करेण ।
तत्याज विश्वत्रयभेषजेन तापज्वरार्तिं सहसा नरेन्द्रः ॥ १३ ॥

औदर्यवह्निज्वलनोत्थितां तामार्तिं निवृत्तां मुमुदे स पश्यन् ।
देवी तु शान्तं विदती जहर्ष भवज्वरज्वालमहाभिषङ्गम् ॥ १४ ॥

तापज्वरो भूमिभृतः शरीरात् तस्यापनीतः करुणादृशायम् ।
तथागतानां[1] द्विगुणस्तदादि चिन्तात्मना चेतसि सञ्जजृम्भे ॥ १५ ॥

अष्टौ सहस्राणि तथागतानामष्टासु शैलेषु कृतास्पदानाम् ।
जातेऽभिषङ्गे मधुरामवापुर्जल्पेन जेतुं शिवदेशिकं तम् ॥ १६ ॥

पारीणमेनं पदवाक्यमाने त्रय्यन्तसिद्धान्तगुरुं महान्तम् ।
आसाद्य जल्पाय सकृत् प्रवृत्ता आसन् क्षणादप्रतिभा जिनेन्द्राः ॥ १७ ॥

उत्सृज्य सर्वाण्युपबृंहणानि मीमांसितन्यायदृढीकृतानि ।
उल्लङ्घ्य तर्कानपि पामरास्ते सम्भूय तं प्रत्ययतोऽजिगीषन्[2] ॥ १८ ॥

संसारतापानखिलान् निहन्तुं शक्तोत्यहिंसैव हि शाक्यदृष्टा ।
नार्च्यो महेशो न शिवा विभूतिरित्यार्हताः स्वामलिखन् प्रतिज्ञाम् ॥ १९ ॥

वेदाः प्रमाणं सह कामिकाद्यैर्विश्वाधिकः शङ्कर एक एव ।
भस्मैव धार्यं भुवि मोक्षमाणैरित्यालिखत् स्वां स गुरुः प्रतिज्ञाम् ॥ २० ॥

जैना अथोचुर्ज्वलने क्षिपामो द्वये वयं स्वस्वकृतान्तलेखम् ।
दाहाददाहादपि सर्वलोकाः पश्यन्तु नो भङ्गजयाविहेति ॥ २१ ॥

तथेति सम्बन्धकरार्पितेन लेखेन जग्लेऽपि न हव्यवाहे ।
अदह्यत द्राक् पुनरार्हतानां लेखः सहायुर्लिपिभिस्तु तेषाम् ॥२२ ॥

पराजये शूलशिखाधिरोहं पणं वृणानाः स्वयमेव जैनाः ।
विचिक्षिपुः स्रोतसि वेगवत्याः पत्रं प्रवाहाभिमुखं चलेति ॥ २३ ॥

तत् स्रोतसा तत्क्षणमेव सिन्धोरनीयत प्राग्दिशमासमुद्रात् ।
प्रत्यग्दृशा तद् गुरुणार्पितं तु प्रत्यङ्मुखं स्रोतसि सञ्चचाल ॥ २४ ॥

ततः क्षणाद् देशिकसार्वभौमविज्ञानसिन्धोरिव वीचिघोषः ।
समन्ततः शङ्करकिङ्कराणां समुज्जजृम्भे विजयाट्टहासः ॥ २५ ॥

चार्वाकशिष्या विजितास्ततस्ते सौत्रान्तिका माध्यमिकाश्च जैनाः ।
अवीक्षितान्योन्यमुखाः प्रचेलुरारोढुकामाः स्वयमेव शूलम् ॥ २६ ॥

---

१. तथागतानां जैनानाम्. २. प्रत्ययतः शपथात्.

ते बोध्यमाना अपि शैवधर्मं शूलाधिरोहाय रुचिं बबन्धुः।
प्राणान्तिकां निष्कृतिमेव युक्तां पश्यन् स चैतेषु तथानुमेने ॥ २७ ॥

पाण्ड्यस्ततः प्रत्ययदर्शनेन सम्बन्धनाथं शरणं प्रपन्नः।
अशेषपापच्छिदुरामयाचद् दीक्षां शिवज्ञानविधानदक्षाम् ॥ २८ ॥

आचार्यवर्योऽप्यधिवासितं प्राक् छिप्यं शुभस्वप्ननिरस्तशोकम्।
आराधितस्य ज्वलने पुरारेरनुज्ञया सन्निधिमानिनाय ॥ २९ ॥

षडध्वनः पञ्च कलाश्च तस्य संशोधयन् देशिकसार्वभौमः।
दुर्दीक्षया दूषितमप्ययत्नात् सम्भावयामास शरीरकोशम् ॥ ३० ॥

शरीरमाविश्य स तस्य नाडीसंधानमार्गेण गुरुः पुनानः।
जातिं समुद्धृत्य दयासमुद्रश्चक्रे शिवज्ञाननिधानमेनम् ॥ ३१ ॥

वित्तं शरीरं हृदयं च तस्य विन्यस्य पाण्ड्यश्चरणारविन्दे।
अभ्यर्थयन्नर्धशशाङ्कचूडं शैवाध्वपान्थः प्रशशास पृथ्वीम् ॥ ३२ ॥

शिवव्रतस्थाः शिवमन्त्रसक्ताः शिवागमज्ञानसुधारसज्ञाः।
प्रजा बभूवुः सकलास्तदानीं प्रजेश्वरे शैवपदाधिरूढे ॥ ३३ ॥

अध्यात्मविद्याभिरयं प्रबुद्धान् मन्दान् विचित्राभिरुपासनाभिः।
बाह्यार्चनैरेव परांश्च शम्भोर्धीरोऽनुजग्राह यथाधिकारम् ॥ ३४ ॥

अधीष्व[1] वेदानवधारयार्थानधीहि शम्भुं वह भूतिमङ्गे।
तपांसि तप्यस्व सुरान् यजेति सर्वे जनाः शङ्करमारराधुः ॥ ३५ ॥

काले ततो वैश्यकुले बभूव कश्चिन्महार्थो मधुरानगर्याम्।
करग्रहं मातुलकन्यकायाः कर्तुं प्रतस्थे स कदापि चोलान् ॥ ३६ ॥

अतीतयोर्मातुलयोस्ततस्तामादातुकामः स्वजनानुमत्या।
वैश्यस्तया साकमनूढयैव भूयः स्वमावासमभि प्रतस्थे ॥ ३७ ॥

मध्येपथं क्वापि महेशधाम्नि शैवानि तीर्थान्यटता स दिष्ट्या।
सम्बन्धनाथेन समाजगाम सञ्जीवितश्चात्र स सर्पदष्टः ॥ ३८ ॥

सम्बन्धनाथेन तदा नियुक्तः स बालिकोद्वाहकृते कुमारः।
पाणिग्रहं साक्षिषु बान्धवेषु चिकीर्षमाणः समशेत किञ्चित् ॥ ३९ ॥

---

१. 'अधीष्व अधीतवन्त इत्यर्थः। समुच्चयेऽन्यतरस्याम्'(३-४-३) इते लोट्। एवं अधीहीत्यादिष्वपि.

शम्भुः शमी कूप इति त्रयं तत् तत्र स्थितं साक्षिपदे वृणानः ।
अग्राहयत् पाणिमनेन सद्यः स देशिको मातुलकन्यकायाः ॥ ४० ॥

स तां समादाय वधूं नवोढां सम्प्राप्य भूयो मधुरां विशालाम् ।
आराधयन्नार्तशरण्यमीशं हालास्यनाथं मुमुदे चिरेण ॥ ४१ ॥

कालेन तस्यास्तनया बभूवुः कारुण्ययोगेन शशाङ्कमौलेः ।
स्तनन्धयांस्तानपथे द्विषत्या सा जातु लेभे कलहं सपत्न्या ॥ ४२ ॥

वेश्येव काचित् त्वमसीह गेहे करग्रहे कस्तव दासि! साक्षी ।
इति प्रवृत्तं कलहेऽतिवादमेषा सपत्न्या ममृषे न साध्वी ॥ ४३ ॥

सा बाष्पमत्यूष्मलमुद्वहन्ती सद्यो विनिर्गत्य गृहाद् विषण्णा ।
आपन्नबन्धोश्चरणं पुरारेर्हालास्यनेतुः शरणं प्रपेदे ॥ ४४ ॥

साक्षी भवानेव करग्रहे मे शम्भो! शमीकूपसमीपवर्ती ।
साक्ष्यं न धत्से यदि मे सपत्न्याः सद्यो विहास्यामि तनूमिहेति ॥ ४५ ॥

हालास्यनाथान्तिकमभ्युपेत्य सम्पश्य पाणिग्रहसाक्षिणो मे ।
इति त्वमाकर्ष बलात् सपत्नीमित्याह तां व्योमगिरा महेशः ॥ ४६ ॥

सा प्रेयसा बन्धुजनैश्च साकं तामानयन्ती प्रसभं सपत्नीम् ।
यावच्छिवस्यान्तिकमेति तावत् तत्र स्वयं तत् त्रयमाविरासीत् ॥ ४७ ॥

इमे समेताः सदनं पुरारेरीशानकोणेऽस्य कदाप्यदृष्टम् ।
अन्धुं शमीवृक्षमनाथबन्धुं लिङ्गं च दृष्ट्वा बिभयाम्बभूवुः ॥ ४८ ॥

भोगाङ्गपूजावसरे पुरारेः समागतास्तत्र सुराः समस्ताः ।
आलोक्य लीलायितमद्भुतं तद् भक्त्या नतास्तुष्टुवुरिन्दुचूडम् ॥ ४९ ॥

क्व ते दया वाङ्मनसातिभूमिः क्व दुर्लभो वा त्वदवाप्त्युपायः ।
अहो जितं सुन्दरनाथ! मत्त्यैरहो जितं तत्र च दीनदीनैः ॥ ५० ॥

गुप्तं वृथा कोटिभिरागमानां गुप्तं वृथाहो गुरुभिः पुराणैः ।
कोणे यदत्र त्वमिहानुकम्पाकोशालयद्वारमपावृणोषि ॥ ५१ ॥

अस्माभिरज्ञानपि तारयद्भिः कियान् प्रकर्षो विबुधेषु कार्यः ।
इति त्वया चिन्तयता किमीश! प्रतारिता स्मस्त्रिदिवार्पणेन ॥ ५२ ॥

---

१. 'तद' इति खपुस्तके पाठः.

पाण्ड्यप्रियं त्वां विदती शिवापि पाण्ड्यात्मजासीद्यदि का कथा नः ।
पाण्ड्येषु जायेमहि खञ्जरीटाः कोयष्टयः कोलकिशोरका वा ॥ ५३ ॥

लीलासु ते लब्धसरूपभावा ग्राम्या इमे पाण्डुषु चन्द्रमौले! ।
जिघ्रन्ति केचिद् विलिखन्ति केचिच्चर्वन्ति केचिच्च वतंसमिन्दुम् ॥ ५४ ॥

त्वं तावदत्यन्तमृदुः प्रजासु त्वत्तोऽपि मृद्वी गृहिणी तवेयम् ।
अद्यायतौ वा चरतोः किलैवमात्मैकशेषो भविता ध्रुवं वाम् ॥ ५५ ॥

कैवल्यदानाय कृतप्रतिज्ञौ काशीपतिः[1] पाण्ड्यपतिर्युवां द्वौ ।
शिष्यैकविश्रान्तममुष्य दानं सार्वत्रिकं तावकमेव शम्भो! ॥ ५६ ॥

विश्वस्य दीर्घौ श्रवणादिभङ्गीं वीतोद्यमाः स्मश्चिरमीश! मोक्षे ।
सम्प्रत्यवाबुद्ध्यत वाक्यशेषपञ्चाक्षरीयं मधुरा विनेति ॥ ५७ ॥

ये ये जना यद्यदिहार्थयन्ते तत्तन्निरस्तोपधि तेषु तेषु ।
ओमित्यलोभादनुजानतः किमोमित्यभिख्यैव तवेयमासीत् ॥ ५८ ॥

अन्वेषणीयं किमनाहते ते तत्त्वं हताः स्मो वयमागमौघैः ।
विस्पष्टमत्राहत एव तत्त्वं वेत्रेण पाण्ड्यस्य यदीक्षितं तत् ॥ ५९ ॥

स्वरूपमेतत् तव सुन्दरेश! शुद्धा दयेत्येव तु लक्षयामः ।
कदम्बमूलन्तु तटस्थलक्ष्म कारुण्यसिन्धो! तव तर्कयामः ॥ ६० ॥

यद्धामसीमाक्रममात्र एव वृत्रद्रुहस्तत् कलुषं विलिल्ये ।
सकृद् विगाह्यैव यदीयतीर्थे शापं मुनेरिन्द्रगजो मुमोच ॥ ६१ ॥

नीपाटवीं यः कुलशेखरेण निर्मापयामास च राजधानीम् ।
प्राप्ता शिवा पाण्ड्यकुलेऽवतारमनुज्ञया यस्य तटातकेति ॥ ६२ ॥

उपायत स्वं युधि जेतुकामामुपायतस्तामपि लीलया यः ।
पतञ्जलेर्भक्तिमवेत्य नृत्तं प्रादर्शयद् रूप्यसभान्तरे यः ॥ ६३ ॥

कुण्डोदरस्योदरपूरणेऽपि कुण्ठोद्यमा येन कृतान्नपूर्णा ।
नालं पिपासोपशमाय यस्य नदी च सा वेगवती यतोऽभूत् ॥ ६४ ॥

---

१. काशीपतिर्विश्वेश्वरः.

समाहृताः काञ्चनमालिकायाः स्नानाय येनाम्बुधयः समस्ताः ।
महीपतिं यो मलयध्वजं च दिवं गतं दर्शयति स्म पत्नीम् ॥ ६५ ॥

मीनेक्षणायां सुतमुग्रपाण्ड्यमवाप यः सुन्दरपाण्ड्यदेवः ।
तस्मै च यं शक्तिधराय वज्रं चण्डायुधं चक्रमपि व्यतारीत् ॥ ६६ ॥

उद्वेलमप्यर्णवमुग्रपाण्ड्यो यद्दत्तया शोषयति स्म शक्त्या ।
वज्रेण मौलिं बिभिदे मघोनश्चण्डायुधेनापि जघान मेरुम् ॥ ६७ ॥

आचष्ट यश्चाशयमागमानां जिज्ञासमानेषु तपोधनेषु ।
यद्दत्तरत्नाहितमौलिनैव पाण्ड्यार्भको राजपदेऽभिषिक्तः ॥ ६८ ॥

कपर्दजैर्यस्य घनाघनौघैः पपे पयोधिः परिजृम्भमाणः ।
प्राप्तैश्च तैर्यः पटमण्डपत्वमवारयद् वृष्टिमतिप्रवृद्धाम् ॥ ६९ ॥

सिद्धात्मना यो विततार सर्वाः सिद्धीः प्रजानां मधुरानगर्याम् ।
यः सुन्दरेशानविमानसक्तं शिलागजञ्चाशयदिक्षुकाण्डान् ॥ ७० ॥

अस्त्रेण तुर्यावतरेण शौरेर्हस्ती हतो येन तथागतानाम् ।
श्वश्रूदुरालापविवासिताया यः प्रादुरासीद् द्विजकन्यकायाः ॥ ७१ ॥

व्यत्यस्य नृत्तं विदधे दयालुः पाण्ड्यस्य यः प्रार्थनया महत्या ।
पान्थद्विजस्त्रीवधपापवादं व्याजेन यो व्याधवटोरहार्षीत् ॥ ७२ ॥

स्वमातृजारं पितृघातिनं च विप्राधमं यो विमलीचकार ।
अङ्कस्य भार्याहरमस्त्रशिष्यमङ्कात्मनैवाजयदाहवे यः ॥ ७३ ॥

मायोरगं यः शमयाम्बभूव मायागवीं यस्य पुनर्महोक्षः ।
यः पाण्ड्यसेनान्यमनुग्रहीतुं सन्दर्शयामास चमूं नृपालम् ॥ ७४ ॥

पाण्ड्याय यः प्रादित हेम यश्च वैश्याङ्गनाभ्यो वलयान् दयार्द्रः ।
अष्टापि सिद्धीः प्रतिपादयन् यो यक्षाङ्गनासु प्रससाद भूयः ॥ ७५ ॥

द्वारं समुद्घाट्य निशि स्वयं यश्चोलाय सेवामदिशन्निगूढम् ।
पानीयदानेन च पाण्ड्यसेनामुज्जीव्य चोलेन्द्रमजापयद् यः ॥ ७६ ॥

स्वर्णं दिशन् सिद्धरसं प्रयुज्य पुपोष वेश्यां शिवधर्मिणीं यः ।
पाण्ड्यस्य यः स्वैकपरायणस्य सादी भवन् साधयति स्म चोलम् ॥ ७७ ॥

अक्षय्यमप्यक्षतमर्पयन् यो भक्ताय भक्तार्पणमन्वगृह्णात् ।
येनाद्दतो मातुलरूपभाजा वैश्यो वटुर्ज्ञातिजनान् विजिग्ये ॥ ७८ ॥

आस्थाय यश्चार्जुननाथलिङ्गं पाण्ड्ये महत् पातकमुन्ममार्ज ।
काष्ठानि मूर्ध्ना कलयन् न्यधत्त काष्ठां परां गायति यः स्वभक्ते ॥ ७९ ॥

भद्राय भूरि द्रविणं दिदेश पुत्रं ददौ चेरमहीभुजे यः ।
भद्राय दिव्यं फलकं दिदेश वृष्टौ महत्यामपि गायते यः ॥ ८० ॥

द्वीपान्तरीयामवमापि गीत्या भद्रा विजिग्ये यदनुग्रहेण ।
वाराहमास्थाय वपुर्ददौ यः स्तन्यामृतं कोलकिशोरकाणाम् ॥ ८१ ॥

प्रापय्य मानुष्यकमद्भुतं यः पाण्ड्यस्य तान् मन्त्रिपदेऽभ्यषिञ्चत् ।
यः खञ्जरीटं शरणं प्रपन्नं चक्रे बलिभ्यो बलिनं खगेभ्यः ॥ ८२ ॥

जहार कोयष्टिमनुग्रहीतुं यादांसि यः काञ्चनपङ्कजिन्याः ।
कल्पान्तलुप्तां कटकाहिना यः सीमां विवत्रे मधुरानगर्याः ॥ ८३ ॥

प्राद्रावयत् पाण्ड्यकृतेऽरिसेनां बाणैः स्वनामाक्षरलाञ्छितैर्यः ।
दुरासदं दुष्कविभिः स्वयं यः प्रादाद् विचित्रं फलकं कवीनाम् ॥ ८४ ॥

पाण्ड्यस्य चिन्तानुगुणं निबध्य पद्यं ददौ यश्च निजार्चकाय ।
विद्याविवादे विहितातिवादं कीरं कविं यः पुनरन्वगृह्णात् ॥ ८५ ॥

अपि स्वयं कुम्भभवेन यस्तमबोधयद् द्रामिडसूत्रतत्त्वम् ।
व्यवेचयन्मूकमुखेन यश्च तत्तत्कृता द्रामिडसूत्रवृत्तीः ॥ ८६ ॥

भक्ते कवौ क्वापि विमाननेन पाण्ड्याय कुप्यन्नगराद्ययौ यः ।
दाशो भवन् दाशकुलेऽवतीर्णो जग्राह पाणौ जगदाम्बिकां यः ॥ ८७ ॥

आचार्यमूर्त्तिं परिगृह्य नम्रमदीक्षयद् वातपुरीश्वरं यः ।
अदर्शयद् यस्तुरगान् सृगालानभ्यर्थितो वातपुरीश्वरेण ॥ ८८ ॥

प्रावर्त्तयद् वेगवतीमथैनं पाण्ड्येन यः पालयितुं निरुद्धम् ।
विश्वात्मता यो विशदीचकार वेत्राहतिं स्वां भुवने विवृण्वन् ॥ ८९ ॥

सम्बन्धनाथस्य मुखादकार्षीच्छान्तं ज्वरं पाण्ड्यमहीपतेर्यः ।
विद्याविवादे विजिताननेन यः शूलमारोपयति स्म बौद्धान् ॥ ९० ॥

आनीय यः कूपशमीमहेशान् वैश्याविवाहे विववार साक्ष्यम् ।
लीलास्वनन्तास्वपि यस्य दृष्टा लीला चतुष्षष्टिरियं पुराणे ॥ ९१ ॥

आलम्बमेकं जगतां त्रयाणामव्याजकारुण्यसुधानिधानम् ।
तं तादृशं त्वामपहाय शम्भो! किं तावदन्यैरिह किम्पचानैः ॥ ९२ ॥

इति स्तवोक्त्या मुदितः सुराणामीशः स वेश्यां सह वल्लभेन ।
निर्विष्टभोगामवनौ चिराय निन्ये परं धाम दयार्द्रचेताः ॥ ९३ ॥

इत्थं समस्तार्त्तिहरः प्रजानामीशः कदम्बद्रुममूलधामा ।
आस्ते त्रिलोकीमनुकम्पमानः साचिव्यतो मीनविलोचनायाः ॥ ९४ ॥

श्रोतव्यं निधिरस्ति कोऽपि निहितो हालास्य इत्यग्रतो
मन्तव्यं स निधिर्जगन्निधिरिति न्यायैरथोच्चावचैः ।
ध्यातव्यं हृदि मूललिङ्गमथ च श्रीसुन्दरेशाभिधं
द्रष्टव्यं शफरेक्षणासहचरं तत्त्वं ततः शाङ्करम् ॥ ९५ ॥

लीलां[1] चतुष्षष्टिमिमां प्रणीतां हालास्यनेतुस्तरुणेन्दुमौलेः ।
श्रीनीलकण्ठे मयि कर्णजाहमानीय §मीनाक्षि! चिरं दयेथाः ॥ ९६ ॥

कृतिः समर्प्या विरसा मयेति कस्यैष दोषः स परं भवान्याः ।
रम्यां कृतिं सा यदि रोचयेत तथानुगृह्णातु निवारितं कैः ॥ ९७ ॥

मा भूवन् नव च रसाः कविप्रणीताः
काव्येऽस्मिन् पदकमलार्पिते पुरारेः ।
आस्ते तु ध्रुवमखिलाभिनन्दनीयां
कारुण्यामृतरसकन्दली जनन्याः ॥ ९८ ॥

हालास्येशितुरीशितुर्यदि सखे! लीलासु शुश्रूषसे
तत्सर्वागमगुप्तमस्य यदि वा तत्त्वं विजिज्ञाससे ।
पारं वाथ दिदृक्षसे यदि परं काव्यागमस्रोतसां
तत् कर्णे कुरु नीलकण्ठमखिनो वाचं शिवैकाश्रयाम् ॥ ९९ ॥

---

१. 'लीलाचतुष्षष्टि' इति पाठः स्यात् ।

§ इतः प्रभृति ९८ तमश्लोकप्रथमपादावधिकानि अक्षराणि त्रुटितानि कपुस्तके.

मलयध्वजपाण्ड्यकन्यका-
चरणद्वन्द्वनिवेशितात्मना ।
शिवयोः कविनेदमार्पितं
शिवलीलार्णवकाव्यमद्भुतम् ॥ १०० ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्य-
चतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजि-
श्रीमद्**प्पयदीक्षित**सोदर्या**च्चान्दीक्षित**-
पौत्रेण **नारायणदीक्षिता**त्मजेन
भूमिदेवीगर्भसम्भवेन महाकवि-
श्री**नीलकण्ठदीक्षितेन**
विरचिते शिवलीलार्णवे
महाकाव्ये
द्वाविंशः सर्गः ।

समाप्तश्चायं
शिवलीलार्णवः ।

TRIVANDRUM SANSKRIT SERIES.

NO. II.

ABHINAVAKAUSTUBHAMÂLÂ

AND

DAKSHINÂMÛRTISTAVA

OF

KRISHNALÎLÂSUKAMUNI

Edited with Notes

BY

T. GANAPATI ŚÂSTRÎ

Principal, His Highness the Maharajah's Sanskrit College, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.

1905.

(All Rights Reserved.)

॥ श्रीः ॥

अनन्तशयनराजकीयसंस्कृतग्रन्थावलिः.

ग्रन्थाङ्कः २.

अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ

श्रीकृष्णलीलाशुकमुनिना

प्रणीतौ

अनन्तशयनस्थराजकीयसंस्कृतविद्यामन्दिराध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितौ

लघुटिप्पण्या च संयोजितौ ।

तौ च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितौ ।

कोलम्बाब्दाः १०८१, क्रैस्ताब्दाः १९०५.

निवेदना ।

अभिनवकौस्तुभमालाया दक्षिणामूर्त्तिस्तवस्य च प्रणेता कृष्णलीलाशुकमुनिर्यथा पुरुषकारकर्तुर्न भिद्यते, तथा पुरुषकारग्रन्थस्य निवेदनायां प्रत्यपादयम् । कृष्णकर्णामृतस्य कर्ता लीलाशुकः किमयमेव स्यादुतान्य इति न निश्चयः । तत्र अभिनवकौस्तुभमालाया रत्नसहोदरकौस्तुभमालेत्यपि प्रसिद्धिरस्ति ।

त. गणपतिशास्त्री.

Prefatory Note.

As has been stated in the Introduction to *Purushakara*, its author Krishnalilasukamuni is also the author of *Abhinavakaustubhamala* and *Dakshinamurtistavam*. But it is not certain whether he is the same as Lilasuka, the author of *Krishnakarnamritam*. *Abhinavakaustubhamala* is also known as *Ratnasahodarakaustubhamala*.

T. G. S.

॥ श्रीः ॥

श्रीकृष्णलीलाशुकमुनिप्रणीता

अभिनवकौस्तुभमाला ।

लक्ष्मीश्च कौस्तुभश्चेति यद्रत्नद्वयमुद्धृतम् ।
तन्नः कामदुघं भूयात् तेजस्त्रैलोक्यमङ्गलम् ॥ १ ॥

यत्र साम्राज्यचिह्नानि यामिनां हृदयैः सह ।
श्रीश्च जाग्रति तज्जीयाच्छ्रीश! त्वच्चरणाम्बुजम् ॥ २ ॥

यच्चादिकवयो व्यासप्रमुखाः सपितामहाः ।
भागीरथीसरस्वत्योः प्रवाहप्रभवं विदुः ॥ ३ ॥

(युग्मकम् .)

किं ब्रूमः प्रपदं देव! यस्य प्रतिनिधावपि[1] ।
पृष्ठे जरढकूर्मस्य जगती प्रतितिष्ठति ॥ ४ ॥

तेऽमी नखेन्दवो देव! यान् हि नाभिसरोजभूः ।
पुरा सिसृक्षितस्येन्दोः प्रतिमामन्वमन्यत ॥ ५ ॥

जयतां जगतां नाथ! गुल्फावुत्फुल्लविभ्रमौ ।
यावनुस्मरतां गाढमुन्नतिर्न[2] तथानयोः ॥ ६ ॥

तव देव! पदं धन्या माणिभूषणमण्डली ।
वेषान्तरेण वेदान्तवाणीव विनिषेवते ॥ ७ ॥

---

१. साक्षात् तस्मिन् जगती प्रतितिष्ठतीति किमु वक्तव्यमित्यापिशब्देन द्योत्यते.
२. उन्नतिरुत्कर्ष उत्सेधश्च.

निर्वाणसंज्ञकं देव! तव तत् परमं पदम् ।
चिरात् प्रविशतां शङ्के जङ्घे मङ्गल्यतोरणे ॥ ८ ॥
एते ते जानुनी नाथ! यशोदाङ्गणरिङ्गिणी ।
लक्ष्मीः करीषगन्धान्ध्यच्छलाज्जिघ्रति ये (स्मिता?)[2] ॥ ९ ॥
तावूरू जयतां यौ किं द्वौ करौ स्मरहास्तिनः ।
हस्तिपृष्ठाप्रतिष्ठश्चेन्नैव देवः श्रियं जयेत् ॥ १० ॥
त्वत्कटीतटसौभाग्ये स्वामिन्नास्माद्गिरां गतिः ।
लक्ष्मीवसुन्धराधन्यमनीषास्तत्र जाग्रतु ॥ ११ ॥
कामरूपैव देव! श्रीर्येयं वक्षस्तटे स्थिता ।
कटीतटेऽपि कामान्धा भाति पीताम्बरात्मना ॥ १२ ॥
काञ्चीयं काञ्चनी नाथ! भाति रत्नप्रभोद्भटा ।
मुग्धयेव कृता लक्ष्म्या मदान्धस्मरशृङ्खला ॥ १३ ॥
सेयं नाभी यया देव! शङ्खः संघृष्य गर्जति ।
लक्ष्मीविरिञ्चयोः स्पर्धा वस्तुं यत्सरसीरुहे ॥ १४ ॥
वलित्रयमिदं देव! जगत्त्रयमनोहरम् ।
माधुर्यवारिधेर्धत्ते वीचीनां विभ्रमश्रियम् ॥ १५ ॥

---

१. करीषगन्धान्ध्यं शुष्कगोमयगन्धव्याप्तत्वं तस्यच्छलात् तद्रूपाद्वा कल्पिताङ्घ्रिङ्गादित्यर्थः । जिघ्रति स्पृशति इति मन्ये इति शेषः । एवञ्च लक्ष्मीसंसर्गजमेवेदं जानुनोः करीषगन्धान्ध्यं, न त्वङ्गणरिङ्गणवशजनितामिति तात्पर्यं फलितम् । लक्ष्मीश्च करीषिणी श्रीसूक्ते श्रूयते —'गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीं । ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम्' इति. २. 'सदा' इति वा 'मुदा' इति वा पाठो भवेत्. ३. इदमर्धं 'इतिप्रविष्टप्रतिश्चेनैव देवः श्रियं जयेत्?' इत्येवादर्शपुस्तके दृश्यते.

श्रीमानुदरबन्धोऽयं श्रियं देवस्य पुष्यति ।
कान्तिसिन्धौ दृशोः क्रीडाप्लवः कृत्त इव श्रियः ॥ १६ ॥
लोकैकनाथ! रम्येयं रोमराजी विराजते ।
कृतेव प्रथमं लक्ष्म्या वक्षोहर्म्याधिरोहणी ॥ १७ ॥
श्रीवत्सः श्रीनिधे! सोऽयं श्रियं कामपि पुष्यति ।
यः पद्मजापदाम्भोजक्रीडाचिह्नानि निह्नुते ॥ १८ ॥
चकास्ति कौस्तुभः सोऽयं तव देव! भुजान्तरे ।
पयोधिराजकन्याया हर्म्यदीप इवार्पितः ॥ १९ ॥
नानारत्नसहस्राणि नाथ! वक्षसि जाग्रति ।
रत्नाकरसुतोद्वाहयौतकानीव कानिचित् ॥ २० ॥
वैजयन्तीमिमां[1] देव! मन्ये साधारणीं[2] ध्रुवम् ।
ममत्वपात्रं भृङ्गाणां देवस्य[3] मदनस्य च ॥ २१ ॥
भान्ति ते जगतां नाथ! भुजा भूषणभूषणाः ।
जगद्भारोद्वहैश्चक्रे यैश्चक्रादिभरश्रमः ॥ २२ ॥
पाणयश्चक्रपाणे! ते भान्ति भक्ताभयप्रदाः ।
येषां दक्षिणतैवासील्लक्ष्मीपाणिग्रहोत्सवे ॥ २३ ॥
लोकपाललललाटेषु लक्ष्म्याश्च स्तनमण्डले ।
लेखारसज्ञैर्यैः पञ्चशाखैः पञ्चशरः स्मरः ॥ २४ ॥
(युग्मकम्)
तेऽमी कररुहा देव! येषां विभ्रमविक्रमाः ।
कमलाविपुलोत्तुङ्गस्तनयोर्हृदि च द्विषः ॥ २५ ॥

---

१. 'वैजयन्ती पताकायां जयन्त्यां केशवस्रजि' इति यादवः. २. साधारणीं सामान्यवनिताम्. ३. देवस्य प्रकरणात् तवेत्यर्थः.

कम्बु ग्रीवामिमां नाथ! कथं नु कथयामहे ।
लक्ष्मीकङ्कणमुद्राभिर्या त्रिरेखास्थितिं जहौ[1] ॥ २६ ॥

कर्णपाशाविमौ देव! स्फुरन्मकरकुण्डलौ ।
अवशाद्यत्प्रवेशान्धा मृगा मृगदृशां दृशः ॥ २७ ॥

तौ कपोलाविमौ देव! यावुद्वीक्ष्य रमाभुवौ ।
मन्ये नान्यावमन्येतां मङ्गल्यमणिदर्पणौ[2] ॥ २८ ॥

अधरं देव! बिम्बोष्ठममृतं भुवनोत्तरम्[3] ।
आहुर्विपर्ययेणात्र[4] प्रमाणं प्राणवल्लभे ॥ २९ ॥

तवाधरसुधा सेयं यां निपीय पयोधिजा ।
ततः प्रभृति वै देव! सुधान्तरमुपेक्षते ॥ ३० ॥

दन्तपङ्क्तिरियं देव! दशनच्छदरञ्जिता ।
मुखेन्दुकान्तेराधत्ते मुक्तावलिपरिष्क्रियाम् ॥ ३१ ॥

देव! त्वन्नासिकावज्रकुसुमं प्राप्य मन्मथः ।
कुसुमान्तरसम्पत्तिं मन्यते पङ्क्तिपूरणम् ॥ ३२ ॥

अनयोः पुण्डरीकाक्ष! नेत्रयोः पुण्डरीकयोः ।
मुखेन्दुः कान्तिसरसी मूलभूमिस्तु चिन्त्यताम्[5] ॥ ३३ ॥

देव! क्रीडाकटाक्षाय भूयो बद्धोऽयमञ्जलिः ।
कामं न केवलं लक्ष्म्या यो दुग्धे जगतामपि ॥ ३४ ॥

तदेतद् वदनं देव! माधुर्यमिव मूर्त्तिमत् ।
वीक्ष्य सेवा[6]च्छलारूढनासाग्राङ्गुलि यज्जगत् ॥ ३५ ॥

---

१. कम्बुना त्रिरेखेण भाव्यं, न तु त्रिरेखाहीनेन । 'त्रयी तु कम्बुः शङ्खोऽस्त्री सुग्रीवो मधुरस्वनः । त्रिरेखः षोडशावर्तः' इति वैजयन्ती. २. अन्यौ वास्तवौ. ३. भुवनोत्तरत्वादुत्तर शति हि बिम्बोष्ठो वक्तव्यः, न त्वधर इति. ४. विरोधिन इन्दोरुत्पत्तिस्थानत्वमद्भुतामिति भावः. ५. सेवायाः सेवाकालिकाञ्जलेश्छलाद्याजाद् वस्तुतो विस्मयादित्यर्थः आरूढनासाग्रा अङ्गुलयो यस्य तत्.

यत्र स्वयंवरे स्पर्धा लक्ष्मीकान्त्योः किलाभवत्।
वेदाश्च केलिजल्पाश्च सौभ्रात्रं यत्र बिभ्रते ॥ ३६ ॥
(युग्मकम्)

पद्मचन्द्रमधुज्योत्स्नाविवादान्ध्येष्वनादिषु।
देव! त्वद्वक्त्रबिम्बस्य स्मितस्य च किमुच्यताम् ॥ ३७ ॥

कस्तूरीतिलकामोदे ललाटे भ्रमरैर्वृते।
देव! त्वद्भ्रूलताभृङ्गचमूः पाति मुखाम्बुजम् ॥ ३८ ॥

अष्टमीन्दुनिभस्यास्य ललाटाष्टापदस्य ते।
यौवराज्यपदं देव! मुखेन्दुरनुमन्यताम् ॥ ३९ ॥

नाथ! धम्मिल्लभारेऽस्मिन् नानासौरभनिर्भरे।
भृङ्गैर्लक्ष्मीकटाक्षाणां जृम्भतेऽतिमृधं मुधा ॥ ४० ॥

नाथ! त्वामेव मन्येऽहमचलं भुवनोन्नतम्।
अनुल्लङ्घ्येव यन्मौलिं छेलादर्कोऽपि सेवते[2] ॥ ४१ ॥

देव! त्वद्भक्तिरथवा त्वत्तोऽपि द्विगुणोन्नता।
जितस्त्वमसि यद्राजा प्रह्लादेन रणेऽपि हि ॥ ४२ ॥

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ४३ ॥

तदिदं त्वद्वपुर्देव! नीलं निर्वृतिमन्मयम्।
कान्तिभूषाशताभोगकर्बुरं भातु मे मुहुः ॥ ४४ ॥

---

१. पद्मचन्द्रयोर्मधुज्योत्स्नयोश्चोत्कर्षाप्रतिष्ठानान्न किमपि वक्तुमर्हमुपानतये-ति भावः। २. नेत्रस्थानावस्थानव्याजादित्यर्थः। सेवनं च मौल्यनुल्लङ्घनपूर्वमि-होत्प्रेक्ष्यम्.

तत्त्वं परं किमपि यत् स्वरसावभासि
सान्द्रप्रमोदलहरीभरिताखिलाशम् ।
कैवल्यविग्रहमिदं तदनुग्रहार्थ-
मस्मादृशां जयति तादृगुपात्तमूर्त्ति ॥ ४५ ॥

अनुभवतममुं भृशं दृशावभिनवकौस्तुभमालयानया ।
भुवनविभुमभूतपूर्वया पुलकपरम्परया च भूषितम् ॥ ४६ ॥

श्रीकृष्णकेलिशुकवाङ्मयवीचिमाला-
लीलारसज्ञ(मकर)श्रवणाञ्चलस्य ।
देवस्य दिव्यहृदये हृदयङ्गमेयं
कण्ठस्थले च सुकृतां सुचिराय जीयात् ॥ ४७ ॥

इति श्रीकृष्णलीलाशुकमुनिविरचिता
सप्तचत्वारिंशत्संख्या
अभिनवकौस्तुभमाला
समाप्ता ।



१. अभिनवेति स्तुत्यर्थे नूतनार्थे च.

॥ श्रीः ॥

श्रीकृष्णलीलाशुकमुनिप्रणीतो

दक्षिणामूर्त्तिस्तवः ।

दुर्वारगर्वभरदूरविजृम्भमाण-
मोहान्धकारपरिपाटनबद्धदीक्षः ।
शश्वद् भृशप्रविसरत्सहजप्रकाश-
कोशः प्रभुर्जयति कोऽपि वटस्थलीशः ॥ १ ॥

अग्नीन्दुभानुभिरशेषजगत्प्रकाशै-
रासादितं नयनभावमवेक्ष्य वेदाः ।
यद् वेदयन्ति महसां तमसां च दूरं
तद् दैवतं वटतटीदयितं भजामः ॥ २ ॥

कल्पद्रुमैरलममीभिरनीश्वराणा-
माराधनीयपदवीमधिगम्य रम्यैः ।
तेऽमी वयं परिवृतं परमेश्वरेण
तं वा वटं तमपि वा विभुमाश्रयामः ॥ ३ ॥

षड्वर्गदुर्गपरिलङ्घनकोपितेन
चित्तेन यत्र सुचिरं चपला मुनीन्द्राः ।
तच्छाम्भवं मधुरिमैकरसोर्मि धाम
श्रीमद्वटाश्रयमुपाश्रयितुं यतध्वम् ॥ ४ ॥

नृत्यन्ति याच्छिरसि नाकनदीप्रवाहा-
स्तद्भ्रातरश्च रसने वचसां प्रपञ्चाः ।
चित्ते दया चरणरेणुषु वाञ्छितार्थाः
पायादयं वटतटीदयितो विभुर्वः ॥ ५ ॥

इन्द्रादयो यदरुणाङ्घ्रिरजःकणेन
राज्यश्रियं त्रिभुवनैर्भृशमुद्वहन्ति ।
व्याघ्रत्वचा परिहितस्य हि तस्य भिक्षो-
र्व्याख्याश्रियं वटतटावसथस्य वन्दे ॥ ६ ॥

आम्नायवीचिसहचारिवचःप्रसारै-
रासारसारसरणीमाधिरोहमाणैः ।
आसिच्य मानसमनन्यधियां मुनीना-
माद्यं वटं च विहरन् गिरिशोऽवताद् वः ॥ ७ ॥

मन्दस्मितेन च मनोहरमुद्रया च
व्याख्यानवीथिविभवैश्च विजृम्भमाणैः ।
आख्यायमाननिजतत्त्वरसानुभूति-
र्विश्वेश्वरो वटतटप्रकटोऽवताद्वः ॥ ८ ॥

ऊर्ध्वं दिवो भवमधश्च भुवो भवन्तं
तिर्यक् च पर्यवसिते भववैभवं तम् ।
गाढं कयापि कृपया वटवृक्षमूले
मन्मानसे च विहरन्तमनन्तमीडे ॥ ९ ॥

रक्ताङ्गुलीयुगळनर्त्तितचारुमुद्रं
संसारवृक्षपरितक्षपरश्वधाढ्यम् ।

क्रीडागृहीतमृगलाञ्छनलाञ्छिताग्रं
हस्तेन जानुनिहितेन जगन्मनोज्ञम् ॥ १० ॥

तत्तत्फणामणिविभूषणभासुरेण
भाग्याधिकेन फणिना कृतयोगपट्टम् ।
वामेतराङ्घ्रितलकान्तिकरम्बितेन
वामोरुणा गिरिसुताहृदयं हरन्तम् ॥ ११ ॥

इन्दोः कलां खलु जटापटले वहन्तं
सर्वाः कला वचनवीथिषु चारयन्तम् ।
देव्या वृतं गिरिजया मुनिभिः शुकाद्यै-
स्तं विश्वतो विशदमादिगुरुं प्रपद्ये ॥ १२ ॥
(विशेषकम्)

त्रिभुवनसुभगेयं दक्षिणामूर्त्तिमूर्त्तौ
भगवति कृतभावा कृष्णलीलाशुकीया ।
जयतु जयतु देवी भारती जीवलोक-
श्रवणहृदयजिह्वाजन्म साफल्यमेतु ॥ १३ ॥

इति श्रीकृष्णलीलाशुकमुनिविरचितो
दक्षिणामूर्त्तिस्तवः
समाप्तः ॥

THE TRIVANDRUM SANSKRIT SERIES.

No. I.

THE

DAIVA

OF

DEVA

WITH THE COMMENTARY

PURUSHAKÂRA

OF

KRISHNALÎLÂSUKAMUNI

Edited with Notes

BY

T. GANAPATI ŚÂSTRÎ

Principal, His Highness the Maharajah's Sanskrit College, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.

1905.

(All Rights Reserved.)

॥ श्रीः ॥

अनन्तशयनसंस्कृतग्रन्थावलिः.

ग्रन्थाङ्कः १.

दैवं

देवप्रणीतं

श्रीकृष्णलीलाशुकमुनिना

विरचितया

पुरुषकार-

समाख्यया व्याख्यया समेतं

अनन्तशयनस्थराजकीयसंस्कृतविद्यामन्दिराध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितं

लघुटिप्पण्या च संयोजितम् ।

तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०८०, क्रैस्ताब्दाः १९०५.

INTRODUCTION.

It was announced in my preface to Bhaktimanjari published last year, that the publication of the ancient Sanskrit works in the Palace Library has been undertaken under command of His Highness The Maharajah. The present publication marks the beginning of the work; and as No. I. of "The Trivandrum Sanskrit Series" is now given to the public, a grammatical work, Daiva (दैव), with its commentary, Purushakara (पुरुषकार).

Daiva has been so called from the name of its author Deva (देव). The Dhatuvrittis (धातुवृत्ति), and other works of Maitreyarakshita (मैत्रेयरक्षित), Kshiraswamin (क्षीरस्वामी), Dhanapala (धनपाल), Sakatayana (शाकटायन) etc. have contributed to the composition of Daiva; and of these, the opinion of Maitreyarakshita has been mostly †followed. The subject matter of the work is the purpose (फल) of the repetition of those roots of *like* form, which in Panini's Dhatupatha (धातुपाठ), after being once enumerated, are again mentioned in the same or a different conjugation (विकरण). This is in many places shown by taking the root, its meaning, and its conjugation, singly or all together, or only two of them when that alone is possible, and merely pointing out the difference of form in the present (लट्), potential (लिङ्), or imperfect tense (लङ्). In a few other places, the peculiarity is explained in words; thus:—

'स्वरभेदाद् द्विरुच्यते' (Sloka 55).
'इटा भिदा' (Sloka 116).

In this work, not merely the roots which are identical in form, like भू (to be) and भू (to obtain), have been taken by the author as like roots, but also those which, though differing somewhat, are yet in the main similar in form, such as अकि अङ्कि, निद नेद, etc. These roots, however, have not been all dealt with. It appears to have been the object of the author, that

† See page 96.

from the explanation given of the greater number of them, the rest are easily to be understood. He says also

'सरूपा धातवः केचिदनुक्ता अपि सन्ति चेत् ।
सन्तूक्तास्तेऽपि चात्रोक्ता न दुष्यन्त्यन्यसम्भवे ॥' (Sl. 200).

The roots are arranged as far as possible alphabetically in the order of their endings. But as an exception, the root भू, with which Dhatupatha (धातुपाठ) begins, has been explained at the very commencement of this work also, as it denotes *satta* (सत्ता) which is Brahman, and is also expressive of auspiciousness. Metrical form has been adopted in the composition of this work to facilitate scholars in retaining the subject-matter in memory. The stanzas in this work number 200, if the *commentary is followed and the benedictory stanza included. No new technical expressions have been employed in this work except those already in vogue in Grammar. What is seen at the end of the work, viz.

'चुरादिश्चुर्युजादिर्युः स यस्माण्णिज्विभाषितः' (Sl. 199.)

cannot be taken as new Paribhasha (परिभाषा), since the instances given are merely cases of Lakshana (लक्षणा) conveying the meaning of a whole expression by a part of it, as नप being used to denote नपुंसक. The commentator also explains that it was to indicate the unimportance of this apparent Paribhasha, that it has not been placed at the beginning of the work.

Purushakara, the commentary, is a work of Krishnalilasuka (कृष्णलीलाशुक). Suitably to the title of the original work, Daiva, the commentary is named Purushakara so as to imply, as it were, that just as Daiva alone, which is another name for Destiny (भाग्य), cannot bring one to the destined fruits without one's own exertions (पुरुषकार), so the understanding of the original work, Daiva, cannot be clear without the commentary. By a complete exposition of the full meaning intended wherever it is likely to be wished for, and presentation at

* The commentary mentions also the other view that the mangala sloka is not to be included in the work (p. 8.)

length of arguments serving to set at rest controversial points regarding †roots, §their forms, $meanings etc., Purushakara clearly impresses on the mind the sense of the original, Daiva. The latter is so terse, looking almost like a sutra, that the commentator has described Purushakara as a Varttika (वार्त्तिक) of Daiva.

'||उक्ता *नुक्त ‡दुरुक्तानि स्थाने स्थाने विविञ्चता ।
कृष्णलीलाशुकेनेदं कीर्तितं दैववार्त्तिकम्' (P. 127).

The manner and style of this commentary which, in barely sufficient and simple words conveys deep meaning, render-it impossible not to state that Purushakara has nearly approached Kaiyata's work. The commentator's gloss on the first stanza of Daiva shows clearly his mastery in the Vedanta Philosophy.

Purushakara is cited in many instances as an authority in his Dhatuvritti by ¶Sayanacharya (सायणाचार्य), who is himself a great authority, and Daiva also in a few places; e. g.—

" 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' अत्र कैयट-पुरुषकार-मैत्रेयादिषु तृतीयो न पठ्यते"

" 'लाज लाजि भर्त्सने च' भर्त्सनग्रहणं भर्जनस्याप्युपलक्षणमिति पुरुषकारः"

" 'इट किट कटी गतौ' .... अयं पक्षः समर्थितः पुरुषकारे .... —'अन्ये पुनरुभावपि न पठन्ति । व्यक्तं चैतद् धनपालशाकटायनवृत्त्योः । अपि च । शोटृ गर्व इत्यादिकान् कांश्चित् धातून् पठित्वा .... उदयतीत्यादि चैवमसाध्वेवास्तु' इति"

thus in many places, and

" 'श्रम्भु प्रमादे' .... दैवेऽप्येवमेवोक्तम्".

There are also a few instances in which Sayana has extracted passages of Purushakara without mentioning the source, e. g.—

† See p. 37. § See p. 23. $ See p. 65. | See p. 29 for instance. * See p. 23 for instance. ‡ See p. 12, 13, 28 and a few others elsewhere. ¶ By Bhattoji Dikshita also in प्रौढमनोरमा, and by Naraya Batta in प्रक्रियासर्वस्व.

"नट नृत्तौ .... 'यत्कारिषु नटव्यपदेशः। नं तु मार्गदेशी-शब्दाभ्यां प्रसिद्धं नृत्तं नृत्यं च, यत्कारिषु नर्तकव्यपदेशः। तत्र वाक्यार्थाभिनयो नाट्यं, पदार्थाभिनयस्तु नृत्यम्। अभिनयशून्यः पुनः शास्त्रोक्तभङ्ग्या स्वगात्रविक्षेपो नृत्तमिति तद्विदः। नैघण्टुकानां तु 'ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम्' इत्यभेदव्यवहारो निरूढलक्षणया नेयः' "

Disagreement from Purushakara is also found in Sayana's work; viz., his remark

"एवञ्च पुरुषकारादिषु अतिट्टिषत इति तकारस्य शेषेणोदाहरणप्रदर्शनं चिन्त्यम्"

about the form अतिट्टिषते, which is according to one view *admitted in Purushakara as a form from the root अट. But as such differences of opinion among authors are only common, and as the few contradictions raised can be met, Purushakara deserves to be regarded by grammarians as an authority faultless in every way.

In that portion of Sayana's Pratyayantadhatuvritti (प्रत्ययान्तधातुवृत्ति) where he deals with the form (बहून् बहुं वाचष्टे) भावयति is found the following statement :—

"यदुक्तं पुरुषकारे बहयतीत्युदाहृत्य —'इष्ठनि यत्फिषः कार्यं, तण्णावप्यतिदिश्यते। न चेष्ठनि यिट् फिषो भूभावश्च, भुवो यिट्सन्नियोगाशिष्टत्वात्। तेन न्यासे तु भावयतीति चिन्त्या प्राप्तिः' इति".

But the quotation is not found in Purushakara; and it is not probable that it existed in the missing leaf mentioned § later on, as the context does not require reference to Subdhatu (सुब्धातु) at that place, and as no instances are seen where the commentator has introduced other topics than those immediately relevent to the subject dealt with in Daiva. It would appear therefore that there is another work of the same name,

*See p. 63. § See p. 6 Introduction.

Purushakara, treating about Subdhatu (सुब्धातु). The commentator's name is found at the close of two other works in the Palace Library, namely Abhinavakaustubhamala (अभिनव कौस्तुभमाला), and Dakshinamurtistava (दक्षिणामूर्तिस्तव).

" श्रीकृष्ण *केलिशुकवाङ्मयवीचिमाला-
लीलारसज्ञ(मकर)श्रवणाञ्चलस्य ।
देवस्य दिव्यहृदये हृदयङ्गमेयं
कण्ठस्थले च सुकृतां सुचिराय जीयात् ॥"

" त्रिभुवनसुभगेयं दक्षिणामूर्तिमूर्त्तौ
भगवति कृतभावा कृष्णलीलाशुकीया ।
जयतु जयतु देवी भारती जीवलोक-
श्रवणहृदयजिह्वाजन्म साफल्यमेतु ॥".

That the author of our Purushakara was a devotee of Sri-Krishna (श्रीकृष्ण) is clearly seen from its commencing and concluding stanzas; and his devotion to Dakshinamurti accords well with his reputation as a §sage (मुनि). From these and the depths of thought found in these two works, it can be inferred that Krishnalilasuka mentioned as the author of these works is none other than the author of Purushakara. Probably the commentator acquired the name of Krishnalilasuka on account of the devotion to Sri Krishna and excellence in sweetness of diction found together in him.

As regards Deva, no other work of his is known.

When exactly Deva or Krishnalilasuka lived, it is not possible to determine. It is plainly seen, however, that their time was anterior to that of Sayanacharya, whose date is known as the middle of the fourteenth century A. D.

As our commentator makes reference to Hemachandra (हेमचन्द्र) who lived in the middle of the twelfth century, it follows that he should have lived at some time in the interval between the end of the twelfth and the beginning of the fourteenth centuries.

---

*केळि the synonym for लीला is used for the sake of metre. §The original manuscripts of the three works conclude 'इति श्रीकृष्णलीलाशुकमुनि ... ...'

Krishnalilasuka's date may therefore be taken roughly as the thirteenth century A. D.

As regard Deva the *anxiety frequently displayed by the commentator in Purushakara to explain Daiva so as to be in conformity with Kshiraswamin, leads naturally to the inference that Deva should have lived posterior to Kshiraswamin referred to. Now it is extremely probable that Kshiraswamin is the same as the Vyakarana (व्याकरण) tutor, Kshira, of king Jayapida (जयापीड) of 751 A. D., who revived the study of Mahabhashya (महाभाष्य) and is described in Rajatarangini †(राजतरङ्गिणी).

'देशान्तरादागमय्य व्याचक्षाणः क्षमापतेः ।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥
क्षीराभिधाच्छब्दविद्योपाध्यायात् सम्भृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥'

Hence the date of our author, Deva, may be fixed as between the ninth and twelfth centuries A. D.

At the end of Purushakara and after the stanza:—

'कृष्णलीलाशुकस्येयं कृतिः कृतिमनोहरा ।
पुष्णती कृष्णसम्प्रीतिं भुवनान्यभिपुष्यतु ॥'

there is found another benedictory stanza (मङ्गलाशंसाश्लोकः):—

'काञ्चीति काञ्चन पुरीं प्रथिताद्भुतश्रीः
काभिश्चिदुत्सवविभूतिपरम्पराभिः ।
चेतःस्थितिं च जगतामधिवासयन् वो
++++++++ विजयाय भूयात् ॥'

If this latter is to be taken as having been composed by Krishnalilasuka himself, it may also be surmised that Conjivaram (काञ्चीपुर) was his place of residence. $

The original palmleaf manuscripts of Daiva and Purushakara existing in the Palace Library are these —

*See p. 43. See 4th Taranga, stanzas 488 and 489 Vol. I. Nirnayasagara Press Edition. $ In p. 12 of Purushakara, we have 'बली पुरुषकारो हि दैवमप्यतिवर्तते' which is also found in Chap. I. Sarirasthana (शारीरस्थान) Ashtangahridaya (अष्टाङ्गहृदय).

§(a)	Daiva		(in Malayalam characters)
†(b)	Do.		Do.
*(c)	Purushakara	(with Daiva)	Do.
$(d)	Do	(incomplete)	Do.

In manuscript No. (c) above mentioned, the94th leaf is missing. But as thereby only 360 letters could have been lost at the most, and as, after much enquiry, no other copy of Purushakara, not even a portion of it, could be procured, I had to content myself with the very nearly complete manuscript. From these four manuscripts, and consulting Sayana's Dhatuvritti and other treatises, I have edited this work. I have also added a few foo notes to bring out the meaning of Purushakara here and there.

Trivandrum,
13th July 1905.

T. GANAPATI SASTRI.

§ This is correct, 200 years old and contains 19 leaves of 15 lines each, and 31 letters in each line. † This is generally correct, 100 years old, contains 14 leaves of 18 lines each, and 24 letters in each line. * This is mostly correct, 200 years old, contains 102 leaves, of 16 lines each and 23 letters in each line. $ This is correct, 100 years old, contains 31 leaves of 24 lines each, and 34 letters in each line.

॥ श्रीः ॥

निवेदना ।

एष समारम्भस्तस्य व्यापारस्य, योऽत्रत्यराजकीयग्रन्थशालास्थितानां प्राचीनग्रन्थानां मुद्रणेन प्रकाशनं नाम महामहिम्ना श्रीमूलकरामवर्मवञ्चिमहाराजेन सदयमाज्ञप्त इति **भक्तिमञ्जर्याः** परुत्प्रकाशिताया उपोद्घाते न्यवेदयम् । एतस्याम् **'अनन्तशयनसंस्कृतग्रन्थावलौ'** दैवनामा व्याकरणग्रन्थः **पुरुषकार**ाख्यया व्याख्यया सनाथः प्राथम्येन प्रकाशयितुमयमुपात्तः ॥

दैव[1]मिति कर्तृसंम्बन्धनिबन्धनेयं समाख्या **देवेन** तन्नाम्ना विदुषा कृतं प्रकरणमित्यर्थात् । अस्य ग्रन्थस्याकरो **मैत्रेयरक्षित-क्षीरस्वामि-धनपाल-शाकटायना**दिप्रणीता धातुवृत्त्यादिग्रन्थाः । तत्राप्यनेन **मैत्रेयरक्षित**मतमेव प्रायशोऽनुगम्यते[2]। पाणिनीयधातुपाठे सकृत् पठितानां धातूनां ये पुनःपाठा एकस्मिन् विकरणे विकरणान्तरे वा दृश्यन्ते, तेषां फलं — तच्चार्थात् सारूप्येण पठितानां धातूनां फलम् अस्य ग्रन्थस्य विषयः । फलञ्च धातु-तदर्थ-विकरणानि व्यस्तानि समस्तानि यथासम्भवं मिलितानि चोपादाय लटा लिङा लङा वा रूपभेदनिर्देशमात्रात् प्रायः सूच्यते । क्वचित्क्वचित्तु फलविशेषो वचनेन प्रकाश्यते यथा —

"स्वरभेदाद्विरुच्यते" (९३पृ. ९५श्लो.)
"इटा भिदा" (८६पृ. ११६ श्लो.)

इत्यादौ । न केवलं 'भू सत्तायां' 'भू प्राप्तौ' इत्यभिन्नाकारतया पठिता एव सरूपाः, किन्तु अंशतो भेदेऽपि ये सदृशाः अकि-अङ्कि, निद-नेदप्रभृतयः, तेऽपि सरूपा इह गृहीताः । सरूपाश्च धातवो यद्यप्यत्र सर्वे न विवृताः, तथापि भूयसां विवरणाच्छिष्यमाणाः सुग्रहा इति ग्रन्थकर्तुराभिसन्धिः । आह च —

'सरूपा धातवः केचिदनुक्ता अपि सन्ति चेत् ।
सन्तूक्तास्तेऽपि चात्रोक्ता न दुष्यन्त्यन्यसम्भवे ॥' (२००.श्लो.)

इति । धातवश्च यथासम्भवं मातृकाक्रममन्त्यवर्णविषयमाश्रित्य दर्शिताः । किन्तु भूधातुः परं धातुपाठे प्रथमः सत्ताख्यब्रह्मवाचितया माङ्गलिकश्चेति कृत्वा प्रथमं व्युत्पादितः । व्युत्पित्सूनां च विषयधारणसौकर्याय ग्रन्थेऽस्मिन् पद्यबन्ध आदृतः;

१. देवशब्दात् 'कृते ग्रन्थे' (४-३-११६) इत्यणप्रत्यये दैवामिति रूपम्. २. एतास्तु धातुवृत्तयो न लब्धाः. ३. ८. पृष्ठे द्रष्टव्यम् .

श्लोकाश्च [1]व्याख्यानुसारान्मङ्गलश्लोकेन सहिताः २०० भवन्ति । वैयाकरणसमय-सिद्धशब्दातिरेकेणापूर्वः शब्दो न कश्चिदिह व्यवहाराय परिभाषितः । यत् पुनः

[2]'चुरादिश्चुर्युजादिर्युः स यस्माण्णिञ्चिभाषितः ।' (१९९ श्लो.)

इति ग्रन्थान्ते दृश्यते, तदपि नपुंसकस्य नप्शब्दव्यवहारवच्छब्दैकदेशलक्षणयैव सिद्धत्वान्न परिभाषणसाध्यम् । अत एवानावश्यकत्वद्योतनाय ग्रन्थादौ तन्न निवेशितमिति **पुरुषकारः** ॥

पुरुषकारः कृष्णलीलाशुकेन प्रणीतः । **पुरुषकार** इति च **दैव**संज्ञानुगुण्यात् कृतं नामधेयं, यथा भाग्यापरपर्यायं दैवं पुरुषकारेण विना न प्रसन्नं भवति, तथैव विनानेन व्याख्यानेन मूलमिति ध्वनयितुम् । **पुरुषकारो** हि आकाङ्क्षितार्थजातपूरणेन [3]धातु[4]धात्वाकार[5]धात्वर्थादिषु विप्रवादविषयेषु निर्णायक-प्रमाणयुक्त्युपन्यसनेन च मूलार्थं बुद्धौ प्रतिष्ठापयति । **दैव**स्य चैनं सारवत्तया सूत्रदेश्यस्य वार्त्तिकं ग्रन्थकारो व्यपदिष्टवान् —

[6]'उक्तानुक्त[7]दुरुक्तानि स्थानेस्थाने विविञ्चता ।
कृष्णलीलाशुकेनेदं कीर्त्तितं दैववार्त्तिकम् ॥' (१२७पृ.)

इति । प्रसन्नपरिमिताक्षरैर्वाक्यैर्गम्भीरार्थाविष्कारे यो भङ्गिविशेषः, तेन **पुरुषकार**: **कैयट**कृतेरदूरविप्रकृष्ट इति न शक्यं न वदितुम् । किञ्चायं दैवाद्यपद्यविवरणेन कर्तुर्वेदान्तविद्यानैपुण्यं भणता ब्रह्मसूत्रभाष्यभामतीछायामनुविधत्ते ॥

इमं प्रामाणिकमूर्धन्यः **सायणाचार्यो माधवीयधातुवृत्तौ** बहुषु प्रघट्टकेषु प्रमाणयति **दैवं** च क्वचित्क्वचित् । यथा —

"'कुर्द खुर्द गुर्द गुद क्रीडायामेव' अत्र **कैयटपुरुषकारमैत्रेया**दिषु तृतीयो न पठ्यते"

"'लाजृ लजि भर्त्सने च' भर्त्सनग्रहणं भर्जनस्याप्युपलक्षणमिति **पुरुषकारः**"

"'इट किट कटी गतौ' ....अयं पक्षः समर्थितः **पुरुषकारे**.... —'अन्ये पुनरुभावपि न पठन्ति । व्यक्तञ्चैतद् **धनपालशाकटायनवृत्त्योः** । अपि च शौट्टगर्व इत्यादिकान् कांश्चि-

---

१- व्याख्यायां मङ्गलश्लोकस्यापाठपक्षोऽप्युक्तः ८. पृष्ठे. २. ३७. पृष्ठे द्रष्टव्यम् । ३. २३. पृष्ठे द्रष्टव्यम् . ४. ६५. पृष्ठे द्रष्टव्यम् . ५. उक्तचिन्तनं २९. पृष्ठे द्रष्टव्यम्; प्रायः सर्वत्र च. ६. अनुक्तचिन्तनं २३. पृष्ठे द्रष्टव्यम्, अन्यत्र च. ७. दुरुक्तचिन्तनं १२, १३, २८. पृष्ठेषु द्रष्टव्यम्, अन्यत्र च क्वचित्.

धातून् पठित्वा .... उदयतीत्यादि चैवमसाध्वेवास्तु' इति"

एवं बहुत्र ।

"'श्रम्भु प्रमादे' .... दैवेप्येवमेवोक्तम्"

इति । क्वचित्क्वचित्तु पुरुषकारनामाग्रहणेन **पुरुषकार**वाक्यं **सायणेनोपन्यस्तमुपलभ्यते । यथा—**

"'नट नृत्तौ' .... 'यत्कारिषु नटव्यपदेशः । न तु मार्गदेशीशब्दाभ्यां प्रसिद्धं नृत्तं नृत्यं च, यत्कारिषु नर्त्तकव्यपदेशः । तत्र वाक्यार्थाभिनयो नाट्यं; पदार्थाभिनयस्तु नृत्यम्; अभिनयशून्यः पुनः शास्त्रोक्तभङ्ग्या स्वगात्रविक्षेपो नृत्तमिति तद्विदः । नैघण्टुकानां तु 'ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्त्तनम्' इत्यभेदव्यवहारो निरूढलक्षणया नेयः' "

अट्टधातौ पक्षविशेषाश्रयेण पुरुषकारेऽभ्युपगतम् अतिट्टिषत इति रूपं प्रति

"एवं च पुरुषकारादिषु अतिट्टिषत इति तकारस्य शेषेणोदाहरणप्रदर्शनं चिन्त्यम्"

इत्ययं सायणस्य विसंवादोऽन्यश्चैवञ्जातीयकोऽत्यल्प उपलभ्यते । किन्त्वसौ **ग्रन्थमात्रसाधारणः सुवचप्रतीकारश्चेति सर्वथानवद्यं माननीयं प्रमाणं वैयाकरणानां पुरुषकारः ॥**

प्रत्ययान्तधातुवृत्तौ सायणीयायां बहून् बहुं वाचष्टे भावयतीति प्रक्रमे

"यदुक्तं **पुरुषकारे** बहयतीत्युदाहृत्य—'इष्ठनि यत् फिषः कार्यं, तण्णावप्यतिदिश्यते । न चेष्ठनि यिट् फिषो भूभावश्च, भुवो यिट्सान्नियोगाशिष्टत्वात् । तेन **न्यासे** तु भावयतीति चिन्त्या प्राप्तिः' इति"

इति दर्शनादन्योऽपि पुरुषकारः सुब्धातुविवरणपरोऽस्तीति गम्यते । मुद्रिते हि **पुरुषकारे** नास्ति **सायणो**दाहृतं वाक्यं, न च लुप्तत्वेन वक्ष्यमाणे पत्रे संभावयितुं शक्यम् अप्रकृतार्थत्वात्, लुप्तपत्रव्याख्यानविषयभूते श्लोके नामधातोरप्रस्तावात्, मूलोक्तवस्तुविजातीयवस्तुनः **पुरुषकारे** क्वचिदपि प्रसक्तानुप्रसक्त्यानुल्लेखात् ।

१. घटादिज्ञाधातौ दिवादिक्षमधातौ आधृषीयशिषधातौ च देवः स्मृतः प्रौढमनोरमायां, भ्वादिशेषधातौ च पुरुषकारः. प्रक्रियासर्वस्वे च नारायणीये स्मृतोऽयं. २. ६३. पृष्ठे द्रष्टव्यम्.

किन्त्वसौ नोपलभ्यते । अत्रत्यराजकीयपुस्तकशालास्थयोः **अभिनवकौस्तुभमाला**दक्षिणामूर्त्तिस्तवाभिधानयोर्ग्रन्थयोरन्ते

"श्रीकृष्णकेळिशुकवाङ्मयवीचिमालालीलारसज्ञ(मकर)श्रवणाञ्चलस्य ।
देवस्य दिव्यहृदये हृदयङ्गमेयं कण्ठस्थले च सुकृतां सुचिराय जीयात् ॥"
"त्रिभुवनसुभगेयं दाक्षिणामूर्त्तिमूर्त्तौ भगवति कृतभावा कृष्णलीलाशुकीया ।
जयतुजयतु देवी भारती जीवलोकश्रवणहृदयजिह्वाजन्म साफल्यमेतु ॥"

इति ग्रन्थकर्तृनामोपलभ्यते । एतद्ग्रन्थगाम्भीर्यस्य कृष्णभक्तेश्च पर्यालोचनयायं **कृष्णलीलाशुकः पुरुषकार**कर्तुरभिन्न इति शक्यमूहितुं, यस्मात् **पुरुषकार**कर्तापाद्यन्तश्लोकाभ्यां कृष्णभक्त इति स्पष्टं गम्यते; दाक्षिणामूर्त्तिभक्तिश्चास्य मुनिप्रथाया आनुगुण्यं धत्ते । रमणीयभणितिनैपुण्यसहचरं कृष्णभक्तत्वमेवोपाधिमाश्रित्य कदाचिदनेन **कृष्णलीलाशुक** इति नामधेयमागन्तुकमधिगतं स्यात् । **देवस्य तु** नान्या कृतिरवगम्यते ॥

देव-कृष्णलीलाशुकयोः समयस्य पुनर्न निर्णयः । अथापि **सायणाचार्यात्** तौ प्राचीनाविति सामान्यतोऽवधारितमेव । **सायणाचार्यश्च** क्रैस्ताब्दीयस्य चतुर्दशशतकस्य मध्ये स्थितः । **पुरुषकारे क्षीरस्वामिना** सह **दैवं** संवादयितुमसकृत् संरम्भस्य दर्शनाद् **देवः क्षीरस्वाम्यपेक्षयार्वाचीन** इत्यप्यवगतम् । **क्षीरस्वामी**चायं

"देशान्तरादागमय्य व्याचक्षाणः क्षमापतिः ।
प्रावर्त्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥
क्षीराभिधाच्छब्दविद्योपाध्यायात् सम्भृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥"

इति **राजतरङ्गिण्यां** प्रतिपादितो महाभाष्योज्जीवयितुः ७११ तमक्रैस्ताब्दस्थितस्य **जयापीड**भूपतेर्व्याकरणोपाध्यायो यः **क्षीरः**, स एव सम्भाव्यते । **कृष्णलीलाशुकश्च** हेमचन्द्रं द्वादशशतकमध्यवर्तिनं स्मरंस्त्रयोदशशतक आसीदिति प्रतीयते । ततश्च **देवः** क्रैस्ताब्दीयस्य नवमशतकस्य द्वादशशतकस्य चान्तराले स्थित इति शक्यं कल्पयितुम् * । पुरुषकारस्यान्ते

---

१. केलिशब्दो लीलापर्यायो वृत्तानुगुण्याय प्रयुक्तः. २. समाप्तिवाक्यं त्रिष्वपि ग्रन्थेषु 'इति कृष्णलीलाशुकमुनि ... ...' इति दृश्यते. ३. ४३. पृष्ठे चकधातुर्दृश्यताम्. ४. 'निर्णयसागर'मुद्रिताया अस्याः प्रथमपुस्तकस्य चतुर्थतरङ्गे ४८८, ४८९. श्लोकाविमौ.
* १२. पृष्ठे 'बली पुरुषकारो हि दैवमप्यतिवर्तते' इत्यर्धं पुरुषकारस्थम् **अष्टाङ्गहृदये** शारीरस्थाने १. अध्याये ३८. श्लोकेऽप्यस्ति .

"कृष्णलीलाशुकस्येयं कृतिः कृतिमनोहरा ।
पुष्णती कृष्णसम्प्रीतिं भुवनान्यभिपुष्यतु ॥"

इति पद्यस्यानन्तरमेकं मङ्गलाशंसापद्यं लिखितमस्ति —

"काञ्चीति काञ्चन पुरीं प्रथिताद्भुतश्रीः
काभिश्चिदुत्सवविभूतिपरम्पराभिः ।
चेतःस्थितिं च जगतामधिवासयन् वो
++++++++ विजयाय भूयात् ॥"

इति । इदं **कृष्णलीलाशुकेनैव** विरचितमित्यभिमाने **काञ्ची**पुरमग्र्य वासस्थानमित्यपि काञ्चीस्मरणादुत्प्रेक्ष्यताम् ॥

राजकीयग्रन्थशालावर्त्तिनो **दैवपुरुषकारयो**रादर्शग्रन्था एते —

कं. दैवं (तालपत्रात्मकं केरलीयालिपि)
खं. दैवं ,,
गं. **पुरुषकारः** (दैवसहितः) ,,
घं. **पुरुषकारः**(१२० श्लोकानां) ,,

एषु ग पुस्तके ९४तमं पत्रं लुप्तम् । किन्तु तावता ३६० अक्षराणामेव लोपस्य सम्भावनात्, **पुरुषकार**प्रतिरूपान्तरस्यासमग्रस्यापि बहुशोऽन्विष्टस्यानुपलम्भाच्च समग्रकल्पे तस्मिन् समग्रसाधारणी तृप्तिरधिगन्तव्यासीत् । तदिदमादर्शचतुष्टयमाधारं कृत्वा **माधवीय**धातुवृत्त्यादिग्रन्थसाह्येनैतत्संशोधनमसाधयं; पुस्तकेऽस्मिन् **पुरुषकारस्य** क्वचित्क्वचिदाशयमभिव्यङ्क्तुं लघ्वीं कामपि टिप्पणीं च प्रतिपत्रमधस्तात् समयोजयम् ॥

अनन्तशयनम्.
३०-११-१०८०.

त. गणपतिशास्त्री.

---

१. अयं ग्रन्थः शुद्धो द्विशतवर्षदेश्यश्च । १९. पत्राणि । प्रतिपत्रं १५ पङ्क्तयः । प्रतिपङ्क्ति २१ अक्षराणि. २. अयं तु शुद्धाशुद्धः । १४. पत्राणि । प्रतिपत्रं १८ पङ्क्तयः । प्रतिपङ्क्ति २४ अक्षराणि. ३. अयं शुद्धप्रायः द्विशतवर्षदेशीयश्च । १०२. पत्राणि प्रतिपत्रं १६ पङ्क्तयः । प्रतिपङ्क्ति २३ अक्षराणि. ४. अयं शुद्ध उपशतवर्षदेशीयश्च । ३१ पत्राणि । प्रतिपत्रं २४ पङ्क्तयः । प्रतिपङ्क्ति ३४ अक्षराणि .

पुरुषकारे स्मृता ग्रन्थकर्तारः.

अमरसिंहः. १०२. पृष्ठे.

आर्याः. ४६, ७२, ७५, ९१, ११२.

कविकामधेनुकारः. ४५.

कैयटः. ११, ६८, ९४, १०९, १२५.

कौमाराः. १८, ३०, ७२, ८०, ९४, १००, १०२, १०६.

कौशिकः. १३, ७०, ७३.

क्षीरस्वामी. १२, १६, १८, १९, २०, २१, २२, २३, २४, २५, २६, २७, ३०, ३१, ३२, ३३, ३४, ३६, ३७, ३८, ३९, ४०, ४१, ४२, ४३, ४४, ४५, ४६, ४७, ४८, ४९, ५१, ५२, ५६, ५७, ५८, ६१, ६२, ६३, ६४, ६५, ६६, ६७, ६८, ६९, ७०, ७१, ७२, ७३, ७५, ७६, ७७, ७८, ८०, ८१, ८२, ८३, ८५, ८६, ८७, ८८, ९०, ९१, ९२, ९५, ९७, ९८, ९९, १००, १०१, १०४, १०८, ११०, १११, ११२, ११३, ११४, ११५, ११६, ११७, ११९, १२०, १२१, १२२.

गुप्तः. ७२, ९८.

गोविन्दस्वामी. (बहूवृचब्राह्मणभाष्यकारः) १२३.

चन्द्रः. २२, ३०, ३९, ४६, ४९, ५०, ५६, ५७, ६६, ७१, ७७, ८१, ८४, ८५, ८७, ११०, १११.

चन्द्रगोमी. ९, १८, २१.

चान्द्राः. ९०, ९४, १००, १०१, १२३.

जयादित्यः. ९२, ९४, १०१.

जिनेन्द्रः. (अयं पञ्चिकाकृत्) १६, ६५, ८०, १०१.

दण्डी. ८, १०६.

दुर्गः. २०, २४, ३७, ४१, ४७, ५०, ५६, ६५, ६९, ७०, ७२, ७३, ७७, ८३, ९८, १०७, १०८, ११०, १११ १२२.
दौर्गाः. ५६, ६८, ७७. ११६, १२०, १२२.
द्रमिडाः. ३६, ५१ ,७५, ९१, ११२.
धनपालः. १२, २६, ३०, ३२, ४०, ४१, ४३, ४४, ४५, ४६, ५०, ५१, ५६, ५८, ६२, ६३, ६८, ६९, ७०, ७१, ७२, ७५, ८४, ८५, ८६, ९१, ९२, ९८, ९९, १००, १०१, १०२, १०८, ११०, ११२, ११५, ११९, १२२, १२३.
धातुवृत्तिकाराः. ९, ३०, ५२.
नन्दी. ३६, ४१, ४२, ७१, ८२, ८८, ११२.
नान्दिस्वामी. ५१.
नैघण्टुकाः. ६६, ९१.
नैरुक्ताः. ३१, ९३.
न्यासकारः (कृत्) १९, ३३, ३८, ५५, ६३, ८३, ९५, १०१.
पतञ्जलिः, भाष्यकारः. ३, ३४, १२७.
पारायणिकाः. ९२, ९३.
पूर्णचन्द्रः. २४, २५, ४०.
भट्टिः. ९३, १०२, ११३.
भर्तृहरिः. १०, १०६.
भागवृत्तिकारः. ९४, ११०.
भाष्यटीकाकृतः. १०६.
भीमसेनः. ३०, ९५.
भोजदेवः, श्रीभोजः, परमेश्वरभोजः. ९, ३४, ८०, ९१, ९४, १००, १०६, १२७.
भोजीयाः. ९१, १००, १०२.
माघः. ६४, ११३.
भीमांसकाः. ९१.

मैत्रेयरक्षितः. ११, १३, १५, १६, १९, २०, २१, २२, २३, २४, २६, २७, २८, ३२, ३४, ३६, ३९, ४०, ४१, ४२, ४३, ४५, ४६, ४८, ४९, ५१, ५७, ५८, ६०, ६१ ६२, ६३, ६५, ६६, ६७, ६८, ६९, ७४, ७५, ७७ ७९, ८३, ८६, ८७, ९०, ९१, ९२, ९६, ९७, ९८ १००, १०३, १०४, १०६, १०९, ११३, ११४ ११५, ११६, ११७, ११९, १२०, १२१, १२३.

यादवप्रकाशः. १०, २७, २८, ४५, ५३.

वामनः (काव्यालङ्कारकर्ता) ११६.

वामनः (काशिकाकृत्) ५८, ११९.

वृत्तिकृत् (कारः) ८, ७५.

व्यासः २३, ९३.

शाकटायनः. (अयं पाणिनिस्मृताच्छाकटायनाद् भिन्नो जैनश्च) १२, १३, १५, १६, १७, १८, १९, २१, २६, २७, ३१, ३२, ३६, ४१, ४३, ४४, ४५, ४७, ४९, ५०, ५१, ५६, ५८, ६०, ६१, ६२, ६३, ६४, ६५, ६७, ६८, ६९, ७१, ७३, ७४, ७८, ७९, ८०, ८३, ८४, ८५, ८६, ८७, ९२, ९३, ९४, ९८, १०१, १०२, १०५, १०७, १०८, ११०, ११२, ११५, ११६, ११८, ११९, १२२, १२३.

शास्त्रतात्पर्यविदः. ६.

श्रीधरः (श्रीकारः श्रीकर इति च माधवधातुवृत्तौ दृश्यते । प्रौढमनोरमायां श्रीधरः इति) १६, ६६.

सभ्याः. ९९.

सुधाकरः. (अयं वाचकवार्तिककृत) १२, ३२, ३५, ३६, ५१, ५५, ६१, ६४, ६८, ९२, ९४, १०६, ११२, १२०, १२७.

सुन्दरपाड्यः. ११४.
हरदत्तः. १८, ३०, ३२, ४८, ४९. ८२, ११९.
हरियोगी. २१,२४, ४०, ६४.
हेमचन्द्रः. २२, २४, ३७.

पुरुषकारे स्मृता ग्रन्थाः.

अमोघा. (शाकटायनकृता सूत्रवृत्तिः) ३६. १०७. पृष्ठयोः.
उणादिवृत्तिः. ३१, ३८.
कण्ठः ७०.
कविकामधेनुः. ३३, १०३.
काव्यालङ्कारः. ११६.
धातुवृत्तिः. (इयं माधवेनापि स्मर्यते) ९५.
निरुक्तम्. (यास्कीयम्) २३, ४८.
न्यासः. १८, २०. २१, ३१, ३२. ३७. ४९. ८७. ९८, ११४.
पञ्जिका. (जिनेन्द्रकृता) ४१.
पारमर्ष सूत्रम् (जैमिनिसूत्रम्) १७.
प्रक्रियारत्नम्. ११०.
भागवृत्तिः. १६, ८९.
महाभाष्यम्. ३. ४. १०, १४, १६, २८. २९, ३०, ३१, ३३. ३४, ३५, ३७, ३८, ३९, ४७. ४९, ५५, ६६, ६८, ८९. ९६, १००, १०९. ११०, ११३, १२७.
वार्त्तिकम्. ३, ३०, ३४, ७६, ८१, ९४, ९६, १०७, ११३, १२७.
वृत्तरत्नाकरः. ९.
वृत्तिः (काशिका) २८, २९, ७५, ७८, ९९, ११५.
शाकटायनन्यासः. ६६.
शृङ्गारप्रकाशः. (अयं भोजकृतः। एकावल्यां विद्याधर एनां स्मरति) १०६.
श्लोकधातुपाठः. ४४, ४७. ५०, ७३. ७६, ८३.
समन्वयसूत्रम्. (तत्तु समन्वयात्) ६.

॥ श्रीः ॥

पुरुषकारे स्मृतानि व्याकरणेतरग्रन्थवाक्यानि .

पृष्ठम् .

३. 'मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥' (मनुस्मृतिः ४ अ.)

९. 'यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति' । 'कस्माद्यभेष्यद् द्वितीयाद्वै भयं भवति' (बृहदारण्यकं १ अ. ४ ब्रा. २ म.)

६. 'पूर्णमेवावाशिष्यते' (ईशोपनिषत् १ मन्त्रम्)

„ 'अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य' (ब्रह्मसूत्रशाङ्करभाष्यं समन्वयाधिकरणम्)

७. 'फल्यभावे फलं कुतः'

८. 'श्रव्यवृत्तैः सुसन्धिभिः' (काव्यादर्शः १ परि. १८ श्लो.)

१०. 'वाग्वाणी भारती भाषा' (वैजयन्ती)

„ 'भावयेज्ज्योतिरान्तरम्'

१२. 'मनोरमा भा भवते'

„ 'स राष्ट्रमभवत्' (यजुर्वेदब्राह्मणम् १ अष्ट. ७ प्रश्न. ७ अनु.)

१४. 'यच्छति प्रियतमे रभसेन' (किरातार्जुनीये 'यच्छति प्रतिमुखं दयितायाः' इति, 'चुम्बति प्रियतमे रभसेन' इति च दृश्यते)

„ 'शर्म यच्छत द्विपदे चतुष्पदे' (७ अष्ट. ८ अ. १३ व. ६ ऋ.)

१७. 'विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्' (जै. सू. १ अ. ३ पा. ३ सू.)

२३. 'पाञ्चाल्याः पद्मपत्राक्ष्याः स्रायन्त्या जघनं घनं ।
याः स्त्रियो दृष्टवत्यस्ताः पुंभावं मनसा ययुः ॥' (भारतम्)

„ 'उष्णीषं स्रायतेः' (यास्कनिरुक्तम्. उत्तरषट्कं ७ अ. ३ पा. ७ ख.)

२४. 'पञ्चबाणः क्षिणोति'

२५. 'जिगादुपज्रयति गोरपीच्यम्' (७ अष्ट. २ अ. २५ व. ५ ऋ.)

२६. 'उदयति दिननाथे याति शीतांशुरस्तम्'

२७. 'संस्फेटस्तुमुलं युद्धम्' (अमरकोशः)

पृष्ठम्.

२७. 'वृकस्य रेषणं रेषा हेषा ह्रेषा च वाजिनाम् । बृंहितं करिणां शब्दः' (वैजयन्ती)

३०. 'ओमिति ब्रह्मा प्रसौति' (तैत्तिरीयोपनिषत् ८ अनु.)

३३. 'प्रसूनं कुसुमं सुमम्' (अमरकोशः)

३९. 'न स्नात्वा वासो धुनुयात्'

„ 'ऊर्ध्वं धूनोति वायुर्विवृतशवशिरःश्रेणिकुञ्जेषु' (मालतीमाधवं ९ अङ्कः)

„ 'अयं स्रुवोऽभिजिहर्ति होमान्' (आप. श्रौतम्. या–प्रश्नः. ७ख.)

३७. 'प्र बाहवा पृथुपाणिः सिसर्त्ति' (२अष्ट. ८अ. २व. २ऋ.)

४०. 'वरिष्ठं वज्रमाजिघर्ति मायिनि' (४अष्ट. ३अ. २व. ३ऋ.)

४१. 'तं रोदसी पिपृतं सत्यवाचम्' (३अष्ट. १अ. २७व. ४ऋ.)

४९. 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः' (अमरकोशः)

„ 'बुक्कनं श्वभ्रकध्वाने' (वैजयन्ती)

४८. 'सिषक्तु सचत इति सेवमानस्य' (यास्कनिरुक्तम् पूर्वषट्के ३अ. ४पा. ४ख.)

९३. 'उञ्छो धान्यश आदानं कणिशाद्यार्जनं शिलम्' (वैजयन्ती)

९४. 'ततो रजन्यां व्युष्टायाम्' (रामायणम् उत्तर. ४१सर्गः)

„ 'व्युच्छन्ती दुहिता दिवः' (तैत्तिरीयब्राह्मणम् ३अष्ट. १प्र. ३अनु.)

„ 'उषा उच्छदपस्निधः' (१अष्ट. ४अ. ४व. ३ऋ.)

९९. 'द्रव्यमर्जयन् ब्राह्मणः प्रतिगृह्णीयात्' ('याजयेदध्यापयेद्वा' इति अस्य शेषः)

१४. 'लोलद्भुजाकारबृहत्तरङ्गम्' (माघः ३सर्गः.)

७२. 'जिह्वाशतान्युल्लडयत्यभीक्ष्णम्'

७४. 'विश्राणनं वितरणम्' (अमरकोशः)

७७. 'यदप्रथयत् तत् पृथिव्यै पृथिवित्वम्' (तैत्ति. ब्रा. १अष्ट १प्र. १अनु.)

९१. 'मीमांसा स्याद्विचारणा'

९३. 'द्वाविमावम्भसि क्षिप्य गळे बद्ध्वा महाशिलाम् । धनिनं चाप्रदातारं दरिद्रं चाप्रवासिनम्' (महाभार. उद्यो. पर्व. १२अ.)

„ 'सांक्षिप्य संरम्भमसद्विपक्षम्' (भट्टिकाव्यं २सर्गः)

पृष्ठम्.

९३. 'इरज्यति पत्यते क्षयति राजति' (यास्कनिरुक्तं निघण्टुः २अध्या. २१ख.)

„ 'ततो वावृत्यमाना सा रामशालां न्यविक्षत' (भट्टिकाव्यम् ४ सर्गः.)

९९. 'पीयूषस्येह तृप्तुतम्' (तैत्ति. ब्रा. २अष्ट. ४प्र. ८अनु. पीयूषस्येह तृप्तुहि' इति.)

९८. 'सावष्टम्भनिषुम्भसम्भ्रमनमद्भ्रूगोळ' (मालतीमाधवं ९ अङ्कः)

१०२. 'सामोन्मुखेनोच्छुरिता प्रियेण' (भट्टिकाव्यं ११ सर्ग.)

„ 'स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक्स्मितम्' (अमरकोशः)

१०१. 'शबर्या पूजितः सम्यक्' (रामायणं बाल. १ सर्गः.)

„ 'दलन्ति ककुभानि च' (काव्यादर्शः २ परि. ११७ श्लो.)

„ 'मिलन्त्याशासु जीमूताः' (शृङ्गारप्रकाशः)

१०८. 'प्रतिस्पशो विसृज तूर्णितमः' (३अष्ट ४अ. २३व. ३ऋ.)

„ 'यतो व्रतानि पस्पशे' (१अष्ट .२अ. ७व. ४ऋ.)

„ 'शब्दविद्येव नो भाति राजनीतिरपस्पशा' (माघकाव्यं २सर्गः.)

१०९. 'पुर इष्णासि पुरुहूत पूर्वीः' (१अष्ट. ५अ ४व. २ऋ.)

१११. 'सोमेन यक्ष्यमाणो नर्तुं सूक्ष्मैर्नेत्र नक्षत्रम्' (आप. श्रौतसूत्रम् ५प्र. ३ख.)

„ 'म्लेच्छो हवा एष यदपशब्दः' (महाभाष्ये पस्पशायां स्मृतम्)

११३. 'मा न श्लिक्षः प्रियं प्रिये' (भट्टिकाव्यं १सर्गः.)

„ 'श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्रीम्' (माघः. ४सर्गः.)

११४. 'निक्षति चुम्बति निंस्ते तन्व्या मुखपङ्कजं प्रेयान्' (सुन्दरपाण्ड्यकृत आर्यावलीति कश्चित् ग्रन्थोऽसमग्रो राजकीयपुस्तशालायामस्ति. अनुपलब्धतद्ग्रन्थभागगतामिदमर्धं स्यात्)

११६. 'लावण्य उत्पाद्य इवास यत्नः' (कुमारसम्भवं १सर्गः.)

१२३. 'प्रवल्हिका प्रहेळिका' (अमरकोशः.)

„ 'प्रवल्हिकाः शंसति । प्रवल्हिकाभिर्वै देवा असुरान् प्रवल्ह्याथैनानत्यायन्' (बह्वृचब्राह्मणम् १पञ्चि. ५अ.)

१२७. 'दैवो विस्तरशः प्रोक्तः' (भगवद्गीता. १६अ. १श्लो.)

शुद्धिपत्रम्.

पृष्ठम्	पङ्क्ति.	अशुद्धम्	शुद्धम्
५	११	वेषा	वैषा
६	३	मवेकै	मेवैक
	७	वृत्या.	वृत्त्या
१०	,,	तथि	वस्थि
	१७	गुर्दगुर	गुद
,,	२२	,,	,,
११	१२	यवन	यमन
१४	१९	स्वाा	स्वा
१७	५	तुरि	तुः (१-१-२१)इ
१८	२	स्कत	स्कर्त्त
२१	५	इत्य	इत्ये
२२	१२	औ	ओ
२३	६	ण्डु	ण्डु
२६	२१	हिका	हिका
२७	२२	सस्फे	संस्फं
३२	१५	रौति	रौति
३४	१२	धवति	धुवति
३८	७	गीत्	गीत् (१-१-५)
४०	८	यान	यिनि
५३	९	त्यवै	त्यैव
५४	१	नुाद	नुदा
,,	२२	भिच	भिचा
५८	३	विवि	विव
८४	९	ङ्गः	ङ्गा
८५	२१	स्मां	मां
७६	९	घण्डुः	घण्डु.
,,	१९	५	१
७७	१०	तिभा	तीभा
,,	१५	प्रथ	पृथ
७९	१९	इणे	हणे
८१	१	त्राप्यु	प्यु
९०	१८	लाना	लनमा
१०१	८	न्त'	न्त.
१०१	१०	ति	मि
,,	१३	तः	त
११८	१२	सां चका	सांच
११९	१	तोः	तौ

॥ श्रीः ॥

श्रीगणेशाय नमः ।

देवप्रणीतं दैवं

कृष्णलीलाशुकमुनिकृतपुरुषकाराख्यव्याख्योपेतम् ।



सच्चित्सुखैकरसवस्तुनि यत्र विश्वं
मिथ्यैव रूप्यमिव राजति शुक्तिभित्ते ।
तस्मिन् प्रतीचि परमात्मनि चित्तवृत्ति-
र्ब्रह्माहमस्मि परमित्यनिशं ममास्तु ॥ १ ॥

गाश्च विबुधांश्च भूमौ पालयितुं किमपि कृतपदन्यासम् ।
आपादचूडमिदमिदमभ्यस्यत दैवमद्भुतं भोभोः ॥

१. अथ महावैयाकरणः श्रीकृष्णलीलाशुकमुनिर्दैवग्रन्थस्य व्याख्यां पुरुषकाराख्यामारिप्सुर्मङ्गलसिद्धये स्वेष्टदेवतां श्रीकृष्णं, प्रेक्षावत्प्रवृत्त्यङ्गप्ररोचनीय-ग्रन्थविषयप्रयोजनाभिधानाय दैवग्रन्थं च विशिष्टरूपमनुसन्धत्ते **गा इति**। **भोभोः** शिष्या इति शेषः । सम्बोध्यावधानाय द्विरुक्तिः । **गाश्च** नन्दगोपसम्बन्धिनी-र्धेनूश्च **विबुधांश्च** कंसादिव्यतिक्रमक्षीणक्षेमान् देवांश्च **पालयितुं** रक्षितुम् **भूमौ** भूलोके **कृतपदन्यासम्** अवतीर्णम् **किमपि** गुणैरीदृक् तादृग् इति परि-च्छेत्तुमशक्यम् **आपादचूडमद्भुतं** पादादिचूडान्तेष्वङ्गेष्वेकशो निर्वर्ण्यमानं रूपधेयादनुभावाच्चाश्चर्यजनकम् **इदमिदं** मच्चित्तसन्निहितं, यदेव चित्ते सन्निधा-पयितुं मननापरपर्यायाभ्यासपरिश्रमः श्रेयस्कामैः करणीयः, मया च कृतः, तदिद-मेवेत्यर्थः । द्विरुक्तिरादरार्था । **दैवं** (प्रज्ञाद्यणा) देवं, विशिष्टदेवत्वस्य देवतान्तरा-गोचरत्वाच्छ्रीकृष्णमिति यावत् । **अभ्यस्यत** मद्वन्मननपरिपाट्या साक्षात्कुरुतेति स्वयं सविकल्पकसमाध्यासादितभगवत्साक्षात्कृतिकृतार्थस्य ग्रन्थकर्तुरेष कृपया **ग्रन्थपठितॄन्** प्रत्युपदेशः ।

अपिच—

[1]दैवं पुरुषकारेण न विना पुष्टिमश्नुते ।
अतः प्रेक्षावतां सार्थास्तमेतमनुधावत ॥

तत्र तावद्यथावच्छब्दार्थप्रतिपत्त्या निष्प्रत्यूहं [2]परिसमाप्य यथासम्भवं प्रचयगमनादिना परोपकारप्रभृति प्रयोजनमात्मनो-

---

अथ च **गाश्च** वाचश्च उपात्तधात्वधीनसिद्धीन् शब्दविशेषानिति यावत् । **विबुधांश्च** वैयाकरणांश्च **पालयितुं** संशयभ्रान्तिविषयताया मोचयितुमिति गोपक्षे, गोगोचरसंशयभ्रान्त्योरनाश्रययितुमिति तु विबुधपक्षे अन्यथापभ्रंशसम्प्रमोहेन गवां वैयाकरणतायाश्च त्राणानिर्वाहात् । **कृतपदन्यासं** कृत आनुकूल्येन सम्पादितः पदन्यासः शब्दसन्दर्भो यस्य तत् । अथवा पदशब्दो व्याकरणपरः । शब्दशास्त्रिकरक्षायै कृतो निवेशितः पदन्यासो व्याकरणानुबन्धिमहार्घार्थनिक्षेपो यस्मिंस्तत् । **किमपि** एकमेव न त्वेतदभिन्नफलकमन्यत्प्रकरणमस्तीत्यर्थः । **अद्भुतं** अशेषधात्वाकरग्रन्थनिर्लोडनविषयासाधारणनैपुण्यप्रकाशकत्वाद् विस्मयावहम् **इदमिदं** व्याख्येयत्वेन व्याख्यातत्वेन वा बुद्धौ सन्निधापितम् । द्विरुक्तिरादरार्था । **दैवं** देवेन विरचितं प्रकरणम् **आपादचूडमभ्यस्यत** आमूलाग्रं परिशीलयतेति यथोक्तफलकामान् प्रति प्रैषे लोट् । अथवामूलाग्रमभ्यसितुमयमवसरो वः प्राप्त इति प्राप्तकाले लोट् । अयं भावः—आसमाप्तिसन्ततेष्वर्थग्रन्थिषु केषाञ्चिद्यथाकथाञ्चिद् ज्ञानेऽपि बहूनामवगतावुचिताभ्युपायविरहेण प्राग् दैवे युष्माकमुपेक्षा तदेकदेशापेक्षा वा जाता कामं युक्ता । सम्प्रति पुनरस्माभिर्दैवस्य वक्ष्यमाणगुणसर्वाङ्गीणव्याख्यानसाचिव्यसम्पादनात् तद्बलेन सर्वार्थानां सुग्रहत्वाद् दैवं वो न केवलमनुपेक्षणीयं, यावदेकदेशमप्यनपहाय परिशीलनीयं साधुशब्दविशेषनिर्धारणाय वैयाकरणतात्राणाय चेति । एषा चाभ्यासस्यावसरप्राप्तिः सौकर्यमपूर्वसिद्धमाक्षिपन्ती सौकर्यकारणं व्याख्यानसनाथत्वं दैवस्याक्षिपति । तेन 'दैवं व्याख्यायत' इति चिकीर्षितप्रतिज्ञासिद्धौ व्याख्यानस्यापि प्रयोजनादिकमर्थादुक्तं वेदितव्यम् । तन्त्रेण चैवं भिन्नप्रयोजनौ प्रकृतार्थावक्लेशेनैकस्मिन् ह्रस्वे वाक्ये निवेशयतो यदेतद्ग्रन्थकारस्य मितसारबह्वर्थवाग्गुम्फनपाटवं, तद् आग्रन्थान्तात् स्पष्टं द्रष्टव्यम् ।

१. यथोक्तफलायावश्यमुपादेये दैवे तत्परिपोषहेतुत्वादवश्यन्तरां स्वव्याख्यानमुपादेयमित्याह—**दैवमिति** । **दैवं** व्याख्येयग्रन्थविशेषो नियतिश्च । **पुरुषकारेण** तन्नाम्ना व्याख्यानेन पुरुषयत्नेन च । २. निबन्धनं परिसमाप्तिकर्म गम्यम् ।

ऽन्येषामप्यमुं प्रबन्धमनुबध्नतामलसमनसामप्याद्यपद्यप्रभावेनैव यथा स्यादित्येवमर्थं मङ्गलाचरणमग्रे निबन्धनस्य[1] निवेशयति[2]— सच्चित्सुखेति। तत्र च ब्रह्मतत्त्वप्रतिसन्धानस्य समस्तेषु मङ्गलेषु मूर्धाभिषिक्तत्वाच्छब्दस्य च शब्दतत्त्वविद्भिर्ब्रह्मत्वेनाभ्युपगमात् तस्यैव चात्रापि भवत्याद्यात्मना[3] प्रतिपाद्यत्वात् स्वस्य च ब्रह्मनिष्ठत्वाद् ब्रह्मतत्त्वविषयमेव मङ्गलमौचित्यातिरेकादाचरितं मन्तव्यम्। मङ्गलाचरणस्य पुनर्यथोक्तफलसाधनत्वं

'मङ्गलाचारयुक्तानां[4] नित्यं च प्रयतात्मनाम्।
जपतां जुह्वतां चैव विनिपातो न विद्यते॥'[5]

इत्यादिस्मृतेः शिष्टाचाराच्च[6] द्रष्टव्यम्। अविनिपातश्चात्राभिमतात् फलादप्रच्युतिरेव। अपिचात्र 'सिद्धे शब्दार्थसम्बन्ध-[7] इत्यत्र तत्रभवतः पतञ्जलेर्भाष्यं 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते; वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च। अध्येतारश्च सिद्धार्था यथा स्युरिति' इति। 'वृद्धिरादैच्' (१-१-१) इत्यत्र च 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते; वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च। अध्येतारश्च वृद्धियुक्ता यथा

---

१. ग्रन्थस्य। २. कर्तुर्गम्यत्वादनुपादानम्. ३. भूधात्वादिरूपेण. ४. अयं श्लोको मनुस्मृतौ चतुर्थाध्यायेऽस्ति. 'अभिलषितायुर्धनादिसिद्धिर्मङ्गलं, तदर्थ आचारः' (मङ्गलाचार) इति मेधातिथिः. ५. 'न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति' इतिवद् मङ्गलाचारः शोभनं शीलं, तच्चाद्रोहवृत्तिरुपकारवृत्तिर्वा, न तु ग्रन्थादाविष्टवस्तुस्तोत्रमिति यद्युच्येत, तदाप्याह — शिष्टाचाराच्चेति. ६. इदं च प्रथमं वार्त्तिकं कात्यायनस्य.

स्युरिति' इति । 'भूवादि' (१-३-१) सूत्रे च 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारमागमं प्रयुङ्क्ते । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते; वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च । अध्येतारश्च मङ्गलयुक्ता यथा स्युरिति' इति । अत्र च मङ्गलप्रयोजनो माङ्गलिकः । तत्र च यथाभाष्यं यथाचारं च मङ्गलादित्वमेव तत्तत्कार्याणामावश्यकम् । शेषयोः[1] पुनर्नावश्यकता । अविगुणमङ्गलानामाभिमतफलभङ्गमुपलभामहे; तच्चैवं[2] प्रबलतरदुरितप्रतिबन्धादेवेत्यनुसन्धेयम् । इत्यास्तां नास्तिकवादावतारावसरः ।

अत्र च परमार्थस्वप्रकाशभूतसुखमात्रस्वरसे† यस्मिन् वस्तुनि शुक्तिशकल इव रूप्यं मिथ्यैव जगत् प्रकाशते; न तु प्रतीच इव चैतन्यमन्यद्रूपमस्यास्ति, तस्मिन् प्रत्यग्भूते परमात्मनि 'परं ब्रह्माहमस्मि' इत्यनिशं मम चित्तवृत्तिर्भूयादित्यक्षरार्थः । यदेवंविधपरमात्माख्यमात्मनः स्वतःस्वरूपमविद्यातिमिरदुष्टदृष्टेरन्यथान्यथावभासते, तत् तथैव मम तत्त्वविद्यासिद्धाञ्जनवशादनिशं प्रकाशतामिति यावत् । तत्रापि प्रत्यक्परमात्मापरपर्यायस्य ब्रह्मणः स्वरूपतटस्थलक्षणोपवर्णनद्वारा परमपुरुषार्थरूपोपदर्शनेन चित्तवृत्तेः[3] स्वयंवरार्हविषयावेदनपराणि **परमात्मनीत्येवंपर्यन्तानि** पदानि वेदितव्यानि । तत्र च विश्वाधिष्ठानत्वं* तटस्थलक्षणं

---

१. मङ्गलमध्यत्वमङ्गलान्तत्वयोः. २. मङ्गलाचरणस्य प्रामाणिकत्वावधारणे. ३. यतः परमपुरुषार्थलाभप्रत्याशा, तादृशं विषयमनन्यप्रेरणया चित्तवृत्तिरन्विष्य वृणुते कान्तमिव कन्यकेत्यत उक्तं **स्वयंवरार्हविषयेति.**

† 'स्वरूपे' इति गपुस्तके पाठः. * 'त्वलक्षणम्' इति घपुस्तके पाठः.

रजताधिष्ठानत्वमिव शुक्तेः। शेषं पुनः स्वरूपलक्षणं यथा शुक्तेरेवासाधारणं रूपम्। तत्र **सुखं** तावत् पुरुषार्थ एवेति सुप्रसिद्धम्। **चिच्छब्देन** तु तस्यैव साक्षात्कारः स्वयंप्रकाशतया प्रकाशितः। सुखानुभवो हि पुरुषार्थः। स चैकरसत्वेनाद्वैतत्वेन स्वयम्प्रकाशतयैव पर्यवस्यति, अपरथा प्रकाशान्तराभावेनाननुभवादपुरुषार्थतापातात्। यद्यपि 'सुखं मे स्याद्'इत्येव पुरुषार्थं पुरुषा अर्थयन्ते, न तु सुखमहं स्यामिति, तथापि सांसारिकस्य सुखस्य जडाजडाकारद्वयकराम्बितस्य जडाकारसाक्षात्कारनान्तरीयकतया भेदसंभेदोऽपि पुरुषार्थकोटिनिविष्ट इवावभासते। मोक्षसुखस्य तु साक्षात्काराय स्वयंप्रकाशतैव भगवती प्रभवतीति किमपरमपेक्ष्यत इति कृतमेतेन भेदतपस्विना। **सच्छब्देन** पुनः सैवेषा पुरुषार्थता समर्थिता। यदि खल्वेवंविधमपि सुखं विश्ववन्मिथ्यैव स्यात्, तदा तदपि पुरुषार्थाभास एव भवेद्; न च भवेत् प्रेक्षावतां प्रवृत्तिपात्रम्। आत्मनः खल्वत्यन्तोच्छेदाद्वरं संसार एवानशनादिव कदशनम्। **एकरसशब्देन** तु तस्यैव सुखस्य दुःखासम्भिन्नता प्रदर्शिता; सच्चित्सुखैकरसमेव तद्वस्तु, न पुनारूपान्तरमन्यथान्यथावभासमानस्याप्यस्यास्तीत्यद्वैतात्मकतयाकुतोभयता च। तथा च श्रूयते—'[1]यन्मदन्यन्नास्ति। कस्मान्नु बिभेमि' इति। 'कस्माद्ध्यभेष्यद् द्वितीयाद्वै भयं भवति' इति च। यद् भयं भवति तद् द्वितीयादेवेत्यद्वैते भयस्य न सम्भावनापीत्यर्थः। **वस्तु**शब्देन पुनर्वक्ष्यमाणाविद्यावृ[2]त्तप्रतिपत्तिसौकर्योपयो-

१.इदं बृहदारण्यके प्रथमाध्याये चतुर्थब्राह्मणे। अनेन वाक्येन 'कस्माद्ध्यभेष्यद्' इत्यादिवाक्येन च विवक्षितसिद्धेस्तयोर्मध्यपाठ्यः 'इति तत एवास्य भयं वीयाय' इत्यंशो नोदाहृतः. २. वृत्तशब्दः स्वरूपे. तच्च मिथ्यात्वम्. 'वृत्तं स्वरूपे चरित' इति वैजयन्ती.

गितया सच्चित्सुखैकरसत्वस्य [1]वस्तुवृत्तमुपन्यस्तम् । यद्येवमद्वैतमेवैकरसतया वस्तु स्यात्, कथं तर्हि प्रत्यक्षादिभिर्द्वैतं प्रकाशत इत्याशङ्काङ्कुरशमनेन यत्रेत्यादिना द्वैतमिथ्यात्वकथनेन तदेवाद्वैतं साधु साधितम् । तेन च देशतः कालतो वस्तुतश्चानवच्छिन्नतया पुरुषार्थकाष्ठा प्रतिष्ठापिता । तेनैव च द्वैतमिथ्यात्वकथनेन निखिलस्य दुःखस्य तद्धेतोश्चाविद्यापर्यन्तस्य विद्याख्यया चित्तवृत्त्या विनिवृत्तिः सूत्रिता । विद्याविनिवृत्त्योश्चैवमाविद्योत्थत्वाविशेषाद्विनिवृत्तिः सूत्रितैव । अविद्यावस्थायामेव ह्यमी निवर्त्यनिवर्त्तकनिवृत्तिविभ्रमाः परिभ्रमन्तस्तत्त्वावस्थायां कथं कथामप्यर्हन्ति । अद्वैतविद्या खल्वियं कृत्स्नं द्वैतमेव ग्रसमाना स्वात्मानं च तत्तन्निवृत्तीश्च द्वैतोपाधौ युगपदेव ग्रसत इति किमपरमवशिष्यते । [2]अपरथा च 'पूर्णमेवावशिष्यते' इत्याम्नायशासनमतिलङ्घ्येत; अद्वैतं चोपक्रम्य द्वैतमेव भङ्ग्यन्तरेणोपसंहृतं स्यात्; कैवल्यप्रसिद्धिश्च कदर्थिता भवेत्; पुरुषार्थश्च न काष्ठामधितिष्ठेत् । तदेवं तत्त्वविद्यावाप्तनिजपदाभिषेकस्य न द्वैतानुबन्धगन्धोऽप्यस्ति; किन्तु निरन्तरमनन्तानन्दसाम्राज्यमेवात्मप्रभवमप्रतिबन्धं चकास्ति । तथा च [3]समन्वयसूत्रे [4]शास्त्रतात्पर्यविदां वचनम्—'अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य' इति । अथ **प्रतीचि** इत्यनेन यथोक्तस्य पुरुषार्थस्य प्रत्यासन्नता प्रत्यायिता । प्रतीचश्च परमात्मसामानाधिकरण्येन जगद्वैलक्षण्यं वार्णितं—जडस्य हि जगतो मिथ्यैव रूपं रूप्यवद्रूपान्तराभा-

---

१. स्वाभाविकं रूपं पारमार्थिकत्वलक्षणमित्यर्थः. २. सशेषत्वे. ३. 'तत्तु समन्वयात्' (१-१-४) इति बादरायणसूत्रे. ४. श्रीशङ्करभगवत्पादानाम् ।

वात्; प्रतीचस्तु जीवरूपमेव मिथ्या, चिद्रूपं तु परमात्माव्यतिरेकात् सत्यमेवेति। अनेन च वैलक्षण्येन यथोक्तस्य वस्तुनः पुरुषार्थतैव पूर्ववत् समर्थिता; प्रतीचो हि जीवात्मनः परमात्मव्यतिरेके विश्वकोटिनिविष्टतया सोऽपि मिथ्यैव स्यादिति कस्यायं परमात्मभावः पुरुषार्थो भवेत्, 'फल्यभावे फलं कुत' इति न्यायात्। [1]अनेनैव च सामानाधिकरण्येन साक्षिब्रह्मणोस्तात्त्विकैक्यकथनार्थेन 'अहं ब्रह्मास्मि' इति चित्तवृत्तेर्मिथ्यात्वविनिवृत्तये तत्त्वज्ञानतापि विज्ञापिता। यद्यपि[†] तस्मिन् प्रतीचीत्यनेनैव सामानाधिकरण्येन जीवब्रह्मणोरैक्यं शक्यमवसातुं, तथापि यथा परमात्मशब्दाद् ब्रह्मावगमः सुकरतरो भवति, न तथा तच्छब्दात्। नित्यप्राप्तस्याप्यविद्यावशाद् विस्मृतपाणिमाणिक्यवदप्राप्तस्य प्राप्तौ चित्तवृत्तिरित्यादिना तत्त्वसाक्षात्कारात्मकमायासविमुक्तं साधनमुक्तम्। परमित्यनेन च सदित्यादिना दर्शितस्य निरतिशयोत्कर्षस्य प्रतिपत्त्यवस्थायामप्यनुवृत्तिरावेदिता, [2]तद्विषयाया एव विद्याया अविद्योत्पाटनपाटवात्। एवं च निरतिशयानन्दसाक्षात्कारात्मकतया स्वविषयस्येव स्वयमपि पुरुषार्थत्वमस्याश्चित्तवृत्तेर्न त्वविद्यानिवृत्तेरेवेत्यप्यादर्शितम्। तदहो तत्त्वविद्याया माहात्म्यं, यत् [3]स्वसाध्यवत् स्वयं च स्वविषयश्च पुरुषार्थभूयमेवावगाहते। अनिशमित्यनेन पुनरर्वाचीनं रसास्वादमवधीर्य परस्यैवास्य रसस्य रसिकास्वाद्यता द्योतिता। यस्य हि तत्त्वस्य

१. 'प्रतीचि परमात्मनी'त्येवंरूपेण. २. निरतिशयोत्कर्षगोचरायाः. ३. अविद्यानिवृत्तिवत्.

† 'द्यपि च' इति गपुस्तके पाठः.

सकृदपि स्मृतिः सकलकामधेनुर्भवति, किं पुनस्तस्य निरन्तरानुसन्धानामिति सूचितम्। तच्च मङ्गलाचरणभूयस्त्वादभिमतफलभूयस्त्वायैवेत्येषा दिक्।

येऽप्येतत् पद्यं न पठन्ति, तन्मतेऽपि वृत्तिकारादिवत्[1] प्रबन्धाद् बहिरेव मङ्गलाचरणं बोद्धव्यम्, 'मङ्गलाचारयुक्तानाम्' इत्यविशेषेण[2] स्मरणात्। अपिचास्मिन्नपि पक्षे 'सत्तायां[3] भवति' इत्यत्रैव महन्मङ्गलमाचरिष्यतीति न किञ्चन दुष्यति॥

सर्वथापि तावत् प्रेक्षावत्प्रवृत्तिसौकर्यार्थं करिष्यमाणं वस्तु निर्दिशन् प्रकरणस्य प्रयोजनं दर्शयति—

पठितस्य पुनः पाठे फलं वृत्तेन वक्ष्यते।
न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम्॥ २॥

इति। एकस्यैव धातोरसकृत् पाठे यत् फलं, तत् तत्रतत्र तत्तद्ग्रन्थकारैरुक्तमप्यस्माभिरेकीकृत्य वृत्तेन वक्ष्यते। यद्यपि च 'धूनयति धवति धवते' इति जात्यापि वक्ष्यते, तथापि[4] 'भूयसा व्यपदेशो मल्लग्रामवद्' इति न्यायेन वृत्तेनेत्युक्तम्। तत्र च वर्णच्छन्दो वृत्तं, मात्राच्छन्दो जातिः। यद्येवं पद्येनेत्येव मुक्तकण्ठमुच्यतां; मुच्यतामयं भूयसा व्यपदेशक्लेशः। सत्यम्। वृत्तसौभाग्यात् पुनः पद्यप्रबन्धः श्लाघ्यतरो भवतीत्यभिप्रेयते। तथा चाचार्यदण्डिना दर्शितं—'श्रव्यवृत्तैः सुसन्धिभिः' इति। वृत्तबन्धान्तराले त्वार्याप्रवेशः स्थायिरसान्तर इव सञ्चारिरसप्रवेशश्चम्पकमालान्तराल इव च नीलपलाशप्रवेशो रसिकानां मानसम-

१. काशिकाकारादिवत्. २. मङ्गलं प्रबन्धाग्रे निवेशनीयमिति विशेषविरहेण. ३. इदं तृतीयश्लोके. ४. इदं षड्विंशश्लोके.

नुरुन्ध एवेत्यभिसन्धिः। तथा चात्रैवानुष्टुब्बन्धान्तराले 'जानातीति श्नि सिध्येद्' इत्यादिवृत्तान्तरप्रवेशोऽपि दृश्यते। वृत्तरत्नाकरादिवद्वा वृत्तशब्दः पद्यमात्रपर इति यथोक्तनिर्वाहालसैराश्रीयताम्। अथ किमर्थं धातुवृत्तिकारादिवचनभङ्गीं विलङ्घ्य वृत्तेन वचने भवान् अभिनिविशते; एवं च क्वचित् क्वचित् पादपूरणाय पदविन्यासप्रयासोऽपि परिहृतो भवतीत्यत उक्तं न विनेति। अत्रापि यथोपक्रमं वृत्तेनेत्येव वक्तव्ये बन्धग्रहणं बन्धविशेषभूषितस्यैव वृत्तस्य वस्तुनः सुग्रहत्वे हेतुत्वात्। एवं च 'वृत्तेन वक्ष्यते' इत्यत्रापि वृत्तबन्धेनेत्येवार्थः पर्यवस्यति। †ग्रहिश्चात्रावधारणपर्यन्ते ग्रहणे वर्तते। अथ यत्र संहितया पाठे वाक्यभेदो दुर्ग्रहो भवति यथा—'[2]ऐओङैऔज्झयवरलण्ञमङणनंझभञ्घढधष्' इत्येतस्मिंश्चन्द्रगोमिभोजदेवयोर्गद्यपद्यसाधारणे[3] सूत्रपाठे, तत्र पद्यबन्धे सति वस्त्वपि वाक्यार्थात्मकं गद्यबन्धवदर्थवशादन्तरान्तरा विच्छिद्य पाठस्यासम्भवाद् दुर्ग्रहमेव; दूरत एवावधारणम्; गद्यबन्धे च सति तत्सम्भवात् सुग्रहमेवेत्यभिप्रायेणोक्तं प्रायेणेति। तदनेनासकृत्पाठफलस्यैकीकृत्याकृच्छ्रेण ग्रहणमस्य प्रकरणस्यासाधारणं प्रयोजनामिति दर्शितं भवति॥

तदेवं करिष्यमाणं वस्तु सप्रयोजनमुपक्षिप्य तत्रापि 'भू सत्तायाम्' इति धातुपाठे प्रथमपठितं भूधातुं मङ्गलं चावलम्ब्य पुनःपाठफलं ब्रुवन् प्रकरणमारभते—

---

१. इदमष्टमश्लोके. २. एषा षट्सूत्री संहितया पाठे जातिर्भवति। 'हयवरट्' 'लण्' इति पाणिनिसम्मतसूत्रयोश्चात्र 'हयवरलण्' इत्येकीकरणं बोध्यम्. ३. यथासङ्ख्यमत्र न विवक्षितम्.

†'गृहीतिश्चा' इति गपुस्तके पाठः.

सत्तायां भवति प्राप्तौ णिचि भावयते तङि ।
भवते शपि तत्रैव भावयत्यवकल्कने ॥ ३ ॥

तत्र च *सत्ताशब्देन सच्छब्दवाच्यं महान्तमात्मानं 'वृद्धिरादैच्' इति वृद्धिशब्देनैव वृद्धिमादावनुस्मरता प्रकरणारम्भोपयोगि मङ्गलमप्याचरितं मन्तव्यम् । उक्तं च भर्तृहरिणा—

'सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महासत्ता तामाहुस्त्वतलादयः ॥'

इति । यदा तु 'सच्चिदि'त्यादिना वा बहिरेव वा प्रागेव मङ्गलमाचरितं, तदात्र सत्ताशब्दस्य माङ्गलिकत्वं मा वा भूद्, भवतु वा कामं फलभूयस्त्वाय । एवं मध्येऽपि 'सिध्येत्' 'जयेद्' इत्यादिभिरन्तेऽपि वृद्धिभाषाशब्दाभ्यां मङ्गलाचरणं कामं व्याख्येयं, 'वाग् वाणी भारती भाषा' इति भाषाशब्दस्यापि भगवत्याः सरस्वत्या वाचकत्वात् । सर्वथापि धातूनामनेकार्थत्वाद् मृदः कुम्भो भवति, 'भावयेज्ज्योतिरान्तरम्' (ध्यायेदित्यर्थः) इत्यादावभूतप्रादुर्भावादिष्वप्ययं भूर्भवति । तच्च 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' इत्येवकाराद्, 'यमो गन्धने'(१-२-१५) इत्यादौ चोपरमादिभ्योऽर्थान्तराभिधानस्य बहुलमुपलम्भाद्, 'अञ्चोऽनपादाने'(८-२-४८) इत्यत्र च 'अनेकार्था धातवो भवन्ति' इति भाष्याद्, "धातुपाठे तु क्रियावाचित्वप्रदर्शनपरोऽर्थनिर्देशः, न तु नियमार्थः, तथा च 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' इत्येवकारः पठित" इति

१. इदमष्टमश्लोके. २. इदं त्रयोदशश्लोके. ३. अष्टनवत्युत्तरशततमश्लोके. ४. अनेकार्थत्वं च.

*'सत्तायामित्यनेन' इति गपुस्तके पाठः.

च कैयटोक्तिनिर्वाहादवसीयते । यथाप्रयोगं क्वचिदपठितेऽप्यर्थे धातवो भवन्तीति यावत् । अत्र च सत्तायां भवति, प्राप्तौ भावयते भवते, अवकल्कने भावयतीत्येव वाच्येऽन्यथावचनं यथार्हं प्रक्रियादिभिर्बालानुग्रहार्थं छन्दोनुग्रहार्थं च । **एवकार**श्च पौनर्वचनिकः[2]। परस्मैपदाद्येव चात्र विवक्षितं, नतु लडेकवचनाद्यपि । तथा च 'सूत्रे लिङ्वचनाद्यप्रामाण्यमविवक्षात' इति न्यायविदः । 'ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्याद्'[3] इत्यादिभिन्नलकारानिर्देशश्चैवमेव युज्यते । **णिच्चेह** चुरादिणिच् । **तङ्** च 'तङानावात्मनेपदम्' (१-४-१००) इत्युक्तस्य भावयमान इत्याद्यानस्याप्युपलक्षणम् । एतच्च सर्वं बालानुग्रहादिकं यथायोगमुत्तरेष्वप्युन्नेयम् । **प्राप्ता**विति । अत्र तावद् 'आधृषाद्वा' इति चुरादौ पठ्यते । 'युज पृच्च संयवन' इत्याद्या 'धृष प्रसहन' इत्यन्ता धातवो विकल्पेन णिचमुत्पादयन्तीत्यर्थः । 'भू प्राप्तावात्मनेपदी' इति युजादौ । भू इत्ययं धातुः प्राप्तौ वा णिचमुत्पादयति, आत्मनेपदी चेत्यर्थः । अत्र च यद्यप्यात्मनेपदस्य णिच्सन्नियोगशिष्टत्वाण्णिजभावपक्षे 'सन्नियोगशिष्टानामेकतरापाये ऽन्यतरस्याप्यपाय' इति न्यायेन परस्मैपदमेव युक्तं, तथापि भवत इत्यात्मनेपदं वदन् एतन्मन्यते—यदाह मैत्रेयरक्षितः—'आ कुस्मादास्मनेपदीति प्रकरणे भू प्राप्तौ वेति वक्तव्ये आत्मनेपदीति वचनं केवलाण्णिजन्तादप्यात्मनेपदं यथा स्याद्' इति ।

---

१. कैयटोक्त्या निर्वाहाद् उक्तभाष्यस्योपपत्तिवर्णनात्. २. प्राप्तिरूपार्थपुनर्वचनवशायातः । पादपूरणार्थो न त्ववधारणार्थ इति तात्पर्यम् । 'एव साम्येऽवधारणे । पादपूरणकृच्चायम्' इति वैजयन्ती. ३. इदमष्टमश्लोके.

तदयुक्तम्[1]। यदि खल्वाकुस्मीये काण्डे 'भू प्राप्तौ वा' इत्युच्येत, तदा 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायेनानन्तरप्रकृतस्यात्मनेपदित्वस्यैव विकल्पः प्रतीयेत, न पुनर्महाप्रकृतस्य चुरादिणिचः। तेनैतदात्मनेपदिग्रहणं न सन्नियोगशिष्टन्यायापनयनाय प्रभवतीत्याणिच्पक्षे परस्मैपदमेव युक्तमुत्पश्यामः। तथा च 'मनोरमा भा भवते' इति प्रयोगं प्रकृत्य भूवादिसूत्रे सुधाकरः—"भू प्राप्तावात्मनेपदी आधृषाद्वेति विकल्पिताणिच्क[2] इति कैश्चित् समर्थितम्। तण्णिच्सन्नियोगेनात्मनेपदित्वादसाधीयः। अत एव 'स राष्ट्रमभवद्' इत्यादि प्रयुयुजे[3]" इति। धनपालशाकटायनौ चाणिच्पक्षे परस्मैपदमेव प्रतिषेदाते। एवं च 'शपि तत्रैव भवति' इति पठितुं युक्तम्[4]।

अन्यत्राप्येवमुन्नेतुमुचितं पाठपाटवम्।
बली पुरुषकारो हि दैवमप्यतिवर्तते॥

'भुवोऽवकल्कने कृपेश्च' एतदर्थाद् भुवः कृपेश्च स्वार्थे णिच् स्यादित्यर्थः। अत्र क्षीरस्वामी—'अवकल्कनं[5] मिश्रीकरणं भावयति क्षीरेण घृतम्' इति। 'भुवोऽवकल्कने' इत्यपरे पठन्ति[6]। तथा च धनपालः—'कृपेस्तादर्थ्य' इति पठित्वा अवकल्पयतीत्युदाजहार। तादर्थ्य इति हि भुव इति पूर्वधातोर्योऽर्थस्तदर्थत्वे सतीत्यर्थः। क्षीरस्वामी तु कृपेर्योऽर्थस्तदर्थभाव[7] इति व्याख्यायावक-

१. तद् मैत्रेयानुसारेण केवलादात्मनेपदवचनम्. २. पृथुर्वैन्यो राज्यं प्राप्तवान् इत्यर्थो वाक्यस्य। इदं च तैत्तिरीयब्राह्मणे प्रथमाष्टके सप्तमप्रश्नेऽस्ति. ३. 'भवते शपि तत्रैव' इत्येतत्स्थान इति शेषः. ४. कृपिधातुपृथक्कारणेति शेषः. ५. अवकल्कनरूपः. ६. स च सामर्थ्यलक्षणः 'कृपू सामर्थ्ये' इति भ्वादावुक्तः. ७. तदर्थकत्वे.

ल्पयतीत्युदाहरणं च समर्थो भवतीति व्याचष्ट[1]*। मूलशुद्धिस्त्वत्र कीदृशीति न विद्मः। तथा च 'दध धारणे' इत्यत्र[2] स एवाह—'कौशिकस्तु दद धारणे, दध दान इति पाठं व्यत्यास्थत्। युक्तायुक्तत्वे तत्र सूरयः प्रमाणम्। वयं तु मतभेदप्रदर्शनमात्रेणैव कृतार्थाः। मुनिप्रख्यानां वाक्यं कथङ्कारं विकल्पयामः। वयमपि हि स्खलन्तोऽन्यैः कियन्नोपालप्स्यामहे' इति। तदेवं

पाठा व्याख्याश्च धातूनां दृश्यन्ते स्वैरिणः क्वचित्।
प्रयोग एव भगवांस्तानवस्थापयेत् पथि॥

सर्वथापि 'चुर स्तेये' इत्यत्र चुरादिण्यन्तेभ्यो णिचश्चेत्यात्मनेपदं नेच्छन्तीति मैत्रेयरक्षितेनोक्तं तत्र तत्र च तेनैव व्यवहृतमादृत्य भावयतीति परस्मैपदमात्रमुदाहृतम्। न त्वेतद् बहूनामनुमतम्। उक्तञ्च तेनैवापि—'धातुपारायणे त्वात्मनेपदमुदाहृतम्' इति। तेनात्र चोत्तरत्र च चुरादिण्यन्तादप्यात्मनेपदमुदाहार्यम्। शाकटायनः पुनः पूर्वमेव पक्षं पर्यग्रहीत्॥

एवं भूवादयो धातव इति प्राथम्यं मङ्गलं चानुसृत्य भुवः पुनःपाठफलं प्रथममुक्त्वातः परं पाठक्रममुल्लङ्घ्य बुद्धिलाघवाद्यथासम्भवं मातृकाक्रममाश्रित्याह[3]—

---

१. एतेन पूर्वस्य व्याख्याप्रकारस्य क्षीरस्वामीयत्वं न प्रतीयते। प्रौढमनोरमायां तु 'क्षीरस्वामी तु कृपेस्तादर्थ्य इति पठित्वा तादर्थ्य इति प्रस्तुतस्य भुवोऽर्थे मिश्रीकरणे, अथवा तच्छब्देन क्लृपिः परामृश्यते। तस्य योऽर्थः सामर्थ्यलक्षणः तस्मिन्निति द्वेधा व्याख्यद्' इति दृश्यते. २. क्षीरस्वामी. ३. अयं च क्रमो धातोरन्ते बोध्यः.

*'चष्टे' इति घपुस्तके पाठः.

दाञो दत्ते ददातीति दाणो यच्छति दो द्यति ।
दाति दायति दावूदैपोर्दयते रक्षणे डितः ॥ ४ ॥

'डुदाञ् दाने' जुहोत्यादिः । यद्यपि च दत्त इत्यादिनिर्देशादेव धातूनां तत्तद्गणेषु पाठः प्रायेण व्यक्तः, तथापि तत्रतत्रैवंविधं व्याख्यानं यथासम्भवं बालार्थं पाठशुद्ध्यर्थं च । 'दाण् दाने' भ्वादिः । एवमुत्तरेषु* अविशेषोक्तौ भ्वादित्वं द्रष्टव्यम् । पाघेत्यादिना (७-३-७८) यच्छादेशः† । प्रपूर्वश्चायं प्राचुर्येण प्रयुज्यते । क्वचित् पुनरन्यथापि । 'यच्छति प्रियतमे रभसेन' । 'शर्म यच्छत द्विपदे चतुष्पदे' इति । एवमुत्तरेष्वप्यवद्यतीत्यादौ बहुलमुपसृष्टता द्रष्टव्या । 'दो अवखण्डने' दिवादिः । 'ओतः श्यनि' (७-६-७१) इत्योकारलोपः । 'नुमादिनान्यभावेऽपि सादृश्यात् केऽप्यवक्षत' इति वक्ष्यमाणन्यायेनात्र पुनःपाठतां मन्यते । 'दाप् लवने' अदादिः । 'दैपैं शोधने' । अवपूर्वश्चायं प्रयुज्यते । तथाच 'दाधाघ्वदाप्' (१-१-२०) इत्यत्र भाष्यम्—'अवदायति अवदातं मुखम्' इति । 'देङ् रक्षणे' ।

[दाने दत्ते ददातीति दाञो दाणस्तु यच्छति ।
लवने दाति दापस्तु दो द्यतीत्यवखण्डने ॥
रक्षणे दयते देङो दायेद् दैपस्तु शोधने ।]

---

१. कथादिषु ह्रस्वाकारस्यान्त्यस्य सम्भवतोऽपि प्रयोगासंभवायात् तान् हलन्तकल्पतया हलन्तेषु गणयिष्यन् प्रथममाकारान्तधातूनेवारभते 'दाञ' इति । २. किरातार्जुनीये तु 'यच्छति प्रतिमुखं दयिताया' इति 'चुम्बति प्रियतमे रभसेन' इति च दृश्यते. ३. नवनवत्युत्तरशततमश्लोके. ४. अविशेषोक्त्या भ्वादित्वमस्य द्रष्टव्यम्.

*'ष्वपि' इति गपुस्तके पाठः. †'शश्च' इति गपुस्तके पाठः.

इति पाठेऽपि न फलभेदः । अत एवैवंविधाः पाठभेदाः पाठाभेदेऽपि वा पौर्वापर्यभेदा नैवाभिधायिष्यन्ते ॥

गाते गाङो गतावर्थे [1]कै गै शब्देऽस्य गायति ।

'गाङ् गतौ' । त्रिष्वपि वचनेषु समानं रूपम् ॥

पाने पिबति रक्षायां पाति पायति शोषणे ॥ ५ ॥

'पा पाने' । 'पा रक्षणे' अदादिः । 'पै ओवै शोषणे' ॥

धेटो धयति पानार्थे धाञो धत्ते दधात्यपि ।

'धेट् पाने' 'डुधाञ् दानधारणयोः' जुहोत्यादिः । तथा च 'डुदाञ् दाने । डुधाञ् धारणे च' इति शाकटायनः । 'डुधाञ् धारणपोषणयोः । दानेऽप्येके' इति तु मैत्रेयरक्षितः ॥

[2]द्रै स्वप्ने द्रायति द्राति कुत्सिते गमने लुकि ॥ ६ ॥

'द्रा कुत्सितायां गतौ' । लुकि शब्लुकि ॥

शब्दसङ्घातयोर्धात्वोस्त्यायत्येकस्य सो न षः ।

'स्त्यै ष्ट्यै सङ्घातशब्दयोः' । स्त्यै सङ्घाते, ष्ट्यै शब्द इत्यनुक्ते यथासङ्ख्यं नेष्यते । एवमन्यत्राप्येवंविधे धातुपाठे द्रष्टव्यम् । तथाच '[3]ऋदितो मेदते मेदद् मेधाहिंसनयोर्द्वयोः' । इति, 'प्रैत्येकं निदिनेद्योस्तां नेदते नेदतीत्युभे । कुत्सायां सन्निकर्षे वा' इति च वक्ष्यते । तत्र च शब्दे सङ्घाते वा यौ धातू,

---

१. 'कै गै शब्दे' इति धातुपाठीयामानुपूर्वीं बोधयितुं कैधातोरुपादानम्. २. धातुपाठानुपूर्वीयम् । अस्या मूलत एव बोधाद् व्याख्यायामप्रदर्शनम् । दैवानिर्दिष्टामेव हि धातुपाठानुपूर्वीं सर्वत्र पुरुषकारो निर्दिशति. ३. इदं चतुरुत्तरशततमश्लोके. ४. इदं चतुर्दशोत्तरशततमश्लोके.

तयोः स्त्यायतीति रूपमिति । एवं तर्हि किमर्थं द्वौ पठितावित्यत उक्तम् **एकस्य सो न ष इति** । तयोरेकस्य 'स्त्यै' इत्यस्य तिस्त्यासति अतिस्त्यपादित्यादिषु संश्चङन्तेषु 'आदेशप्रत्यययोः' (८-३-५९) इति सस्य षत्वं न भवति अषोपदेशत्वेनानादेशसकारत्वात् । अन्यस्य तु तिष्ट्यासति । अतिष्ट्यपदित्यादि भवत्येवेत्यर्थः । यथादैवमेव च मैत्रेयरक्षितः । क्षीरस्वाम्यादयः पुनः शाकटायनश्च द्वितीयस्य ष्ट्यायतीत्येव रूपं प्रतिपेदिरे । तद् भाष्योक्तेन षोपदेशलक्षणेन विरुध्यते । तथा हि—'धात्वादेः षः स' (६-१-६४) इत्यत्र भाष्यम्—'अज्दन्त्यपराः सादयः षोपदेशाः स्मिङ्-स्वदि-स्विदि-स्वञ्जि-स्वपयश्च । सृपि-सृजि-सृ-स्तृ-स्तॄ-स्यासेकृवर्जम्' इति । अच्परो दन्त्यपरो वा सकारः प्रयोग आदिर्येषां सृप्यादिभ्यः सप्तभ्योऽन्येषां धातूनां ते च, स्म्यादयश्च पञ्च पाठे षादयो वेदितव्या इत्यर्थः । 'ष्वञ्ज परिष्वङ्गे' । 'ञिष्वप् शये' । 'गमॄ सृपॄ गतौ' । शेषास्त्विकारान्तादिष्वेव वक्ष्यन्ते । तत्र च स्तृ इति ह्रस्वान्तं केचिन्न पठन्ति । तथा च 'स्तॄञ् छादने' इति दीर्घान्तमेव जिनेन्द्रादयः प्रायः पठन्ति । श्रीधरस्तु 'स्तॄञ् छादने' दीर्घः 'स्तृञ् छादने' ह्रस्व इत्युभावप्युपन्यास्थत् । स्त्येति चात्र स्त्यै गृह्यते । भागवृत्तौ तु 'सीकृ-सेकृ' इत्यधिकमपि पठ्यते । तच्च 'सीकृ सेचने' इति श्रीधरो व्याकरोत्; 'एतानष्टौ वर्जयित्वा' इति चाधिक्यमेव मुक्तकण्ठमुक्तवान् । तच्चैतल्लक्षणं

१. दैवमैत्रेयरीत्या द्वयोरपि धात्वोर्दन्त्यपरसादित्वाभ्युपगतौ द्विष्पाठसाफल्यायैकस्यैव षोपदेशत्वप्रतिषेधकक्ष्यायां निवेशादपरस्मिन् षोपदेशलक्षणं प्रसरमासाद्य व्यापकत्वं प्राप्नुयात् । क्षीरस्वाम्यादिपक्षे तु तादृशविषयपरिलोपो भवतीत्येतावता विरोधो बोध्यः.

ष्ट्यायतीत्येव प्रयोगाभ्युपगमे सादित्वदन्त्यपरत्वयोरभावात् ष्ट्याय-तिं न व्याप्नुयात्। व्यापकेन च नाम लक्षणेन भवितव्यम्॥

सै क्षये सायतीतीष्टमन्तकर्माणि तु स्यति॥ ७॥

'क्षै षै जै क्षये'। सै इति तु पाठः षोपदेशलक्षणविरुद्धः। एतेनैतदपि प्रत्युक्तम्—यदुक्तं 'क्रियार्थो धातुरि'त्यत्र शाकटायनेन—"षच समवाये। सचति सिषाचयिषति। केषाञ्चिदयमषादिः पाठे। तेषां सिसाचयिषति। 'सृपिसृजिसृस्तृस्त्रिस्त्यासेकृवर्जमि'ति च यत् केषाञ्चित्, तदुपलक्षणम्। अन्यथा सचतिसायत्यादयोऽपि षादयः स्युः" इति। प्रबलविरोधे हि बाधैव दुर्बलस्य न्याय्या। न पुनरुपलक्षणादिभिरुपरोधगन्धोऽपि। तथा च पार्[2]मर्षं सूत्रं "विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्' इति। एवं च श्लोकेऽपि 'षै' इत्येव पठितुं युक्तम्। 'षो अन्तकर्मणि'। दिवादिः। तच्चावसानक्रिया॥

जानातीति श्नि सिध्येज्ज्ञपयाति तु पुनर्मारणादौ घटादेश्चौ मित्त्वेऽपीदमेव ज्ञप मिदिति पदं ज्ञापने मारणादौ। तेनार्थाज्ज्ञापनेऽर्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्यादुक्तस्योक्तिर्णिचश्चेत्युदितावहतये ज्ञापयेज्ज्ञो नियोगे॥ ८॥

'ज्ञा अवबोधने' इत्यस्य श्नाविकरणे सति जानातीति सिध्येत्। 'ज्ञाजनोर्जा' (७-३-७९) इति जादेशः। †रूपोदाहर-

१. जैमिनीयम्. २. इदं १ अध्याये ३ पादे तृतीयं सूत्रम्। अनेन हि 'औदुम्बरीं स्पृष्ट्वोद्वायेद्' इत्यादिप्रत्यक्षश्रुतिविरोधे 'औदुम्बरी सर्वा वेष्टयितव्या' इति सर्ववेष्टनादिस्मृतीनामनुमेयमूलश्रुतित्वेन दुर्बलानां बाधो बोध्यते. ३. 'चुरादिश्चुः' (११८ श्लो.) इति परिभाषया चुरादावित्यर्थः.

†'ज्ञारू' इति गपुस्तके पाठः.

णमात्रं चैतत्। प्रयोगे तु 'अकर्मकाच्च' (१-३-४५) इत्यात्मनेपदं मा भूदिति कृष्णमित्यादि कर्मोपस्कृतव्यम्[1]; अकर्त्राभिप्रायविषयं च द्रष्टव्यम्[2], अन्यथा 'अनुपसर्गात् ज्ञ' (१-३-७६) इत्यात्मनेपदप्रसङ्गात्। घटादेः पुनरस्य मारणाद्यर्थत्वे ज्ञपयतीति तु सिध्येत्। पादपूरणार्थो वा तुः। अत्र 'मारणतोषणनिशामनेषु ज्ञा' इति घटादिषु पठ्यते। इत्थमेव च 'श्लाघह्नुङ्स्था' (१-४-३४) इत्यत्र न्यासः। 'निशानेष्विति पाठ' इति तु हरदत्तः[3]। चन्द्रगोमी चैवमेवापाठीत्। क्षीरस्वामिशाकटायनकौमारास्त्वाद्यमपि पाठं पक्षान्तरत्वेन पर्यग्रहीषुः। तत्र निशामनमालोचनं चाक्षुषज्ञानम्। शाकटायनस्तु 'आलोचनं प्रणिधानमाहुः'इत्याह। निशानं तीक्ष्णीकरणं। तत्र मारणादिष्वर्थेषु ज्ञा मित्संज्ञो भवतीत्यर्थः। इति भित्त्वाण्णौ 'मितां ह्रस्व' (६-४-९२) इति ह्रस्वः। तेषु तु मारणे संज्ञपयतीति प्रयुञ्जते। शेषयोरपि कौमारानुसारेण विपूर्वः प्रपूर्वश्च प्रयोगो द्रष्टव्यः। विष्णुं विज्ञपयति, प्रज्ञपयति रूपं कोपं वेति। अथ ज्ञपिप्रसङ्गादनादन्तस्यापि ज्ञपेः फलमुक्तं—'ज्ञप मिच्च' इति चुरादिभित्त्वेऽपि इदमेव पदम्, तच्च ज्ञापने मारणादौ च प्रयुज्यत इति। केचित्[4] पुनः'ज्ञप मारणतोषणनिशामनेषु मिच्च' इति वा 'मारणतोषणनिशामनेषु ज्ञा मिच्च' इति वा पठन्ति। व्यक्तं चैतद् 'इको झल्' (१-२-९) इत्यत्र न्यासे। अनयोस्त्वाद्यमेव पक्षं क्षीरस्वामी समाशिश्रियत्। निशानेष्विति

---

१. अध्याहर्तव्यमित्यर्थः. २. अत्र विशेषोऽयम् 'एतद्' इति. ३. 'श्लाघह्नुङ्' इत्यत्रैव. ४. दर्शयति तीक्ष्णीकरोति नेत्यर्थः। अनयोश्चार्थयोः क्रमेण रूपकोपौ कर्मणी. ५. ज्ञपिविषये चुरादौ पाठभेदान् दर्शयंस्तेषु 'ज्ञप मिच्च' इति पाठस्य युक्ततमत्वं साधयितुमारभते केचिदित्यादिना.

तु विशेषः। शाकटायनः पुनरन्त्यपक्षानुकूलः। *[1]तत्र च पक्षद्वयेऽपि निशानपाठोऽपि घटादिपाठसाम्यच्छाकटायनानुकूल्याच्च द्रष्टव्यः। क्षीरस्वामिपक्षे पुनर्निशामनपाठोऽपि। 'ज्ञप मिच्च' इत्येव तु मैत्रेयरक्षितः। 'श्लाघह्नुङ्स्था' (१-४-३४) इत्यत्र न्यासकारश्च "सर्वथापि 'ज्ञा छ ज्ञीप्सायां' 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' (१-४-३४) इति ज्ञाने ज्ञापनेऽपि च प्रयोगदर्शनान्मारणाद्यर्थानामुपलक्षणत्वादयं ज्ञपिर्यथादृष्टमर्थान्तरेऽपि भवति" इति। [2]एवं च 'ज्ञप मिच्च' इत्येव पाठो युक्ततमः। येनैवं मारणादौ ज्ञापने चार्थे ज्ञपयतीति सिद्धं, तेनार्थाद् ज्ञापनेऽर्थे द्वैरूप्यं भवति। यथा हि चुरादौ 'ज्ञप मिच्च' इति ज्ञापनेऽपि मित्त्वविधानाश्रयणाद्ध्रस्वो भवति, तथा घटादौ मारणादिविशेषणबलात् ततोऽन्यत्र मित्त्वाभावाद्ध्रस्वो न भवतीत्यर्थाज्ज्ञापने द्वैरूप्यम्। अथ घटादौ मारणादिपूक्तस्य मित्त्वस्य चुरादावपि तेष्वेवोक्तिः किमर्थेत्यत उक्तम् – **उक्तस्योक्तिर्णिचश्चेत्युदितस्यात्मनेपदस्य विघातार्था बाधनार्थेति**। अर्थाच्च चुरादिणिचोऽन्यत्राविघातं ब्रुवता ज्ञपयत इत्यपि [3]तत्र स्यादित्युक्तं भवति। अयं च विभागश्चुरादिण्यन्तेभ्यो 'णिचश्च' (१-३ ७४) इत्यात्मनेपदाभावपक्षमाश्रि-

१. निशामनपाठस्य न्यासतः सिद्धत्वान्निशानपाठं साधयितुमाह–**तत्रेत्यादि**। **शाकटायनानुकूल्यं** च निशानेषु ज्ञा मिच्चेत्येव तेनाश्रयणाद् बोध्यम्। क्षीरस्वाम्यानुकूल्यं तु न केवलं निशानपाठस्य, किंतु निशामनपाठस्यापीत्याह–**क्षीरस्वामिपक्षे** इति. २. ज्ञापनाद्यविकार्थसङ्ग्रहाय न्यासकारेण मारणाद्यर्थनिर्देशस्याव्यावर्तकत्वाभिधानाद् 'ज्ञपिः' ज्ञान पकारविशिष्टतया धातुस्वरूपस्य निर्देशाच्चेत्यर्थः. ३. घटादौ. ४. अयं पक्षो मैत्रेयरक्षितोक्तत्वेन भूधातौ दर्शितः.

*'अत्र' इति घपुस्तके पाठः.

त्योक्तः । पक्षान्तरे तु मारणादिष्वन्यतः सिद्धत्वात् ततोऽन्यत्रैवानेन विधिर्युक्तः । 'ज्ञा †नियोगे' । आज्ञापयेत् ॥

मिमीते मायते माने माति तत्रैव शब्लुकि ।
मयते प्रणिदानेऽर्थे

'माङ् माने शब्दे च' । जुहोत्यादिः । §माङ्मानशब्दयोरित्यनुक्तिरन्वाचयद्वारा शब्दे प्रयोगाप्राचुर्यार्था[1] नूनम् । यदाह 'गाधृप्रतिष्ठालिप्सयोर्ग्रन्थे च' इत्यत्र क्षीरस्वामी—'*अत्र पृथक्पाठो विरलप्रयोगार्थ' इति । व्यभिचरति[2] चैतत् 'पूयी विशरणे दुर्गन्धे[3] च' इत्यादौ । 'भृञामित्' (७-४-७६) इत्यभ्यासस्येत्त्वम् । 'माङ् माने' दिवादिः । अयं च मैत्रेयरक्षितेनानुमतः; नतु बहुभिः । तथा च 'घुमास्थागापाजहातिसां हलि' (६-४-६६)इत्यत्र न्यासः—"मा इति कस्येदं ग्रहणं, किं 'मेङ् प्रणिदान' इति भौवादिकस्य, उत 'माङ् मान' इति जौहोत्यादिकस्य, आहोस्विद् 'मा मान' इत्यादादिकस्य । 'गामादाग्रहणेष्वविशेष' इति त्रयाणामपि ग्रहणम्" इति । क्षीरस्वामी तु दिवादावेवाह—'माङ् मान इति दुर्ग' इति । 'मा माने' । आधेयस्याधारादनधिकपरिमाणतात्र मानम् । तेनाकर्मकोऽयम् । मान्ति तण्डुलाः स्थाल्यामिति । 'मेङ् प्रणिदाने' । तच्च विनिमयः । अपमयते विनिमयत इत्यादिः सोपसर्गस्यैवास्य प्रयोगो दृश्यते ॥

---

१. माङः शब्दरूपेऽर्थे या वृत्तिस्तदप्राचुर्यलक्षणानुषङ्गिकत्वरूपोऽन्वाचयश्च-शब्दस्यार्थः. २. उक्तं फलं सम्भाव्यते, न पुनरवधार्यते वक्ष्यमाणव्यभिचारादिति भावः. ३. दुर्गन्धे प्रयोगप्राचुर्यादिति शेषः.

†'नियोजने' इति घपुस्तके पाठः. §'माङ्मानशब्दयोरिति त्वनु' इति गपुस्तके पाठः. *'अस्य' इति घपुस्तके पाठः.

श्राति श्रायति लुक्शपोः ॥ ९ ॥

'श्रा पाके' । 'श्रै पाके' । सं च द्विविधः । अन्यकर्तृकः पच्यमानकर्तृकश्च । यथा—चैत्रः पचति । पच्यते ओदनः स्वयमेवेति । पचतीत्यस्याग्न्यादिभिस्तण्डुलान् विक्लेदयतीत्यर्थः । पच्यत इत्यस्य विक्लिद्यतीति । तत्र चान्त्यः क्वाथ इत्यके । श्रायति यवागूः क्वथतीत्यर्थः । अथ घटादौ च 'श्रा पाक' इति पठ्यते; चुरादौ च कैश्चित् । यदुक्तं 'श्रृतं पाके'(३-१-२७)इत्यत्र न्यासे—'श्रा पाक इत्यदादौ च पठ्यते, घटादिषु च मित्संज्ञार्थः, कैश्चिच्चुरादावपि, 'श्रै पाक' इति भ्वादौ पठ्यत' इति । तथा च चन्द्रगोमिना चुरादावपि 'श्रा पाके' इति पठ्यते । तत्र च घटादौ 'श्रा पाक' इत्यस्यार्थे वृत्तिकृतो विवदन्ते । तत्र तावच्छ्रातिश्रायत्योः सामान्यानुकरणमिति मैत्रेयरक्षितक्षीरस्वामिशाकटायनाः श्रातेरनुकरणमिति हरियोगी । सर्वथापि पाकेऽर्थे श्रा मिश्रवतीत्यर्थः । श्रपयति श्रपयते । पाकादन्यत्र श्रापयति घर्मः । स्वेदयतीत्यर्थः । चुरादौ चैतदेव रूपं 'नान्ये मितोऽहेतौ' इति मित्त्वनिषेधात् । येषां चुरादौ मित्त्वमुक्तं ज्ञपयति यमयति चहयति चपयतीति, तेभ्योऽन्ये धातवो हेतुमण्णिचोऽन्यत्र णौ मितो न भवन्तीत्यर्थः । तदेवं चतुर्षु श्रीपाकेषु सत्स्वपि द्वयोरेव फलव-

---

१. पाकश्च. २. विक्लेदनरूप इत्यर्थः. ३. विक्लित्तिरूप इत्यर्थः. ४. श्राश्रैधात्वोः. ५. 'अर्थे' इति तादर्थ्येऽव्ययम् । घटादिपठितश्राधातुविषय इत्यर्थः. ६. धातुपाठव्याख्यातार इत्यर्थः. ७. चहस्थाने 'चप' इति मैत्रेयस्य पाठादिदं रूपम् । एवञ्च ज्ञपादिपञ्चके त्रयाणां प्रदर्शनमन्ययोरप्युपलक्षणमसति पाठभेदे . ८. 'श्रा पाके' इति समुदायानुकरणाद् एदन्तात् सुप् । तदाकारेषु पाठेष्वित्यर्थः । श्रापाठेष्विति तु तात्पर्यम् .

चनं घटादेर्ज्ञपयातिवदूह्यत्वाच्चुरादेश्च मैत्रेयरक्षितादिवृत्तिष्वदर्शनाद्[1]। 'उक्ता न दुष्यन्त्यन्यसम्भवे' इति वक्ष्यमाणनीत्या निर्वाहः सर्वत्राप्यभ्यूह्यः ॥

गतिगन्धनयोर्वाति वायतीति तु शोषणे ।
वयते वयतीत्येवं तन्तुसन्तान इष्यते ॥ १० ॥

'वा गतिगन्धनयोः' अदादिः। गन्धनं मर्दनं हिंसा। तथा कथादौ क्षीरस्वामी—"'वा गतिसुखसेवनयोः'[2]। वापयति। वातेत्येके। वातयति अववातद्" इति। हेमचन्द्रस्तु 'वातणि'ति पठित्वा 'सुखसेवनयोरित्येक' इति चोक्त्वा 'वेत्येक' इत्यप्याह। णित्त्वं चुरादित्वचिह्नम्। 'पै ओवै शोषणे' 'वेञ् तन्तुसन्ताने' ॥

गतौ त्यागे यथासङ्ख्यं जिहीते च जहाति च ।

'ओहाङ् गतौ' 'भृञामिद्'(७-४-७६)इतीत्। 'ओहाक् त्यागे' जुहोत्यादिः ॥

रै शब्दे रायतीतीष्टं रा दाने राति शब्लुकि ॥ ११ ॥

'रा ला आदान' इति चन्द्रः। तन्मतेनात्राप्याङ्प्रश्लेषो द्रष्टव्यः[3] ॥

स्नातीति शौचे †स्नः स्नायेदिति चेच्छन्ति केचन ।

---

१. दैवस्यान्तिमश्लोकशेषोऽयम्. २. कथादिपाठसामर्थ्यादेव सवर्णदीर्घानापन्नो ह्रस्वाकारो धातोरन्ते णिज्विवक्षायां 'अतो लोप' (६-४-४८) इति लुप्तः कल्प्यः। धातोश्चैवमग्लोपित्वाद् 'अववापद्' इति लुङि रूपं द्रष्टव्यम्. ३. मूले 'रा दान' इत्यत्रापि.

†'तु' इति क-गपुस्तकपाठः

इति च क्वचित् कोशे दृश्यते । 'ष्णा शौचे' । अदादिः । 'ष्णै शौचे' । तथा च—

'पाञ्चाल्याः पद्मपत्राक्ष्याः स्नायन्त्या जघनं घनम् ।
या स्त्रियो दृष्टवत्यस्ताः पुम्भावं मनसा ययुः ॥'

इति भगवान् व्यासः । 'स्नाति स्नायत्याप्लुवत' इति चाख्यातनिघण्टुः । 'उष्णीषं स्नायतेः' इति निरुक्तं चैवमेव व्याचख्युः—'उष्णीषं शिरोवेष्टनं । स्नायतेः शौचार्थस्य वेष्टनार्थस्य वोभयस्यापि तत्र सम्भवाद्' इति । एवं च 'ष्णै वेष्टन' इत्यस्यापि स्नायेदिति द्रष्टव्यम् । क्षीरस्वाम्यादीनां च बहूनामनुमतोऽयं पाठः । देवेन तु 'ष्टै वेष्टने स्तायति तिष्टापयिषति' इति मैत्रेयरक्षितोक्ततकारविस्रम्भान्नायमनुसृतः ॥

क्षये क्षयति हिंसायां क्षिणातीति षितो भवेत् ॥ १२ ॥
निवासगत्योः क्षियति क्षिणोत्यावगुणे क्षिणोः ।
[एके क्षेरेव भाषायां क्षिणोतीति पदं विदुः ।]

अत्रान्त्यमर्धं क्वचिदेवं दृश्यते । 'क्षि क्षये' । 'क्षिरैश्वर्ये इत्येके' इत्येवं क्षीरस्वामी; 'ऋभून् क्षयति ईष्टे ऋभुक्षेन्द्रः' इति च । 'क्षिष् हिंसायां' । क्र्यादिः । षिद्ग्रहणमस्यैव पाठस्योपलक्षणार्थं, 'रि क्षि' इति वक्ष्यमाणक्षिव्यावृत्त्यर्थं च, 'षिन्निदाद्यादिभ्योऽङ्

---

१. क्वचिदेवेत्यनुक्त्या बहुष्वदर्शनेऽप्येकत्र दर्शनं वक्ष्यमाणप्रयोगतः स्नाधातुपुनःपाठावधारणादादरणीयं मन्यते । अन्यथा तु समनन्तरश्लोकव्याख्यायामिव अदर्शनस्यादरणीयतां सूचयितुं निषेधप्रधानमेवकारं निर्दिशेत्. २.' शौचार्थस्य' इति भगवद्दुर्गः. ३. एवकारलभ्यस्य बहुष्वदर्शनस्य प्रधानवाक्यार्थस्यादरणीयतां मन्यते क्षिणोतीति पदस्यान्यतः सिद्धत्वात्.

(३-३-१०४) इत्यङि कृते क्षियेत्येवंरूपफलसूचनार्थं च। दीर्घान्तोऽयमित्येके। 'क्षीणाति' इति हेमचन्द्रः। 'क्षि निवासगत्योः'। तुदादिः। औ उविकरणे अगुणे 'संज्ञापूर्वको विधिरनित्य' इति गुणाभावे च सति 'क्षणु हिंसायां क्षिणु च' इति मैत्रेयरक्षिताद्युक्तस्य धातोः क्षिणोतीति भवति। अस्य च नुमादिनान्यभावेऽपि क्षिसादृश्यादत्रोक्तिः। स्वरितेत्त्वाच्च क्षिणुत इत्यात्मनेपदस्याप्युपलक्षणमेतत्। हरियोगी तु अत्र 'संज्ञापूर्वको विधिरनित्य' इत्येतदनादृत्य क्षेणोतीत्युदाहार्षीत्। तथैव च चान्द्रेण पूर्णचन्द्रेण 'ऋणु गतौ' 'तृणु अदने' 'घृणु दीप्तौ' इत्यत्र अर्णोति तर्णोति घर्णोतीत्युदाहृत्योक्तं—"'धातोर्लघोरुपान्त्यस्यादेङ् नेष्यत' इत्यन्यः। तस्याभिप्रायो मृग्य" इति। क्षीरस्वामी पुनः क्षणुमेव पठित्वा 'क्षिणु इति दुर्गः क्षिणोति' इत्याह; ऋणोतीत्यादि चोदाहृत्य 'एते सार्वधातुके सन्दिग्धगुणाः अर्णोति' इत्याद्याह। क्षेरेव तु श्नौ सति भाषायामपि क्षिणोतीति भवतीत्येके। तथा च मैत्रेयरक्षितः स्वादिगणे 'तृप प्रीणने' इत्यस्यानन्तरं पठ्यमानं छन्दसीत्येतद् व्याचक्षाणः 'छन्दसीत्यागणपरिसमाप्तेरधिक्रियत' इति क्षीरस्वामिवदुक्त्वाह—"'रि क्षि चिरि जिरि दाश ट हिंसायाम्'। क्षिणोति। भाषायामप्यस्य प्रयोगं केचिदिच्छान्ति। 'पञ्चबाणः क्षिणोति'" इति। क्षीरस्वामी तु ऋक्षि इति पठित्वा ऋँङ्क्षणोतीति ऑनृङ्क्ष इति चोदाहृत्य 'ऋणोति क्षिणोतीत्येके' इत्याह॥

---

१. दीर्घान्तत्वमेवादृतं सिद्धान्तकौमुद्याम्. २. आदिना तृणोति घृणोति. ३. आदिना तर्णोति घर्णोति. ४. इदित्त्वान्नुम्। सिद्धान्तकौमुद्यां तु एकधातुपक्षे 'ऋक्षिणोति' इत्युदाहरणं दृश्यते. ५. अयं प्रयोगो मन्त्रे मृग्यः. 'इजादेश्च गुरुमतोऽनृच्छः' (३-१.३६) इत्याम् 'अमन्त्र इति' निषेधान्न.

जयेज्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः ॥ १३ ॥
उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः ।

'जि जये' । जयेत् कृष्णः । सर्वोत्कर्षेण वर्तेतेत्यर्थः । 'जि अभिभवे' । जयेत् कंसम् । 'जि, ज्रि अभिभवे' इति क्षीरस्वामी । 'अभिषव इत्यपरे' इति *च पूर्णचन्द्रः । तत्र च ज्रि इति पाठो ज्रयतीति ताभ्यामुदाहृतोऽपि 'जिगादुपज्रयति गोरपीच्यम्' इत्यादिदर्शनादार्षः । सर्वथाप्यर्थभेदाद् द्विष्पाठ इति तात्पर्यार्थः । [२]एवं च 'ज्रि अभिभवे' 'जि जये च' इति सकृदेव पाठश्चिन्त्य इत्यप्यर्थादायातम् । [३]सकर्मकाकर्मकोक्त्या तु प्रयोगभेदश्चास्तीत्युक्तम् । नन्वेवमपि 'जि जय' इत्येव द्वावप्यर्थौ सिद्धौ जयत्वाविशेषादित्यत उक्तम् **उत्कर्षप्राप्तिरिति** । न जय इति जयमात्रं गृह्यते । द्विष्पाठबलाद् गोर्[४]बलीवर्दनीत्या जयविशेषस्यैव ग्रहणात् । द्विष्पाठस्त्वर्थप्रयोगभेदौ व्यङ्क्तुमित्यभिसन्धिः ॥

अयत्येतीयते गत्यामधीतेऽध्येति चेङिकोः ॥ १४ ॥

'इ गतौ' । 'ईं' इत्येके । अनयोश्च पाठयोरियाय अयाञ्चकारेति फलभेदः । तयोश्चाद्ये 'अभ्यासस्यासवर्णे' (६-४-७८) इतीयङादेशः । अन्त्ये तु 'इजादेश्च गुरुमतोऽनृच्छः' (३-१-३६)

---

१. इदं ७ अष्टके २ अध्याये २९ वर्गे ९ ऋचि । उपज्रयतीत्यस्य उपगच्छतीत्यर्थो वर्णितः सायणाचार्यैः. २. द्विष्पाठस्य प्रामाणिकत्वे सिद्ध इत्यर्थः. ३. 'आद्येऽर्थेऽसावकर्मकः' इत्युक्त्या. ४. गोशब्दस्य गोविशेषपरत्वाश्रयणन्यायेन.

---

*'च' इति न पश्यते गपुस्तके.

इत्यामः[1]। तत्र चैकत्वेऽप्यादिवद्भावव्यपदेशिवद्भावाभ्यामिजादित्वगुरुमत्त्वे[2]। व्यक्तौ चैतौ पक्षौ[3] मैत्रेयरक्षितवृत्तौ। अपरे पुनरुभावपि न पठन्ति। व्यक्तं चैतद् धनपालशाकटायनवृत्त्योः। अपि च 'शौटृ गर्वे' इत्यादिकान् कांश्चन[4] धातून् पठित्वान्ते च 'उदात्ता' इत्युच्यते। तच्चास्मिन् प्रकरणेऽयतेरपि पाठे सति तस्य 'अनिट्[5] स्वरान्तो भवतीति दृश्यताम्' इत्यनुदात्तत्वात् प्राचुर्याभिप्रायेण कथञ्चिन्नेयं स्याद्, यथा वा मैत्रेयरक्षितः—'उदात्तत्वमयतिवर्जम्, भट्टग्रामन्यायेन[6] तूदात्ता इत्युच्यते' इति। स चायं न्यायः सुनिश्चित एवायतेः पाठे शोभेत; विप्रतिपन्ने पुनरुदात्तोक्त्याङ्गस्यवशादपाठपक्ष एव साधीयान्[7]। उदयतीत्यादि चैवमसाध्वेवास्तु। क्षीरस्वामी पुनः 'इट किट कटी गतौ' इति पठित्वा 'ईदित्त्वात् कट्टः कट्टवान्। अन्ये इदितमेनम् ईं च प्रश्लिष्टमाहुः' इति चोक्त्वा कण्टति कं[8](ण्टा?)ण्टकफलः, मानुषकण्टकः 'उदयति दिननाथे याति शीतांशुरस्तम्' इति चोदाहृत्य (दिङ्[9]कालादप्ययगतौ?) इति पठित्वैतदेवोदाहरन् साध्वेव मन्यते। 'इण् गतौ'। अदादिः। 'ईङ् गतौ'। दिवादिः। 'इङ् अध्ययने'।

---

१. आम्प्रत्ययस्यादन्तत्वमभित्त्वाय. २. आदिवद्भावस्य वचनं व्यपदेशिवद्भावेन गतार्थत्वं व्यङ्क्तुम्. ३. इ, ई इति पाठभेदपक्षौ. ४. गडिपर्यन्तान्. ५. 'एकाच उपदेशेऽनुदात्तात्' (७-२-१०) इति सूत्रे काशिकायामनिट्कारिकेयम्. ६. 'भूयसा व्यपदेश' इति न्यायेन. ७. साधीयःपक्षे. ८. 'पनसः कण्टकफल' इत्यमरः. ९. कुण्डलनान्तर्गतं "हिक्कादौ 'अय व्यय गतौ'" इति संस्कृत्य पठनीयं प्रतिभाति। हिक्कप्रभृतिगुहूपर्यन्तधातुगणो हिक्कादिः। अत एव तेन स्वरितेता 'उदयति' इति प्रयोगस्य सिद्धत्वात् 'कटी' इत्यत्र धात्वन्तरप्रश्लेषमन्यपक्षीयं वदन् क्षीरस्वामी स्वयं न रोचयाम्बभूव.

'इक् स्मरणे' । अदादी । 'इङिकावध्युपसर्गं न व्यभिचरतः' इत्याहुः । 'तदधीते तद्वेद' (४-२-५९) 'अधीगर्थदयेशां कर्मणि' (२-३-५२) इति निर्देशश्चैवमेव युज्यते ॥

सिनोति सिनुते बन्धे सिनीते च सिनाति च ।

'षिञ् बन्धने' । स्वादिः क्र्यादिश्च ॥

ईषद्धासे स्मयेतेति स्माययेतेत्यनादरे ॥ १५ ॥

'स्मिङ् ईषद्धसने' । 'स्मिट अनादरे । स्मिङित्येके' इति मैत्रेयरक्षितः । तत्र च स्मिङ्पक्षेऽवयवद्वारा ण्यन्तस्यापि ङित्त्वादात्मनेपदम् । अवयवे हि कृतं लिङ्गं समुदायस्य विशेषकं भवति, तच्चेत् तत्राकृतार्थं; यथा सक्थनि कर्णे वा कृतं गोः । 'अट्ट स्मिट अनादर' इति तु टवर्गान्तकाण्डे शाकटायनः । क्षीरस्वामी त्वाह—" 'स्निट स्नेहने' स्नेटयति । स्मिटेत्येके । 'स्फिट अनादरे' स्फेटयति । संस्फेटस्तुमुलं युद्धम्[1]" इति ॥

श्रीणाति पाके श्रीणीते सेवायां श्रयते श्रयेत् ।

'श्रीञ् पाके' । क्र्यादिः । 'श्रिञ् सेवायाम्' ॥

मीञो मीनाति मीनीते हिंसायां मीयते ङितः ॥ १६ ॥
मिनोति मिनुते स्वादेर्गतौ मयति माययेत् ।

'मीञ् हिंसायाम्' । क्र्यादिः । 'मीङ् हिंसायाम्' । दिवादिः । 'डुमिञ् प्रक्षेपणे' । 'मी गतौ' । युजादिः[2] । मताविति क्षीरस्वामी ।

यौ द्रवीकरणेऽनात्वे लीनयेल्छाययेल्छयेत् ॥ १७ ॥
लापयेल्छालयेदात्वे श्लेषणे लीयतेऽलिनात् ।

---

१. अत एव 'कलिसंस्फेटसंयुगा' इत्यमरकोशे संस्फोटपाठस्यायुक्तत्वमाह क्षीरस्वामी तद्व्याख्यायाम् . २. आधृषीय इत्यर्थः.

'ली द्रवीकरणे' इति युजादौ पठितस्य लियो 'विभाषा लीयतेः' (६-१-५१) इत्यात्वाभावपक्षे 'लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने' (७-३-३९) इति नुकि सति लीनयेदिति भवति; असति तु लायेयदिति । णिजभावे तु लयेदिति । आत्वपक्षे पुनर्लुगागमे सति लालयेदिति; तदभावे तु पुकि लापयेदिति । तत्रात्वमयुक्तं[1] 'विभाषा लीयतेः' इत्यत्र 'लिनातिलीयत्योर्यका निर्देश' इति भाष्येण युजादिलिय आत्वाभावात् । देवेन तु मैत्रेयरक्षितविस्रम्भादेतदुक्तम् । 'लीङ् श्लेषणे' । दिवादिः । 'ली श्लेषणे' । क्र्यादिः । 'प्वादीनां ह्रस्वः' (७-३-८०) इति ह्रस्वः ॥

स्रवणे रीयते रीङो रिणाति गतिरेषयोः ॥ १८ ॥

'रीङ् स्रवणे' । दिवादिः । 'री गतिरेषणयोः' । प्वादिः । रेषणं वृकशब्दः । यदाह यादवप्रकाशः—'वृकस्य रेषणं रेषा हेषा ह्रेषा च वाजिनाम् । बृंहितं करिणां शब्दः' इति ॥

व्रीणाति वरणे तत्र व्रीङो व्रीयेत तु श्यनि ।

'व्री वरणे' । क्र्यादिः । येथा[2] पुनः 'प्वादीनां ह्रस्वः' (७-३-८०) इत्यत्र वृत्तिः[3]—"प्वादयः क्र्यादिषु पठ्यन्ते 'पूञ् पवन' इत्यतः प्रभृति 'ष्ठ्री गतौ वृद्' इति यावत् । केचिदिच्छन्ति वृत्करणमेतत् प्वादीनां ल्वादीनां च परिसमाप्त्यर्थमिति ।

---

१. अतो लालयेलापयेदिति रूपे युजादिलियोऽप्रामाणिके इत्यर्थः. लीनयेदित्यपि 'लीलो'रित्यत्र लाक्षादृश्यादस्वार्थणिजिविषय एव लीधातुर्गृह्यते, नतु युजादिरिति तदनाश्रित्य समर्थनीयम्. २. येन प्रकारेण. वृत्तिरित्यनेनास्य सम्बन्धः. अस्य च यथाशब्दस्य 'तथाप्यापि' इति वक्ष्यमाणतथाशब्देन प्रतिनिर्देशः. ३. काशिका.

अपरे तु ल्वादीनामेव परिसमाप्त्यर्थं वृत्करणमिच्छन्ति आगणान्ताः प्वादय" इति, तथास्यापि प्वादित्वं पक्षे स्यात् । यथा तु 'ज्ञाजनोर्जा' (७-३-७९) इत्यत्र भाष्यं—"दीर्घोच्चारणं किमर्थम् । 'अतो दीर्घो यञि' (७-३-१०१) इति दीर्घत्वं भविष्यति" इति, तथैतन्नेष्यते । यदि हि वृत्त्युक्तरीत्या क्र्यादिगणान्तात् प्वादयः, तदा जानातेरपि प्वादित्वेन ह्रस्वे प्राप्ते तद्व्यावृत्त्यर्थमेव दीर्घोच्चारणं स्यादिति कैमर्थक्यं न स्यात् । तस्मादावृत्करणादेव प्वादयः । वृत्तिश्च यावदित्यन्तात्रैवाञ्जस्यं धत्ते । वृत्कृतं चैवं वृत्तः समाप्तोऽयं प्वादिर्ल्वादिश्च क्र्याद्यवान्तरगण इत्यर्थकं, 'पूञ् पवने' 'लूञ् छेदने' इत्यदूरपाठादुभयोरपि गणयोरवध्यपेक्षायाश्चाविशेषात् । ल्वाद्यानन्तर्यमतन्त्रम् । अतश्च व्रियो वृत्करणात् परत्वेन प्वादित्वाभावात् व्रीणातीति साधूक्तं देवेन । 'व्रीङ् वृणोत्यर्थे' । स च वरणम् । अन्योऽप्यर्थो यथाप्रयोगं गम्यः ॥

व्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीते तर्पणे ञितः ॥ १९ ॥
अणौ यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत् ।

'व्रीङ् प्रीतौ' । प्रीयते । दिवादिः । 'व्रीञ् तर्पणे कान्तौ च' । क्र्यादिः । कान्तिः कामना । 'व्रीञ् तर्पणे' । युजादिः । तत्र **अणावित्यादेरेषोऽर्थः**—यौ तु तर्पणे ञितः प्रीणयेदित्यादि स्याद्; न च ञित्त्वादेव प्रयत इतिवत् प्रीणयेतेत्यपि स्यात्, अप्यन्ता-

---

१. तेन प्रकारेण पक्षद्वयपरकाशिकारीत्येत्यर्थः. २. आङः प्रश्लेषोऽत्र बोध्यः. ३. एतच्चावश्यकम् अङ्गवृत्तपरिभाषाज्ञापनाय. ४. अत्रैव आवृत्करणात् प्वादित्व एव । 'अन्यथा 'ह्री गतौ वृदिति यावद्' इत्ययमंशः 'केचिदिच्छन्ती'त्यादिना वक्ष्यमाणत्वान्न वक्तव्यः स्यात् । उक्तश्चासौ स्वानुमतत्वसूचनार्थ इत्याभिप्रायः. ५. वृत्करणम्.

वस्थायां त्रित्वाख्यस्य लिङ्गस्य कृतार्थत्वादिति । तत्र चाद्ये रूपे 'णिच्प्रकरणे धूञ्प्रीञोर्नुग्वचनम्' इति वार्त्तिकेन नुक् । धूञ्-प्रीणोरिति तु पाठे क्र्यादेरेवानेन नुग्विधानात् प्राययेदिति पठितव्यम् । आह चात्र हरदत्तः — 'श्नान्तानुकरणाद्दै-वादिकस्य न भवति' इति । दैवादिकग्रहणेन चात्र चौ-रादिकोऽप्युपलक्षयितव्यः । तथा 'धूञ्प्रीणात्योर्नुग्' इति कौ-माराः । धातुवृत्तिकाराः पुनर्युजादावपि प्रीणयतीत्युदाहरन्तो धूञ्प्रीञोरित्येव पाठं मन्यन्ते । तन्त्रान्तरीयाश्चैवमेव पठन्ति ॥

विहायसां गतौ डीङो डयते डीयते पदे ॥ २० ॥

'डीङ् विहायसां गतौ' । भ्वादिर्दिवादिश्च । विहायसां विहगानाम् । 'डीङ् आकाशगमन' इति भूवादौ चन्द्रः । तथा भीमसेनोऽप्यत्र विहायसेति पपाठ । धनपालश्चाकाशगताविति व्याकुर्वन्नेवमेव पपाठ । दिवादौ तु 'डीङ् गतौ' इति क्षीरस्वामि-धनपालौ तन्त्रान्तरीयाश्च ॥

षुञः सुनोति सुनुते प्रसवैश्वर्ययोरसौत् ।
गतौ तयोश्च सवति द्विरुक्त्या† तस्य सो न षः ॥ २१ ॥

'षुञाभिषवे' । स्वादिः । 'षु प्रसवैश्वर्ययोः' । अदादिर्भूवा-दिश्च । 'ओमिति ब्रह्मा प्रसौति'[2] इत्यादिदर्शनात् प्रसवोऽभ्य-नुज्ञा । 'उतो वृद्धिर्लुकि हलि' (७-३-८९) इति वृद्धिः । 'सु, सु गतौ' । द्विरुक्त्येति । 'सु गतौ' । 'षु प्रसवैश्वर्ययोश्च' इति पाठ्ये सोर्द्विष्पाठाद् गत्यर्थस्य सुसावेत्यादौ षत्वं न भवतीत्यर्थः । भाष्ये

१. अश्नान्तत्वाविशेषादित्यर्थः. २. इदं तैत्तिरीयोपनिषदि ८ अनुवाके । प्रसौति अभ्यनुजानातीत्यर्थः.

†'क्त्यैकस्य' इति खपुस्तके पाठः.

तु नैतादिच्छन्ति। यदि ह्यच्परः सादिरप्यषोपदेशः स्यात्, तदा भाष्योक्तम् 'अज्दन्त्यपराः सादयः षोपदेशा' इति षोपदेशलक्षणमव्यापकं स्यात्। अत एव 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' (१-३-८६) इत्यत्र 'दु द्रु गतौ' इति पठित्वापि 'स्रु गतौ' इत्येव न्यासे पठ्यते; न तु 'सुं स्रु गतौ' इति। अपरे पुनः 'शु[द्रि?]स्रु गतौ' इति पठन्ति। तथा च 'शु दु द्रु स्रु गतौ' इति शाकटायनः। क्षीरस्वामी तु 'शु श्रु गतौ' इति पठित्वा शवति शृङ्गं प्ररोहः, आश्नृणोति चैत्रायेति चोदाहृत्य 'श्रु श्रवण' इत्यस्य स्थाने 'स्रु गतौ' इत्यपि पपाठ। 'शुसिचिमीनां दीर्घश्च' इति चोणादौ क्रनि शूरशब्दो व्युत्पाद्यते। 'शूरः शवतेर्गतिकर्मणः' इति च नैरुक्ताः। न चान्यः शुर्दृश्यते। उणादिवृत्तौ तु सौत्रोऽयं धातुः॥

स्थैर्ये ध्रवति गत्यां तु स्थैर्ये च ध्रुवतीति शे।

'ध्रु स्थैर्ये'। 'शु, दु, द्रु, स्रु गतौ। ध्रु स्थैर्ये च' इति शाकटायनः। 'ध्रु गतिस्थैर्ययोः'॥

दुनोति दूयते तापे दवतीति गतौ पदम्॥ २२॥

'टुदु उपतापे'। स्वादिः। 'दूङ् परितापे'। दिवादिः। 'दु द्रु गतौ'॥

अव्यक्तशब्दे कवते कुवते त्वार्तशब्दने।
कौतीति शब्दमात्रे स्याद्

---

१. द्रुधातुमात्रे प्रदर्शनीये अधिकवचनेन धातुपाठस्थपाठाकारविशेषप्रदर्शनसंरम्भमाविष्कृत्यापीत्यर्थः. २. यद्येष पाठोऽभाविष्यद्, अवश्यमदर्शयिष्यत 'दु द्रु गता'वितिवत्.

'कुङ् शब्दे'। भ्वादिस्तुदादिश्च। अत्रान्त्ये 'गाङ्कुटादि' (१-२-१) सूत्रे हरदत्तः—"आकूतमिति प्रयोगदर्शनात् 'कूङ्शब्द' इति दीर्घान्त" इति। 'अन्ये कूङिति पठन्ति। आकूतमिति प्रयोगदर्शनाद्' इति धनपालः। 'ऊकारान्तोऽप्यङ्गीचक्रे, आकूतम् आकूत्यै इति' इति भूवादि (१-३-१) सूत्रे सुधाकरः। कुङ् कूङिति च शाकटायनः। 'कु शब्दे'। अदादिः। तदेवं यद्यप्येते शब्दमात्रे पठ्यन्ते, तथाप्यर्थविशेषः प्रयोगवशादाश्रीयते। तथा च 'न कवतेर्यङि' (७-४-६३) इत्यत्र न्यासः—'सत्यपि शब्दार्थत्वे भिद्यत एवैषामभिधेयम्। तथा †च कवतिरव्यक्तशब्दे वर्तते। उष्ट्रः कोकूयत इति। कुवतिरार्तस्वरे। कुवते पीडित इति। *कौतीति शब्दमात्र' इति। क्षीरस्वामिमैत्रेयरक्षितौ§ च 'कु शब्द' इत्यत्रैतामेव व्यवस्थामातस्थाते। सर्वत्रैवं प्रयोगविशेषादर्थविशेषोऽप्यनेकार्थवदास्थेयः‡। न पुनः पाठ एव शरणम्॥

रवते रौति शब्दने॥ २३॥

'रुङ् गतिरेषणयोः'। अत्र च रेषणस्य वृकशब्दत्वाच्छब्दन इत्येकं नेतव्यम्। एतच्च गतेरप्युपलक्षणम्। 'रुङ् शब्द' इत्येव तु पाठे सति शक्यमक्लेशेन नेतुम्। यथा त्वत्र

१. अत एतामेव तदनुसारी देव आदद्रे. २. न केवलमर्थभेदः, किन्तु अर्थैक्येऽपि तद्गतविशेषोऽप्यवसातव्यः प्रयोगभेदात्. ३. रेषणपरतया समर्थनीयम.

†'हि' इति गपुस्तके पाठः. *'कौतिः शब्द' इति गपुस्तके पाठः. §'क्षीरस्वामी मैत्रेयरक्षितश्च' इति घपुस्तके पाठः. ‡'र्थत्ववदास्थेयः' इति गपुस्तके पाठः.

क्षीरस्वामी — "रेषणं हिंसाशब्दः । रवते । अदादौ 'रु शब्दे' रौति" इति, यथा चादादौ "रु शब्दे । रौति । भ्वादौ 'रुङ् गतिरेषणयोः' रवत" इति, तथा चायं पाठो नैवास्तीति गम्यते ॥

यावयेत जुगुप्सायां मिश्रणे यौति बन्धने ।
युनाति च युनीते च

'यु जुगुप्सायाम्' । चितादित्वात् तङ् । यदाह — 'आकुस्मादात्मनेपदी' इति । 'चित संचेतन' इत्याद्याः 'कुस्म' इत्यन्ता धातव आत्मनेपदिन इत्यर्थः । "'युज कुत्सायाम्' इत्येके । योजयते" इति क्षीरस्वामी । 'यु मिश्रणे' । अदादिः । 'युञ् बन्धने' । क्र्यादिः ॥

स्तुत्यां नुवाति नौति वा ॥ २४ ॥

'णू स्तवने' तुदादिर्दीर्घान्तः । तथा च 'गाङ्कुटादि' (१-२-१) सूत्रे 'नूत्वा धूत्वा' इति भाष्यम् । 'णु रतवने' । अदादिः ॥

प्रेरणे सुवाति प्राणिप्रसवे सूयते भवेत् ।
प्राणिगर्भविमोकेऽर्थे सूते शे श्यानि शब्लुकि ॥ २५ ॥

'षू प्रेरणे' । 'षूङ् प्राणिप्रसवे' । अप्राणिप्रसव इत्येके । तथा च क्षीरस्वामी प्रसूनं पुष्पमिति निष्ठानत्वमुदाहृत्याह — 'अत एवाप्राणिप्रसव इत्याहुः' इति । न्यासकारस्तु 'स्वरतिसूतिसूयतिधूञूदितो वा' (७-२-४४) इत्यादिषु षूङ्विषयेषु प्राणीत्येव पपाठ । धातुपाठाश्चैवमेव बहुलमुपलभ्यन्ते । यथा 'प्रसूनं कुसुमं सुमम्' इत्यत्र कविकामधेनुः — "'षूङ् प्राणिप्रसवे' । क्षपणकमतेन† वृक्ष-

†'मते' इत्येव घपुस्तके पाठः.

स्यापि प्राणित्वम् । 'स्वादय ओदित' इति क्तस्य नत्वम्" इति, तथा 'अत एवे'त्युक्तयुक्तिश्च प्रत्युक्ता । तत्र च क्षपणकग्रहणं तेषामहिंसायां सूक्ष्मेक्षिकाभिमानात्; न पुनरपरेषामनाभिमतोऽयमर्थ इति । तच्चैतत् प्राणित्वमयुक्तम्, यतो लोक इव व्याकरणेऽपि प्रासिद्धिवशादेव तत्र तत्र प्राप्यप्राणिव्यवस्थास्थीयते । लोके चाप्राणित्वं वृक्षादेः प्रसिद्धम् । तथा च 'ऊडुत' (४-१-६६) इत्यत्र 'अप्राणिजातेश्चारज्ज्वादीनाम्' इति वार्तिकं प्रकृत्यालाबूः कर्कन्धूरित्युदाहरता भाष्यकारेणापि स्थीयते । अत एव मैत्रेयरक्षितेन 'प्राणिग्रहणमतन्त्रम् । अप्राणिप्रसवेऽपि वर्तते । प्रसूनं धान्यमिति' इत्युक्तम् । 'पूङ् प्राणिगर्भविमोचने' ॥

धूनयति धवति धवते धुनोति धुनुते धुनाति च धुनीते ।
धूनोति धूनुते स्युः पदानि कम्पे विधूनने धवति ॥ २६ ॥

'धूञ् कम्पने' । युजादिः प्वादिः स्वादिश्च । तत्राद्ये प्रीञ्वत् त्रैरूप्यम् । क्षीरस्वामी तु 'धावयतीत्येके' इति । मैत्रेयरक्षितादयश्च ह्रस्वान्तं चान्त्यमाहुः । तथा च 'धृसृधुवृषिप्राच्छिज्वरित्वरिभ्यः कित्' इति धुञो धुनिशब्दो भोजदेवेन व्युत्पादयाञ्चक्रे । एभ्यो धातुभ्यः संज्ञायां गम्यमानायां निन् प्रत्ययो भवति । स च किदित्यर्थः । घृणी रश्मिः । सृणिरङ्कुशः । धुनिर्नदी । वृष्णी राजा, यद्वंश्या वृष्णयः । पृश्निरल्पतनुः । 'ग्राहिज्या' (६-१-१६)

---

१. 'अत एवाप्राणिप्रसव इत्याहुः' इति क्षीरस्वाम्युक्तयुक्तिः, चकाराद् 'अप्राणिप्रसवे' इति पाठश्च. २. लोकप्रसिद्धिर्नातिलङ्घ्यते इत्यर्थः. ३. प्रीञ्धातुर्निशब्लोके विवृतः. ४. एकेषां मते नुन्विधौ 'धूञ्प्रीणोरि'ति पाठात् प्रीणातिसाहचर्येण क्रैयादिकस्यैव धूञो ग्रहणं, न तु चौरादिकस्य.

इति सम्प्रसारणम् । 'च्छ्वोः शूडनुनासिके च' (६-४-१९) इति च्छस्य शः । जूर्णिर्वृद्धः । तूर्णिः शीघ्रः । 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' (६-४-२०) इत्युपधावकारयोरूठ् । प्रयोगश्च 'न स्नात्वा वासो धुनुयात्' 'ऊर्ध्वं धूनोति वायुर्विवृतशवशिरःश्रेणिकुञ्जेषु गुञ्जन्' इत्यादिर्भूवादि (१-३-१) सूत्रे सुधाकरेण दर्शयाम्बभूवे§ । सर्वथापि—

'धूनयति धवति धवतेऽधुनाद् धुनीते च धूनुतेऽधूनोत् ।
धुनुतेऽधुनोदिति स्युः'

इत्यनेन क्रमेण पठितुं युक्ततरम् । 'धू विधूनने' । तुदादिः ॥

श्नि पुनाति पुनीते स्तां पवने पवते ङितः ।

'पूञ् पवने' । 'पूङ् पवने' ॥

प्रसह्य हृत्यां† हरणे जहर्त्ति* हरते हरेत् ॥ २७ ॥

'हृ प्रसह्य हरणे'[२] । जुहोत्यादिः । 'हृञ् हरणे' । तत्र चाद्यो घृप्रभृतित्वाच्छान्दसः । स च जिहर्तीति दृश्यते—'अयं स्रुवोऽभिजिहार्ति होमान्' इति । 'भृञामित्' । 'बहुलं छन्दसि' (७-४-७८) इत्यभ्यासस्येत्वम् । घृप्रभृतीनां छान्दसत्वम् 'अर्तिपिपर्त्योश्च' (७-४-७७) इत्यत्र भाष्यतद्व्याख्यानयोर्व्यक्तम् ॥

भृञो विभर्ति विभृते भरते भरतीत्यपि ।

---

१. स्वाद्युदाहरणानां विजातीयाव्यवधानं हि स्वादिविषयपक्षभेदप्रतिपत्तौ सौकर्यमादधाति; यथास्थितपाठस्तु ष्वादिधातुना व्यवधानान्न तथेति तात्पर्यम्.
२. 'करणे' इत्येव माधववृत्त्यादिषु दृश्यते.

---

§'यामासे' इति गपुस्तके पाठः. †'कृत्याम्' इति गपुस्तके पाठः. *'जिहर्ति' इति कपुस्तके पाठः.

ऋदन्तस्य भृणातीति भर्त्सने श्नि तथा भरः ॥ २८ ॥

'डुभृञ् धारणपोषणयोः'। जुहोत्यादिः। डुभृञित्येके। तथा च भृत्रिममित्युक्त्वा 'भरथुरिति केचिदि'ति मैत्रेयरक्षितः। क्षीरस्वामी तु 'डुभृञिति द्रमिडाः। भरथुः' इति। सुधाकरः पुनरथुञ्विधौ डुभृञित्युक्त्वाह—डुभृञं द्रमिडाः पठन्ति। तेन भृत्रिमं भरथुरिति द्वयमिच्छति नन्दी' इति। डुडुभृञित्यनुबन्धद्वयमपि शाकटायनः। तन्मते हि 'अप्रयोगीद्' इतीत्त्वम्। अत्रामोघा—'इह शास्त्रे उपदिश्यमानो वर्णः समुदायो वा यो लौकिके शब्दप्रयोगे न दृश्यते, स इत्संज्ञो भवति। अत एव चास्य प्रयोगाभावः सिद्धः। उपदेशस्तु कार्यार्थ' इति। तत्र च भरणेन निर्वृत्तं भृत्रिममिति। 'ङितः क्रिः' (३-३-८८) इति क्रिः। 'क्रेर्मब् नित्यम्' इति मप्। भरणं भरथुः। 'ट्वितोऽथुच्' (३-३-८९) इत्यथुच्। 'भृञ् भरणे'। 'वृ वरणे। भृ भर्त्सने च'। प्वादिः। "'वृ भृ भरणे'। 'भृ भर्जने च' भर्जनं पाक" इति क्षीरस्वामी। स चात्र भर्जनाख्यः पाकभेद एव प्रसिद्धो बोद्धव्यः। 'ऋजि, भृजी भर्जने' इत्यत्र च स एवाह—'भर्जनं पाकप्रकार' इति। भरणपाठे[1] च भरस्य भारपर्यायत्वौचित्यं* व्यक्तम्। स[2] च ऋदन्तपाठफलम्। 'ऋदोरप्' (३-३-५७) इत्यप्।

ध्रियते स्यादवस्थाने धृङोऽवध्वंसने पुनः।
धरते धारणेऽर्थे तु धरते धरतीत्युभे ॥ २९ ॥

---

१. 'भृ भरणे' इति क्षीरस्वामिपाठे. २. भरश्च भरशब्दश्चेति यावत्.

---

*'यत्वादौचित्यम्' इति वपुस्तके पाठः.

'धृङवस्थाने'। तुदादिः। 'रिङ्शयग्लिङ्क्षु' (७-४-२८) इति रिङ्। इयङादेशः। 'धृङवध्वंसने'। अविध्वंसन इति क्षीरस्वामी। अपरेऽप्येवं बहवः। 'धृञ् धारणे'। 'धृ धारणे' इत्यपि चुरादौ क्षीरस्वामी। तत्र धारयति धारयते। 'चुरादेराकृतिगणत्वाद् धारयती'ति हेमचन्द्रः। न्यासे तु 'धारेरुत्तमर्ण' (१-४-३५) इत्यादिषु ध्रियतेर्हेतुमाण्णिच्येव धारिर्व्युत्पाद्यते। 'षिद्भिदादिभ्योऽङ्' (३-३-१०४) इत्यत्र 'धारा प्रपातन इति वक्तव्यम्। धृतिरन्या' इति भाष्यम्। तत्र च धृतिरन्येति ब्रुवता 'ऋदृशोऽङि गुणः' (७-४-१६) इति गुणे कृते दीर्घत्वनिपातनेन धरतेरेव धारेत्यभिप्रेयते, न पुनः समानार्थत्वेऽपि धारयतेः। यदि च सोऽपि चुरादिष्वपठिष्यत, धारणान्येत्येवावक्ष्यत; कृतं निपातनक्लेशेन॥

गतौ ससर्ति सरति इलुशपोर्धावति केचित्।

'ऋ सृ गतौ' घृप्रभृतित्वाच्छान्दसोऽन्त्यः। स च सिसर्तीति दृश्यते। 'प्र बाहवा पृथुपाणिः सिसर्ति' इति। 'सृ गतौ'। 'सर्तेर्धावादेशो वेगितायां गतौ' इति वार्त्तिकेन सञ्जातवेगायां गतौ शपि धौभावः। क्षीरस्वामी तु चुरादौ 'धृ स्रावण' इति पठित्वा "'धृ सृ आवरणे' इति पूर्वे पेठुः। 'धर स्रावणे' इति दुर्ग" इति। सरतिसिसर्त्योश्च स एवाह — चुरादौ सारयति' इति॥

---

१. तथा ब्रुवता धारयतेरेव धारेत्यभिप्रैष्यतेत्यर्थः. एवं तु वृद्ध्यैव णिनिमित्तया दीर्घत्वस्य सम्पत्तेर्निपातक्लेशोऽपि परिहृतो भवतीत्याह—कृतमिति. २. विशेषे. स च वेगिता गतिः. ३. आद्यस्तु समनन्तरं व्याख्यास्यते.

तत्रेयर्त्यृच्छतीत्यर्त्तेः श्नि गतौ स्यादृणाति *तु ॥ ३० ॥

तत्रेति पूर्वोक्त एव विषय इत्यर्थः । तेन गतौ श्लुशपोः **अर्त्तेः** 'ऋ सृ गतौ' 'ऋ गतिप्रापणयोरि'त्यनयोरियर्त्ति ऋच्छतीति भवतीति वाक्यार्थः । तत्र चाद्ये शप्श्लुद्विर्वचनोरदत्वहलादिशेषेषु कृतेषु 'आर्त्तिपिपर्त्योश्च' (७-४-७७) इत्यभ्यासस्येत्वम् । 'अभ्यासस्यासवर्णे' (६-४-७८) इतीयङादेशः । ततो गुणः । अस्य चार्त्तेर्घृप्रभृतित्वेऽपि भाषायामपि प्रयोग इष्यते । तच्च 'बहुलं छन्दसि' (७-४-७८) इत्येवेत्वे सिद्धे अर्त्तेः पृथगित्वविधानसामर्थ्यादवसीयत इति 'आर्त्तिपिपर्त्योश्च' (७-४-७७) इत्यत्र भाष्ये स्थितम् । अन्त्ये 'पाघ्राध्मा' (६-३-७८) इति ऋच्छादेशः । 'ऋ गतौ' । ल्वादिः ॥

हिंसाकरणयोः श्नावौ कृणोति कृणुते कृञः ।
करोति कुरुते द्वे द्वे सम्पद्येते§ पदे क्रमात् ॥ ३१ ॥

'कृञ् हिंसायाम्' । 'डुकृञ् करणे' । तथा 'कृञ् करणे' इति भ्वादौ क्षीरस्वामी । करोति कृणोति करतीति वा कारुरिति च कस्यांचिदुणादिवृत्तौ दृश्यते । न्यासकारस्तु 'कः करत्करतिकृधिकृतेष्वनदितेः' (८-३-५०) इत्यत्र करतौ [1]व्यत्ययेन शपं ब्रुवन्नै[2]तमनुमन्यते ॥

भक्तौ वृणीते वरणे वृणोति वृणुते वृञः ।
वृञ आवरणे वा णौ वारयेद् वरते वरेत् ॥ ३२ ॥

'वृङ् सम्भक्तौ' । क्र्यादिः । 'वृञ् वरणे' । स्वादिः । 'वृञ्

---

१. 'व्यत्ययो बहुलम्' (३-१-८५) इति विकरणव्यत्यासेन. २. भ्वादिम्.

*'च' इति कपुस्तके पाठः. §'म्बध्येते' इति खगपुस्तकयोः पाठः.

आवरणे' । अत्र क्षीरस्वामी—"आवारयति आवरति आवरते । स्वादौ वृणुते वृणोति । क्रयादौ वृणीते । तुदादौ[1] वृङ् सम्भक्तौ' व्रियते" इति ॥

ज्ञाने गारयते गिरेन्निगरणे शब्दे गृणाति त्रयं
युक्तं ग्रो गरतीति सेकविषये ह्रस्वान्तधातोः शापि ।
सेके प्रस्रवणे क्रमाच्छपि णिचि स्यातां घरेद् धारयेद्
यद्दीप्तौ क्षरणे जिघर्ति तदिदं केचिद्विदुश्छान्दसम् ॥

'गृ विज्ञाने' । चितादिः । कृ इति चन्द्रः । 'गृ निगरणे' । तुदादिः । निपूर्वताप्राचुर्योपदर्शनार्थो निः । 'अचि विभाषा' (८-२-२१) इति लत्वविकल्पाद् गालयते गिलेदित्यपि द्रष्टव्यम् । 'गृ शब्दे' । ल्वादिः । एवं त्रिष्पठितस्य गृ इत्येतस्यैतत्त्रैरूप्यं युक्तम् । अन्त्ययोरेव धात्वोः प्रसिद्धत्वाद्रूपद्वयमेवेति मन्दैर्मा शङ्कीत्याशयः । 'गृ, घृ सेचने' । यथा तु 'तृज्वत्क्रोष्टुः' (७-१-९५)इत्यत्र भाष्यम —'अविशेषविहिताः[1] शब्दा नियतविषया दृश्यन्ते । घरतिरस्मायविशेषेणोपदिष्टः । स घृतं घृणा घर्म इत्येवंविषय[2]' इति, तथा घरेदिति नेष्यते[3] । देवस्तु मैत्रेयरक्षितेनैकीयमतत्वेन घरतीत्युदाहृतमुपलभ्यैतदभ्यधात् । 'घृ प्रस्रवणे' । 'घृ स्रावण' इति क्षीरस्वामी । 'घृ क्षरणदीप्त्योः' । जुहोत्यादिः । अत्र मैत्रेयरक्षितः—

---

१. अनुपसन्दानबोधितशक्तिका अपि शब्दा उपसन्दानोपजीविसामर्थ्याः प्रयोगतोऽवसीयन्ते इत्यर्थः. २. घरतिर्हि सेचने सामान्यतः पठितोऽपि क्तनग्मन्प्रत्ययोपसन्दानेनैव सर्पिर्दयोष्मार्थोपसन्दानेनैव वा स्वार्थबोधक इत्यर्थः. ३. पद्धत्यादावौपसन्दानिकशक्तियोगिनो गत्यर्थहन्तेरिव घरतेरपि तिङ्विषयत्वाभावादिति भावः.

"'जन जनने' जजन्ति । 'गा स्तुतौ' । जिगाति । 'छन्दसि' इति च्छान्दसावेतौ । घृप्रभृतयोऽपि च्छान्दसा[1] इति केचिद्" इति । (गा स्तुतौ?) तत्स्थ एवात्र ग्राह्यः केचिच्छब्दो भाष्यानुसारिण[2] इत्येवं व्याख्येयः । तत्रापि जिघर्तीति च्छन्दसि दृश्यते । 'वरिष्ठं वज्रमाजिघर्ति मायनी' इति ॥

प्रीतौ पृणोत्यृदन्तस्य व्यायामे प्रियते पृङः ।

'पृ प्रीतौ' । स्वादिः । 'पृङ् व्यायामे' । तुदादिः । व्यायामे प्रियते ॥

मृणाति हिंसार्थे प्वादेर्मृङस्तु म्रियते पदम् ॥ ३४ ॥

'कॄ हिंसायाम्' । 'मॄ इत्येके' इति मैत्रेयरक्षितः । क्षीरस्वामी तु 'मॄ हिंसायाम्' इत्यपि पृथक् पपाठ । किन्तु बॄ इति पवर्गतृतीयोपधतया मैत्रेयरक्षितपठितस्य स्थाने मॄ इति । 'मृङ् प्राणत्यागे' । तुदादिः ॥

स्तृञः श्नि च्छादने प्वादेः स्तृणीते च स्तृणाति च ।
श्नावृदन्तस्य तत्रैव स्तृणोति स्तृणुते स्तृञः ॥ ३५ ॥

'स्तॄञ् छादने' । 'स्तृञ् छादने' ॥

दरेद् दृणाति द्रियते क्रमाद् भीदारणादरे ।

'दॄ भये' । घटादिः । अत्र मैत्रेयरक्षितः—"'दॄ विदारणे' । क्र्यादिः । तस्य मित्त्वार्थः पाठः । धात्वन्तराभ्युपगमे दरतीत्येक" इति । धनपालहरियोगिपूर्णचन्द्रास्तु दरतीत्येवाहुः§ । क्षीर-

---

१. घृप्रभृतिगणान्ते पठितस्य छन्दसीत्यस्य तद्गणीयेषु सर्वेषु सम्बन्धौचित्यादिति भावः. २. भाष्यं च 'अर्तिपिपर्त्योश्च' (७-४-७७) इति सूत्रस्थम्. ३. समाहारद्वन्द्वनिर्देशोऽयम्.

§'वमाहुः' इति घपुस्तके पाठः.

स्वामी त्वाह—"'दृ भये'। दरति। क्र्यादौ 'दृ विदारणे'। तस्यैव मित्त्वार्थ इह पाठ इत्येके। दिवादौ दीर्यत इति पञ्चिका। कर्मकर्तरि दीर्यत इत्येक" इति। धनपालशाकटायनौ तु क्र्यादौ च 'दृ भये' इत्येवाहतुः। 'दृङ् आदरे'। तुदादिः। आद्रियते॥

पॄणाति पूरणे श्लौ तु पिपर्त्ति णिचि पारयेत्॥ ३६॥

'पॄ पालनपूरणयोः'। प्वादिः। श्लौ त्वयं ह्रस्वान्तः[1]। तथा च 'तं रोदसी पिपृतं सत्यवाचम्' इति श्रूयते। मैत्रेयरक्षितस्तु ह्रस्वान्तं पठित्वा 'दीर्घान्तोऽयमित्येके' इत्याह। तत्फलभेदश्च† पिपृतः पिप्रति पिपूर्त्तः पिपुरतीति। तत्र च 'उदोष्ठ्यपूर्वस्य' (७-२-१०२) इत्युत्वं रपरत्वं च। 'हलि च' (८-२-७७) इति दीर्घः। क्षीरस्वामी तु—दीर्घान्तं पठित्वा 'ह्रस्वान्तोऽयमिति नन्दी' इति। 'पॄ पूरणे'। अत्र च स एवाह—'पॄ इति दुर्गः। पारयति परति' इति। एतच्च चुरादिणिचोऽनित्यत्वाश्रयेण[2]॥

वॄवृञोरञितो धातोर्वृणाति वरणे भवेत्।
वृणाति च वृणीते च वृञस्तत्रार्थ इष्यते॥ ३७॥

'वॄ वरणे'। 'वृञ् वरणे'। प्वादिः। वॄवृञोरिति निर्धारणे षष्ठी। तत्र चाद्यं पवर्गतृतीयादिं बहवः पठन्ति। 'बॄ भरण' इति क्षीरस्वामिशाकटायनौ॥

सिद्धे पदद्वये वृञो ञित्त्वाद् यदञितो वचः।
फले तत् कर्त्राभिप्राये परस्मैपदसिद्धये॥ ३८॥

---

१. अस्यार्थस्तु दीर्घान्तस्येवेत्यर्थः. २. न तु युजादित्वेन.

---

†'दं च' इति गपुस्तके पाठः.

वृञो ञित्त्वाद्वृणाति वृणीते इति सिद्धे वृ इत्यञित्पाठः कर्त्रभिप्राये क्रियाफले परस्मैपदार्थः ॥

जृणाति जीर्यति जरत्येकार्थे जारयत्यपि ।

'जॄ वयोहानौ' । सा च यौवनादेस्त्यागः । प्वादिर्युजादिश्चायम् । तत्राद्ये 'धृ इत्येक' इति मैत्रेयरक्षितः । अन्त्ये तु क्षीरस्वामी—'जारयति जरति । दिवादौ जीर्यति । क्र्यादौ जृणाति । ज्रीति च नन्दी । ज्रायति ज्रयति । क्र्यादौ जृणाति' इति । 'जॄ ज्रॄष् वयोहानौ' । दिवादिः । अस्य तु हेतुमण्णिचि । 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वाज्जरयतीति द्रष्टव्यम् । 'जनी प्रादुर्भावे' 'क्नसु ह्वरणदीप्त्योः' 'रञ्ज रागे' इत्येते जीर्यतिश्चाम्रूपान्ताश्च धातवो मितो भवन्तीत्यर्थः ॥

कृणन् कृणीते हिंसायां विक्षेपे किरतीति शे ॥ ३९ ॥

'कृञ् हिंसायाम्' । प्वादिः । 'कृञित्येके' इति क्षीरस्वामी । तिङ्प्रकरणेऽपि शत्रन्तोदाहरणं वृत्तानुरोधात् । 'कृणाति च कृणीते च हिंसायां किरतीति शे' इत्यनुक्तिः 'परस्मैपदाद्येवात्र विवक्षितमि'ति प्रागुक्तमर्थं बालानां व्यङ्क्तुमिति गमयितव्यम् । एवं 'बध्नन् बीभत्सते बन्ध' इत्यत्रापि बन्धे बीभत्सनेऽबध्नादित्यनुक्तिर्नेतव्या । 'तॄ कॄ हिंसायाम्' इत्यपि प्वादावेव क्षीरस्वामिमैत्रेयरक्षितौ । तत्फलं तु वृवद् द्रष्टव्यम् । 'कॄ विक्षेपे' । किरतीति ॥

तृसौ चकेत् प्रतीघाते तृसौ च चकते शपि ।

---

१. भूधातुव्याख्यानावसरोक्तम्. २. इदं १२०तमश्लोके. ३. कर्त्रभिप्राये क्रियाफले परस्मैपदसिद्धिरूपं फलं वृधातोरुक्तम् अष्टात्रिंशे पद्ये.

'चक तृप्तौ' । घटादिः । 'चकृ तृप्तौ प्रतीघाते च' । क्वचित् पुनः पठ्यते—

प्रतीघाते च तृप्तौ च चकते चकतीति तु ।
तृप्तिमात्रे चकेरस्य मित्त्वाच्चकयतीति णौ ॥

इति । तयोश्च पाठयोस्तृप्ताविति तृप्तिमात्र इति च घटादिपाठपरम् । शेषं च प्रदेशान्तरपाठपरम् । ततश्च यद् घटादौ च शाकटायनेनोभयार्थत्वमुक्तं, यच्च क्षीरस्वामिना घटादावुभयार्थत्वमन्यत्र तृप्त्यर्थत्वं, तदपि संगृहीतं भवति । धनपालः पुनरात्मनेपदिनं 'चक तृप्ताविति'येव पठित्वा तस्यैव 'चक तृप्तौ प्रतीघाते च' इति घटादौ 'घटादयो मित' इति मित्संज्ञार्थं पाठं मन्यमानस्तत्राप्यात्मनेपदमेवोदाजहार ॥

दर्शने लोकते लोकेर्भाषार्थे णौ तु लोकयेत् ॥ ४० ॥

'लोकृ दर्शने' । लोकृ भाषार्थः* । अस्माच्च सकर्मकादेव णिच् स्यात् । यदाह—'आस्वादः सकर्मकाद्' इति । अत्र मैत्रेयरक्षितः—"'स्वाद आस्वादने' आ एतस्मात् स्वादः सम्भवि-

---

१. घटादिपाठतात्पर्यकम्. एवञ्च योऽन्यैस्तृप्तावेव केवलायां धातुः पठितः, तस्यार्थाद् घटादेः 'चकेद्' इति भवति कस्मिन्नर्थे तृप्तौ प्रतीघाते चेति 'तृप्तौ चकेद्' इत्यस्यार्थो वक्ष्यमाणशाकटायनानुरोधी बोध्यः. तथा 'चकतीति तु तृप्तिमात्रे' इत्यस्यापि. २. भ्वादिपाठतात्पर्यकम्. एवञ्च योऽन्यैस्तृप्तिप्रतीघातयोर्धातुः पठितः, तस्यार्थाद् भ्वादेः 'चकते' इति भवति कस्मिन्नर्थे तृप्तावेव केवलायामिति 'प्रतीघाते तृप्तौ च चकते' इत्यस्यार्थो वक्ष्यमाणक्षीरस्वाम्यनुरोधी द्रष्टव्यः. तथा 'प्रतीघाते च तृप्तौ च चकते' इत्यस्यापि. ३. चादन्यत्र. ४. परस्मैपदप्रकरणानुवादसामर्थ्यमनादृत्येति शेषः.

---

*'र्थे' इति गपुस्तके पाठः.

कर्मकादेव णिज् भवतीति मन्तव्यम्। असम्भविकर्मकत्वे व्यावृत्तिः। आङः स्वाद एव सकर्मकादित्येके"। इति। तत्र च सम्भविकर्मकत्वकथनेन सत्यसति वा कर्मणः प्रयोगे तत्सम्भवमात्रेण णिज् भवतीत्युक्तं भवति। *कर्मासम्भवः पुनरनेकार्थत्वेनार्थान्तरवाचितायां यथाप्रयोगं द्रष्टव्यः। क्षीरस्वामीत्वाह—'आङ्पूर्वात् स्वादतेः सकर्मकाण्णिज् भवति। आस्ति कर्म यस्य स [1]सकर्मकः। आस्वादधातुर्णिचमुत्पादयति। 'पय आस्वादयति' इति। धनपालश्च 'आस्वादयति क्षीरम्' इत्युदाहरन्नेत्रैवानुकूलः। तत्र चाभिविधिपक्ष एव युक्तः प्रत्यवभासते, इहाप्याङः पूर्वापरेष्विवाभिविध्यर्थताया एवौचित्यात्। 'आ कुस्मादि'ति हि पूर्वत्राभिविधावाङ् दृष्टः। 'आधृषाद्देति' 'आगर्वादि'ति च समनन्तरमेवैवं द्रक्ष्यते। तत्रायमपि तन्मध्यपाती तच्छायश्चाङ् तदर्थ एव व्यक्तमवभासते। तदत्र [3]पक्षान्तरं व्याचक्षाणानामाशयश्चिन्त्यः। अन्ये तु 'आस्वदः सकर्मकाद्' इत्याहुः। 'ग्रस ग्रहण' इत्यारभ्य 'ष्वद आस्वादन' इत्येवमन्ता‡ [4]ये धातवः पठ्यन्ते, [5]तथा च 'पूरी आप्यायने ष्वदास्वाद' इति श्लोकधातुपाठः, संवरण इति तु क्षीरस्वामिधनपालशाकटायनाः, 'ष्वद आस्वादन' [6]इत्यत्र च क्षीरस्वामी — 'स्वदते', चुरादौ 'स्वद संवरणे स्वादयति' इति, तेभ्य एतेभ्यः सम्भविकर्मकेभ्य एव णिज् भवतीत्यर्थः। एतच्च

१. सकर्मकः प्रयुज्यमानकर्मक इत्यर्थः. तेनाप्रयुज्यमानकर्मको व्यावर्त्यते. २. क्षीरस्वामिपक्षे एव. ३. आङ्विषये. ४. 'ये' इत्यस्य 'तेभ्य एतेभ्य' इति वक्ष्यमाणेनान्वयः. ५. स्वदधातोर्ह्रस्वोपधत्वे प्रमाणमर्थविषयकपक्षभेदानुग्राहि दर्शयति—तथाचेत्यादि. ६. भ्वादौ.

‡'न्ता धा' इति घपुस्तके पाठः. *'कर्मसम्भवः' इति गपुस्तके पाठः.

सकर्मकत्वमन्येष्वपि भाषार्थेषून्नेयम्। अत्र चोत्तरत्र च भाषार्थग्रहणे 'भासार्थ इत्येक' इत्यपि द्रष्टव्यम्। तथा च 'पटपुटे'त्यादौ 'वृतु वृधु भाषार्था' इत्यन्ते दण्डकधातुपाठे मैत्रेयरक्षितः—'भासार्था दीप्त्यर्था इत्येक' इति। क्षीरस्वामी च—'भासा दीप्तिरर्थो येषां ते भासार्थाः' इति। 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः। स्त्रीवेषधारी पुरुष' इत्यत्र कविकामधेनुकारश्च दण्डकधातुमेवाश्रित्याह—'कुंसिर्भासार्थः। स्त्रीरूपधारित्वाद् भ्रुवा कुंसयति पुरुषत्वमिति भ्रुकुंसः'। इति। तत्र* भासार्थपक्षे सकर्मकत्वे यत्नः कर्तव्यः। धनपालः पुनरन्यथैवामुं दण्डकं व्याचष्टे—'एते पटादयः सर्वे णिचमुत्पादयन्ति। अन्ये च ये भासार्था धातवः, ते च णिचमुत्पादयन्ति' इति। अत्र चाज्ञसैवानाज्ञस्ये सत्यव्या(स्प्र?)प्त्यपनीत्याशैव शरणम्॥

अङ्क लक्षण इत्यस्य भवेदङ्कयतीति णौ।
इदितस्त्वङ्कते तत्र कुटिलायां गतावकेत्॥ ४१॥

'अकि लक्षणे'। तत्रेति लक्षणे। 'अक अग कुटिलायां गतौ'॥

णिचि बुक्कयतीति स्याद् भाषणे शपि बुक्कति।

'बुक्क भाषणे'। 'बुक्कनं श्ववृकध्वान' इति तु यादवप्रकाशः। 'बुक्क आभाषण' इति शाकटायनः। अन्ये तु क्षीर-

१. स च भांसधातौ णिजर्थान्तर्भावना. २. धनपालव्याख्याने. ३. पूर्वापरधातुष्वास्थितस्यार्थनिर्देशस्य पटादिषु परं त्यागानौचित्याद् धनपालव्याख्यानस्यायुक्तत्वे सतीत्यर्थः. ४. 'बुक्कनं श्ववृकध्वाने भषणं भषितं शुनः' इति अन्तरिक्षकाण्डे शब्दाध्यायः.

*'तत्र तु' इति गपुस्तके पाठः.

स्वामी—'भषण इत्येके । बुक्कति श्वा' इति । मैत्रेयरक्षितश्चैवमेवोदाहार्षीत् ॥

मर्षणे शीकयेच्छीकेत् सेचने शपि शीकते ॥ ४२ ॥

'शीक आमर्षणे' । युजादिः । 'शीकृ सेचने' । अनुदात्तेत् । एतच्च शीकतीति मन्दैर्मा पाठीत्येवमर्थमुच्यते । अनुपात्ते त्वात्मनेपदचिह्ने* परस्मैपदपाठ एव अन्यथापि वृत्तिविरोधिपाठसम्भवेऽपि शुद्धो बोद्धव्यो यथा बुक्कतीत्यादौ । 'सीकृ इत्यार्यो' इत्यपि धनपालः । तत्र चाद्यः पक्षः शीकर इति प्रयोगानुगुणः । योऽपि षोपदेशलक्षणे सीकृपाठ उक्तः, सोऽप्येवं प्रत्युक्तः । शीकृ गत्यर्थ इत्यप्येके । तत्स्थाने षेकृ इत्यन्ये । यदाह क्षीरस्वामी—'शीकृ, सेकृ, स्त्रेकृ, स्त्रकि, शकि, श्लकि गत्यर्थाः । शीकेरर्थभेदात् पुनः पाठः । अत एव चन्द्रो नैनमध्यैष्ट । अन्ये षेकृ इति विकल्पेन षोपदेशकार्यार्थं पेठुः' इति ॥

शङ्कते शकि शङ्कायां शक्तौ शक्नोति मर्षणे ।
शक्यते शक्यतीत्येवं शपि श्नौ श्यनि च क्रमात् ॥ ४३ ॥

'शकॄ शक्तौ' । 'शक विभाषितो मर्षणे' । विभाषित

---

१. वचनातिरेकेणात्मनेपदावसायेऽभ्युपायाभावादिति शेषः । अत एवैवञ्जातीयके स्थले सर्वत्र 'गत्यां तु लङ्घते' (४९ श्लो.) 'पृक्ते संपर्के' (५१ श्लो.) इत्यादौ 'अनुदात्तेद्' इति वक्ष्यते । 'तृप्तौ च चकते शपि', 'दर्शने लोकते लोकेः' (४० श्लो.), 'इदितस्त्वङ्कते तत्र' (४१ श्लो.), 'शङ्कते शकि शङ्कायाम्' इत्यत्र तु परस्मैपदपाठे वृत्तिविरोधसम्भवादभ्युपायादात्मनेपदं शक्यावसायमिति 'अनुदात्तेद्' इत्यात्मनेपदचिह्नं न कथितं; न च तज्जातीये स्थले वक्ष्यते 'सेचने सचते'(४६ श्लो.) इत्यादौ. २. शीकरानुगुण्येन तालव्यादित्वावधारणे.

*'पदभेदे' इति गपुस्तके पाठः.

इत्युभयपदी। रूढं चैतत् तन्त्रान्तरेष्वपि। क्षीरस्वामीत्वाह—'सहनेऽर्थे शकिधातुर्विभाषितो विकल्पितः, पक्षे दिवादिः, पक्षे स्वादिरित्यर्थः। शक्यति शक्नोतीति। शाकटायनश्चामुमेव विभाषितार्थम्, अस्य चोभयत्र पाठमात्रादेव सिद्धत्वाद्वैयर्थ्यं नूनं मत्वा 'शक मर्षण' इत्येव पपाठ; न पुनः 'शकी' इति। ईदित्वं ह्युभयपदित्वचिह्नं तन्मते। तच्चैतदुभयमपि बहुसम्मते यथोक्तेऽर्थे सम्भवत्ययुक्तमेव॥

तकेत् तङ्क्रेव्यथासङ्ख्यं हसने कृच्छ्रजीवने॥ ४३½॥

'सहने' इत्यपरः पाठः। 'तक सहने'। क्षीरस्वामी पुनः सहन इत्युक्त्वा 'हसन इति दुर्ग' इति। यत्तु श्लोकधातुपाठे 'फक्क नीचैर्गतौ तक्क मर्षणे बुक्क भाषणे'। इति द्विककारस्ताकिः पठ्यते, तद् 'अचो यद्' (३-१-९७) इत्यत्रत्येन 'ताकिशासियतिजनीनामुपसङ्ख्यानम्' इति भाष्येण विरुध्यते। 'तकि कृच्छ्रजीवने'॥

अन्वेषणेऽर्थे मृगयेत णौ यौ
मार्गेर्भवेन्मार्गाति मार्गयेच्च॥

'मृग अन्वेषणे'। कथादित्वाददन्तः। ततश्चातो लोपस्य

---

१. क्षीरस्वाम्युक्तमुभयगणीयत्वमेव. २. इदं च वैयर्थ्यमिति च मत्वेत्यस्य कर्म. ३. दिवादौ स्वादौ च. ४. यथोक्ताविभाषितपदोपादानरहितात् पाठादेव. ५. यत् सूत्रयति शाकटायनः—'अीदिदपवदानुपसर्गञ्ः' (१-४-६९) इति। ञित ईदितोऽपवदादेश्च कर्तरि फलेशे लस्य तङ् भवतीति च तस्यार्थः. ६. द्विककार एव ताकिधातौ सति ततो यति ण्यति वा वृद्ध्यभावस्य तुल्यतया यत्प्रत्ययोपसंख्यानं व्यर्थं स्यादिति तत्साफल्यायैककार एव धातौ भाष्यसम्मत्यवधारणादिति भावः.

'अचः परस्मिन् पूर्वविधौ' (१-१-५७) इति स्थानिवद्भावाल्लघूपधगुणाभावः। पदादित्वात् तङ्। यदाह—'आगर्वादात्मनेपदी' इति। 'पद गतौ' इत्याद्या 'गर्व माने' इत्यन्ता ये धातवः कथादिषु पठ्यन्ते, त आत्मनेपदिन इत्यर्थः। अत्र मैत्रेयरक्षितः—'मृग्यतीति कण्ड्वादिपाठात् केचिन्मन्यन्ते'। इति। मार्ग अन्वेषणे॥

लिङ्गेर्गतौ लिङ्गति लिङ्गयेदित्यस्यैव चित्रीकरणार्थवृत्तेः॥ ४४½॥

लिङ्गिर्गत्यर्थः। लिगि चित्रीकरणे॥

भाषणे लङ्घयेच्छोषे लङ्घेद् गत्यां तु लङ्घते॥४५॥

लघिर्भाषार्थः। 'लघि शोषणे'। लघिर्गत्यर्थः। अनुदात्तेत्। लघि भोजननिवृत्तौ चेत्येके। तथा च क्षीरस्वामी—"लघिर्भोजननिवृत्तौ च गत्यर्थश्च। 'नवज्वरे लङ्घनीयः'" इति॥

सेचने सचते तच्च समवाये सचत्यपि।

'षच सेचने'। सेवने तु सचिरुक्तो निरुक्ते—'सिषक्तु,[2] सचत इति सेवमानस्य' इति। अस्यैतौ वाचकावित्यर्थः। षच समवाये। तच्चेति सचते च। क्वचित्तु पठ्यते—

सेचने समवाये च सचते सचति क्रमात्।

इति। तथा च 'अकथितं च'(१-४-५१)इत्यत्र हरदत्तः—केचित्तु परस्मैपादिभिः सह धातुमेनं पठन्ति। षच समवाये।

---

१. दिवादेराकृतिगणत्वात् क्षीयते मृग्यतीत्यादि सिद्धिरित्याहुरिति भट्टोजिदीक्षिताः. २. 'सिषक्तु सचत इत्येते नामनी सेवमानस्य' इति आचार्यभगवद्दुर्ग इदं व्याचष्टे.

रप लप व्यक्तायां वाचि' इति । तदेतत् 'ध्रुविशासिगुणेन च यत् सचत' इति भाष्यौचित्यादयुक्तम् । सचत इति सम्बध्यत इत्यर्थः, समवैतीति यावत् । एवं च 'षच सेचन इत्यस्यानुदात्तेतोऽनेकार्थत्वात् समवाये वृत्तिः' इति हरदत्तोक्तं प्रौढिवादमात्रम् । न्यासे च सचत इत्यस्य 'षच समवाये' इत्येव धातुरुक्तः । एवञ्च परस्मैपदिषु 'षप समवाय' इति पान्तस्यैव पाठः । पान्तकाण्डं चैवमनुसृतं भवति । एवमेव च मैत्रेयरक्षितः शाकटायनश्च । क्षीरस्वामी तु सप्त सप्तिरिति चोदाहृत्य 'सचेति चन्द्रः । सचति सचिव' इत्याह ॥

णौ लोचयति भाषार्थे दर्शने शपि लोचते ॥ ४६ ॥

लोचृ भाषार्थः । 'लोचृ दर्शने' । अनुदात्तेत् ॥

कल्कने मुञ्चते मुञ्चेर्मोक्षे मुञ्चति मुञ्चते ।
प्रमोचने चुरादेर्णौ मोचयत्येष न त्वृदित् ॥ ४७ ॥

'मच मुचि कल्कने' । 'कल्कनं दम्भः शाठ्यं च' इति मैत्रेयरक्षितः । कल्कनं दम्भः §कथनं च । मच मुचेति च चन्द्रः । मोचते । 'मुञ्चते' इति क्षीरस्वामी । मच मचीत्येके । तथा च 'मचि कल्कने' 'मचुङ् धारणोच्छ्रायपूजनेषु'* इति शाकटायनः । तेन ह्यनुदा-

१. समवाये पठितस्य परस्मैपदित्वपक्षे समवायार्थे 'सचत, इति भाष्यप्रयोगस्योपपत्तये हरदत्तेन कथितम्. २. न पुनरात्मनेपदसिद्धये 'षच सेचने' इति धातुरुक्तः । तथा च षचधातुः समवायार्थकस्तङ्योग्य एवाभिमतो न्यासस्येत्युन्नीयते. ३. 'सप्यशूभ्यां तुट् च' इति सपेः कनिन्प्रत्यये तुडागमे च सप्तन् शब्दः 'क्तिच्क्तौ च संज्ञायाम्' (३-३-१७८) इति सपेः क्तिचि सप्तिशब्दः. ४. अनेन चैवमुकारवान् धातुर्भ्वादौ त्यक्तः फलति । (एकीयपाठे शाकटायनीयपाठे च मकाराः सर्वे मुकारा एव पठ्यन्ते घपुस्तके)

§'कथनम्' इति गपुस्तके पाठः. *'धारणोदयपूजनेषु' इति गपुस्तके पाठः.

त्तेत्स्थाने तु ईदित्, तेतस्थाने चोदित् क्रियते। धनपालश्चात्रैवानुकूलः। 'मुचॄ मोक्षणे'। तुदादिः। 'शे मुचादीनाम्'(७-१-५९) इति नुम्। 'मुच प्रमोचने'। **एष न त्वॄ दिदीति**। पूर्व एव लृदित्, न त्वयमिति पाठशुद्ध्यर्थमेतत्। तत्र चामुचदिति तुं लृदित्त्वफलम्। 'पुषादिद्युताद्यॄदितः परस्मैपदेषु' (३-१-५५) इति च्लेरङ्॥

णौ पञ्चयति विस्तारे व्यक्तौ तु शपि पञ्चते।

'पचि विस्तारवचने'। प्रपञ्चयति। विस्तार इत्येवैके। तथाच श्लोकधातुपाठः—'जुड प्रेरणवाची शुठालस्ये गज मार्ज च। शब्दार्थे पचि विस्तारे' इति। तथैव चन्द्रः। पचि व्यक्तीकरणे। पचेति दुर्गः। अनुदात्तेत्॥

वञ्चतीति गतावर्थे वञ्चयेत प्रलम्भने ॥४८॥

'वञ्चु गत्यर्थः'। 'वञ्चु प्रलम्भने'। चिंतादिः॥

पूजायां णौ विभाषार्चेरर्चयत्यर्चतेऽर्चति।
भूवादौ पाठसामर्थ्यात् कर्तृगामिफलेऽर्चति ॥४९॥

'अर्च पूजायां' युजादिः स्वरितेत्। ततश्चार्चतीत्यपि तेनैव सिद्धेऽर्चेर्भूवादिपाठः कर्त्रभिप्रायेऽपि क्रियाफले परस्मैपदार्थः। शाकटायनस्य त्वात्मनेपदी॥

गतियाचनयोरञ्चत्यञ्चते णौ विशेषणे।

---

१. 'तातांझथासाथांध्वमिल्वहिमहिङ् ङिदिदिच्छीयसंक्ष्ण्वपस्कानिविशः' (१-४-१) इति शाकटायनसूत्रम्। ङित इतिः शीयादेशात् संक्ष्ण्वादिभ्यश्च धातुभ्यः परस्य लस्य अन्ययुष्मदस्मादु प्रत्येकमेकद्विबहुषु यथासङ्ख्यं त आतां झ, थास् आथां ध्वम्, इल् वहि महिङ् इत्यादेशा भवन्तीति तत्स्यार्थः. २. ततस्थाने = इदितस्थाने. 'उदितः' (४-२-१९७) इति शाकटायनीयं सूत्रम् 'उदितो धातोर्नम् भवति' इत्यर्थकम्. ३. चितादिः = आकुस्मीयः. ४. एवं चास्य मते भूवादिपाठफलं क्रियाफलव्याकर्तृगामित्वेऽप्यात्मनेपदं सम्पद्यते.

अञ्चयत्यञ्चतीत्येकं गतिपूजनयोरपि ॥ ५० ॥

अत्र त्रिभि,स्त्रिभिः, पञ्चभिश्च पदैः क्रमाद्वाक्यत्रयं बालानां योजनीयम्। 'अञ्चु गतौ याचने च'। '[1]अचु इत्येके'। इति मैत्रेयरक्षितः। '[2]अचूञ् व्ययीगतौ' इति शाकटायनः। तेन चोदित्स्थाने [3]ऊदित् क्रियते। अचि गताविति, अञ्चु गताविति च द्वौ धातू क्षीरस्वामी। तत्र चेदित्त्वफलमञ्च्यत इत्यादौ 'अनिदितां हल उपधायाः क्ङिति (६-४-२४) इति नलोपाभावः। 'अञ्चु विशेषणे'। 'अञ्चु गतिपूजनयोः' ॥

वक्तीति भाषणे वा णौ वाचयेद् वचतीति वा।

'वच भाषणे'। अदादिर्युजादिश्च। तत्र चान्त्यः पारायणिकैर्नाधीयते इति क्षीरस्वामी। अन्यः पुनः 'अस्यतिवक्तिख्यातिभ्योऽङ्' (३-१-५२) इत्यत्र वृत्तौ परिभाषणे पठ्यते। तथापि परेरर्[4]नधिकार्थत्वाद् भाषणमेवार्थः ॥

पृणक्ति पृक्ते सम्पर्के यौ पर्चयति पर्चाति ॥ ५१ ॥

पृङ्क्त इत्यपरः पाठः। 'पृची सम्पर्के' रुधादिरदादिश्च। अन्त्योऽनुदात्तेत्। अत्र भूवादिसूत्रे सुधाकरः— 'पृचि इति द्रमिडा §वेति नान्दिस्वामी। पृङ्क्त' इति। धनपालश्च सर्वे नन्दि-

---

१. अयं च पाठो 'यः पूर्णादुदचति' (तैत्तिरीयसंहिता. का. ७. प्र. ५. अनु. ६.) इत्यादिप्रयोगानुगुणः. २. अित्त्वमीदित्त्वं चोभयपदित्वाय. ३. तथा च शाकटायनीयं — 'ल्यूदितः' (४-२-१६१) इति। ऊदितो धातोः क्त्वाया इड् वा स्यादिति तदर्थः. ४. अनाधिकार्थत्वात् = धात्वर्थातिरिक्तार्थशून्यत्वाद् धात्वर्थगतविशेषाद्योतकत्वादिति यावत्। 'अधिपरी अनर्थकौ' (१-४-९३) इति प्रसिद्धस्य परेरनर्थकस्यैवायं प्रयोगो, न तूपाल-भरूपविशेषद्योतकस्येति भावः.

§'नवेति' इति गपुस्तके पाठः.

स्वामिवेदवास्थित । 'युज, पृच संयमने' । सम्बन्धन इति क्षीर स्वामी ॥

रिचिर् विरेचने रिङ्क्ते रिणक्ति श्ने वियोजने ।
संपर्चने च यौ वा णौ रेचयत्यपि रेचति ॥ ५२ ॥

श्ने श्नमि । 'रिच वियोजनसंपर्चनयोः' ॥

शुच्यते शुच्यतीत्येवं पूतीभावे शुचेः श्यानि ।
शोके शोचति

'ईशुचिर् पूतिभावे' । 'शुच शोके' ॥

हिंसायां तर्जने परिभाषणे ॥ ५३ ॥
चर्चत्यध्ययने त्वर्थे भवेच्चर्चयतीति णौ ।

'चर्च परिभाषणहिंसातर्जनेषु' । अत्र[1] धातुवृत्तिकाराः प्रत्येकमव्यवस्थितपाठशता दृश्यन्ते । यदत्र सत्यं, तद्देवा ज्ञातुमर्हन्तीत्यप्याहुः । तत्र च प्राचुर्यात् 'चर्च परिभाषणे' इति नूनं पक्षमाश्रित्य देवः प्रववृते । 'चर्च अध्ययने' । क्वचित्तु पठ्यते—

अध्ययने चर्चयेच्चर्चतीति तु ।
हिंसायां तर्जने शे तु तथैव परिभाषणे ॥

इति । तत्र 'चर्च हिंसातर्जनयोः' । 'चर्च परिभाषणे' इति नूनं पाठौ । परिभाषणसन्तर्जनयोरिति चौन्त्यं बहवः पठन्ति । सर्वथापि 'स्वरभेदाद् द्विरुच्यते' इति 'शैतुर्वा नुं शे स्यादिति तुदादिता' इति च वक्ष्यमाणनीत्या फलभेदो द्रष्टव्यः ॥

---

१. अत्र = धातुस्वरूपविषये. २. तौदादिकम् । 'जज चर्च झझ परिभाषणभर्त्सनयोः' इति तु सिद्धान्तकौमुद्याम्. ३. स्व पञ्चपञ्चाशल्लोके. ४. इदं सप्तपञ्चाशल्लोके.

सङ्कोचे कुचतीति स्यात् कोचेत् संवर्चनादिषु ॥ ५४ ॥

'कुच संकोचे' । तुदादिः । 'कुच संवर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु' । ज्वलादिः । तत्फलं पुनः 'इगुपधज्ञाप्रीकिरःकः' (६-१-१३५) इति प्राप्ते 'ज्वलितिकसन्तेभ्यो णः' (३-१-१४०) इति पक्षे णः कोचः कुच इति । यस्तु 'कुच शब्दे तारे' इति ज्वलादिभ्योऽन्यत्र पठ्यते, तस्य कोचेत् कुच इति द्रष्टव्यम् । तत्र ज्वलादिषु पाठादेवानयोरपि रूपयोः सिद्धत्वेऽपि कुच एवात्रार्थे यथा स्यात्, न तु कोचोऽपीत्येवमर्थं पृथक् पठ्यते ; न पुनः कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनतारशब्देष्वित्येकीकृत्यवै[1] ॥

वियोजनेऽर्चयेदर्च्यौ स्तुतावृचतीत्यृचेः ।

ऋचेर्युजादौ मृग्यः पाठः । 'रिच वियोजने' इति प्रागुक्त एव हि पाठो दृश्यते । 'ऋच स्तुतौ' । तुदादिः ॥

शशपोरुञ्छतीत्युञ्छे स्वरभेदाद् द्विरुच्यते ॥ ५५ ॥

उञ्छतीति विवासे स्यादिदितोऽनिदितस्तयोः ।

'उछि उञ्छे' । 'उञ्छो धान्यश आदानं कणिशाद्यार्जनं शिलम्' इति यादवप्रकाशः । श्लोकेऽपि **विवास** इतिवद् उञ्छे इति सप्तम्येव, न पुनरुञ्छेरिति षष्ठी । विसर्जनीयकल्पनागौरवं चैवं परिहृतम् । यद्येवमुञ्छतीत्येव शशपो रूपं, ततः स्वतः प्राप्ते भूवादावेवायं पठ्यताम् । अथापि 'शतुर्वा नुं शे स्यादिति तुदादिते'ति वक्ष्यमाणनीत्योञ्छन्ती उञ्छतीति नुम्विकल्पार्थं तुदादौ पठ्येत । तथापि न भूवादौ । तदेवं रूपाभेदात् कुतोऽयं द्विष्पठ्यते इत्यत उक्तं **स्वरभेदा**दिति । उञ्छतीत्यापाततो रूपाभेदेऽपि सूक्ष्मेक्षिकायां मध्योदात्ताद्युदात्तत्वाभ्यां रूपभेदोऽप्यस्त्येवेत्यर्थः ।

१. द्वापञ्चाशपद्योक्तः.

अत्र हि 'अनुदात्तौ सुप्पितौ' (६-१-४) इत्यनुदात्तस्तिप्शपोरजिति 'धातोः' (६-१-१६२) इत्युदात्त उकारः 'उदात्तादनुदात्तस्य स्वरित' (८-४-६६) इति स्वरितः शप्। 'स्वरितात् संहितायामनुदात्तानाम्' (१-२-३९) इत्येकश्रुतिरिकारः। स एव च प्रचय इत्युच्यते। एवं शप्याद्युदात्तं पदम्। शे पुनः 'आद्युदात्तश्च' (३-१-३) इत्युदात्ते सति मध्योदात्तम्। तथा च 'अनुदात्तं पदमेकवर्जम्' (६-१-१५८) इत्यनुदात्त उकारः। स च 'उदात्तस्वरितपरस्य सन्नतर' (१-२-४०) इत्यनुदात्ततरः। तिपश्चानुदात्तस्वरितौ पूर्ववत्। 'उछी विवास' ईतीदित्त्वेनेदित्त्वाभावान्नुमभावेन तयोः शशपोरुच्छतीति स्यात्। विपूर्वश्चायं प्रायः प्रयुज्यते। 'ततो रजन्यां व्युष्टायाम्' 'व्युच्छन्ती दुहिता दिवः'। 'उषा उच्छदपस्निधः' इति॥

णौ विच्छयति भाषार्थे गतौ विच्छायतीति शे॥ ५६॥
विच्छेराये शतुर्वा नुं शे स्यादिति तुदादिता।

विच्छ भाषार्थः। 'विछ गतौ'। 'छे च' (६-१-७३) इति तुक्सिद्धोर्विच्छेत्यपपाठः। तत्र चान्त्याद् 'गुपूधूपविच्छिपणिपनिभ्य आय' (६-१-२८) इत्याये शे च सति विच्छायतीति भवति। अथास्य तुदादिपाठः किमर्थः। न तावत् स्वरार्थः। 'एकादेश उदात्तेनोदात्त' (८-२-५) इत्यनुदात्तस्य शशपोर्विशेषाभावात्। इह हि शे उदात्ते पूर्ववद्धात्वकारोऽनुदात्तः। शपि त्वनुदात्तेऽसावुदात्त इत्येवं सत्यपि विशेषे तयोरेकदेश उदात्त एवेत्यत

१. ईदित्त्वेनेति च्छेदः. २. व्युच्छन्ती (तमांसि) वर्जयन्तीत्यर्थः। इदं तैत्तिरीयब्राह्मणे तृतीयाष्टके प्रथमप्रश्ने तृतीयेऽनुवाकेऽस्ति. ३. विपूर्वत्वव्यभिचरोदाहरणमिदम्। अपोच्छद्=अपवर्जयतीत्यर्थः। एतच्च ऋक्संहितायां प्रथमाष्टके चतुर्थाध्याये चतुर्थवर्गेऽस्ति. ४. धात्वकारशबकारयोः.

आह—शतुर्वा नुं शे स्यादिति तुदादिता । शे हि सति विच्छायती विच्छायन्तीत्यत्र 'आच्छीनद्योर्नुम्' (७-१-८०) इति नुं विकल्प्यते । शपि तु 'शप् श्यनोर्नित्यम्' (७-१-८१) इति नित्यं स्यात् ।

अत्र केचित् तुदादिपाठबलाद्विच्छतीत्यपि रूपमिच्छन्ति[1] । 'तुदादिभ्यः शः' (३-१-७७) इति विच्छेः शो विधीयते, न तु विच्छायेः, विच्छेरेव तुदादिषु पाठात् । तच्चैतद् विच्छेः शविधानम् आये नित्ये सत्यायान्ताद् भवत् परिक्लिश्येत । एवं[2] चा'यादय आर्धधातुके वा' (३-१-३१) इत्यत्र '[3]शपि नित्यम्' इति भाष्ये शब्ग्रहणं विच्छेः शेऽप्यायस्य विकल्पे सत्याज्ञस्येनावकल्पेत । न पुनः शिद्विकरणोपलक्षणतया कथञ्चि[4]न्नीयेत । तथा च सुधाकरः—'विच्छेस्तुदादिषु पाठो ज्ञापकः सार्वधातुकेऽप्यायप्रत्ययोऽनित्य इति । तेन विच्छतीति सिद्धम्' इति । 'छ्वोः शूङनुनासिके च (६-४-१९) इत्यत्र न्यासकारश्च—'गां विच्छतीति गोविड्' इति । †यन्नुंविकल्पः फलमित्युक्तं, तुदादिपाठात् तदपि

---

१. आयादेशाभावपक्षे शे सति रूपमिदम् । अपिशब्दसङ्ग्राह्यं तु विच्छायतीति आयान्तादौत्सर्गिके शपि द्रष्टव्यम्. २. एवञ्च = शेऽप्यायस्य नित्यत्वे च. ३. दोषपरिहारार्थं 'आयादयः शपि नित्यम्' इति कश्चिन्न्यासभेदोऽयम् । अनेन च शपोऽन्यत्र सर्वत्रायप्रत्ययस्य विकल्पः स्वरसतः प्रतीयते. ४. कैयटेन तु नीयते, यत् स आह—"ननु तौदादिकत्वाद्विच्छेः शेन भाव्यं, न तु शपा । एवं तर्हि न्यासभेदोपलक्षणार्थमिदमिति 'शिति नित्यम्' इति तु न्यासः कर्तव्यः" इति । एवं च शेऽप्यायस्य नित्यत्वं फलति । विच्छेः शविधानस्यायप्रत्ययान्तार्थत्वं च गुपादिप्वनुबन्धकरणस्य सन्नन्तसमुदायार्थत्ववदुपपत्स्यत इति पूर्वोक्तः परिक्लेशोऽपि न्.

---

†'यच्च नुम्' इति गपुस्तके पाठः.

सम्भवतीति तुदादिपाठस्येदमेव फलं न्याय्यम् । एवं च नुंविकल्पाद्विच्छन्ती विच्छतीत्येव युक्तम् । विच्छायतीत्यौत्सर्गिकः शबेवेति नित्यो नुम् ॥

रजते रजतीत्येव रज्यते रज्यतीत्यपि ॥ ५७ ॥
रागार्थे शप्श्यनोर्द्वे द्वे

'रञ्ज रागे' । 'दंशसञ्जस्वञ्जां शपि' । 'रञ्जेश्च' (६-४-२६) इति, 'अनिदिताम्' (६-४-२४) इति नलोपः ॥

गतौ वजति वाजयेत् ।

'वज, व्रज गतौ' । 'वज मार्गसंस्कारगत्योः' । मार्गण इति धनपालः । 'वज, मार्गेति द्वौ धातू इत्यन्ये' इति क्षीरस्वामी । व्रजेति चन्द्रः । 'व्रज मार्गसंस्कार' इति दुर्गः । उभयोरप्यनयोर्वजव्रजपक्षयोर्मार्ग(ण?)संस्कार इत्येवार्थस्तन्त्रान्तरे पठ्यते ॥

दीप्तौ शप्येजते तत्र भवेदेजति कम्पने ॥५८॥

'एजृ भ्रेजृ भ्राजृ दीप्तौ' । 'एजृ कम्पने' ॥

वृणक्ति वर्जने वृङ्क्ते यौ वर्जयति वर्जति ।

'वृजी वर्जने' । रुधादिर्युजादिश्च । तत्र चाद्ये वरण इति धनपालशाकटायनौ । 'वृजि वर्जने' । अदादिरनुदात्तेत् । ईदित्पाठे तु नुमभावाद्वृक्त इति पाठः । तथा च क्षीरस्वामी । वृजि इति पठित्वा 'वृजी इति दौर्गाः । वृक्ते वार्जिता वृक्तः' इत्याह । तत्र चान्त्ये 'श्वीदितो निष्ठायाम्' (७-२-१४) इतीडभावः । शाकटायनस्य त्वयं सम्पर्चने । यदाह—'विजुङ् वृजुङ् वृजैङ्

---

१. अनेन नलोपो दैवादिके.

सम्पर्चने' इति। तेन च [1]ईदित्स्थाने ऐदित् क्रियते ॥

गर्जेद् गृञ्जेद् गजेद् गञ्जेच्छब्दने गाजयेण्णिचि ॥५९॥

'गज गाजि गृज गृजि मुज मुजि शब्दार्थाः'। मज मुजीति क्षीरस्वामी चन्द्रश्च। 'मृज मृजीत्यप्याहुरि'ति च[†]। 'गज मदने च'। शब्देऽस्य पाठो मदने [2]प्रयोगाप्राचुर्यार्थो नूनम्। यदाह 'अधि मधि लधि गत्याक्षेपे। मधि कैतवे च' इत्यत्र मैत्रेयरक्षितः—'पूर्वमस्य पाठः कैतवार्थस्यान्वा[3]चितत्वद्योतनाय' इति। [4]व्यभिचरति चैतद् 'वृषु पृषु मृषु सेचने। मृषु सहने च' इत्यादौ। [5]गंज शब्दार्थः। अत्र च गर्जतीत्येतद् 'गर्ज शब्द' इत्यस्यापि कामं द्रष्टव्यम् ॥

धर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद् गतौ शपि।

'ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ' ॥

शौचालङ्कारयोर्वा णौ मृजेर्मार्जाति मार्जयेत् ॥ ६० ॥

मार्ष्टि शुद्धौ तथा §मार्जेः शब्दार्थाद् मार्जयेण्णिचि।

'मृजू शौचालङ्कारयोः'। मृजूषिति क्षीरस्वामी; षकारोऽङर्थ इति च। तच्चिन्त्यम्, मृजेति भिदादिपाठात् सिद्धेः। 'मृजेर्वृद्धिः' (७-२-११४) इति वृद्धिः। 'मृजू शुद्धौ'। अदादिः।

---

१. "न ङीयङ्यैदिद्वेटोऽपतः' (४-२-१४३) इति शाकटायनः। 'ङीयश्चिभ्यामैदितो विकल्पितेटश्च क्त्वोरिड् न भवति, न पतः' इति च तदर्थः. २. चार्थान्वाचययोगेन मदनरूपार्थस्यानुषङ्गिकत्वसम्पादनात् तस्मिन् धातोः प्रयोगाप्राचुर्यं फलतीत्यभिप्रायः. ३. अन्वाचितत्वं = अन्वाचययुक्तत्वं। तद्द्योतनाय. ४. 'मृङ् सहने च' इत्यत्र हि चशब्दः समुच्चयार्थ एवाश्रयणीयो, नत्वन्वाचयार्थः सहने-प्रयोगप्राचुर्योपलम्भात्. ५. 'गज मार्ज शब्दार्थौ' इति चुरादौ पठितः.

†'चाह' इति गपुस्तके पाठः. §'मार्ज शब्दार्थे' इति खपुस्तके पाठः

मार्ज शब्दार्थः । तथा 'गज गजी'त्यत्र क्षीरस्वामी मृज मृजि इत्यप्याह मार्जति मृज्नतीति ॥

वेवेक्तीति पृथग्भावे विविक्ते च भये पुनः ॥ ६१ ॥
विनक्ति विजते

'विजिर् पृथग्भावे' । जुहोत्यादिः । 'णिजां त्रयाणां गुणः श्लौ' (७-४-७५) इत्यभ्यासस्य गुणः । 'ओविजी भयचलनयोः' । रुधादिस्तुदादिश्च ॥

सर्गे सृज्यते सृजतीति च ।

'सृज विसर्गे' । दिवादिस्तुदादिश्च । लोके त्वनुपसृष्टः सृजिः सृष्टौ प्रसिद्धः कर्षतिरिवाकर्षण इत्यतो विसर्ग इति नोक्तं 'कर्षत्याकर्षण' इत्यत्रैव विलेखन इति ॥

ऋञ्जते भर्जने गत्याद्यर्थे स्यादर्जते त्वृजेः ॥ ६२ ॥

'ऋजि भृ (जि?)जी भर्जने' । 'ऋज गतिस्थानार्जनोपार्जनेषु' इति मैत्रेयरक्षितः । ऊर्जनेष्विति क्षीरस्वामिशाकटायनधनपालाः । अनुदात्तेत् ॥

प्रतियत्नेऽर्जयेदर्जेरर्जतीत्यर्जने पदम् ।

'अर्ज प्रतियत्ने' । अत्र 'उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु' (६-१-१३९) इत्यत्र वामनः—'सतो गुणान्तराधानमाधिक्याय वृद्धस्य वा तादवस्थ्याय समीहा प्रतियत्नः' इति । अत्र चान्तरो-

---

१. एतच्च ५९ श्लोके गर्जेदित्यंशव्याख्यायामुक्तम् . २. अयं स्वरितेत् . ३. 'कर्षत्याकर्षणे शे तु कृषते कृषतीत्युभे' इति १७८तमे श्लोके. ४. काशिकाकारः. ५. वृद्धियुक्तावस्थायाः प्रच्युतिपरिहारायेत्यर्थः. ६. अन्तरशब्दस्यान्यवाचिन उपादानेन.

क्त्या प्रागेव गुणे सति पुनराधानं किमर्थमित्यत उक्तम् 'आधिक्याये'ति । अधिकस्येत्युक्तौ च गुणान्तराधानेनैवाधिक्यं भायादित्यन्यैकृतमप्याधिक्यं संगृहीतं 'वृद्धस्ये'ति । अर्थान्तरे त्वयमर्जिः प्रसिद्धः — 'द्रव्यमर्जयन् ब्राह्मणः प्रतिगृह्णीयाद्' इति । अर्ज षर्ज अर्जने ॥

निङ्क्ते नेनेक्ति नेनिक्ते शौचेऽर्थे पोषणे तथा ॥ ६३ ॥

'णिजिर् शौचपोषणयोः' । रुधादिर्जुहोत्यादिश्च ॥

युनाक्ति युङ्क्ते योगार्थे समाधौ युज्यते श्यनि ।
युजेः संयमनार्थे वा णौ योजयति योजति ॥ ६४ ॥

'युजिर् योगे' । 'युज समाधौ' । अनुदात्तेत् । 'युज पृच संयमने' ॥

भुजेद् भुनक्ति भुङ्क्ते स्युः कौटिल्ये पालनेऽदने ।
[क्रमेण

'भुजो कौटिल्ये' । 'भुज पालनाभ्यवहारयोः' । तुदादी रुधादिश्च । 'भुजोऽनवने' (१-३-६६) इति तङ् ॥

प्रतियन्नेऽर्जेरर्जयेदर्जनेऽर्जति ।]

ये तु प्रागेव 'प्रतियन्नेऽर्जयेद्' इत्याद्यपाठिषुः, तेऽत्र 'क्रमेण' इत्यादि न पठन्त्यर्थाभेदात् ॥

सेवायां भजते भजेदिति भजेर्विश्राणने भाजयेद्
आमर्दे तु भनक्ति भाजयति णौ भाजेः पृथक्कर्मणि ।

---

१. विद्यमानत्वेन ज्ञाते सतीत्यर्थः. २. अन्येन गुणान्तराधानातिरिक्तेन स्वभावादिना कृतम्. ३. अयमनुदात्तेत् । अन्यस्तु स्वरितेत्.

भाषार्थे णिचि भञ्जयेद्

'भज सेवायाम्' । 'भज विश्राणने' । 'भञ्जो आमर्दने' । नोपधोऽयम् । चुत्वेन ञकारः । तेन 'श्नान्नलोप' (६-४-२३) इति नलोपः 'पूर्वत्रासिद्धम्' (८-२-१) इति चुत्वस्य तत्रासिद्धत्वात् । 'भाज पृथक्कर्मणि' । तच्च पृथक्करणम् । भजि भाषार्थः ।

अभिहिते त्वर्थे पदं तुञ्जये-

द्धिंसायां शपि तुञ्जतीत्यनिदितस्तस्यां तुजेस्तोजति ॥

तुजि भाषार्थः । अभिहितोऽर्थो भाषायामित्युक्तोऽर्थः । वक्ष्यमाणापेक्षया विशेषद्योतकस्तुः; पादपूरणो वा । 'तुज तुजि हिंसायाम्' । 'तुजि पालने च' ॥

सन्तर्जने तर्जयते भर्त्सनार्थे तु तर्जति ॥ ६६ ॥

'तर्ज, भर्त्स सन्तर्जने' । †चितादिः । 'तर्ज भर्त्सने' । अर्थैक्येऽपि धातुपाठवशात् पृथक्कथनम् ॥

वर्णे पिङ्क्ते भवेत् पिञ्जेर्भाषार्थे पिञ्जयेदिति ।

'पिजि वर्णे' । अदादिरनुदात्तेत् । 'पृजिरित्येके' इति मैत्रेयरक्षितः । 'पिजुङ् संपर्चने' इति शाकटायनः । पिजि भाषार्थः । 'तुजि पिजि हिंसाबलादाननिकेतनेषु' इत्यर्थान्तरेऽपि चौरादिकौ तुजिपिजी स्तः ।

गुञ्जेदव्यक्तशब्दे स्याच्छब्दमात्रे गुजेदिति ॥ ६७ ॥

'गुजि अव्यक्तशब्दे' । गुज इत्यपरे । तथा च क्षीर-

---

१. अयं पटपुटादिदण्डके पठितः । एवं तुजिपिज्यादयो द्रष्टव्याः.

† 'चितादी' इति घपुस्तके पाठः.

स्वामी – 'अनिदित्येके' इति । सुधाकरश्च भूवादि (१-३-१) सूत्रे 'अनिदित्पारायणेष्वपाठि, गोजति जुगोजेत्याद्युदाहृतेः । *पक्षे पुनरिदिदेव गीतः' इति । शाकटायनः पुनर्गुज गुजीति पठन् पक्षद्वयमपि परिजग्राह । 'गुज शब्दे' । तुदादिः ॥

भृज्जते भृज्जति भ्रस्जेर्भर्जने भर्जते भृजेः ।

'भ्रस्ज पाके' । 'ऋजि भृजी भर्जने' ॥

प्रकाशे लजयेद् व्रीळे लज्जते लजते पदे ॥ ६८ ॥
लज्जेल्लाजेल्लजेल्लाजेदित्येते भर्त्सने शपि ।

'लज प्रकाशने' । कथादिः । 'लजि इत्येके' इति मैत्रेयरक्षितः । तदा लज्जयेदिति पठितव्यम् । लज्जापयेदिति शाकटायनः । 'कथादिपातिस्फायोऽग्लग्वम्' (४-१-१९७) इत्यगागमश्च । कथादीनां पातेः स्फायतेश्च अक्, लक्, वम् इत्येत आगमा णौ क्रमाद् भवन्तीत्यर्थः । ततो वृद्धिपुकौ । 'ओलजी, ओलस्जी \$व्रीळने' । तुदादी । तत्र च शो भवन् 'तास्यनुदात्तेद्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमङ्णिङोः' (६-१-१८६) इति तिङ्यनुदात्ते उञ्छतिवदुदात्तः । 'लज लाजि भर्त्सने' । 'लाज लजि भर्त्सने च' । अत्र मैत्रेयरक्षितः – 'चकारो भिन्नक्रमः । एतावपि भर्त्सने पठ्येते इत्यर्थः' । इति । 'लज लजि भर्त्सने । लाज लाजि भर्जने च' इति तु क्षीरस्वामी । 'लज लजु भर्त्सने' । लाज लाजु भर्जने चे'ति पठन् शाकटायनोऽप्येतैवानुकूलः । एवञ्च भ(र्ज?)र्त्सनग्रहणं भर्जनस्यापि काममुपलक्षणं द्रष्टव्यम् । लज्जयेदिति च क्षीरस्वामिनः पक्षे, तेन लजेरपि पट-

*'लक्ष्ये' इति गपुस्तके पाठः. \$ 'व्रीले' इति गपुस्तके पाठः.

पुटादिदण्डके 'तुजि पिजी'त्यत्र च लजि लुजीत्यपि पाठात् ॥

भङ्गे रुजति हिंसायां रोजयेदिति णौ रुजेः ॥ ६९ ॥

'रुजो भङ्गे' । तुदादिः । 'रुज हिंसायाम्' । ग्रसादित्वात्[1] सकर्मकादेव णिच् ॥

घाटयेद् घण्टयेत् सङ्घभाषयोर्घटते मितः ।
क्रमाद्विकासे शशपोः स्फुटति स्फोटते पदे ॥ ७० ॥
स्फोटयेत् स्फोटतीति द्वे भेदे विशरणे क्रमात् ।

अत्र घाटयतिस्फोटयत्योर्विवदन्ते । तत्र धनपालस्तावत्—"'चटास्फुट भेदने' उच्चाटयति आस्फोटयति । 'घट च सङ्घाते' । चकारात् पूर्वौ चात्रार्थे णिचमुत्पादयत" इति । शाकटायनस्तु—'चटास्फुटौ घट च हन्त्यर्थौ' इति । क्षीरस्वामी तु "'चट स्फुट भेदने' चाटयति स्फोटयति । 'घट च' घटधातुश्च भेदने वर्तते । 'हन्त्यर्थाः' । हन्त्यर्थाश्च धातवो णिचमुत्पादयन्ति" इत्युक्त्वा दर्शनान्तरमप्याह—"'घट च हन्त्यर्थाः' । चटस्फुटधातू द्वौ घट च धातुस्त्रय एते हन्त्यर्था हन्तिना समानार्था णिचमुत्पादयन्ति" इति । मैत्रेयरक्षितस्तु—"'चट स्फुट भेदने' । घट सङ्घाते' 'हन्त्यर्थाश्च' । येऽन्येषु नवसु गणेषु हिंसार्थाः पठ्यन्ते, त इह द्रष्टव्याः" इति । तत्र नवस्विति शबादिविकरणविषयेषु भ्वादिप्रभृतिषु । इहेति चुरादौ । एतेषु च पक्षेष्वन्त्यस्यानुकूलं[2] दैवम् । घट घटि भाषार्थौ । ततश्चार्थौ[3] यथासङ्ख्यं न भवतः । 'घट चेष्टायाम्' । तस्य तु मित्त्वाद्धेतुमण्णिचि घटयेत् । स्फुट विक-

---

१. आस्वादीयत्वात् . २. आनुकूल्यं च 'भेदे स्फोटयेद्' इति, 'सङ्घे घाटयेद्' इति च कथनात् स्पष्टम् . ३. घाटयतेरपि भाषार्थकत्वादित्यर्थः.

सने'। 'स्फुटिर्विशरणे'। स्फुटेति चन्द्रः। इरित्फलं तु 'इरितो वा' (३-१-५७) इत्यङ्विकल्पः। अस्फुटत्। अस्फोटीत्॥

प्रमर्दने चाक्षेपे च मुटेदाद्ये तु मोटति॥ ७१॥
सञ्चूर्णने चुरादेर्णौ मोटयेदतङस्त्रयः।

'मुट आक्षेपप्रमर्दनयोः'*। तुदादिः। 'मुट प्रमर्दने'[1] 'पुडि' इति धनपालः। शाकटायनश्च 'पुडु' इति पठन्नत्रैवानुकूलः। क्षीरस्वामी त्वेतौ पाठौ मुटि मुडि इत्यपरौ चावोचत्। मैत्रेयरक्षितस्तु 'मुडि खण्डन' इत्यत्राह—'पुडि चेत्येक' इति। 'मुट सञ्चूर्णने'॥

हिंसातिक्रमयोरट्टेरट्टतेऽनादरेऽट्टयेत्॥ ७२॥

'अट्ट अतिक्रमहिंसनयोः'। अत्र मैत्रेयरक्षितः—"दोपधोऽयमिति स्मर्यते। 'ष्टुना ष्टुः' (८-४-४१) इत्यत्र न्यासकारेण तु तकारोपधोऽयमित्युक्तम्" इति। क्षीरस्वामी तु 'पक्षद्वयेऽपि पाठेऽत्र ष्टुत्वं न कृतमसन्देहार्थम्' इत्यप्याह। 'अन्ये अड्डेत्याहुः[2] इति च। तत्र चाद्ये पक्षे संश्चङोः कृतयोः 'नन्द्राः संयोगादय' (६-१-३) इति दकारवर्जे द्विरुक्तौ ष्टुत्वे[3] 'पूर्ववत्सन' (१-३-६२) इति तङि च कृते अट्टिटिषते आट्टिटदिति भवति। अन्ये त्व-

१. 'आद्ये' इत्यस्य विवरणमिदम्. २. 'डान्तपाठः प्रकरणविरोधादुपेक्ष्यः' इति माधवः. ३. उपधाभूतस्य तकारस्य ष्टुत्वे तस्य 'पूर्वत्रासिद्धीयमद्विर्वचन' इति सिद्धत्वाद् टकारद्वयसहितस्य द्वित्वे 'हलादिः शेषः' (७-४-६०) इति निमित्तटकारनिवृत्त्या नैमित्तिकस्य ष्टुत्वस्य निवृत्तौ तकार एवाभ्यासेऽवतिष्ठत इति भावः। 'निमित्तापाये नैमित्तिकस्याप्यपायः' इत्येतदनाश्रयेण तु अटिट्टिषते आटिट्टद् इत्येव रूपं माधवो मन्यते.

* 'आक्षेपमर्दनयोः' इति गपुस्तके पाठः.

तिट्टिषते आतिट्टादिति । 'अट्ट अनादरे' ॥

घट्टयेद् घट्टते द्वे स्तां चलने णौ शपि क्रमात् ।
'घट्ट चलने' । अन्त्योऽनुदात्तेत् ॥

णौ लोटयति भाषार्थे लुट्येल्लोटति लोटने ॥ ७३ ॥
लोटते प्रतिघातेऽर्थे स्तेये लुण्टति लुण्टयेत् ।
रोटते प्रतिघातेऽर्थे रोषे रोटयतीति णौ ॥ ७४ ॥

लुट भाषार्थः । 'लुट विलोटने' । दिवादिर्भ्वादिश्च । अत्र भ्वादिसूत्रे सुधाकरः—"'लुड विलोडन' इति डान्तः । लान्तोऽपि तु दृदृशे । लोलः । 'लोलह्रुजाकारबृहत्तरङ्गः' इति माघे । 'डलयोरेकत्वस्मरणमिति कोचिद्' इति वा प्रतिविधेयम्' इति । 'रुट लुट प्रतीघाते' । अनुदात्तेतौ । ठान्ताविमावित्येके । तथा च क्षीरस्वाम्येवमेव पठित्वाह—"रुट लुट इत्येके । 'बाधृ लोटन' इति लिङ्गाद्" इति । तथा 'रुट दीप्तावि'त्यप्यनुदात्तेत्सु स एवाह । लुटि इति तु शाकटायनः । रुट लुट इति हरियोगी । 'रुटि लुटि स्तेये' । क्षीरस्वामी तु—'रुठि लुठि इत्येके । रुण्ठति लुण्ठति' इति । रुडु लुडु इति डान्तकाण्डे शाकटायनः । 'लुण्ट स्तेये' । लुण्ठेति क्षीरस्वामी । लुण्डेति शाकटायनः । तत्र चाद्य एव पाठो 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' (३-२-१५५) इति सूत्रपाठानुसारी । यस्तु लुटीत्यनेन लुण्टाक इति निर्वाहः क्षीरस्वामिनः, सोऽपि 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि'ति नीत्या विरुध्यते । लुटीत्यस्य हि लुण्टभावो लाक्षणिकः । स च लुण्टे-

---

१. अयं चुरादिः. २. लुण्ट लुण्ठ लुण्डेषु. ३. इदितौ.

त्येव प्रतिपदोक्ते धातौ सम्भवति कथङ्कारं गृह्येत, लुण्टेत्यस्यैव झटिति परिस्फुरणात् । 'कुट्टि लु(ण्टि?)ण्डिवृङ्जल्पभिक्षादाकट्' (४-३-२५५) इति शाकटायनानुसारेण कुट्ट लुण्डेत्येव पाठपरिकल्पनेऽपि टकारसाहचर्यादनाञ्जस्यं व्यक्तमेव । 'रुष रोषे । रुट इत्यप्येके' इति मैत्रेयरक्षितः । 'रुट भाषार्थ' इति च क्षीरस्वामी ॥

कूटयेताप्रसादे णौ कूटेर्दाहे तु कूटयेत् ।

'कूट अप्रसादे' । चितादिः । 'कुट प्रतापन इत्येके' इति मैत्रेयरक्षितः । स एव तु पाठः प्रायेण दृश्यते । तदा 'कोटयेत प्रतापे णौ' इति पठितव्यम् । 'कुट्ट प्रतापने' । कुट्टयेतेति क्षीरस्वामी । 'कुट्ट छेदनपूरणयोरि'[1]ति च चुरादावेवाह । कुत्सनयोरिति तु बहवः । छेदन इत्येव पुनः 'जल्प भिक्ष' (३-२-१५५) इत्यत्र जिनेन्द्रः । एवमेव च दुर्गः । सर्वथापि तरय कुट्टयतीति द्रष्टव्यम् । कुटपक्षे तु 'कुट कौटिल्य' इत्यस्य तुदादेः कुटतीति । 'कूट दाहे' । कथादिः । तत्फलं पुनरचुकूटदित्यत्र 'नाग्लोपिशास्वृदिताम्' (७-४-२) इति ह्रस्वाभावः । परितापन इति तु मैत्रेयरक्षितः । 'केत श्राम कुण गुण चामन्त्रण' इति चकारादामन्त्रणेऽप्ययं वर्तते । केत ग्रामेति मैत्रेयरक्षितपाठेऽप्यत्रांशे[2] न विवादः । बह्वनुमतत्वात् परमाद्यमेव पाठमभिरोचयामहे ॥

भाषासंसर्गसंश्लेषे पोटयेत् पुटयेत् पुटेत् ॥ ७५ ॥

पुट भाषार्थः । 'पुट संसर्गे' । कथादिः । पुट संश्लेषे । तुदादिः ॥

---

१. चितादेर्बहिरित्यर्थः. २. चकारेण कूटानुकर्षणांशे. ३. समाहारद्वन्द्वोऽयम्.

नृतौ नटत्यवस्पन्दे चुरादेर्णिचि नाटयेत् ।

'नट नृतौ' । नृतौ *नृत्ताविति च क्षीरस्वामी । उभयथापि नर्तन इत्येवार्थः । तच्च नाट्यम्, यत्कारिषु नटव्यपदेशः । न तु मार्गदेशीशब्दाभ्यां प्रसिद्धं नृत्यं नृत्तञ्च,यत्कारिषु नर्तकव्यपदेशः । तत्र च वाक्यार्थाभिनयो नाट्यम् । पदार्थाभिनयस्तु नृत्यम् । अभिनयशून्यः पुनः शास्त्रोक्तभङ्ग्या गात्रविक्षेपो नृत्तमिति तद्विदः । नैघण्टुकानां तु 'ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम्' इत्यभेदव्यवहारो निरूढलक्षणयैव नेयः, 'अन्यायश्चानेकार्थत्वम्' इति न्यायात् । 'नट अवस्पन्दने' । तच्च नाट्यम् । नाट्य इत्येव चन्द्रः । अत्र च णोपदेशाणोपदेशविभागो 'णो नः' (६-१-६५) इत्यत्र भाष्ये दर्शितः—'सर्वे नादयो णोपदेशा नृतिनन्दिनर्दिनाङ्किनाटिनाथृनाधृनूवर्जम्' इति । केचित् पुनस्थान्तमेवात्र पठन्ति, न धान्तम । तथा च 'णाधृ नाथृ याच्ञोपतापैश्वर्याशीष्षु' इत्यत्र मैत्रेयरक्षितः—'आद्यो णोपदेशः, नेतर' इति । (नृत?) नृ इति प्रायो न पठन्ति । तथा च श्रीधरो नृत्यागेन नृत्यादीन् पठित्वा 'एतान् सप्त वर्जयित्वा' इत्याह । नटिश्रुरादिण्यन्तो† नाटिः । 'नृती गात्रविक्षेपे' । 'टुनदि समृद्धौ' । 'नर्द गर्द शब्दे' । शाकटायनन्यासे तु णोपदेशो वायम् । 'नङ्क ठङ्क नाशने' । 'नृ नये' । तत्र च प्रणटति प्रनाटयति इत्यादौ 'उपसर्गादसमासेऽपि णोपदेशस्य' (८-४-१४) इति णत्वं तदभावश्च णोपदेशाणोपदेशफलम् । घटादौ चायं नटिः पठ्यते ।

१. घटादिरत्वदीर्घार्ह इति न गृह्यते.

*'नृत्तावित्यपि' इति गपुस्तके पाठः. †'दिर्ण्यन्तो' इति गपुस्तके पाठः.

अर्थपाठे त्वस्य विवदन्ते। तत्र तावन्नृताविति नृत्ताविति गताविति च पक्षत्रयं मैत्रेयरक्षितः प्रतिपेदे। क्षीरस्वामी तु — 'नट नतौ नटयति शाखाम्। नृत्तौ तु नाटयति' इति॥

भाषार्थे पाटयेद् ग्रन्थे पटयेद् गमने पटेत्॥ ७६॥
वण्टयेद्वण्टतीत्येते णिशपोः स्तां विभाजने।
णावदन्ताद्वटेर्ग्रन्थे वटयेद्वेष्टने वटेत्॥ ७७॥

पट भाषार्थः। 'पट वट ग्रन्थे'। *कथादिः। स च वेष्टनमिति क्षीरस्वामी। 'अट पट गतौ'। 'वटि विभाजने'। चुरादिः कथादिर्भ्वादिश्च। तत्र च कथादौ वटेत्येके। तथा च मैत्रेयरक्षितो वटेति पठित्वा 'वटीत्येके' इत्याह। तदा वटयेदित्यपि द्रष्टव्यम्। वण्टापयेदिति तु शाकटायनः। तच्च लज्ञापयेदितिवन्नेयम्। मैत्रेयरक्षितश्चाह — 'अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यपरे। वण्टापयति लज्ञापयति' इति। चुरादौ तु स एवाह — 'वटि विभजन इति भ्वादौ पठ्यते। ततो हेतुव्यापारे णिचि विभाजनेऽर्थे वण्टयतीति सिध्यति। किन्त्वेसौ[2] कर्त्रभिप्राये क्रियाफले आत्मनेपदी। अनेन[3] पुनस्तत्रापि वण्टयतीति[4]। अन्ये पुनर्वैचित्र्यार्थमस्योपादानमिच्छन्ति' इति। तदा[5] 'णिशपोः स्तां विभाजने' इत्येतद्विभाजने विभजने चेति व्याख्येयम्। भाजेर-

१. नमयतीत्यर्थः. २. हेतुण्यन्तः. ३. चौरादिकेन. ४. इदं च प्रयोजनं चुरादिण्यन्तेभ्यो 'णिचश्च' (१-३-७४) इत्यात्मनेपदाभावपक्षे। पक्षान्तरे तु चुरादौ पाठो वैचित्र्यार्थ इत्याह — अन्ये पुनरिति. ५. भौवादिकस्य विभजनार्थत्वे.

*'कथादी' इति घपुस्तके पाठः.

रपि पृथक्कर्मकर्मणो विभजनार्थत्वसम्भवाद् । बहुसम्मतत्वाद्वो-भयत्रापि विभाजन इत्येव युक्तं पाठं मन्यते । क्षीरस्वाम्यादयः पुनर्वेहवश्चुरादिं डान्तं पठन्ति । डान्तकाण्डं चैवमनुसृतं भवति । शाकटायनः पुनर्भूवादिमपि डान्तकाण्ड एवाध्यगीष्ट । 'वट वेष्टने' । 'वट भट परिभाषणे' इति च घटादौ पठ्यते । बटेत्यप्याद्यो बहुषु कोशेषु दृश्यते ॥

श्लेषालस्योपघातेषु प्रतिघाते क्रमाल्लुठेत् ।
लुण्ठेल्लोठति लोठेत किन्तु गत्यां च लुण्ठति ॥ ७८ ॥
रुण्ठतीति गतौ रोठेदुपघाते-

'लुठ श्लेषणे' । तुदादिः । 'लुड इत्येके' इति मैत्रेयरक्षितः । डान्तकाण्डं चैवमनुसृतं भवति । लुउतीति लक्ष्यदर्शनात् तुदादौ पाठ इति भूवादौ क्षीरस्वामी । 'लुठि आलस्ये गतिप्रतिघाते च' । 'रुठ लुठ उपघाते' । 'उठ इत्यप्येक' इति मैत्रेयरक्षितः । उठ इत्येव धनपालः । क्षीरस्वामी त्वेवमेव पठित्वा 'रुठ लुठेत्यपि दौर्गाः' इत्याह । ऊठ इत्येव शाकटायनः । 'लुठ प्रतीघाते' । अत्र भूवादिसूत्रे सुधाकरः—'लुट प्रतिघाते इति लुटवद् द्वितीयान्तोऽपि प्रलुठितो लोठमान इति प्रयोगदर्शनादूरीकृतः' इति । कैयटस्तु 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (३-१-७) इत्यत्र लुलुठिषत इति भाष्यं व्याचक्षाण आह—'रुठ लुठ प्रतिघाते इति द्युतादौ पठ्यते' इति । 'रुठि लुठि गतौ' ॥

---

१. पृथक्कर्म पृथक्करणं विभजनं, तत्क्रिय इत्यर्थः. २ विभाजनशब्दार्थद्वयकल्पनाक्लेशमरोचयमानो देवाभिप्रायमन्यथा विवृणोति—बहुसम्मतत्वाद्वेति.

ऽथ कण्ठते।

शोके यौ कण्ठयेत् कण्ठेत् कठेत् स्यात् कृच्छ्रजीवने ॥

अथशब्दः पूर्वार्थान्वयाशङ्कापरावृत्तिपरः। 'कंठि शोके'। 'कठ कृच्छ्रजीवने'। एष्वाद्योऽनुदात्तेत् ॥

गतिप्रतिहतौ शोठत्यालस्ये शोठयेदिति।

'शुठ गतिप्रतीघाते'। शूठ इति क्षीरस्वामी। प्रतीघात इति धनपालः। तथा च 'कुठि च' इत्युत्तरधातौ कुण्ठ इत्यादौ प्रतिहतिमात्रं प्रतीयते। 'अनिशित इत्यर्थ' इति च स एवाह। 'शुठ आलस्ये'।

शुण्ठयेच्छुण्ठतीत्येवं शोपणे णौ शपि क्रमात् ॥ ८० ॥

'शुठि शोषणे'। अत्र णौ क्षीरस्वामी — 'केचिदेनमै-कारन्तं पठन्ति। लक्ष्यतस्तदपि प्रमाणम्' इति। तदा शोठये-दिति पठितव्यम्।

शठयेच्छठयेदेते द्वे सम्यगवभाषणे।
गत्यसंस्कारधात्वर्थे शाठयेच्छाठयेदिति ॥ ८१ ॥
कैतवे शठतीति स्याच्छ्लाघायां शाठयेत णौ।

'शठ श्वठ सम्यगवभाषण' इति मैत्रेयरक्षितः। कथादी। सम्यगाभाषण इति दुर्गः। सम्यगाभाषणे सम्यग्वचनक्रियाया-मिति क्षीरस्वामी। सम्यग् भाषण इति शाकटायनः। 'शठ श्वठ असंस्कारगत्योः'। 'श्वठि इत्येके' इति मैत्रेयरक्षितः। 'शठ कैतवे च'। चकारात् पिठ हिंसासंक्लेशनयोरित्युक्तावर्थौ गृह्येते।

---

१. 'इह शोक आध्यानम्' इति माधवः. २. अनिदितमित्यर्थः.

क्षीरस्वाम्यादयः पुनश्चकारं नैव पठन्ति । 'शठ श्लाघायाम्' । चितादिः ॥

मण्ठते शपि शोकार्थे मठेन्मदनिवासयोः ॥ ८२ ॥

'मठि शोके' । 'मठ मदनिवासयोः' ॥

वण्ठते त्वेकचर्यायां स्थौल्ये शपि वठेदिति ।

'वठि एकचर्यायाम्' । अनुदात्तेत् । 'वठ स्थौल्ये' ।

मुण्डते मार्जने मुण्डेः खण्डने शपि मुण्डति ॥ ८३ ॥

'मुडि मार्जने' । 'शोधन इत्यर्थः' इति च धनपालः । मज्जन इत्यन्ये । तथा च क्षीरस्वामी—'मज्जनं शुद्धिर्न्यग्भावश्च' इति । 'मुडि खण्डने' । क्षीरस्वामीत्वाह—"अर्थभेदात् पुनः पाठः । अत एव 'मुडि खण्डनप्रमर्दनयोः' इति कैण्ठः । शुठीति कौशिकदुर्गौ । शुण्ठति" इति । 'मुट प्रमर्दन' इत्यत्रापि (ठा?) डान्तेन मुडीति पाठात् पुनः पाठः ॥

भूषार्थे मण्डतीति स्यात् तत्र मण्डयतीति णौ ।

---

१. मूलेऽर्थनिर्देशस्योपलक्षणतामाश्रित्यान्योऽपि परस्मैभाषः प्रमर्दनार्थो मुट-प्रसक्तावुक्तः क्षीरस्वाम्यनुसरणे सङ्ग्राह्यः स्यादित्येवं रूपं विशेषमाविष्कर्तुमाह—क्षीरस्वामीत्वाहेति. २. कण्ठः=सरस्वतीकण्ठाभरणं, तत्कर्त्ता भोजदेव इति यावत् । एतदन्तवाक्यानुवादेनोपपत्तौ 'शुठीति' इत्यादिकमधिकमनुवदन्नेवं मन्यते—सति शुठिपाठे खण्डनप्रमर्दनाभ्यां सह शोषणग्रहणस्याप्यत्रैव सुकरतया 'शुठि शोषण' इति पृथङ् न पाठ्यं स्यादिति युक्त्या यथायं शुठिपाठो न गणितोऽस्माभिः (८० श्लोके.), तथा मुडिपाठे सति प्रमर्दनेन सह खण्डनग्रहणस्यापि कर्तुं शक्यतया 'मुडि खण्डन' इति पृथङ् नापठिष्यतेति युक्त्या प्रमर्दनार्थे मुडिपाठोऽयं नादर्त्तव्य इति. ३. क्षीरस्वाम्युक्तोऽयं पुनःपाठः कस्य पठितस्येत्येतद् विवृणोति—मुटेति.

मण्डते वेष्टने

'माडि भूषायाम्' । णौ तु हर्षे चेत्यधिकम् । 'वडि वेष्टने माडि च' । क्षीरस्वामी त्वाह—"'वडि विभाजने । माडि च' । पृथक्सूत्रादर्थान्तरेऽपि । नन्दी तु 'वडि विभाजने । माडि वेष्टन' इति च भङ्क्त्वा पठति" इति । तच्चार्थान्तरं प्रयोगतोऽवगन्तव्यम् ॥

स्तुत्यामीड्ढे तत्रेडयेण्णिचि ॥ ८४ ॥

'ईड स्तुतौ' । आद्योऽदादिरनुदात्तेत् ॥

मन्थार्थे खण्डते खण्डेर्भेदार्थे खण्डयेण्णिचि ।

'खडि मन्थे' । स च मन्थनम् । 'खड खडि कडि भेदे' । तत्र च खडेत्यस्य खाडयतीति द्रष्टव्यम् ॥

हेडतेऽनादरे. हेडेर्वेष्टने हिडयेन्मिथः ॥ ८५ ॥
होडतीति गतौ होडेर्होडतेऽनादरे पुनः ।

'हेडृ होडृ अनादरे' । अनुदात्तेतौ । 'हेड वेष्टने' । घटादिः । तत्र च मितां ह्रस्वो भवन् 'एच इग्घ्रस्वादेश' (१-१-४८) इतीगेव भवति । हेतुमण्णिच्त्वात्तु 'णिचश्चे' (१-३-७४) त्यात्मनेपदमप्यूह्यम् । अण्यन्तावस्थायां तु हेडतीति द्रष्टव्यम् । 'हुडृ होडृ गतौ' । हुडृ हूडृ इति धनपालशाकटायनौ । क्षीरस्वामीत्वाह—"'हूडृ हुडृ हौडृ गतौ' हूडति होडति हौडति । होडृ इति चन्द्रः । होडति" इति ॥

---

१. अस्य धात्वन्तरत्वे वा पूर्वपठितात्मनेपदिधात्वनुवादरूपत्वे वा परस्मैपदिपङ्क्तौ निवेशादित्याशयः । अत्र माधवः—'इहायमनृदित् पठ्यते, पूर्वस्त्वृदिदिति धात्वन्तरत्वं नाशङ्क्यं, यत ऋदितोऽननुवादेऽपि मित्त्वाद्ध्रस्वत्वेन भाव्यमित्युत्सृष्टानुबन्धोऽयमनुवादोऽनादरार्थस्य हेडतेः' इति.

कण्डयेदिति भेदे णौ मदे तु शपि कण्डते ॥ ८६ ॥

'कडि भेदे'। स चात्रावघातः। 'कडि मदे'। अनुदात्तेत्। कडेर्भूवादितुदाद्योः पाठात्[1] कण्डतीत्यपि भवति। क्षीरस्वामी तु भूवादौ परस्मैभाषमपि कडीत्येव पठित्वाह—'कडेति दुर्गः' इति ॥

लाडयत्युपसेवायां विलासे तु लडेच्छपि।

'लड उपसेवायाम्'। 'लड विलासे'। 'लड ईप्सायां वे'ति च क्षीरस्वामी। लळयोर्लडयोश्च कैश्चिदविशेषाश्रयणाल्लाळयति ललनेत्यपि भवति। घटादौ पुनः पठ्यते। 'जिह्वोन्मथने लडिः' इति। जिह्वाया उन्मथने[2] लडिर्मिश्रवतीत्यर्थः। लडयति जिह्वाम्। कौमारास्त्वाहुः—'अन्ये जिह्वोन्मथने इति द्वन्द्वं[3] व्याचक्षते। तदा लडयति शत्रुमित्यपि भवति' इति। क्षीरस्वामी तु—"जिह्वोन्माथनयोर्लडिः'। लड विलास इत्ययं भूवादिर्जिह्वाविषयायां क्रियायामुन्माथे च मित्। लडयति जिह्वाम्। लडयति दधि। अन्यत्र लाडयति मित्रम्। जिह्वोन्मथन इति गुप्तः। 'जिह्वाशतान्यल्लडयत्यभीक्ष्णम्'" इति। धनपालस्तु—'जिह्वोन्मथने लडिः। आर्याणान्तु जिह्वान्मथनयोरिति पाठः' इति ॥

मृडेर्मृण्णाति सुखने तत्रैव मृडतीति शे ॥ ८७ ॥

'मृड सुखने'। क्र्यादिः तुदादिश्च। अन्ये त्वाद्यं 'मृद क्षोदे, मृड सुखने च' इति पठन्ति। तथाच 'गुध रुषि मृद

---

१. 'कड मदे' इत्येवंरूपात्. २. अस्योभयत्र पाठफलं तु 'स्वरभेदाद् द्विरुच्यत' इति (९९श्लो.) पूर्वोक्तनीत्यावगन्तव्यम्. ३. उन्मथनं=क्षोभणम्. ४. समाहारद्वन्द्वम्.

संक्षोदे मृड सुखनार्थे च कुन्थ संक्लेशे' इति श्लोकधातुपाठः । क्वचित्तु 'मृड च' इति क्षोदार्थतैव दृश्यते ॥

वैकल्यदाहरक्षासु कुण्डेत् कुण्डेत कुण्डयेत् ।

'कुडि वैकल्ये' । शाकटायनः पुनष्टकारान्तमध्येऽमुमध्यैष्ट । क्षीरस्वामी त्वाह—'कुठीति कौशिकदुर्गौ । कुण्ठति कुण्ठः' इति । 'कुडि दाहे' । अनुदात्तेत् । 'कुडि रक्षणे' ॥

तोडनार्थे तुडेस्तुण्डेस्तुडेत् तोडति तुण्डते ॥ ८८ ॥

तुड्योस्तुण्डेश्च तुडेदित्यादि भवतीत्यर्थः । 'तुड तोडने' । तुदादिः । 'तुडृ तोडने' । तूडृ इति शाकटायनः । 'तुडि तोडने' अनुदात्तेत् । तच्च दारणं हिंसा च[1] । यदाहान्त्ययोः क्षीरस्वामी ॥

§कल्याणे भेण्डयेद्भण्डेः[2] परिहासे तु भेण्डते[3] ।
प्रेरणे जोडयेच्छे तु बन्धने जुडतीति च ॥ ८९॥

'जुड बन्धे' । तत्र चैवं यथापठितेऽर्थे जोडयेदिति जुडतीति च भवतीति वाक्यार्थसमुच्चये चकारो व्याख्येयः; न पुनर्बन्धन एव जोडयेदिति च भवतीति ॥

सङ्घाते पिण्डयेत् पिण्डेस्तत्रैव शपि पिण्डते ।

'पिडि सङ्घाते' । अन्त्योऽनुदात्तेत् ॥

---

१. 'च यदा' इत्यत्र स्थाने 'चेत्या' इति पठनीयं भाति. २. 'भडि कल्याणे'. ३. 'भडि परिभाषणे'. अनुदात्तेत्. तच्च परिहासः सनिन्दोपालम्भश्च । 'यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम्' इत्यमरः । "'परिहास' इति देवः । 'परितो भाषणं परिभाषणम्' इति स्वामी" इति माधवः.

§ इदमर्धं गपुस्तके न पठ्यते.

कणेः कणति शब्दार्थे काणयेण्णौ निमीलने ॥ ९० ॥

कण शब्दार्थः । 'कण निमीलने' । घटादौ च 'कण रण गतौ' इति पठ्यते । तस्य तु हेतुमण्णिचि कणयेत् । शब्दार्थस्य[1] तु काणयेदित्येव ॥

भूवाद्योर्घुणिघूर्ण्योः स्तां घोणते घूर्णते शपि ।
भ्रमणेऽत्र तुदाद्योः शे स्यातां घुणति घूर्णति ॥ ९१ ॥

'घुण घूर्ण भ्रमणे' । अत्रेति भ्रमण एवेत्यर्थः ॥

अणेरणाति शब्दार्थे प्राणने त्वण्यते श्यनि ।

अण[2] शब्दार्थः । 'अण प्राणने' । अनुदात्तेत् । अनेति शाकटायनः । तवर्गान्तकाण्डं चैवमनुसृतं भवति ॥

मितः श्रणति दानार्थे श्राणयत्यत्र णौ पदम् ॥ ९२ ॥

'चण शण श्रण दाने' । घटादयः । 'गतावित्येक' इति मैत्रेयरक्षितः । मित्फलं पुनः श्रणयतीति हेतुमण्णिचि ह्रस्वः । श्रण दाने' । विपूर्वश्चायं दृश्यते । 'विश्राणनं वितरणम्' इति ॥

व्रणेच्छब्दार्थविषये व्रणयेद् गात्रचूर्णने ।

'व्रण[3] शब्दार्थः' । 'व्रण गात्रचूर्णने' । कथादिः ॥

आमन्त्रणे तु कुणयेच्छब्दे चोपकृतौ कुणेत् ॥ ९३ ॥

'कुण आमन्त्रणे' । कथादिः । 'कुण शब्दोपकरणयोः' । तुदादिः ॥

बन्धनेऽन्तति सातत्यगमनेऽताति

---

१. गत्यर्थस्यैव घटादावनुवादादिति भावः. २. 'अण रण वण' इत्यादिदण्डके पठितः. ३. अणरणादिदण्डकपठितः.

'अति अदि बन्धन' इति मैत्रेयरक्षितः । 'तान्तं द्रमिडाः पठन्ति । आर्यास्तु दान्तम् इति धनपालः' । क्षीरस्वामी तु अति अदीत्येव पठित्वा तथैव चोदाहृत्याह—"अतेः पाठोऽनार्षः । अन्ये 'अदि इति बन्धन' इति पेठुः । तनुयाञ्चकार" इति । 'अत सातत्यगमने' ॥

चिन्तयेत् ।

स्मृत्यां चेताति संज्ञाने तत्र चेतयते णिचि ॥ ९४ ॥

'चिति स्मृत्याम्' । 'चिती संज्ञाने' । 'चित सञ्चेतने' । इति मैत्रेयरक्षितः । संवेदन इति बहवः ॥

कृणत्ति कृन्ततीत्येते वेष्टने छेदने क्रमात् ।
कीर्त्तयेदिति संशब्दे

'कृती वेष्टने' । रुधादिः । 'कृती छेदने । मुचादिः' । 'कृत संशब्दने' । 'उपधायाश्च' (७-१-१०१) इतीत्वं रपरत्वं च । 'उपधायां च' (८-२-७८) इति दीर्घः ॥

गत्यर्थे पतयेत् पतेत् ॥ ९५ ॥

'पत गतौ वा' । कथादिः । केचित् तु वेति न पठन्ति । तथैव[2] च 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' (३-२-१५८) इत्यत्र वृत्तौ[3] दृश्यते । वापाठे[4] तु सति यावदुपयुक्तं वृत्तिकृता पठितमिति कल्पनीयम् । तत्र च वापाठपक्षे तस्य णिज्विकल्पार्थत्वात् पतेत्यस्य पतयेत् पतेदिति भवति;' पतॢ गतौ,

१. 'इन्ताञ्चकार' इति पाठः स्यात्. २. 'पत गतौ' इत्येवेत्यर्थः. ३. काशिकायाम्. ४. वाशब्दस्तु प्रकृतानुपयोगात्र पठित इति तात्पर्यम्.

इत्यस्य तु पतेदित्येवेति। विकल्पफलं[1] पुनर्लुङादावपतीत्। पताञ्चकार। अपतत्। पपातेत्यादिषु द्रष्टव्यम्। तत्र च पताम्यित्यत्र 'कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम्' इति वार्तिकेनाम्। अपप्तदित्यत्र लृदित्त्वादङ्। 'पतः पुम्' (७-४-१९) इति पुम्॥

यतते तु प्रयत्नार्थे निराकारे तु यातयेत्।

'यती प्रयत्ने'। 'यत निकारोपसंस्कारयोः'। निराकार इति तु पाठो दृश्यते। 'निराकारः परिभव' इति च क्षीरस्वामी। उपस्कारोपसंस्कारयोः पुनः *पाठकृतो विप्रवदन्ते[2]। तथा चाख्यातनिघण्टुः—'यत्ने प्रैषे निराकारे यातयेदप्युपस्कृतौ' इति। श्लोकधातुपाठश्च—'यत उपसंस्कारनिकारार्थः स निरश्च धान्यधनवाची[3]' इति॥

वर्तयेद् भाषणार्थे णौ वर्तने ञापि वर्तते॥ ९६॥

वृतु भाषार्थः। 'वृतु वर्तने'। अनुदात्तेत्[4]॥

ग्रथ्नातीति तु सन्दर्भे ग्रन्थयेद् ग्रन्थतीति यौ।
कौटिल्ये ग्रन्थते ग्रन्थेर्ग्राथयेद् ग्रथति ग्रथेः॥ ९७॥

'ग्रन्थ सन्दर्भे'। क्र्यादिः। 'अनिदिताम्' (६-४-२४)इति नलोपः। 'श्रन्थ ग्रन्थ सन्दर्भे'। 'ग्राथि कौटिल्ये'। अनुदात्तेत्। 'ग्रथ बन्धने'। युजादिः॥

---

१. अणिच्चकथादेर्भ्वादेश्च रूपे को विशेष इत्याकाङ्क्षायामाह—विकल्पफलमिति. २. परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः. ३. धान्यधनविषयक्रियावाचीत्यर्थः। ऋणं निर्यातयतीति यथा. ४. एतदनुवादे 'णौ वर्तयति भाषार्थे' इति पाठो दृश्यते १३१ श्लोकविवरणे.

*'पाठका' इति गपुस्तके पाठः.

हिंसासंक्लेशयोर्मन्थेन्मथेन्मथ्नाति लोडने।

[1]मथि हिंसासंक्लेशयोः। क्षीरस्वामी तु मन्थेति पठित्वा [2]मेथ्यत इति चोदाहृत्य 'माथि इति दौर्गाः। मन्थ्यत' इत्याह। 'मथे विलोटने'। 'मन्थ विलोटने'। क्र्यादिः। भ्वादौ चामुं मैत्रेयरक्षितः पठति। चन्द्रदुर्गौ च। §तदा मन्थेदित्येतद्विलोटनेऽप्यावृत्त्या कामं व्याख्यायताम्॥

कुथ्नाति कुन्थेत् संक्लेशे पूतीभावे तु कुथ्यति॥ ९८॥

'कुन्थ संक्लेशे'। क्र्यादिः। संश्लेषणे इत्येके। तथा च 'संश्लेषणे संश्लेषणक्रियायाम्' इति क्षीरस्वामी। कुथि हिंसासंक्लेशयोः। कुथ पूतिभावे। दिवादिः॥

प्रथते प्राथयत्येतत् प्रख्याने द्वितयं प्रथेः।
पृथेः पर्थयतीत्येतत् प्रक्षेपे णौ पदं विदुः॥ ९९॥

'प्रथ प्रख्याने'। आद्यो घटादिरनुदात्तेत्। तत्र च हेतुमण्णिचि मित्त्वाद्ध्रस्वे प्रथयति। अन्त्ये तु 'नान्ये मितः' इत्यमित्त्वान्न ह्रस्वः। 'प्रथ प्रक्षेपे'। केचित् पुनर्घटादौ च पृथिं पठन्ति। तथा च क्षीरस्वामी—"पृथु विस्तारे। पर्थति। 'प्रथेः षिवन् सम्प्रसारणं चे'ति प्रथेः सम्प्रसारणविधानादनार्षममुं मन्यन्ते" इति। 'यदप्रथयत् तत् पृथिव्यै पृथिवित्वम्'। इत्यस्य [3]श्रौतस्य

१. 'कुथि पुरी लुथि मथि मान्थि हिंसासंक्लेशयोः' इत्यत्र पठितः। मान्थिस्तु न दृश्यते सिद्धान्तकौमुद्याम्. २. अनिदितामिति नलोपादिति भावः. ३. श्रुतिसिद्धस्येत्यर्थः। उदाहृतं च वाक्यं तैत्तिरीयब्राह्मणे प्रथमाष्टके प्रथमप्रश्ने तृतीयानुवाकेऽस्ति.

§'तथा' इति गपुस्तके पाठः.

निर्वचनस्यानार्षपक्ष एवाङ्गस्यम् । अन्यथा हि यदपर्थयदित्येव निर्ब्रूयात् । सर्वथापि प्रथेर्घटादिपाठे तत्फलं 'घटादयः षित' इति षित्त्वादङि सति प्रथेति रूपं द्रष्टव्यम् । येऽमी घटादय आत्मनेपदिनः पठितास्ते षिद्वद् भवन्तीत्यर्थः ॥

क्रथत्यर्थौ यौ हिंसायां क्राथयेत् क्रथते क्रथेत् ।

'श्रथ श्लथ क्रथ क्लथ हिंसार्थाः' । घटादयः । 'क्रथ हिंसायाम्' । स्वरितेत्[2] । शाकटायनस्य तु पररमैपदी । अपरे पुनरेनं न पठन्ति । तथा च 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम्' (२-३-५६) इत्यत्र चोररयोत्क्राथयतीत्यत्र निपातनाद्वृद्धिरिति वृत्तिः[3] । सति हि चौरादिके 'नान्ये मित' इति मित्त्वनिषेधादयत्नसिद्धा वृद्धिर्न निपातनसाध्या ॥

पुथ्येत् पुन्थति हिंसार्थे भाषार्थे पोथयेदिति ॥ १०० ॥

'पुथ हिंसायाम्' । दिवादिः । पुथि हिंसासंक्लेशयोः । पुथ भाषार्थः ॥

दौर्बल्ये श्रथयेत्प्रयत्नविषये स्याच्छ्राथयेन्मोक्षणे
यौ तु श्राथयति श्रथत्यपि च वा णौ श्रन्थयेच्छ्रन्थति ।
सन्दर्भे श्रि विमोचनार्थविषये श्रथ्नात्यथ श्रन्थते
शैथिल्ये-

---

१. अयुजादौ. २. स्वरितेत्त्वादेव णिजभावपक्षे पदद्वयमुदाहृतं 'क्रथते क्रथेद्' इति. ३. नाटसाहचर्याद्व्याख्यानाच्च निपातनं णिज्विषयम्, घटादिपाठस्तु मित्त्वेन 'चिण्णमुलोः' (६-४-७३) इति दीर्घार्थः, पाठे ह्रस्वोच्चारणं च दीर्घणिचोरभावे श्रवणार्थमिति वृत्त्याशयः.

'शौर कृप श्रथ दौर्बल्ये'। कथादयः। 'श्रथ प्रयत्ने'। इति मैत्रेयरक्षितः। प्रतिहर्ष इति बहवः। 'श्रथ मोक्षणे'। 'श्रथ हिंसायाम्' इत्यपरे। तथा च 'श्रथ क्रथ हिसु हिंसायाम्' इति शाकटायनः। 'श्रन्थ ग्रन्थ सन्दर्भे'। 'श्रन्थ विमोचनप्रतिहर्षयोः'। ये तु 'श्रन्थ ग्रन्थ सन्दर्भ' इत्यपि क्र्यादौ पठन्ति[2], तथा च 'सन्दर्भे श्रन्थनक्रियायां श्रन्थग्रन्थधातू वर्तेते' इति क्षीरस्वामी; तेषां सन्दर्भ इत्येतद्यथाश्रुतं श्रथ्नातीत्यनेनैव सम्बन्धनीयम्। वा णौ इत्यनेनैव पूर्वधातोरवच्छेदः† सिद्धः। 'श्रथि शैथिल्ये'॥

ऽथ पथेर्गतौ पथति णौ पन्थेर्गतौ पन्थयेत्॥ १०१॥

'पथे गतौ'। एवं च 'पथेर्गतौ' इत्यत्रापि काममस्यैवैकारस्य पूर्वरूपम्[3]। तत्फलं[4] पुनरपथीदित्यत्र 'ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्' (७-२-५) इति वृद्ध्यभावसंसूचनं। 'पथि गतौ'॥

क्लिन्दते क्लिन्दतीत्येवमिदितः[5] परिदेवने।
क्लिद्यतीत्यार्द्रभावेऽर्थे क्लिदेः श्यन्यूदितो भवेत्॥ १०२॥

'क्लिदि परिदेवने'। अकर्त्राभिप्राये कर्त्राभिप्राये च क्रियाफले द्वैरूप्यार्थो द्विष्पाठः। एवञ्च 'इदितोः परिदेवन' इति पठितुं युक्तम्[6]। 'क्लिदू आर्द्रीभावे'। ऊदित्त्वफलं तु क्लेत्ता क्लेदिता

---

१. दन्त्यादित्वेनापि पाठो दृश्यते. २. पाठेऽस्मिन्नरुचिस्तु रूपभेदाभावेन विमोचनप्रतिहर्षाभ्यां सहैव सन्दर्भग्रहणे कार्ये पृथक् पाठो न कर्तव्य इति। अत एव 'ग्रन्थ सन्दर्भ' इत्येव तत्प्रसक्तावुक्तम्. ३. 'ङसिङसोश्च' (६-१-११०) इति. ४. एकारान्तानुकरणफलम्. ५. एक एव धातुः पदद्वयवानुदाहृत इति भ्रमानुत्पादायेति शेषः.

†'दासिद्धे' इति गपुस्तके पाठः.

इत्यादौ 'स्वरतिसूतिसूयती'ति (७-२-४४) इड्विकल्पः; न पुनः पाठशुद्ध्या पदशुद्धिरेव। वक्ष्यति च 'ईटा भिदेति' ॥

आस्वादनेऽर्थे स्वदते स्वादयेदिति शव्णिचोः।

'ष्वद ष्वर्द आस्वादने'। अनुदात्तेतौ। 'ष्वद आस्वादने'। विस्तृतश्चायं 'भाषार्थे यौ तु लोकयेद्' इत्यत्र। यस्तु स्वाद आस्वादन इत्येव भ्वादावपि पठ्यते, तस्य तङि स्वादत इति द्रष्टव्यम् ॥

अर्दयेदर्दतेऽर्देर्द्यौ हिंसनेऽर्दति याचने ॥ १०३ ॥

'अर्द हिसि हिंसायाम्'। आद्यः स्वरितेत्। शाकटायनस्य त्वात्मनेपदी। 'अर्द गतौ याचने च' ॥

मेदते मेद्यतीत्येते स्नेहने मिन्दयेण्णिचि।
ऋदितो मेदते मेदेन्मेधाहिंसनयोर्द्वयोः ॥ १०४ ॥

'ञिमिदा स्नेहने'। भ्वादिर्दिवादिश्च। 'मिदेर्गुणः' (७-३-८२) इति गुणः। 'मिदि स्नेहने'। क्षीरस्वामी तु 'मिद स्नेहने। मेदयती'त्युक्त्वा 'कैश्चिदिदित् पठ्यते' इत्याह। 'मिद मेद मेधाहिंसनयोः'। थान्तावेतावित्येके। व्यक्तं चैतत् क्षीरस्वामिवृत्तौ। धान्तावपरे। तथा च 'पिच्चिदादिभ्योऽङ्' (३-३-१०४) इत्यत्र मेधाशब्दव्युत्पादने जिनेन्द्रः पपाठ। भोजदेवस्तु 'रिखिलिखिशुभिसिधिमिधिगुधिभ्यो गुणश्च' इत्यङ्विधौ मिधेर्गुणं च विदधद् मेधिं नानुमन्यते। कौमाराश्चात्रैवानुकूलाः। तत्र च रिखिः सौत्रो लिख्यर्थः। सेधा सत्त्वम्। गोधा प्रकोष्ठत्राणम्। शिष्टं स्पष्टम्। सर्वथापि 'प्रत्येकं निदिनेद्योः स्तां नेदते नेदतीत्युभे' इत्येवात्रा-

---

१. ११९ तमश्लोके. २. ४० श्लोके.

त्राप्युभयविवक्षायामृदितोरिति युक्तं पठितुम् । 'इदितः परिदेवने' इत्यत्रैव वा जात्याख्यायामेकवचनम् । ऋदित्त्वफलं तु 'णौ चङ्युपधाया ह्रस्वः' (७-४-१) इति ह्रस्वेनामीमिदिति प्राप्ते 'नाग्लोपिशास्वृदिताम्' (७-४-२) इति निषेधादभिमेदिति रूपम् ॥

आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति ।
वैक्लव्ये तु तयोर्धात्वोः क्रन्दते कन्दते मितोः ॥ १०५ ॥

'कदि क्रदि क्लदि आह्वाने रोदने च'[1]। 'कदि क्रदि क्रद क्लद वैक्लव्ये' । क्षीरस्वामी तु 'कदि क्रदि क्लदि वैक्लव्ये' इत्युक्त्वा 'वैकल्य इति चन्द्रः । कद क्रद क्लदेति नन्दी' इत्याह । सर्वथापि क्लन्द्यादेरपि क्लन्दतीत्यादि[3] यथार्हमूह्यम् ।

अथ मितोरिति किमर्थं, नहि तावद्ध्रस्वार्थं, 'नुंविधावुपदेशिवद्वचनम्' इति वार्तिकाद्[4] 'इदितो नुं धातोः' (७-१-५८) इति धातुग्रहणबलादेव वा धातुसंज्ञासमनन्तरमेव नुमि कृतेऽका-

---

१. एवञ्चार्थनिर्देशे न यथासङ्ख्यं श्लोके. २. एते घटादयः. ३. आदिना क्लदते क्रदते. ४. उन्द्यादेर्नकार इव नुम् इदितो धातोरुपदेशावस्थायां सन्निहितो वक्तव्य इति वार्तिकार्थः । तेनाङ्गोऽपि नुम भावि-यङ्लुबे पूर्वमेव भवतीति 'कुण्डा हुण्डा' इत्यादौ 'गुरोश्च हलः' (३-३-१०३) इत्यप्रत्ययो गुरुमत्त्वसाम्पत्त्या सिध्यति. ५. तासिसिचोरिदित्त्वाभावेऽपि 'मन्ता अमंस्त' इत्यादौ 'अनिदिताम्' (६-४-२४) इति प्राप्तुवनुपधानकारलोपो डादेशनिमित्तस्य टिलोपस्यापीयासिद्धत्त्वात्, 'हनः सिच्' (१-२-१४) इति सिचः कित्त्वविधानेन 'आहसाताम्' इति नलोपार्थेन सिजाश्रयोपधानलोपाभावज्ञापनाच्च वारयितुं शक्य इत्यत इकारवैयर्थ्ये स्थिते उच्चारणमात्राय च 'च्लेः सच्' 'स्यतासौ' इत्येवमकारस्य पाठे प्राथम्यान्न्याय्ये तावतैव 'अच्छैत्सीत्' इत्यादौ नुमागमाप्रसङ्गादधातोरिदितो व्यावर्त्यस्यालाभाद् धातुग्रहणमचरितार्थं सद् धातूपदेशावस्थोपलक्षणार्थं विज्ञायते; तथा च भाष्यं— 'धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुंविधानम्' इति । तेन वार्तिकफलस्य सूत्रत एव सिद्धेराह — **धातुग्रहणबलादेव वेति.**

रस्यानुपधात्वेन 'अत उपधाया' (७-२-११६) इति वृद्धेरभावाद्ध्रस्वविधेर्वैयर्थ्यात् । न च 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (६-४-९३) इति दीर्घार्थः, 'ऊदुपधाया गोहः' (६-४-८९) इत्यत उपधाया इत्यत्रानुवृत्तेरुपधाया एव मितां ह्रस्वदीर्घयोर्विधानाद्, अत्र चानुपधात्वात् । न च घटादिपाठबलादनुपधात्वेऽपि दीर्घः सिध्यति । पित्त्वार्थतयापि पाठोपपत्तेरित्यत आह —

मित्त्वार्थपाठसामर्थ्यात् तयोर्दीर्घविकल्पनम् ।
भवेच्चिण्णमुलोस्तस्मादक्रान्द्यक्रन्दि सिध्यतः ॥

पित्त्वं खल्वाङि कन्दा क्रन्देति रूपार्थम् । तयोश्च 'गुरोश्च हलः' (३-३-१०३) इत्यप्रत्ययेनैव सिद्धेर्मित्त्वार्थ एवायं पाठ इति तद्बलादनुपधात्वेऽपि अक्रान्दि अक्रन्दि क्रान्दं क्रन्दम् । अक्रान्दि अक्रन्दि कान्दं कन्दमिति वैकल्पिको दीर्घः सिध्यतीत्यर्थः । एवं क्लुन्देरप्यूह्यम् ॥

गात्रप्रक्षरणे स्विद्येत् स्वेदते स्नेहमोकयोः* ।

'ष्विदा गात्रप्रक्षरणे' । दिवादिः । तथा च 'निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः' (१-२-१९) इत्यत्र हरदत्तः — ञिष्विदा स्नेहनमोचनयोरित्यस्य भौवादिकस्य ञीतो ग्रहणं । न तु ष्विदा गात्रप्रक्षरण इत्यस्य दैवादिकस्य, ञीद्भिः साहचर्यात् । अस्य चाञीत्त्वाद्' इति । 'ञिष्विदा स्नेहनमोचनयोः' । अनुदात्तेत् । क्षीरस्वामी तु 'ञिष्विदा' इति क्षकारादिं पठित्वाह—'ञिष्विदेति नन्दी' इति ॥

क्ष्वेदत्यव्यक्तशब्दार्थे क्ष्विद्यति स्नेहमोक्षयोः ॥ १०७ ॥

---

*'मोक्षयोः' इति गपुस्तके पाठः.

'ञिक्ष्विदा अव्यक्ते शब्दे' । 'ञिक्ष्विदा स्नेहनमोचनयोः' । दिवादिः । मोहनयोरित्यपि बहुषु ग्रन्थेषु दृश्यते ॥

ज्वलादेश्च तुदादेश्च सीदेद् विशरणादिके ।
पद्यतेरर्थ आसीदेदासादयति चाङि यौ ॥ १०८ ॥

'षदॢ विशरणगत्यवसादनेषु' । तुदादावप्येवमेव धनपालः । विशरण इत्येव मैत्रेयरक्षितो दुर्गश्च । 'विशमृशणुदप्रवेशामर्शक्षेपेषु षदॢ विशरणार्थः' इति च श्लोकधातुपाठः । अवसादन इत्येव क्षीरस्वामिशाकटायनौ । अत्र च ज्वलादित्वात् सीदतीत्यर्थे साद इति पक्षे णः । अन्यदा§ सद इति पद्यादेव । तुदादित्वफलं तु स्वरभेदनुंविकल्पौ पूर्वोक्तावेव च द्रष्टव्यौ । 'आङः षद पद्यर्थे' । आङः परः षदधातुः पदेरर्थे गतावन्यत्रापि यथाप्रयोगं विकल्पेन णिचमुत्पादयतीत्यर्थः । आङीति चाङ्युपपदे । तत्र[1] चासीदेदित्यन्यार्[2]ष्यं मन्यामहे । शादिसह[3]चरितयोर्ज्वलादितुदाद्योरेव सद्योः सीदादेशस्य न्याय्यत्वात् । तथा च तद्विधौ तावेव न्यासकृता पठितौ—'षदॢ विशरणगत्यवसादनेष्विति भौवादिकः । षदॢ विशरणे तौदादिकः' । इति ॥

व्यक्तवाचि वदेद्वा णौ वादयेद् वदते वदेत् ।
सन्देशे

'वद व्यक्तायां वाचि' । 'वद सन्देशे' । स्वरितेत् । शाकटायनस्य तु आत्मनेपदी । यदाह—'वदि सन्देशवचने' इति ।

---

१. तत्र=तयोर्युजादुदाहरणयोः. २. आसदेदिति तु न्याय्यमित्यभिप्रायः. ३. साहचर्यं च धातुपाठे.

§ 'अन्यथा' इति गपुस्तके पाठः.

धनपालस्तु 'पद[†] सन्देशवचने पादयति पदति। [1]अन्यत्र प(द्य?) दयते' इति। वदि अभिवादनस्तुत्योरित्यस्य च वन्दत इति द्रष्टव्यम्॥

इयानि गत्यर्थे पद्यते पदयेत णौ॥ १०९॥

'पद्लृ गतौ'। दिवादिः कथादिश्च। आगर्वादित्वात् तङ्॥

णौ देवशब्दे गदयेद् व्यक्तवाचि गदेच्छपि।

'स्तन गदी देवशब्दे'। स च पर्जन्यध्वनिः। स्तनश्च गदिश्च स्तनगदी इत्यदन्तोपदेश एव गदिः। 'इक्श्तियौ धातुनिर्देशे वक्तव्यौ' इतीक्प्रत्ययं कृत्वा अतो लोप इत्यल्लोपेनात्र निर्दिश्यत इत्याहुः। 'स्तन गद' इत्येव चन्द्रः। केचित्तु गादिमीदितमेवेच्छन्तः कथादिकाण्डपाठबलादेवादन्तत्वं कल्पयन्ति। तथा च 'स्तन गदै इति' शाकटायनः। तन्मते तु '[2]कथादिपाति' इत्यक्। 'गद व्यक्तायां वाचि'॥

नदत्यव्यक्तशब्दार्थे भाषार्थे नादयेदिति॥ ११०॥

'णद अव्यक्ते शब्दे'। णद भाषार्थः। 'टुनदि' इत्यस्य नन्दतीति द्रष्टव्यम्॥

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दतीत्येवं लाभे वेदयते णिचि॥ १११॥

'विद सत्तायाम्'। दिवादिरनुदात्तेत्। 'विद ज्ञाने'। अदादिः। 'विद विचारणे'। रुधादिः। 'विदृ लाभे'। मुचादिः।

---

१. कथादावागर्वीये २. लजिप्रसङ्गे विवृतमेतत्.

---

† धनपालवाक्यस्थानां पकाराणां स्थाने वकारा एव पठ्यन्ते घपुस्तके.

इरित्पाठः पुनः प्रामादिकः। तथा च सर्वैर्लुङि आविदादिति नित्य एवाङ् उदाजह्रे। 'विद चेतनाख्याननिवासेषु'। चितादिः। निपातनेष्विति धनपालशाकटायनौ ॥

दैन्येऽर्थे खिद्यते खिन्ते परिघाते तु खिन्दति।

'खिद दैन्ये'। दिवादिः रुधादिश्च। 'खिद परिघाते'। मुचादिः। §"परितापे परितापनक्रियायामि'ति क्षीरस्वामी ॥

स्तुत्यादौ मन्दते हर्षे माद्येन्मादयते णिचि ॥ ११२ ॥

'मदि स्तुतिमोदमदस्वप्नगतिषु'। अत्र क्षीरस्वामी—"स्वप्नेनालस्यं लक्ष्यते। चन्द्रस्तु 'मदि जाड्ये' इत्येवाह" इति। 'मदी हर्षे'। 'शमामष्टानाम्' (७-३-७४) इति दीर्घः। 'मद तृप्तियोगे'। चितादिः। तृप्तिशोधन इत्यन्ये। तथा च 'तृप्तिशोधने तर्पणशुद्धौ' इति क्षीरस्वामी। हर्षयति ग्लपयति वेत्याद्यर्थे तु मदयति मदयत इति भवति। 'मदी हर्षग्लेपनयोः'† इति घटादौ पठ्यते। अत्रार्थे माद्यातीर्मित् स्यादित्यर्थः ॥

यौ वा णावपवारणे छदत इत्येकं द्वितीयं छदेदन्यच्छादयतिच्छदोदिति पुनः स्यादूर्जनेऽर्थे मितः।
यत्तुच्छन्दयतीति णौ नुमि पदं तत् संवृताविष्यते

'छद अपवारणे'। स्वरितेत्। शाकटायनस्य तु परस्मैपदी। 'छदिरूर्जने'। घटादिः। तच्च बलनं प्राणनं वा। अत्र च 'धौत्वन्तराभ्युपगमे दरतीत्येके' इत्यादिपूर्वोक्तरीत्यनुसारेण छदे-

१. ग्लेपनयोरिति पठित्वा 'ग्लेपनं दैन्यम्' इति माधवः. २. इदं च षट्त्रिंशश्लोकव्याख्याने द्रष्टव्यम्.

§ 'परिघाते' इति गपुस्तके पाठः. † 'ग्लापनयोः' इति गपुस्तके पाठः.

दित्युक्तम् । क्षीरस्वामिमैत्रेयरक्षितौ तु 'छद अपवारणे' इति यौजादिकस्यैवच्छदेरूर्जने छदयतीति मित्त्वार्थो घटादौ पाठ इत्याहतुः । 'छदि संवरणे' । 'छदेति तु बहवः । उरश्छदो दन्तच्छद इत्युदाजहार च क्षीरस्वामी । शाकटायनः पुनरात्मनेपदिष्वमुं‡ पपाठ ॥

संसर्गे णिचि मोदयेदिति भवेद्धर्षे पुनर्मोदते ॥ ११३ ॥

'मुद संसर्गे' । 'मुद हर्षे' । अनुदात्तेत् ॥

प्रत्येकं निदिनेद्योः स्तां नेदते नेदतीत्युभे ।
कुत्सायां सन्निकर्षे वा कुत्सामात्रे तु निन्दति ॥ ११४ ॥

'णिद्ट णेद्ट कुत्सासन्निकर्षयोः' । रूपभेदस्तु निनिदे निनेदे इत्यादौ व्यक्तः । 'णिदि कुत्सायाम्' ॥

छृदी सन्दीपने वा णौ छर्दयेच्छर्दतीत्युभे ।
छृन्ते छृणत्तीति पदे दीप्तिदेवनयोः श्नमि ॥ ११५ ॥

'छृदी स्थाने' छृदेति धनपालशाकटायनौ । तत्र चाद्ये छृण्णमन्त्ये छृदितामिति फलभेदः । क्षीरस्वामिनस्तु पकारान्तोऽयम् । यदाह—"'चृप छृप तृप दृप सन्दीपने' । संदीप्तिक्रियायां चृपादयश्चत्वारो धातवो वर्त्तन्ते । चर्पयति छर्पयति" इत्यादि । 'उच्छृदिर् दीप्तिदेवनयोः' ॥

सिधेः सिध्यति संराद्धौ सेधतीत्युदितो गतौ ।
शास्त्रमाङ्गल्ययो रूपमूदितस्तदिटा भिदा ॥ ११६ ॥

१. 'श्वीदितो निष्ठायाम्' इतीटो निषेधात्.

‡ 'ष्वप्यमुम्' इति घपुस्तके पाठः.

'षिधु संराद्धौ' । 'षिधु गत्याम्' । एवमेव च बहवः । न्यासे तु 'एकाच उपदेशेऽनुदात्तात्' (७-२-१०) इत्यत्र 'अस्योदित्त्वमनार्षम्' इति स्थितम् । तत्र चोदित्त्वे 'उदितो वा' (७-२-५६) इति क्त्वायामिड्विकल्पात् सिद्धा सिधित्वा सेधित्वेति भवति । अनुदित्त्वे तु स्वतः प्राप्तनित्येट्त्वमेवावतिष्ठते इति सिद्धेति न भवति । अत्र च 'रलोव्युपधाद्धलादेस्संश्च' (१-२-२६) इति किद्भावविकल्पात् पक्षे गुणः । 'षिधू शास्त्रे माङ्गल्ये च' । 'शासनं शास्त्रमि'ति मैत्रेयरक्षितः शाकटायनश्च । 'षिधू शिष्टौ' इत्येव च चन्द्रः । 'शास्त्रं शास्त्रविषयं शासनम् । माङ्गल्यं मङ्गलविषया क्रिया' इति क्षीरस्वामी । शासनाद्धि शास्त्रमिति शास्त्रविषयक्रियापि शासनमेवेत्याशयः । तादिति सेधतीत्येतदेवेत्यर्थः । इटा भिदेति सेद्धा सेधितेत्यादौ 'स्वरतिसूति' (७-२-४४) इति इड्विकल्पेनास्य पूर्वस्मात् सिधेर्भेद इत्यर्थः ॥

शुन्धयेच्छुन्धते शुन्धेद्यौ वा णौ शौचकर्मणि ।
शुद्धौ शुन्धति भूवादेः शुधेः शौचे तु शुध्यति ॥ ११७ ॥

'शुन्ध शौचकर्मणि' । स्वरितेत् । शाकटायनस्य त्वात्मनेपदी । 'शुन्ध शुद्धौ' । 'शुध शौचे' । दिवादिः ॥

शर्धते शब्दकुत्सायामुन्दे शर्धति शर्धते ।
हिक्कादौ शर्धयत्यस्य शृधेः प्रसहने णिचि ॥ ११८ ॥

'शृधु शब्दकुत्सायाम्' । सा च पायुशब्दत्वादिति क्षीरस्वामी । 'शृधु मृधु उन्दे' । स च क्लेदः । हिक्कादित्वं पुनरुभयप-

१. 'षिध गत्याम्' इति निरुकार एव पाठः सिद्धान्तकौमुद्याम् .

दित्वे हेतुः । भूवादौ 'हिक्क अव्यक्ते शब्दे' इत्यारभ्य केचित् स्वरितेतः पठ्यन्ते । तेषु चायं शृधिः । 'शृधु प्रसहने' ॥

बुध्यते बोधतीत्येवं बुधेरवगमे द्वयम् ।
बुधिरो बोधनार्थस्य बोधते बोधतीत्यपि ॥ ११९ ॥

'बुध अवगमने' । दिवादिर्भूवादिश्च । 'बुधिर् बोधने' । क्षीरस्वामी तु 'बुध' इति पठित्वा 'बुधिरिति नन्दी' इत्याह ॥

बध्नाति बन्धने बन्धेर्बाधयेदिति संयमे ।
यत्तु बीभत्सते तत् स्याद् वैरूप्येऽर्थे बधेः सनि ॥

अपरे पुनः पठन्ति —

[बध्नन् बीभत्सते बन्धे बाधयेदिति संयमे ।]

'बन्ध बन्धने' । क्र्यादिः । 'बध संयमने' । 'बध बन्धने' । 'गुप्तिज्किद्भ्यः सन्' (३-१-५) 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (३-१-६) इति सन् । अभ्यासेकारस्य च 'सन्यतः (७-४-७५)इति कृतस्य दीर्घः । संश्चास्माद्वैरूप्य इष्यत इत्याहुः । तच्च बीभत्सैव । एवं च बन्धे इत्यपि बन्धे पठितस्येत्यर्थः । अत्र च सन्नन्तस्याप्यवयवद्वारागुदात्तेत्त्वादात्मनेपदम् । तद्द्वारा हि समुदाय एव गवादाविव लिङ्गमासज्यते । गुपादीनां त्रिमुनिसम्मतेन नित्यसन्नन्तत्वेन केवलेषु गोपत इत्यादेस्तत्फलस्याभावात् जुगुप्सादेश्च समुदायस्यानुपदेशात् । न च नित्यसन्नन्तत्वे वृत्त्युक्तं गोपयतीत्यादि न सिध्येत् । यथासम्भवं प्रकृत्यन्तरात्[2] स्वार्थाणि-

१ आदिना तेजयत्यादिपरिग्रहः. २. अन्या भूवादौ पठिता 'गुप गोपन' इत्याद्या नित्यसन्विषया प्रकृतिः, अन्या च चुरादौ पठिता भूवादौ चार्थान्तरे पठितेत्याशयः.

जादिना तत्सिद्धेः । व्यक्तं चैतत् 'पूर्ववत् सनः' (१-३-६२) इत्यत्र भागवृत्तौ ॥

गुधेर्गुध्नाति रोषेऽर्थे गुध्येत्तु परिवेष्टने ।

'गुध रोषे' । क्र्यादिः । 'गुध परिवेष्टने' । दिवादिः ॥

रुन्धे रुणद्ध्यावरणे कामेऽनावनुरुध्यते ॥ १२१ ॥

'रुधिर् आवरणे' । 'अनौ रुध कामे' । दिवादिः । अनुदात्तेत् । अनावित्यन्विल्युपसर्गे सति ॥

राध्नोति संसिद्ध्यर्थे श्नौ राध्येद् वृद्धावकर्मकात् ।

'राध साध संसिद्धौ' । 'राधोऽकर्मकाद्वृद्धावेव' । राधेरकर्मकाच्छ्यन् इत्येतावानेवात्र विवक्षितोऽर्थः । वृद्धिग्रहणन्त्वकर्मकक्रियोदाहरणमात्रम् । एवमकारश्चैवमर्थात् सिद्धाया[2]व्यावृत्तेरनुवादमात्रम् । तथा च 'कर्मवत् कर्मणा तुल्यक्रियः' (३-१-८७) इत्यत्र भाष्यम्—'राध्यत्योदनः स्वयमेव' इति । अत्र हि सिध्यतीत्यर्थः; नतु नदी राध्यतीतिवद् वर्धत इति । तथैव 'राधीक्ष्योर्यस्य विप्रश्नः' (१-४-३९) इत्यत्र वृत्तिः । 'देवदत्ताय[3] राध्यति । नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थः' इति ॥

ऋध्नोतीति भवेद् वृद्धावृध्यतीत्यत्र तु श्यनि ॥ १२२ ॥

'ऋधु वृद्धौ' । आद्यः स्वादिः ॥

गृधेर्गृध्यति काङ्क्षायां गर्धेस्तत्रैव गर्धयेत् ।

'गृधु अभिकाङ्क्षायाम्' । दिवादिः । 'गर्ध अभिकाङ्क्षायाम्' ॥

---

१. वक्ष्यमाणभाष्यवृत्त्यानुगुण्याय यथाश्रुतान्वयपरित्यागेन व्याचष्टे—राधेरिति. २. सकर्मकव्यावृत्तेरित्यर्थः । एवञ्चैवकारस्य भिन्नक्रमतया 'अकर्मकाद्' इत्यनेनान्वयः फलितः. ३. दैवस्य कर्मणो धात्वर्थेऽन्तर्भावादकर्मकत्वं द्रष्टव्यम् .

छेदने पूरणे चार्थे वर्धेर्वर्धयतीति णौ ॥ १२३ ॥
तदेव रूपं भाषार्थे वृधेर्वृद्धौ तु वर्धते ।

'वर्ध च्छेदनपूरणयोः' । वृधु भाषार्थः । 'वृधु वृद्धौ' । अनुदात्तेत् ॥

याचने वनुते शब्दे सम्भक्तौ च वनेदिति ॥ १२४ ॥
क्रियासामान्यवृत्तेश्च तदेव स्यात् पदं मितः ।

'वनु याचने' । तनादिः । 'वनोति वनुतः वन्वन्ति । ववान ववनतुः ववनुरिति चान्द्रा उदाहरन्ति' इति ब्रुवन्मैत्रेयरक्षितः परस्मैपदिनञ्चैनं मेने । 'ष्टन वन शब्दे । 'वन षण सम्भक्तौ' । 'अर्थभेदाद्विष्पाठ' इति मैत्रेयरक्षितः । 'ष्टन ध्वने'ति तु क्षीरस्वामी । 'कगे नोच्यते' । 'वनु [1]च नोच्यते' । अस्यायमर्थ इति नोच्यते । क्रियासामान्यमस्यार्थ इति यावत् । 'इह शास्त्रे नोच्यत' इत्येके' इति मैत्रेयरक्षितः । शास्त्रान्तरात् प्रयोगोऽस्यावगन्तव्य इति यावत् । क्षीरस्वामी तु—'अस्यायमर्थ इति नोच्यते' । अनेकार्थत्वान्नोच्यत इति योऽर्थस्तत्रार्थे कगिरित्येके' इति । [2]अन्ये तु स एवाह—'क्रियासामान्यवाचित्वान्नोच्यते' इति । मित इति । एतच्च मित्त्वमनुपसर्गस्य विकल्प्यते, सोपसर्गस्य तु नित्यम् । वानयति वनयतीति यदाह—'ज्वलह्वलह्मलानामनुपसर्गाद्वा' । 'ग्लास्त्रावनुवमां च' इति । एषामनुपसर्गाणां मित्त्वं वा भवती-

---

१. न केवलं कगेरर्थावचनं, किन्तु वनेश्चेत्येवमर्थं चकारः । समुच्चेयं च व्यवहितं स्मारयितुं 'कगे नोच्यते' इत्यस्योपन्यासः. २. वनुधातौ इत्यर्थः स्यात् .

त्यर्थः । एतच्च 'अनन्तरस्य विधिर्वा' इति न्यायान्न[1] वनोतेः । धनपालस्तु तमेव[2] प्रस्तुत्याह—'वनुं घटादिषु पठन्ति द्रमिडाः । तेषां मित्संज्ञा । वनयति । आर्यास्तु विभाषामित्त्वमिच्छन्ति । तेषां वानयति वनयति' इति ॥

स्तम्भे मानयते ज्ञाने मन्यते मनुते पदम् ॥ १२५ ॥
पूजायां मानयेन्मानेद् यौ मीमांसेत तङ्सनोः ।

'मन स्तम्भे' । चितादिः । 'मन ज्ञाने' । दिवादिः । 'मनु अवबोधने' । तनादिः । 'मान पूजायाम्' । भूवादौ त्वयमनुदात्तेत् । 'मान्बधे'ति (३-१-६) सनि 'अवयवे कृतं लिङ्गम्' इति न्यायेन तङ् । संश्चास्मात् जिज्ञासार्थादित्याहुः[3] । विचारणार्थादिति तु भोजीया मीमांसकाश्च । 'मीमांसा स्याद्विचारणा' इति च नैघण्टुकाः । एवं[4] च जिज्ञासाशब्देनापि वा विचारणैव लक्ष्यताम् ॥

ध्वनयेदित्यदन्तस्य ध्वनेः शब्दे ध्वनेच्छापि ॥ १२६ ॥

घटादौ चायं कैश्चित् पठ्यते । तथा च 'ध्वन शब्द इत्येके' इति मैत्रेयरक्षितः । क्षीरस्वामिधनपालावप्यत्रैवानुकूलौ । 'दलिवलिस्खलिरणिध्वनिक्षपित्रपयश्च' इति च भोजदेवः । एते च मित्संज्ञा इत्यर्थः ॥

शब्दे च देवशब्दे च स्तनति स्तनयेत् क्रमात् ।

'ष्टन वन शब्दे' । 'स्तन गदी देवशब्दे' । नचास्यापि

---

१. न वनोतेः=न तानादिकस्य, किन्तु घटादौ प्राक्पठितस्यैवेत्यर्थः । घटादिपठितश्चोदित्करणसामर्थ्यादन्यो धातुः, न तानादिकानुवाद इत्ययमर्थः 'तदेव (वनेदित्येव) पदम्' इति वदता देवेनैव सूचित इत्यभिप्रायः. २. वनोतिमेव. ३. तथा च काशिका—'मानेर्जिज्ञासायाम्' इति. ४. एवञ्च=बहुसम्मत्या मीमांसाशब्दस्य विचारणावाचकत्वे च.

दन्त्यपरसादित्वात् षोपदेशत्वम् । स्म्याद्येकाच्साहचर्यादनेकाचां नैतदित्याहुः । व्यक्तं चैतत् क्षीरस्वामिमैत्रेयरक्षितवृत्त्योः ॥

श्रद्धोपकरणार्थस्य तनेस्तनाति तानयेत् ॥ १२७ ॥
दैर्घ्यार्थस्योपसर्गात्तु विस्तारे तनुतेऽतनोत् ।

'तनु श्रद्धोपकरणयोः' । (†धनपालशाकटायनौ?) 'उपसर्गाच्च दैर्घ्ये' । उपसर्गात्तनेर्दैर्घ्येऽर्थे णिज् भवतीत्यर्थः । आतनति आतानयेत् । 'तनु विस्तारे' ॥

दाने सनोति सनुते सम्भक्तौ तु सनेदिति ॥ १२८ ॥

'षणु दाने' । तनादिः । 'वन षण संभक्तौ' ॥

णौ गोपयति भाषार्थे निन्दायां से जुगुप्सते ।
गोपायेद्रक्षणे त्वाये व्याकुलत्वे तु गुप्यति ॥ १२९ ॥

गुप भाषार्थः । 'गुप गोपने' । अनुदात्तेत् । गोपनकुत्सनयोरिति मैत्रेयरक्षितः । **निन्दायामिति** । अत्र 'गुप्तिज्किद्भ्यः सन्' (३-१-५) इत्यत्र जयादित्यः—'निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यते' इति । 'गुपू रक्षणे' । 'गुपूधूप' (३-१-२८) इत्यादिनायः । 'गुप व्याकुलत्वे' । दिवादिः ॥

धूपायतीति सन्तापे भाषार्थे धूपयेदिति ।

'धूप सन्तापे' । धूप भाषार्थः ॥

क्षिप्यति प्रेरणे शे तु क्षिपति क्षिपते पदे ॥ १३० ॥

'क्षिप प्रेरणे' । अत्र भूवादिसूत्रे सुधाकरः—"'संपृचादि' (३-२-१४२) सूत्रे पारायणिकैरनुक्तोऽपि क्षिपिर्दैवादिको जया-

१. एषां गुपादिषु यथासङ्ख्यं सम्बन्धः.

† अतः प्राक् 'चन श्रद्धोपहननयोरिति' एतावद् गलितमिति प्रतिभाति.

दित्येनोररीचक्के 'क्षिप प्रेरणे इति दिवादिस्तुदादिश्च गृह्यते' इति वदता। अत एव व्यासप्रयोगः—

'द्वाविमावम्भसि क्षिप्य गळे बद्ध्वा महाशिलाम्।
धनिनं चाप्रदातारं दरिद्रं चाप्रवासिनम्॥'

इति। 'संक्षिप्य संरम्भमसाद्विपक्षम्' इति भट्टिः। नो खलु पारायणिकैरप्रदर्शनादभावानुमानं, लक्ष्यपारतन्त्र्येण तेषामवस्थानात्, शिष्टप्रयोगोपगीतनाम्नः शब्दराशेरनाश्रयणे प्रधानाविरोधाल्लक्षणस्यालक्षणत्वं मा भूदिति" इति॥

सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत्।
ऐश्वर्ये वा दिवादित्वात् तप्यते तपतीति च॥ १३१॥

'तप सन्तापे'। 'तप दाहे'। युजादिः स्वरितेत्। शाकटायनस्य त्वात्मनेपदी। 'तप ऐश्वर्ये वा'। तपेत्ययं धातुरैश्वर्ये तङ्श्यनौ वोत्पादयतीत्यर्थः। एवं च दिवादित्वेनैव तदविनाभूतमनुदात्तेत्त्वमपि दर्शितं द्रष्टव्यम्। पतेत्येके। तथा च 'इरज्यति पत्यते क्षयति राजतीति चत्वार ऐश्वर्यकर्माणः' इति नैरुक्ताः। केचित्तु वेत्येतद् 'वावृतु वरणे' इत्युत्तरधात्वंशमाहुः। तथा च 'ततो वावृत्यमाना सा रामशालां न्यविक्षत' इति भट्टिः। एवं च 'णौ वर्त्तयति भाषार्थ' इत्यत्र 'वरणे श्यनि वृत्येत' इत्यप्यनुक्तिः शोभतेतराम्॥

आक्रोशे शप्यते शप्येच्छपते शपतीति च।

---

१. तत्सम्बद्धम्. २. अपिशब्दग्राह्यं श्यन्विषयत्वम्. ३. एतच्च 'वर्तयेद् भाषणार्थे णौ' इति प्राक् (९६. श्लोके) पठितस्योपलक्षणं यथाश्रुतपाठस्य काप्यदर्शनात्.

उपालम्भे शपेर्वाक्यात् तङि स्याच्छपते पदम् ॥ १३२ ॥

'शप आक्रोशे' । दिवादिर्भूवादिश्च । वाक्यादिति । 'शप उपालम्भने' इति वार्तिकेन । उपालम्भन इत्येव तु प्रायः पठन्ति । तदात्राप्युपालम्भ इति पाठः । तत्र वाचा शरीरस्पर्शनमुपालम्भनम् । तच्चैतज्जयादित्यमतम् । एतच्च 'त्वत्पादौ स्पृशामि नैतन्मया कृतमित्येवंविधः शपथविशेषः' इति व्याचख्युः[1] । सुधाकरश्चाह—'वाचा शरीरस्पर्शने=तव शरीरं स्पृष्ट्वा शपे इति यल्लोकप्रसिद्धं तत्र शपेस्तङ्' इति । कैयटस्तु 'उपलम्भनं प्रकाशनम्' इति । भागवृत्तिकारः पुनः प्राह—'शपेरुपलम्भने प्रकाशने कथने वर्तमानादात्मनेपदं भवति । देवदत्ताय शपते । देवदत्तं यत्किञ्चित्कथयतीत्यर्थः । वाचा शरीरस्पर्शनमुपालम्भनमित्यदः कस्यचित् काव्यम्' इति । तत्र च श्लाघह्नुङ्स्थेति (१-४-३४) सम्प्रदानत्वाच्चतुर्थी । शाकटायनस्त्वाह—'उपलम्भनं प्रकाशनं देवदत्ताय शपते । देवदत्तं प्रकाशयति । एवम्भूतोऽसाविति देवदत्तमाचष्ट इत्यर्थः । अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनम् । देवदत्ताय शपत इति । प्रोषिते देवदत्ते तस्य भावाभावयोरुपलब्धव्ययोः कंचिदासेवते[2]' इति । चान्द्रभोजकौमारास्तु 'शपः शपथे' इत्येवमाहुः । तदेतेष्वपि पक्षेषु लक्ष्यवशादेव समस्तस्य व्यवस्थास्थेया ॥

तृप्नोति तृप्यतीत्येते प्रीणने श्नौ श्यनि क्रमात् ।
तृप्तावन्यतरस्यां णौ स्यातां तर्पति तर्पयेत् ॥ १३३ ॥

---

१. हरदत्तमिश्राः. २. एवञ्च देवदत्तभावाभावान्यतरविषयं स्वाभिप्रायमाविष्करोतीत्यर्थ उदाहरणस्य फलितः.

'तृप प्रीणने' । तच्च 'पीयूषस्येह तृप्तम्' इत्यादिदर्शनात् तृप्तिरेव । केचित् पुनः स्वादौ तृपिं न पठन्ति । तथा च 'क्षुभ्नादि' (८-४-३९) सूत्रे न्यासकृता 'व्यत्ययो बहुलम्' (३-१-८५) इतिच्छान्दसोऽत्र क्षुरुक्तः । अत्र च 'क्षुभ्नादिषु च' इति णत्वाभावः । तेषु च तृम्प्रोतिशब्दस्यैव पाठात् तसादिषु णत्वंभवत्येव । अतृम्प्रोत् तृम्प्रोत्वित्यत्र तु 'एकदेशविकृतमनन्यवद् भवति' इति न्यायान्न भवति । 'तृप तृप्तौ' । तुदादिश्चायम् । सन्दीपन इति तु युजादौ क्षीरस्वामी । प्रीणन इति बहवः ॥

संघाते डेपयेतेति क्षेपे डिपति डिप्यति ।
डेपयेदिति चत्वारि णिचि शे श्यनि णौ डिपेः ॥ १३४ ॥

'डिप सङ्घाते' । चितादिः । 'डिप क्षेपे' ॥

कल्पते शपि सामर्थ्ये कल्पयत्यवकल्कने ।
अदन्तस्य कृपेर्णौ तु दौर्बल्ये कृपयेदिति ॥ १३५ ॥

'कृपू सामर्थ्ये' । 'कृपो रो लः' (८-२-१८) इति लः । 'कृपेश्च' इति 'कृपेस्तादर्थ्ये' इति वा णिच् । ते (*) 'भावयत्यवकल्कने' इत्यत्र दर्शिते । 'दार कृप श्रथ दौर्बल्ये' ॥

क्षम्पेः क्षम्पयति क्षान्त्यां प्रेरणे क्षपयेदिति ।

'क्षपि क्षान्त्याम्' । 'क्षप प्रेरणे' । भीमसेनेन कथादिष्वपठितोऽप्ययं 'बहुलमेतन्निदर्शनम्' इत्युदाहरणत्वेन धातुवृत्तौ पठ्यते ॥

---

१. न केवलमयं युजादिः, किन्तु तुदादिरपीत्यर्थः. २. इदं तृतीयश्लोके.

---

* 'च' इति पाठः स्यात्.

दिवादेः कुप्यति क्रोधे भाषार्थे कोपयेत् कुपेः ॥ १३६ ॥

'कुप क्रोधे' । कुप भाषार्थः ॥

आपयत्यापतीत्यापेर्यौ वा णौ लम्भने पदे ।
व्याप्त्यर्थस्यास्य तु स्वादेराप्नोतीति §पदं भवेत् ॥

'आपॢ लम्भने' इत्यत्र मैत्रेयरक्षितेनापत इत्यात्मनेपदमप्युदाहृतमुपलभ्यते । दैववशात्तु तस्यापि नैतदस्तीति प्रतीयते । तदनुसारेणैव हि प्रायेण देवः प्रवर्त्तमानो दृश्यते । 'आपॢ व्याप्तौ' ॥

स्पर्शे चुपति मन्दायां गतौ तु शपि चोपति ।

'चुप स्पर्शे' । तुदादिः । 'दीर्घोऽकितः' (७-४-८३) इत्यत्र भाष्ये चेच्छिद्यते चोच्छुप्यते इति 'छे च' (६-१-७३) इत्युदाहरणाच्छकारादिरयं युक्तः । 'चुप मन्दायां गतौ' ॥

शपि तोपति हिंसायां तत्रैव तुपतीति शे ॥ १३८ ॥
तत्रैव शशपोस्तुम्पेदर्दने तुम्पयेण्णिचि ।

'तुप तुम्प हिंसायाम्' । अत्र च 'अनिदिताम्' (६-४-२४) इति नलोपे कृते 'शे तृम्फादीनाम्' इति वार्तिकेन नुम् । आदिशब्दः प्रकारार्थः सादृश्यार्थः । तेन तुदादिषु ये नोपधाः पठ्यन्ते, ते तृम्फादयः । 'तुबि तुपि अर्दने' इति मैत्रेयरक्षितः । लुबि तुबीत्येव बहवः ॥

लुम्बयेत् तुम्बयेदर्दे शपि लुम्बति तुम्बति ॥ १३९ ॥

'लुबि तुबि अर्दने' ॥

---

१. मैत्रेयरक्षितस्यापि. २. भौवादिकस्तु चादिरेव सर्वसम्मतः.

---

§ 'भवेत् पदम्' इति गपुस्तके पाठः.

हिंसायां वक्रसंयोगे चुम्बयेच्चुम्बति क्रमात् ।

'चुबि हिंसायाम्' । 'चुठि इत्येके' इति मैत्रेयरक्षितः । 'चुबि वक्रसंयोगे' ॥

णिचि कुम्बयतीति स्याच्छादने शपि कुम्बति ॥ १४० ॥

'कुबि छादने' ॥

गार्ध्ये लुभ्यति मोहार्थे तुदादेर्लुभतीति शे ।

'लुभ गार्ध्ये' । दिवादिः । तच्चाभिकाङ्क्षा । 'लुभ विमोहने' ॥

दृभी भये विभाषा णौ स्यातां दर्भति दर्भयेत् ॥ १४१ ॥
अनीदितश्च सन्दर्भे दृभति ग्रन्थ ईदितः ।

विभाषेत्याद्यनुकर्षणार्थश्चः । तत्र चाणिच्पक्षे 'दृभी भये' 'दृभ सन्दर्भे' इत्यनयोरीदितो दृब्धामिति भवति, अनीदितस्तु दृभितमितीत्यभिप्रेत्य **अनीदित** इत्युक्तम् । बहवस्त्वन्त्यं न पठन्ति । 'दृभी ग्रन्थे' । तुदादिः । स च ग्रन्थनम् ॥

स्तभ्नाति स्तभ्नुयात् स्तुभ्नात्यपि स्तुभ्नोति सौत्रयोः ॥
स्तम्भते प्रतिबन्धार्थे स्तम्भेऽर्थे स्तोभते शपि ।

'क्र्यादिभ्यः श्ना' । 'स्तन्भु स्तुन्भु स्कन्भु स्कुन्भु स्कुञ्भ्यः श्नुश्च' (३-१-८२) इति सौत्रयोर्धात्वोः श्नुश्नौ । 'ष्टभि स्कभि प्रतिबन्धे' । अनुदात्तेतौ । 'औपदेशिकोऽयं टकारो न तु ष्टुत्वनिबन्धन इत्येके' । इति क्षीरस्वामिमैत्रेयरक्षितौ । तदा ष्टम्भते इत्येवं रूपम् । स्कन्भुस्कुन्भ्वोः पुनः स्कभ्नाति स्कुभ्नुयात् स्कुभ्नाति स्कुभ्नुयात् स्कम्भत इति सुशकमूहितुमित्याशयः । 'ष्टुभु स्तम्भे' ॥

हिंसाभाषणयोः शोभेच्छोभार्थे शुभतीति शे ॥ १४३ ॥
शोभते शपि दीप्त्यर्थे शुम्भेरन्यत् तङः समम् ।

'शुभ शुम्भ भाषणे हिंसायां च' । क्षीरस्वामी " 'शुम्भ भाषणे हिंसायां च' भासन इति च दुर्गः । षोपदेशोऽयमिति गुप्तः 'सावष्टम्भनिषुम्भसंभ्रमनमद्भूगोले' त्यादिदर्शनाद्" इत्याह । धनपालशाकटायनौ (त?) यथा दुर्गः । 'शुभ शुम्भ शोभार्थौ' 'शुभ दीप्तौ' । तत्र च तङोऽन्यच्छुम्भेरपि समामित्यर्थः, हिंसाद्यर्थत्रये शशपोः शुम्भतीति भवतीति यावत् । तृन्फादित्वान्नुम् ॥

क्षुभ्नाति क्षोभते क्षुभ्येदिति सञ्चलने क्षुभेः ॥ १४४ ॥

'क्षुभ सञ्चलने' । क्र्यादिर्भ्वादिर्दिवादिश्च । मध्यमोऽनुदात्तेत् । आद्ये 'क्षुभ्नादिषु च' (८-४-३९) इति णत्वाभावः ॥

नभ्येन्नभ्नाति नभते हिंसायां तत्तुभेः समम् ।

'णभ तुभ हिंसायाम्' । दिवादिः क्र्यादिर्भ्वादिश्च । अन्त्योऽनुदात्तेत् ॥

जृम्भणे जम्भते याभे जम्भेन्नाशे तु जम्भयेत् ॥ १४५ ॥

'जभ जृभि गात्रविनामे' । 'राधिजभोरचि' (७-१-६१) इति नुम् । 'जभीत्येके' इति मैत्रेयरक्षितः । तदा[2] निष्ठायां जब्धम् । अन्यदा जभितम् । 'भयविपरीतो मैथुने' । विपरीत इति यभेत्यर्थः । 'जभ इत्येके' इति मैत्रेयरक्षितः । जभ चेति धनपालः । यभजभेति शाकटायनः । न्यासे तु 'राधिजभोः' (७-

---

१. यथा दुर्गः=दुर्ग इव तावपि भासने इत्यर्थं वदत इत्यर्थः. २. ईदित्त्वे.

१-६१) इत्यादौ जभ जृभि गात्रविनाम इत्येव पाठात् जभि-मैंथुने नास्तीति गम्यते, वृत्तौ च 'रैंभिश्च भान्तेष्वथ मैथुने याभिः' इत्यत्र रब्धा यब्धेत्येवोदाहृतेः। 'जभि नाशने' ॥

प्रेरणे लाभयेल्लाभेः प्राप्त्यर्थे लभते शपि।

'लाभ प्रेरणे'। कथादिः। तत्फलं पुनरललाभदित्यत्राग्लोपित्वाद्ध्रस्वाभावः। 'लभेति सभ्या' इति क्षीरस्वामी। 'डुलभष् प्राप्तौ' ॥

अषितः क्षाम्यति क्षान्तिः क्षमूषः क्षमते क्षमा ॥ १४६ ॥

'क्षमू सहने'। 'शमामष्टानां दीर्घः' (७-३-७४) इति दीर्घः। 'क्षमूष् सहने'। अनुदात्तेत्। षित्त्वादङ्। स च 'स्त्रियां क्तिन्' (३-३-९४) इत्यस्यापवादः। अषितस्त्वौत्सर्गिकः क्तिन्नेव भवतीति क्षान्तिरित्युक्तम्। 'अनुनासिकस्य क्विझलोः क्ङिति' (६-४-१५) इति दीर्घः ॥

गत्यादावमतीति स्याद्रोगे स्यादामयत्यमेः।

'अम गत्यादिषु'। ते च 'कन दीप्तिकान्तिगतिषु। ष्टन वन शब्दे। वन षण सम्भक्तौ' इति समनन्तरोक्ताः। "अपरे 'अव रक्षणगतौ' त्यादयो गत्यादय इत्याहुः" इत्यपि धनपालः। 'अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु' इति विदूरे वक्ष्यमाणा अपि गृह्यन्ते इत्याहुरित्यर्थः। 'अम रोगे'। 'आद्यन्तवदेकस्मिन्' (१-१-२१) इति अमन्तत्वेऽपि 'न कम्यमिचमाम्'

---

१. अनिट्कारिकेयम

इति मित्त्वनिषेधादमेर्हेतुमाण्णिच्यप्याम्यतीति द्रष्टव्यम् । अयं च निषेधः कमिचमिसाहचर्याद्भौवादिकस्यैवार्हतीति 'नान्ये मित' इत्येव चुरादिणिचि निषेद्धव्यम् ॥

चलने भ्रमति भ्रम्येच्छमादेर्भ्राम्यति भ्रमेत् ॥ १४७ ॥

'भ्रमु चलने' । 'भ्रमु अनवस्थाने' । दिवादिः । 'वा भ्राश' (१-३-७०) इत्यादिना वा श्यन् ॥

यमेरुपरमे यच्छेद्यमयेत् परिवेषणे ।

'यमु उपरमे' । 'उदित्त्वमस्य केचिन्नेच्छन्ति' इति मैत्रेयरक्षितः । क्षीरस्वामी तु यमेत्येव पठित्वाह—'उदिदिति श्रीभोजः' इति । तत्फलं तु यत्वेत्येव प्राप्ते यमित्वेतीड्विकल्पः । 'अनुदात्तोपदेश' (६-४-३७) इत्यादिना नलोपः । 'इषुगमियमां छः' (७-३-७७) । 'इषेश्छत्वमहलीति वक्तव्यम् । इह मा भूत् । इष्यति इष्णाति' इति भाष्याद् इषेत्येवार्षः पाठः[1] । 'यम च परिवेषणे' । अत्रार्थे यमिर्णिचमुत्पादयति मिच्च भवतीत्यर्थः । 'यमोऽपरिवेषणे' इति तु क्षीरस्वामिधनपालौ । घटादावप्येवमेव[2] पठन्ति । अर्थे त्वस्य विवदन्ते । तत्र क्षीरस्वामी तावद्—'यम उपरम इत्यस्य धातोः परिवेषणादन्यत्रैवार्थे मित्संज्ञा । यमयति नियमयति संयमयति । परिवेषणे तु यामयति श्राद्धे । यामयति चन्द्रम्' इति । एवमेव च चान्द्रकौमारभोजीयाः । मैत्रेयरक्षित-

१. अन्यथा दिवादिकचाद्योरुदित्त्वाभावेन हलि च्छत्वाप्रसङ्गाद् इष्यतीष्णातीत्यनयोः अहलीति निषेधोदाहरणत्वमसङ्गतं स्यात् । 'इषु इति वक्तव्यम्' इति वाच्ये तथानुक्त्या च तुदादावप्यननुबन्ध एव पाठो वार्तिककारस्य. २. 'यमोऽपरिवेषणे' इत्येव सर्वे पठन्तीत्यर्थः.

स्तु "अपरिवेषणे यमिर्न मित्। यामयति । परिवेषणे यमयति ब्राह्मणान्। कथं नियमयति संयमयतीति । 'तत्करोति' इति प्रातिपदिकाण्णिच्प्रत्ययः" इति । धनपालश्च निषेधपक्षमेव पर्यग्रहीत्। 'न पादम्याङ्यम' (१-३-८९) इत्यत्र च जयादित्यः — "आयामयते 'यमोऽपरिवेषणे' इति मित्संज्ञा प्रतिषिध्यते" इति । व्यानञ्ज चैतज्जिनेन्द्रः — "'न कम्यमिच्चमाम्' इत्यतो नेति वर्तते" इति । 'अनन्तरस्य विधिर्वा' इति च नीतिः 'नेति वर्तते' इत्येतदेवानुवर्तते 'घटादयो मितः' इति मित्त्वविधेः प्रतिषेधान्त[1]रितत्वात्। शाकटायनः पुनर्घटादौ चुरादौ च पक्षद्वयमपि परिजग्राह । तत्र च क्षीरस्वाम्यादिपक्षे यामयेदिति कामं पठितव्यम्। धनपालपक्षेऽप्येवमेव चुरादौ द्रष्टव्यम । शाकटायनपक्षे पुनरुभयत्राप्युभयमिति विभागः ॥

स्यमेः स्यमति शब्दार्थे वितर्के स्यामयेत णौ ॥ १४८ ॥

'स्यमु स्वन ध्वन शब्दे' । 'स्यम वितर्के' । चितादिः । 'नान्ये मित' इति मित्त्वाभावः । पूर्वस्य हेतुमाण्णिचि मित्त्वात् स्यमयेत् स्यमयेतेति द्रष्टव्यम् । न्यासकारस्तु 'नाचार्यराजार्त्विक्संयुक्तज्ञात्याख्येभ्यः' (६-२-१३३) इत्यत्र स्यालशब्दव्युत्पादनार्थं 'स्यल वितर्के' इत्यपाठीत् ॥

आलोचने शामयते शाम्यत्युपशमे श्यनि ।

'शम लक्ष आलोचने' । चितादिः । 'शमु उपशमे' । घटादौ च 'शमो दर्शने' इति पठ्यते । शाम्यतेर्दर्शनेऽर्थे मित्संज्ञा न भवतीत्यर्थः । अदर्शने भवतीति तु क्षीरस्वामी । एवमेव चान्द्र-

---

१. एतदेव = 'नेति वर्तते' इत्येवंरूपं विवरणमेव । अनुवर्तते = अनुगृह्णाति.

कौमारभोजीयाः। धनपालस्तु 'दर्शने न भवती'त्युक्त्वा 'अदर्शने इत्येके' इत्याह। शाकटायनश्चात्रैवानुकूलः। एषु च 'अनन्तरस्य विधिर्वे'ति नीत्या प्रथम एव पक्षो युक्तः। नञ्प्रश्लेषक्लेशश्चैवं परिहृतो भवति। तत्र च दर्शने निशामयति रूपमिति भवति। अन्यत्र निशमयति श्लोकं, शमयति रोगमिति॥

भामेर्भामयति क्रोधे तत्रैव शपि भामते॥ १४९॥

'भाम क्रोधे'। आद्यः कथादिः। अन्त्योऽनुदात्तेत्॥

वित्तत्यागे व्ययययति व्ययति व्ययते गतौ।

'व्यय वित्तसमुत्सर्गे'। कथादिः। 'व्यय गतौ'॥

पूरेराप्यायनेऽर्थे स्यात् पूर्यते पूरयेदपि॥ १५०॥

'पूरी आप्यायने'। दिवादिर्ग्रसादिश्च॥

स्तेये चोरयतीति स्याण्णिचि चोरयते चुरेः।

केचित्त्वेतन्न पठन्ति। 'चुर स्तेये'। 'चुर छेदने'। तुदादिः। णिच्चास्माद्धेतुमाण्णिच्। चोरयत इत्येतच्च चोरयतीत्यस्याप्युपलक्षणम्। **इति स्यादि**त्येतद्वा चुरेरित्यनेन सम्बध्य चुरश्चोरयतीति स्यात्, चोरयत इति चेति व्याख्येयम्। चुरतीति तु वाच्ये णिचा निर्देशो वैचित्र्यार्थः। सर्वथाप्यत्रार्थतः शब्दतश्चाञ्जस्यं नैव पश्यामः। 'छुर च्छेदने' इत्येव च पाठः। तथा च 'सामोन्मुखेनोच्छुरिता प्रियेण' इति भट्टिः। 'स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक्स्मितम्' इत्यमरसिंहश्च। तच्चैतत्

१. ते च क्षीरस्वामिपक्ष्याः. २. स च मित्त्वप्रतिषेधपक्षः. ३. क्लेशो ह्ययमवर्जनीयो मित्त्वविधिवादिनो दर्शने मित्त्वं मा भूदिति. ४. आस्वादीय इत्यर्थः.

'छुर च्छेदने क्तः । यावादि (५-४-२९) कन्नि'ति कविकामधेनौ व्याख्यातम् । 'कृन्तत्यचोटयदच्छुण्टयदच्छुरच्च' इत्याख्यातनिघण्टुश्च । तदेवमपाठपक्ष एव न्याय्यः, चितादौ चेच्छुरिर्न दृश्यते ।

स्तेये चोरयतीति स्याच्चुरेश्छेदे चुरेरिति ।

इति तु कचित् पाठः । तदापि चकारादित्वमयुक्तमेव । यदा तु छकारादिरेवापठ्यत, तदापि कथञ्चित् सादृश्यं नेयम् ॥

शूरयेतेति विक्रान्तौ शूर्यते स्तम्भहिंसयोः ॥ १५१ ॥

'शूर वीर विक्रान्तौ' । भ्वादी । 'शूरी हिंसास्तम्भयोः' । दिवादिरनुदात्तेत् ॥

गुरते गूरयेतेति शे णावुद्यमने तङि ।
श्यनि गूर्यत इत्येवं गतिर्हिंसनयोस्तङि ॥ १५२ ॥

'गुरी उद्यमने' । तुदादिः । 'गूर उद्यमने' । चितादिः । 'धूरी गूरी हिंसागत्योः' ॥

संशये चारयेद्गत्यां चरति

'चर संशये' । 'चर गतौ भक्षणे च' । यथा तु 'भक्षणेऽपि प्रयुज्यते चरिः' इति मैत्रेयरक्षितः, तथा नायं पाठोऽस्ति । अपि त्वर्थवशेन केनाचित् प्रक्षिप्त इति गम्यते; तथा 'चर गतिभक्षणयोरि'ति ॥

---

१. छेदनार्थे चुरतीत्याख्यातस्य सत्त्वे तदत्रापाठिष्यत. २. उक्तप्रकारेण तुदादेर्णिजुदाहरणस्य चकारादित्वस्य चासामञ्जस्यादित्यर्थः. ३. इदमर्धं रान्तशेषतया दैवग्रन्थे पठ्यते 'गतौ शलती'ति (१५४) श्लोकात् प्राक्. ४. आगर्वीयावित्यर्थः. ५. मैत्रेयोक्तिपर्यालोचनया 'चर गतौ भक्षणे च' इति वा 'चर गतिभक्षणयोः' इति वा पाठो नास्तीति प्रतीयते इति वाक्यार्थः.

ईरयतीरति ।

ईरेः क्षेपे विभाषा णौ लुकीर्त्ते गतिकम्पयोः ॥ १५३ ॥

'ईर क्षेपे' । 'ईर गतौ कम्पने च' । अनुदात्तेत् । गताविति[1]व बहवः ॥

गतौ शलति संवृत्यां चलने शलते शलेः ।

'शल हुल पत्ल गतौ' । ज्वलादयः । 'शल श्वल्ल आशुगमने' इति ज्वलादौ क्षीरस्वामी । श्वल श्वल्लेति तु मैत्रेयरक्षितः । तत्र चाद्यं पाठमाश्रित्य गताविति[1]वोक्तम् । पाठान्तरेऽपि वा गतिग्रहणेनाशुगतिरपि कामं गृह्यते । 'शल चलनसंवरणयोः' ॥

समाधौ शीलतीति स्याच्छीलयत्युपधारणे ॥ १५४ ॥

'शील समाधौ' । 'शील उपधारणे' । तच्चाभ्यासः ॥

कलेः कालयति क्षेपे गतिसङ्ख्यानयोर्द्वयोः ।
कलयेच्छब्दसङ्ख्यानविषये कलते शपि ॥ १५५ ॥

'कल विल क्षेपे' । 'कल गतौ सङ्ख्याने च' । कथादिः । 'कल शब्दसङ्ख्यानयोः' ॥

महत्त्वे पोलति पुलेर्णौ तु तत्रैव पोलयेत् ।

'पुल महत्त्वे' । तुदादौ चायं क्षीरस्वामिनः । भूवादौ च स एवाह—'तुदादौ पुलती'ति । तदा पुलेदिति पाठः । चुरादौ तु समुच्छ्राय इति पपाठ ॥

सङ्घाते पूलयेत् पूलेत् पूलेः स्तां णिशपोः क्रमात् ॥

'पूल सङ्घाते' । पूर्ण इति तु चुरादौ क्षीरस्वामी । पूणेति

---

१. पुलेरित्यस्य स्थाने.

शाकटायनः । कोशशुद्धिरत्वीदृशेषु कीदृशीति न विद्मः ॥

मूलेः प्रतिष्ठितौ मूलेद्रोहणे मूलयेदिति ।
वेलेत्तु चलने वेलेर्वरणे विलतीति शे ॥ १५७ ॥
क्षेपे णौ वेलयेद्

'वेलृ चलने' । 'विल वरणे' । 'विल क्षेपे' ॥

भृत्यां चालयेत् कम्पने चलेत् ।

'चल भृतौ' । 'चल कम्पने' । अस्य तु हेतुमण्णिचि 'कम्पने चलिरि'ति मित्त्वाच्चलयेदिति द्रष्टव्यम् । कम्पनात्त्वन्यत्र चालयति सूत्रमर्थं वेति ॥

फलेर्विशरणे फुल्लं फलितं फलति त्रयम् ॥ १५८ ॥
आदितोऽनादितस्त्वन्त्ये रूपे निष्पत्तिवाचिनः ।

'ञिफला विशरणे' । अस्याकर्मकत्वाद् भावे क्तः, 'गत्यर्थाकर्मके' (३-४-७२) त्यादिना कर्तरि च, 'क्तोऽधिकरणे चे' (३-४-७६) त्यधिकरणे च । तत्रान्त्ययोः 'आदितश्च' (७-२-१६) इतीटि प्रतिषिद्धे 'उत् परस्यातः' 'ति च' (७-४-८८) इत्युत्वे च कृते 'अनुपसर्गात् फुल्ले' (८-२-५५) त्यादिना निष्ठातकारस्य लत्वनिपातनात् फुल्लम् । आद्ये तु 'विभाषा भावादिकर्मणोः' (७-२-१७) इतीट्प्रतिषेधविकल्पात् फलितं च । क्तश्चायं 'ञीतः क्तः' (३-२-१८७) इति वर्तमाने भवति, नतु भूते 'तक्रकौण्डिन्य'न्यायेन बाधात् 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधकः' इति चाहुः । येन नाप्राप्त इति च यस्मिन् प्राप्त एवेत्यर्थः । अपरे पुन-

---

१. क्षिपत्यन्यथाकरोति वेत्यर्थः.

भूतेऽपि भवतीत्यूचुः। 'शबर्या पूजितः सम्यग्' इत्यादिप्रयोगाश्चात्रैवानुगुणाः[1]। 'अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः' इति भोजदेवः। आह स्म चैतत्सर्वं सुधाकरः—"'अनेन वर्तमाने क्तेन भूते प्राप्तः क्तो बाध्यते' इति भर्तृहरिः। भाष्य-(टकार?) टीकाकृतस्तु भूतेऽपि भवतीत्यूचुः। तथा च पूजितो गतः पूजितो यातीति भूतकालो वाच्यः। नतु पूज्यमानो वर्तमान" इति। 'फल निष्पत्तौ'। अस्य चानादित्वादनिट्त्वोक्त्वयोरसम्भवेन फुल्लाभावाद् अन्त्ये इत्युक्तम्॥

†**विदारणे शपि दलेद् दालयेदिति णौ दलेः॥ १५९॥**

'दल विदारणे'। अन्त्यो ग्रसादिः। विशरणे त्वाद्यं बहवः पठन्ति। 'दलन्ति ककुभानि चे'ति दण्डिनः प्रयोगः। सर्वथाप्यस्य 'दलिवली'ति मित्त्वाद् दलयेदित्यपि विशरणे द्रष्टव्यम्॥

श्लेषे मिलेत् सङ्गमे तु मिलते मिलतीति च।

'मिल श्लेषणे' 'मिल सङ्गमे'। तुदादी। अत्र मैत्रेयरक्षितः—'मिल श्लेषण इत्येके पठन्ती'ति। कौमाराः पुनरमुमेव पठन्ति। शृङ्गारप्रकाशे तु 'मिलन्त्याशासु जीमूता' इत्यपठितधातुषु मिलतिः प्रदर्शितः॥

अर्दने देवयेद् दीव्येत् क्रीडादौ परिकूजने॥ १६०॥

---

१. आनुगुण्यं च शबर्येति तृतीयानिर्देशस्य द्रष्टव्यम्। अन्यथा हि 'क्तस्य च वर्तमाने' (२-३-६७) इति पप्ठ्या भाव्यम्. २. 'ज्ञातमिति तु भूतेऽपि भवति तेनेत्यधिकारात् तृतीयान्तादुपज्ञातेऽर्थेऽण्प्रत्ययविधानाद्' इति 'मतिबुद्धि' (३-२-१८८) इति सूत्रे कैयटः. ३. अयं स्वरितेत्.

† इदमर्धं 'फलेर्विशरणे फुल्लम्' इत्यतः प्राक् पठितं कपुस्तके.

देवयेतेदितो दिन्वेद् देवेर्देवेत देवने ।

'दिवु अर्दने' । 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' । 'दिवु परिकूजने' । चितादिः । 'हिवि दिवि धिवि जिवि प्रीणनार्थाः' । 'तेवृ देवृ देवने' । अनुदात्तेतौ ॥

माने गर्वयते दर्पे गर्वतीति भवेच्छपि ॥ १६१ ॥

'गर्व माने' । पदादिः । 'कर्व खर्व गर्व दर्पे' ॥

•ष्ठीवति ष्ठीव्यतीत्येते स्यातां निरसने ष्ठिवेः ।

'ष्ठिवु निरसने' । अन्त्यो दिवादिः । 'सादेशे सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधः' । इति वार्तिकेन सत्वाभावः । 'ष्ठिवुक्लमुचमां शिति (७-३-७५) इति दीर्घः ॥

पूरणे पूर्वतीति स्यात् पूर्वयेण्णौ निकेतने ॥ १६२ ॥
पूर्व्यतीति तु यत् स्वप्ने तत् कण्ड्वादिषु दर्शनात् ।

'पुर्व पर्व मर्व पूरणे' । 'उपधायां च' (८-२-७८) इति दीर्घः । 'पुर्व निकेतने' । तच्च निवासः । 'पूर्व भावे स्वप्ने च' । कण्ड्वादिगणपाठेषु पूर्वशब्दो न दृश्यते । यस्त्वयं दर्शितः, सोऽप्येवं लोटोऽर्थनिर्देश एव भवेत् । तथा चामोघायां वृत्तावर्थनिर्देशाद्विना शाकटायनः कण्ड्वादीन् पठन् पूर्वशब्दं न पपाठ । गणपाठे तु लोटो धौर्ये पूर्वभावे स्वप्ने चेत्यर्थत्रयं निर्दिदेश ॥

व्यक्तोक्तौ क्लेशते क्लेशेः क्लिश्नाति तु विबाधने ॥ १६३ ॥
दिवादेरुपतापेऽर्थे तङि स्यात् क्लिश्यतेपदम् ।

'क्लेश व्यक्तायां वाचि' । अनुदात्तेत् । बाधन इति दुर्गः । 'क्लिशू विबाधने' । क्र्यादिः । क्लिशु उपतापे ॥

दंशने दशतीति स्यात् तत्र दंशयते णिचि ॥ १६४ ॥
भाषणे दंशयेत्

'दंश दंशने' । 'दंशसञ्जे'ति (६-४-२५) नलोपः । 'दशि दंशने' । चितादिः । दंशेत्येके । तथा च दंश् इति* । शाकटायनः पुनर्दशुङिति । दशि भाषार्थः ॥

काशेर्दीप्तौ काश्येत काशते ।

'काशृ दीप्तौ' । दिवादिर्भूवादिश्च । अनुदात्तेत् ॥

लिश्यते लिशतीत्येवमल्पीभावे गतौ क्रमात् ॥ १६५ ॥

'लिश अल्पीभावे' । दिवादिः । तुदादिश्चायं क्षीरस्वामिधनपालयोः । 'लिश गतौ' । तुदादिः । तयोरनुमतोऽयं पाठः । द्विष्पाठस्त्वेवमर्थभेदान्नूनम् । एवं तु 'लिश गत्यल्पीभावयोरि'त्यनुक्तिर्वैचित्र्यार्था ॥

व्याप्तावश्नुत इत्याहुरश्नातीति तु भोजने ।

'अशू व्याप्तौ' । स्वादिः । 'अश भोजने' क्र्यादिः ॥

बाधने स्पर्शने चार्थे हिक्कादौ स्पशते स्पशेत् ॥ १६६ ॥
ग्रहणे श्लेषणे चार्थे चुरादौ स्पाशयेत णौ ।

'स्पश स्पर्शबाधनयोः' । क्षीरस्वामी तु 'पषेत्येके । पाषण्डः पाषाणः' इत्याह । दुर्गशाकटायनयोश्चैष एव पक्षः । तत्र चाद्यः पाठः 'प्रतिस्पशोऽविसृजतूर्णितमः' 'यतो व्रतानि पस्पशे' 'शब्दविद्येव नो भाति राजनीतिरपस्पशा' इत्यादिप्रयोगानु-

* इदं वाक्यं दंशेति पाठं संवादयितुं प्रवृत्तमिव भासते । पदभ्रंशश्चात्रार्थाप्रतीतेरनुमातव्योऽस्ति.

गुणः । पाषण्डादिस्तु 'पष अनुपसर्गाद्' इत्यस्य कथादेर्भविष्यति; 'पष बन्धने' इत्यस्यैव वा युजादेः । 'पश बन्धने' इत्यत्र मैत्रेयरक्षितः—'पष बन्धन इति युजादावेके पठन्ति' इति । अव्युत्पन्नो वास्तु । 'स्पश ग्रहणश्लेषणयोः' । चितादिः ॥

भ्राशते भ्लाशते दीप्तौ भ्राश्यते भ्लाश्यते तथा ॥ १६७ ॥

'टुभ्राजृ टुभ्राश्रृ टुभ्लाश्रृ दीप्तौ' । 'वा भ्राशे'ति (३-१-७०) वा श्यन् ॥

झषेज्झषेत संवृत्यामादाने हिंसने झपेत् ।

'झष आदानसंवरणयोः' । झप हिंसार्थः ॥

इष्णात्याभीक्ष्ण्य इच्छायामिच्छेद् गत्यर्थ इष्यति ॥

'इष आभीक्ष्ण्ये' । पौनःपुन्यं भृशार्थो वाभीक्ष्ण्यम् । तद्विषयायां क्रियायामित्यर्थः । तथा च श्रूयते—'पुर इष्णाति पुरुहूतः पुर्वीः' इति । अत्र ह्यासुरीणां पुरूणां पुराममीक्ष्णं हननादिरर्थो गम्यते । 'इषु इच्छायाम्' । यथा तु 'तीषसहलुभरुषरिष' (७-२-४८) इत्यत्र " 'इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधः' इह मा भूत् प्रेषिता प्रेषितुं प्रेषितव्य"मिति भाष्यं, तथा इषेत्येव पाठः । यदाह कैयटः—"इषु इच्छायामिति केचित् तौदादिकमुदितमधीयते । अन्ये तु उदित्त्वस्य प्रयोजनमपश्यन्त इष इच्छायामिति पठन्ति । ये त्विह 'तीषुसहे'ति पठन्ति । तन्मतेनेह विशेषणार्थ उकारः । तत्र वार्तिककारमतेन त्रयोऽपीषयोऽननुबन्धकाः; इह च तीषसहेति पाठः । तदाह इषेरिति" इति । अत्र च 'तीषे'त्यनेनैव क्त्वायामिड्विकल्पः सिद्धः । 'शतुर्वा नुमि'ति

चोक्तमेवोन्नेयम् । 'इषुगामियमां छः' (७-३-७७) । 'इष गतौ' । दिवादिः । 'जेषृ णेषृ एषृ प्रेषृ गता'वित्यस्य तु तङि एषते । अत्रैव तु क्षीरस्वाम्याह—'चुरादावप्येषयती'ति ॥

ईषतीतीष उञ्छेऽर्थे गत्यादावीपते भवेत् ।

गत्यादाविति । ईष इत्येव । 'ईष उञ्छे' । 'ईष गतिहिंसादर्शनेषु' ॥

घुषेर्विशब्दनादौ णौ घोषयत्यविशब्दने ॥ १६९ ॥
घोषतीतीदितो घुंषेद् घुंषते कान्तिकर्मणि ।

'घुषिर्विशब्दने' । तच्च शब्देन स्वाभिप्रायप्रकाशनम् । धातूनामनेकार्थत्वेनार्थान्तरस्यापि सम्भवादादिशब्दः प्रकारार्थो व्याख्येयः । यदि तु 'विशब्दनार्थे णौ' इति पाठः स्यात्, तदा न कश्चित् क्लेशः । 'घुषिरविशब्दने' (७-२-२३) इत्यत्र विशब्दने विभाषा घुषेर्णिज् भवतीति भाष्ये[1] स्थिते घोषतीत्यपि भवति । 'घुषिरविशब्दार्थः' । घुषिर् इत्ययं धातुः यथाप्रयोगं विशब्दनादन्यत्रार्थे वर्तत इत्यर्थः । शब्दार्थ इति तु क्षीरस्वामिधनपालभागवृत्तिकाराः । शब्द इति चन्द्रदुर्गौ । 'घुषृ शब्दे' इति शाकटायनः । तेन चेरित्स्थाने ऋदित् क्रियते । अस्मिंश्च पाठे अस्यैवानेकार्थत्वेन विशब्दनार्थत्वस्यापि सम्भवाद् विनापि णिज्विकल्पेन विशब्दनेऽपि घोषतीति सिध्यति । प्रपञ्चितं चैतत् प्रक्रियारत्ने । 'घुषि कान्तिकरणे' । 'घषि करणे' इत्यन्ये । घसी-

१. इत्थं हि भाष्यम्—'किमर्थमविशब्दने इत्युच्यते । न विशब्दने चुरादिणिचा भवितव्यम् । एवं तर्हि सिद्धे सति यदविशब्दने इत्याह, तद् ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज् भवतीति'.

त्यपरे। तथा च क्षीरस्वामी—"'घसि करणे'। घंसते। चन्द्रो घषीत्याह। घंषते। 'घुषि कान्तिकरणे' इति दुर्गः" इति॥

ईर्ष्यायामादरे चार्थे क्रमात् सूर्क्ष्यति सूर्क्षति॥ १७०॥

'सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः'। 'पूर्क्ष आदरे' इति च अनादरे इति च बहवः। क्षीरस्वामी 'पूर्क्ष्य अनादरे' इति पठित्वाह—'षान्तोऽयमिति चन्द्र' इति। तत्र च 'सोमेन[1] यक्ष्यमाणो नर्तुं सूर्क्ष्येन्न नक्षत्रम्' इति दर्शनाद्यथादैवमेव[2] युक्तम्[3]॥

धारणे पोषयेत् पुष्टौ पुष्येत् पुष्णाति पोषति।

'पुष धारणे'। ग्रसादिः। 'पुष पुष्टौ'। दिवादिः क्र्यादिर्भ्वादिश्च। 'पूष वृद्धौ' इत्यस्य तु पूषति॥

म्लेच्छने म्रक्षयेन्म्रक्षेत् सङ्घाते

'म्रक्ष म्लेच्छने'। तच्चाव्यक्तवाग् अपशब्द इत्यर्थः। 'म्लेच्छो हवा एष यदपशब्दः' इति च श्रूयते। 'म्रक्ष सङ्घाते'॥

दाहकर्मणि॥ १७१॥

ष्लोषति प्लुष्यतीति स्तां प्लुष्णाति स्नेहनादिषु।
प्रुष्णाति च प्रोषति च दाहे

'श्रिषु श्लिषु प्रुषु प्लुषु दाहे'। 'प्लुष दाहे'। पुषादिः। क्षीरस्वामीत्वन्यथापि[4] दिवादावमुं पपाठ। तत्फलभेदः पुनरप्लुषदप्लोषीदित्यङो भावाभावौ। 'प्रुष प्लुष स्नेहनसेचनपूरणेषु'।

---

१. सोमेन यक्ष्यमाणो 'वसन्ता ब्राह्मणोऽग्निमादधीत' 'उत्तरयोः फल्गुन्योरग्निमादधीत' इत्यादिऋतुनक्षत्राणि नाद्रियेतेत्यर्थकम् आपस्तम्बश्रौतसूत्रमिदम्. २. दैवोक्तमादरार्थत्वमेव धातोर्युक्तं, न पुनरन्योक्तमनादरार्थत्वमित्यर्थः. ३. पुषादेर्बहिरपि.

क्र्यादिः। एवं चैतेष्वेव क्र्यादिपाठात् 'बन्धने जुडतीति च' इतिवत् दाहेऽर्थे प्रोषतीति चेति वाक्यार्थसमुच्चय एव चः; दाह एव वा प्रागुक्तरूपयोः[2] समुच्चयेन चात्रात्यन्ताय व्यवहितान्वयः, दाहग्रहणेनैव तयोरपि धिया सान्निधानात् ॥

भूषति भूषयेत् ॥ १७२ ॥

अलङ्कृतौ

'भूष अलङ्कारे' ॥

क्षमायां यौ मर्षेन्मर्षेत मर्षयेत् ।
मृष्यते मृष्यतीति स्यात् सहने शपि मर्षति ॥ १७३ ॥

'मृष तितिक्षायाम्' । स्वरितेतौ । दिवादिश्चान्त्यः । शाकटायनस्य त्वाद्य आत्मनेपदी । 'पृषु वृषु मृषु सेचने' । 'मृषु सहने च' ॥

सेचने मेषतीति स्यात् स्पर्धायां मिषतीति शे ।
व्याप्तौ वेवेष्टि वेविष्टे विषेर्वेषति सेचने ॥ १७४ ॥
विप्रयोगे विषेः क्र्यादेर्विष्णातीति पदं भवेत् ।

'जिषु विषु मिषु सेचने' । 'मिष स्पर्धायाम्' । 'विषू व्याप्तौ' । जुहोत्यादिः । 'उदिदित्येके' इति क्षीरस्वामी । 'आर्याणामुदित् । द्रमिडानां लृदित्' इति धनपालः । पुषादि (३-१-५५) इत्यत्र सुधाकरश्च—"द्रमिडानामविषत् । आर्याणां तु 'शल इगुपधादनिटः क्सः (३-१-४५) अविक्षादिति नन्दी" इति । 'निजां त्रयाणां गुणः श्लौ' (७-४-७५) 'विष विप्रयोगे' ॥

---

१. इदं ८९ श्लोके. २. प्लोषति प्लुष्यतीत्यनयोः.

श्लिष्यत्यालिङ्गने दाहे श्लेषति श्लेषणे णिचि ॥ १७५ ॥
श्लेषयेत्

'श्लिष आलिङ्गने' । दिवादिः । अत्रार्थे आङ्पूर्वत्वं प्रायिकमेव । यदाह भट्टिः—'मा न श्लिक्षः प्रियं प्रिये' इति । माघश्च—'श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्रीम्' इति । 'श्लिषु दाहे' । 'श्लिष श्लेषणे' ॥

क्रमतोऽलीके तुष्टौ हर्षति हृष्यति ।

'हृषु अलीके' । 'हृष तुष्टौ' । दिवादिः ॥

शक्तौ वर्षयते सेके वर्षेत् स्नेहे तु वर्षते ॥ १७६ ॥

'वृष शक्तिसम्बन्ध' इति तु प्रायस्तन्त्रान्तरेऽपि पठ्यते । 'वृषु सेचने' । 'वर्ष स्नेहने' । अनुदात्तेत् ॥

भक्षयत्यदने भक्षेः शपि भक्षति भक्षते ।

'भक्ष अदने' । 'भक्ष भक्षणे' । 'भ्लक्षेत्येक' इति मैत्रेयरक्षितः । भक्षेति क्षीरस्वामी । यथा तु 'गतिबुद्धी' (१-४-५२) त्यत्र 'भक्षेरहिंसार्थस्य' इति वार्तिकं प्रकृत्य 'भक्षयति पिण्डं देवदत्त' इत्येवोक्तं भाष्ये न पुनर्भक्षतीत्यपि, तथा भक्षतिर्नैवास्तीति गम्यते ॥

कान्तौ लष्यति लष्येत इयनि वा लषते लषेत् ॥ १७७ ॥

'लष कान्तौ' । इयनि वेति । वा भ्राशेति (३-१-७०) विकल्पेन इयनि । ततश्च फलतः पुनःपाठं मत्वेदमुक्तम् । एतच्च क्रमुप्रभृतीनामपि कामं द्रष्टव्यम् ॥

कर्षत्याकर्षणे शे तु कृषते कृषतीत्युभे ।

'कृष विलेखने'। कर्षतिस्त्वाकर्षणे प्रसिद्धः ॥

शिषोऽसर्वोपयोगे यौ शेषयेच्छेषतीत्युभे ॥ १७८ ॥
लुङ्यभावादङोऽशेषीच्छिनष्टीति विशेषणे।

'शिष असर्वोपयोगे'। 'शिष हिंसार्थ' इत्यस्यापि शेषतीति द्रष्टव्यम्। लुङीति। लृदित्त्वाभावादस्य लुङ्यङोऽभावः। 'शिषू विशेषण' इत्यस्य तु रुधादेर्लृदित्त्वादशिषदित्यङ् भवति। विपूर्वश्चायमत्रार्थे प्रयुज्यते। अत्र चाशेषीदित्ययुक्तम्, 'शिषिं पिषिम्' इत्यनिट्कारिकाप्रामाण्याच्छिषिमात्रस्यानिट्त्वेन 'शल इगुपधादनिटः क्सः' (३-१-४५) इति क्से सति आशिक्षदित्येव युक्तत्वात् ॥

शपि रोषति हिंसायां रोषे रुष्यति रोषयेत् ॥ १७९ ॥

रुष हिंसार्थः। 'रुष रोषे'। दिवादिश्चुरादिश्च ॥

चुम्बने परिमाणे च निक्षेन्निंक्षयते क्रमात्।

'णिक्ष चुम्बने'। 'निक्षति चुम्बति निंस्ते तन्व्या§ मुखपङ्कजं प्रेयान्' इति च सुन्दरपाण्डयः। रोषे इति तु 'वा निंसनिक्षनिन्दाम्' (८-४-३३) इत्यत्र न्यासः—'णिक्ष परिमाणे'। चितादिः। निष्केत्येव तु दृश्यते। मैत्रेयरक्षितेन च निष्कमित्युदाहृतम् ॥

जोषयेज्जोषतीत्येते युजादेः परितर्कणे ॥ १८० ॥
प्रीतिसेवनयोरिष्टं तुदादेर्जुषतेपदम्।

'जुष परितर्कणे'। 'परितर्पणे परितृप्तिक्रियायाम्' इति क्षीरस्वामी। 'जुषी प्रीतिसेवनयोः' ॥

---

§ 'तस्या' इति पाठस्याप्यनुकूलोऽक्षरविन्यासः.

धृषेः प्रसहने यौ स्तां धर्षयेद् धर्षतीत्युभे ॥ १८१ ॥
प्रागल्भ्यार्थे तु धृष्णोति परस्मैपदिनावुभौ ॥ १८१½ ॥

'धृष प्रसहने'। 'धृषा प्रसहन' इति शाकटायनः। 'ञिधृषा प्रागल्भ्ये'। स्वादिः ॥

आलोचनार्थाण्णिचि लक्षयेत
स्याल्लक्षयेल्लक्षयतेऽङ्कनार्थात्।

'शम लक्ष आलोचने'। चितादिः। 'लक्ष दर्शनाङ्कनयोः'। अत्र मैत्रेयरक्षितः—'स्वरितेत्त्वमस्य केचित् प्रतिपद्यन्ते। एतच्च ज्ञापकं चुरादिण्यन्ताद् 'णिचश्च' (१-३-७४) इत्यात्मनेपदं न भवतीत्यत्र' इति। हरदत्तस्तु 'णिचश्च' इत्यत्राह—

'एष विधिर्न चुरादिण्यन्तात् स्यादिति कश्चन निश्चुनुते स्म।
आप्तवचोऽत्र न किञ्चन दृष्टं लक्षयतेः स्वरितेत्त्वमनार्षम्' ॥

इति ॥

स्यात् तक्षतीति त्वचनेऽथ वा श्नौ
तक्ष्णोति तक्षेच्च तनूक्रियायाम् ॥ १८२½ ॥

'तक्ष त्वचने'। अत्र क्षीरस्वामी—'त्वचनं त्वचो ग्रहणम्। संवरणमिति दुर्ग' इति। यथादुर्गमेव च धनपालशाकटायनौ। अयं चार्थः 'त्वच संवरण' इति धातुपाठसिद्ध इत्यन्तरङ्गः। अन्यस्तु 'सत्यापपाशे' (३-१-२५) त्यत्र त्वचं गृह्णातीति णिचि कृद्वृत्तिसिद्ध इति बहिरङ्गः। णिच्कल्पनं चात्रातिरिच्यते। त्वक्षेत्येव तु बह्वनुमतः पाठः। तथा च 'तनूकरणे तक्षः' (३-१-७६) इत्यत्र वृत्तिः। 'धातूनामनेकार्थत्वाद् विशेषणोपादानमि'ति। यदि हि त्वचनेऽपि तक्षतिः स्यात् ततस्तद्ज्ञानायैव

१. त्वग्ग्रहणरूपस्तु. २. त्वक्ष त्वचन इत्येव, नतु तक्ष त्वचन इतीत्यर्थः.

विशेषणोपादानं स्यात्। एवं च 'स्यात्त्वक्षती'ति पठित्वा तदेव चकारेणाप्यनुकृष्य तनूक्रियायाञ्च त्वक्षतीति भवतीति कामं व्याख्यायताम्। इटा [1]भिदेत्यप्यूह्यताम्। तक्ष्णोति तक्षेदिति च लषिवद्वा [2]सादृश्याद्वा नीयताम्। 'तक्षू त्वक्षू तनूकरणे'। 'अक्षोऽन्यतरस्याम्'। 'तनूकरणे तक्षः' (६-१-७६) इति वा श्रुः॥

आशंसते स्यादिच्छायां शंसतीति स्तुतौ भवेत्॥ १८३॥

हिंसायां शसति

'आङः शसि इच्छायाम्'। अनुदात्तेत्। क्षीरस्वामी तु 'दौर्गा आङः शन्स्वित्याहुः' इत्याह; आशंस्यते आशस्यत इति फलभेदं च। 'शन्सु स्तुतौ'। शंस्विति [3]रूढे पाठेऽपि नोपध एवायम्। तत्फलं च शस्यत इत्यादौ नलोपः। 'शसु हिंसायाम्॥

इच्छायामाशास्ते शास्ति शासने।

'आङः शासु इच्छायाम्'। 'शासु अनुशिष्टौ'। अदादी॥

शब्दार्थे नासते नासेः कौटिल्ये नसते नसेः॥ १८४॥

'णासृ रासृ शब्दे'। 'णस कौटिल्ये'॥

असतेऽसति गत्यादौ भुव्यस्ति क्षेपणेऽस्यति।

'अस गतिदीप्त्यादानेषु'। तथा च काव्यालङ्कारे वामनः—"'लावण्य उत्पाद्य इवास यत्नः' इत्यत्र आसेत्यसतेः" इति। 'अष इत्येके' इति मैत्रेयरक्षितः। आपिति च शाकटायनः। 'अस भुवि'। अदादिः। भवनं भूः। 'असु क्षेपणे'। दिवादिः॥

---

१. त्वक्षेस्त्वचने नित्यमिट्, तनूकरणे तु ऊदित्त्वाद् वैकल्पिक इति भेदः. २. लषिवत् फलतो द्विष्पाठानाश्रयणेऽपि तक्षेस्त्वक्षधातुना भूयोवयवैक्यात् सहोक्तिः समर्थ्यतामिति भावः. ३. प्रसिद्धे.

अस्रांसिष्ट स्रंसते चाद्युतादे-
स्ते च द्वे स्तामस्रसच्च द्युतादेः ।
ध्वंसत्यादेः साहचर्याद् द्युतादे-
र्नीगित्याहुर्दत्वमन्यस्य चापि ॥ १८५½ ॥

'स्रन्सु प्रमादे' । क्षीरस्वामी तु स्रन्भु इति भकारान्तं प्रकरणानुरोधेन पठित्वा 'स्रन्स्विल्येक' इत्याह । मैत्रेयरक्षितस्तु—'संयोगान्तसाधर्म्येण सकारान्तोऽप्यत्र निर्दिश्यते' इति । 'स्रंसु ध्वंसु भ्रंसु अवस्रंसने' । अस्रसत् । 'द्युभ्यो लुङि' (१-३-९१) इति विभषा परस्मैपदम् । 'पुषादिद्युतादी'ति (३-१-५५) अङ् । 'अनिदितामि'ति (६-४-२४) नलोपः । (यश्च नीवभ्युस्रनुसुध्वंसुभ्रंस्वनडुहां द इति दत्वं तु ध्वंसुसाहचर्यानभ्युपगमनादाद्युदात्तश्चेत्याह ?) अत्र मैत्रेयरक्षितः—'द्युतादावप्ययं पठ्यते । तस्यैव ध्वंसुभ्रंसुसाहचर्यान्नीगित्याहुः । दत्वे पुनरसाहचर्यमिच्छन्ति 'उखास्रद्' इति ।

दंसयेन्मोक्षणे दस्येत् क्षये दंसयते णिचि ॥१८६ ॥
दंशदर्शनयोर्दासेर्दाने दासति दासते ।

'जसि मोक्षणे' । 'दसि च' । रक्षण इत्येव तु दृश्यते । तत्रापि दसि चेत्येतत् क्वचिदेव कोशे । तथा च जसु (कुंडुपल-

---

१. इदं कुण्डलेरेखान्तर्गतं शब्दजालं 'यश्च नीक् नीग्वञ्चुस्रंसुध्वंसुभ्रंसु (७-४-८४) इति, स ध्वंसुभ्रंसुसाहचर्याद् द्युतादेर्भवति; वसुस्रंसुध्वंस्वनडुहां दः (८-२-७२) इति दत्वं तु ध्वंसुसाहचर्यानभ्युपगमाद् अद्युतादेश्चेत्याहुः' इत्यर्थकं किमप्युत्तरार्धव्याख्यानपरं वाक्यं स्यादिति प्रतिभाति. २. 'कुडुम्ब रक्षण' इति स्यात्.

क्षण!) इत्येव शाकटायनः ।

[2]वस्यति स्तम्भने वस्ते छादने वसयेद् वसेत् ॥ १८७ ॥
निवासे वासयेत् स्नेहे वासयत्युपसेवने ।
[[3]वसेन्निवासे वसयेच्च वस्ते
त्वाच्छादने स्तम्भन एव वस्येत् ।
निवासयत्याच्छदने निवासे-
रासेवने वासयतीति वासेः ॥]
[4]मोक्षणे जस्यतीति स्याण्णावत्रार्थे तु जंसयेत् ॥ १८८ ॥
हिंसाताडनयोर्धात्वोरुदितोर्जासयेदिति ।
[5]तंस्यत्युपक्षयार्थे णावलङ्कारे तु तंसयेत् ॥ १८९ ॥
[6]ध्रस्नाति ध्रासयत्युञ्छे पदे श्नि णिचि च ध्रसेः ।
[7]यमुकारः । उद्भ्रां चकारोध्र(सा?)स्नादित्युदाहृतेः ।

---

१. इत ऊर्ध्वं 'यमुकारः' इत्यतः प्राक् पत्रमेकं नोपलभ्यते पुरुषकारे । अतस्तावतो ग्रन्थस्य मूलं यथाप्रमाणं विन्यियते । 'तसु उपक्षये' । 'दसु च' । दिवादिः । 'दसि दर्शनदंशनयोः' । चितादिः । 'दासृ दाने' । स्वरितेत्. २. 'वसु स्तम्भे' । दिवादिः । 'अपरे वकारादिमाहुः' इति माधवः । 'वस आच्छादने' । अदादिः । 'वस निवासे' । कथादिः । तत्त्वं च 'बहुलमेतन्निदर्शनम्' इत्यस्यादन्तधातुनिदर्शनार्थत्वादनुमेयमिति भट्टोजिदीक्षिताः । 'वस निवासे' । भूवादिः । 'वस स्नेहच्छेदापहरणेषु' । चुरादिः । 'वास उपसेवायाम्' कथादिः. ३. ख पुस्तकेऽयं श्लोकोऽधिको दृश्यते, किन्तु एतद् 'वस्यति स्तम्भने' इत्यादि-पूर्वश्लोकस्य पाठान्तरं न भवितुमर्हति, सेवार्थस्य वसधातोरत्रावचनाद् विरूपस्य निवासधातोर्वचनाच्च. ४. 'जसु मोक्षणे' । दिवादिः । 'जसि मोक्षणे' । 'जसु हिंसायाम्' । 'जसु ताडने' । चुरादिः. ५. 'तसु उपक्षये' । दिवादिः । 'तसि भूष अलङ्करणे' । चुरादिः. ६. 'ध्रस्व उञ्छे' । क्र्यादिः चुरादिश्च. ७. यकारात् प्राक् 'धात्ववयवोऽ' इति स्यात्.

अपरथा च ध्रसु इत्येव ब्रूयादित्यभिप्रायः । यथा तु भूधातोः स एवाह —

'दरिद्राजागृदीधीङामेकाचां च चिरिंजिरः ।
अदन्तोणादिवीङां स्मर्यो नेर् तथौ डः ॥'

इति, तथा अत्रेत्त्वेन भाव्यम् । ध्रसू इति च शाकटायनः ॥

लासयेच्छिल्पयोगेऽर्थे श्लेषणे क्रीडने लसेत् ॥ १९० ॥

'लस शिल्पयोगे' । 'शिल्पोपयोग' इति क्षीरस्वामी । 'केचिन्मूर्धन्यान्तमेनं धातुं पठन्ती'ति च । 'लस श्लेषणक्रीडनयोः' ॥

भाषणे त्रंसयेत् त्रंसेर्धारणे* त्रासयेण्णिचि ।
त्रसति त्रस्यतीत्येवमुद्वेगार्थे तु वा श्यनि ॥ १९१ ॥

त्रसि भाषार्थः । 'त्रस धारणे' । अत्र मैत्रेयरक्षितः — 'त्रासयति मृगान् । वारणे धारणशब्दः' इति । वारणे इत्येव च शाकटायनः । 'त्रसी उद्वेगे' । 'वा भ्राशेति (३-१-७०) श्यन् ॥

णौ पिंसयति भाषार्थे गत्यां तु शपि पेसति ।

पिसि भाषार्थः । 'पिस गतौ' इत्यपि चुरादौ पठ्यते । 'तुजि पिजि पिस हिंसाबलादाननिकेतनेषु' इति तु धनपालः । शाकटायनस्याद्ययोरुदित्पाठमात्रं विशेषः । सर्वथा तस्य पेसयतीति द्रष्टव्यम् । 'पिसृ पेसृ गतौ' । निट्टनेट्टवद् द्वावपीह कामं ग्राह्यौ ॥

गतिशासनयोः कंस्ते कसतीति गतौ शपि ॥ १९२ ॥

'कसि गतिशासनयोः । कसेति वैजनः । उक्तं च भूवा-

१. 'प्रतिष्कशश्च कसेः' इति सूत्रे काशिकायाम् .

* 'द्वारणे' इति खपुस्तके पाठः.

दिसूत्रे सुधाकरेण — "कसि गतिशासनयोरिति पारायणिकैरुदाहारि कंस्ते कंस इति । 'प्रतिष्कशश्च कशेः' (६-१-१५२) इति च कश गतीत्येवायमाम्नायि" इति । 'कसेत्येके' इति च क्षीरस्वामी । 'गृ विज्ञाने' इत्यत्र च स एवाह—'कसि गतिशासनयोरितीकारान्तोऽकारान्तः शकारान्तश्च पठ्यते' इति । तदा कस्ते कष्टे इत्यपि द्रष्टव्यम् । 'कस गतौ' ॥

शब्दे शपि रसेत् स्नेहास्वादयो रसयेद्रसेः ।

'रस शब्दे' । रासेस्तु तङि रासते । 'रस आस्वादनस्नेहनयोः' । कथादिः ॥

प्रपूरणे दोग्धि दुग्धे दोहतीत्यर्दने दुहेः ॥ १९३ ॥

'दुह प्रपूरणे' । अदादिः । तच्च दोहनाख्यं रेचनम् । प्रतिष्ठत इतिवद् धात्वर्थवैपरीत्ये प्रः । 'तुहिर् दुहिर् अर्दने' । 'तुहिर् उहिर् इत्येके' इति मैत्रेयरक्षितः । क्षीरस्वामी त्वेवमेव पठित्वाह—'तुहिर् दुहिर् इति दौर्गाः' इति ॥

ण्यन्तस्य ग्रहणे गृहेर्गृह्यते तत्रानदन्ताद् गृहे-
र्भ्वादेः शपि गर्हते श्नि तु पदे गृह्णात्यगृह्णीत च ।
गर्हेर्वा णिचि निन्दनार्थविषये गर्हेत् तथा गर्हयेद्
भ्वादेः शपि कुत्सनार्थविषये गर्हेर्भवेद्गर्हते ॥ १९४ ॥

'गृह ग्रहणे' । पदादिः । 'गृह्ण ग्रहणे' । अनुदात्तेत् । अनदन्ताद् गृहेरित्यनेनैव पूर्वस्यादन्तत्वमात्रं विशेषो गृ(ही?)हित्वं (च?) चाविशिष्टमिति दर्शयता मन्दानां ग्रहपाठशङ्का(विति?)पि निरवकाशतां नीता । 'ग्रह उपादाने' । 'गर्ह निन्दने' ।

१. 'णामृ रामृ शब्दे' इति पठितस्य.

'गर्ह गल्ह कुत्सायाम्' । अनुदात्तेतौ । ये त्वेतत् पद्यं प्रबन्धान्त एव पठन्ति, तेषां सत्यपि वृत्तभेदकृते परभागे गर्हयायमुपसंहारो भवन् पुरोभागिनां श्रवणोत्सवमेव पुष्णीयात्, न चेदयमन्यो व्यत्ययेन पाठोऽद्रक्ष्यत ॥

रहयेद्रहति त्यागे गतौ रंहेस्तु रंहति ।

'रह त्यागे' । कथादिर्भ्वादिश्च[1] । तत्र चान्त्याद्धेतुमाण्णिचि राहयति । 'रहि गतौ' ॥

श्नेतृणेढीति हिंसायां तृहतीत्यूदितस्तृहेः ॥ १९५ ॥

तृह हिंसायाम् । तृहः श्नमि[2] कृते ढत्वधत्वष्टुत्वढलोपाः । तृह्ल् ष्टृह् तृन्ह् हिंसार्थाः । क्षीरस्वामी तु—'तृह् तृन्ह् ष्टृह् ष्टृन्ह् हिंसार्थाः । तृह्प्रभृतयश्चत्वारो धातवो हिंसार्थाः' इति । तत्र च तृंहति स्तृहति स्तृंहतीत्यपि कामं द्रष्टव्यम् । तृम्फादित्वान्नुम् ॥

महयेन्महतीत्येते पूजायां णौ शपि क्रमात् ।

'मह पूजायाम्' । आद्यः कथादिः । मंहत इत्यपि 'महि वृद्धौ' इत्यस्यानुदात्तेतो द्रष्टव्यम् । क्षीरस्वामी तु भाषार्थ इत्याह । तस्य तु मंहयतीति ॥

चहयेच्चहतीत्येते चहेः स्तां परिकल्कने ॥ १९६ ॥

'चह परिकल्कने' । चुरादिः कथादिश्चाद्यः । तत्र चाद्ये चपेति मैत्रेयरक्षितः । चहिश्चापिर्वात्रार्थे णिचमुत्पादयति मिच्च भवतीत्यर्थः । अत्र च मित्त्वफलम् अचाहि अचहि चाहं चाहं

१. अन्योऽपि भाषार्थ इदिच्चुरादौ दृश्यते सिद्धान्तकौमुद्याम्. २. इमि चेति शेषः.

चहं चहामिति चिण्णमुलोर्दीर्घविकल्पः । अदन्तत्वफलमग्लोपित्वेन 'सन्वल्लघुनि चङ्परेऽनग्लोप' (७-४-९३) इति सन्वत्त्वस्य 'दीर्घो लघोः' (७-४-९४) इति दीर्घत्वस्य चाभावादचचहादिति ॥

मर्षणे सहते यौ तु साहयेत् सहति द्वयम् ।
श्यनि सह्यति श(क्या?)क्यर्थे

'षह मर्षणे' । 'षह षुह श(क्या?)क्यर्थे' । क्षीरस्वामी तु षुहेत्येव पठित्वाह — 'षह षुह शक्ताविति दुर्गः' इति । षुहेत्येव च धनपालशाकटायनौ ॥

पूजनेऽर्हति चार्हयेत् ॥ १९७ ॥

अर्ह पूजायाम्' ॥

स्नेहने स्नेहयेत् प्रीतौ स्निह्येद्

'ष्णिह स्नेहने' । स्निहेति क्षीरस्वामिधनपालशाकटायनाः । तदापि दन्त्यपरसादित्वात् ष्णिहेत्येव युक्तम् । 'ष्णिह प्रीतौ' ॥

बृंहति बर्हति ।
वृद्धौ भाषार्थविषये बृंहयेद् बर्हयेदिति १९८ ॥

'दृह दृहि बृह बृहि वृद्धौ' । 'बृहि शब्दे च' इति । (द्वयम् । यदाह क्षीरस्वामी इति?) बृहिर् इति दौर्गाः । अबृहत्

---

१. एष दीर्घपाठो मूलपुस्तकेषु पुरुषकारे चैकरूपो दृश्यते । 'क्य' इति ह्रस्व एव तु पठितुं युक्तो दुर्गानुसारात् शक्तेः शक्यर्थत्वात्. २. अर्थश्चास्य चक्यर्थ एवेति पुहधातुस्थमाधवग्रन्थात् प्रतीयते, यत् स आह — 'चक्यर्थस्तृप्तिरिति क्षीरस्वामिधनपालशाकटायनाः' इति. ३. 'द्वयमाह क्षीरस्वामी' इति पाठः सुकल्पो भाति.

अबर्हीदिति। यथादौर्गमेव चान्द्राः। अनुदात्तेत्सु च स एवाह—'बर्ह बल्ह प्राधान्ये। (मुदिञ्?) घञ् बर्हं बल्हम्। चुरादौ तु भाषार्थौ। बर्हयति बल्हयति' इति। 'वर्ह वल्ह परिभाषणहिंसाछादनेषु' इति च। मैत्रेयरक्षितः पुनः 'वर्ह वल्ह प्राधान्ये। बर्ह बल्ह परिभाषणहिंसाछादनेषु' इत्यर्थव्यत्ययेन पपाठ। नैव च तृतीयं[1] धनपालस्य 'वर्ह वल्ह प्राधान्ये। वर्ह वल्ह परिभाषणहिंसाछादनेषु। छादयत्यनेनेति वर्हं घञ्'। इति। शाकटायनोऽप्यत्रैव पाठेऽनुकूलः। [भाषाविशेषार्थत्वात्?] तत्र[2] च[3] प्रबर्हार्थानुकूल्यादाद्यः पाठो युक्तः। 'प्रवल्हिका प्रहेळिका' इति चात्रैवानुकूलः[4], भाषाविशेषार्थत्वात् प्रवल्हेः। तथा च बह्वृचब्राह्मणं—'प्रवल्हिकाः शंसति। प्रवल्हिकाभिर्वै देवा असुरान् प्रवल्ह्याथैनानत्यायन्' इति। व्याकृतं चैतत् गोविन्दस्वामिना—"प्रवल्हिकाः प्रहेळिकाः 'विततौ किरणौ द्वौ' इति षडनुष्टुभः। प्रवल्ह्य अनृतं भाषित्वा" इति। सर्वथापि बर्हत इत्याद्यपि काममूह्यम्। सर्वत्रैवं तत्तद्ग्रन्थगतास्तत्तत्पाठभेदादयो (यथा?) द्रष्टव्याः, युक्त्यादिभ्यश्च विवेक्तव्याः। बृहि बर्ह भाषार्थौ। 'ब्रूस बर्ह हिंसायाम्' इत्यस्यापि बर्हयेत्। इतिः पुनः प्रकारार्थः[5] प्रकरणसमाप्त्यर्थश्च[6]। 'पठितस्य पुनः पाठे' इति यदुपक्रान्तं, तदित्थमुपसंहृतमित्यर्थः॥

---

१. पवर्गतृतीयं बवर्णमित्यर्थः। एवं तु वर्ह वल्ह प्राधान्यपरिभाषणहिंसाछादनेष्विति शक्यं पठितुं धनपालस्य. २. क्षीरस्वामिमैत्रेयधनपालपाठेषु त्रिषु मध्ये ३. प्राधान्यलक्षणोऽर्थः प्रबर्हशब्दस्यैव प्रसिद्धो, न तु दन्तोप्त्यवतः प्रवर्हशब्दस्येत्यभिप्रायः. ४. अमर इति शेषः, यादव इति वा. ५. 'यथायथम्' इति पठनीयम्. ६. इदं पदमादर्शे नास्ति तथापि 'समाप्त्यर्थश्चे'ति चकारस्य, 'तदित्थमुपसंहृतम्' इति इत्थंपदस्य चोपपत्तये प्रक्षेप्तव्यमेवेति भाति.

कथं पुनरत्र प्रकरणे सर्वत्रापि पुनः पठिता धातवो व्युत्पाद्यन्ते । त(दे?)थैव पुनः पाठो भवेत्, यथा भूप्रभृतयः । येषां पुनर्नुमादिना भिन्नरूपता, कथमिव तेषां पुनः पाठो भवेत् । तत्र नुमा तावत् बृंहति बर्हतीत्यादिषु अनन्तरोदितेष्वेवांसौ दृश्यते । अत्र हि [2]अन्यश्च बृहिरिति सकृदेव तयोः पाठः प्रस्फुटः । अथापि बृंहतिबृंह्योरत्र पुनः पाठो भविष्यति । तथापि कथं बृहिबृंह्योः 'इदितस्त्वङ्क्ते तत्र' (४१श्लो) इत्यादिषु च [3]चरिष्यासि । न च तेष्वपि पाठावस्थायां नुमभावाद्भवेदेव पुनः पाठ इति साम्प्रतं, नुंविधावु[4]पदेशिवद्वचनेन धातुग्रहणबलेनैव वा नुमोऽपि पठितकल्पत्वात् । अथापि धातुपाठसिद्धं रूपमनूद्यैतत्फलवचनप्रतिज्ञानाद् भवत्येवात्रापि नुंविधुरेण पठितेन रूपेण पुनः पाठः । तथापि बृहिबर्ह्योः, 'अङ्क लक्षण' (४१श्लो) इत्यादिषु च का वार्त्ता । एवमन्यत्राप्येवंविधे 'दो द्यति (४ श्लो) इत्यादौ, 'क्षिणोत्यावगुणे क्षिणोः' (१३ श्लो) इत्यादौ च भिन्नरूपधातुपाठफलोपदर्शने पर्यनुयोगं प्राप्तं प्रत्याह—

नुमादिनान्यभावेऽपि सादृश्यात् केऽप्यवक्षत ।

यत् क्वचिन्नुमादिनान्यत्वेऽपि केऽपि धातव उक्ताः केषांचित् पुनःपाठफलमुक्तमिति यावत्, तच्च यथादर्शनं मिथस्तेषां सादृश्याद्युक्तमेव । ततश्च 'पठितस्ये'त्यस्याः प्रतिज्ञायाः क्वचिद-

---

१. भिन्नरूपता. २. इतः प्राक् 'अन्यो बृंहिः' इत्यपेक्षितमिति भाति. ३. गतिं वक्ष्यसीत्यर्थः. ४. एतच्च कुण्डा हुण्डेत्यादौ 'गुरोश्च हलः' (३-३-१०३) इत्यप्रत्ययार्थमावश्यकम्.

प्यन्यथात्वमशङ्कनीयमेवेत्यर्थः। अत्र च पूर्वोक्तरीत्या[1] नुमान्यभावस्यासम्भवाद् आदिशब्दोपात्त एव तात्पर्यं द्रष्टव्यम्। नुंग्रहणं वा नकारोपलक्षणम्। नुमिति नकारस्य पूर्वाचार्यसंज्ञेति च 'न धातुलोप आर्धधातुके' (१-१-४) इत्यत्र कैयटः॥

मया चात्र 'चौ मित्त्वेऽपीदमेव' (८ श्लो) 'यौ द्रवीकरणेऽनात्वे' (१७ श्लो) इत्यादौ चुशब्दयुशब्दौ व्यवहृतौ श(ब्दाकाशे?)ब्दैकदेशलक्षणान्यायेन चुरादियुजादिपरौ वेदितव्यौ 'बेष्कयासे' 'नब्विषयस्यानिसन्तस्य' इत्यादौ सशब्दनप्छब्दाविव समासनपुंसकपरावित्याह—

चुरादिश्चुर्युजादिर्युः स यस्माण्णिञ्भाषितः॥ १९९॥

यस्माद्गणाद् 'आधृषाद्वा' इति णिञ्विकल्पितः, स युजादिर्युः। युजादेर्णिञ्विकल्पाव्यभिचाराद्युजादिरित्येव वाच्ये स इत्यादिवचनं युशब्दयुजादिशब्दाभ्यामिह व्यवहारस्य लीनयेल्लयेदित्याद्युदाहृतणिञ्विकल्पनिर्वाहार्थतोपदर्शनेन चुरादिभूवादिधातुद्वयशङ्काप्रसङ्गव्युदासार्थम्। 'इत्यत्र परिभाषितम्' इत्येव च कैश्चित[2] पठ्यते। श्लोकश्चायं न्यायसिद्धार्थतयानावश्यकत्वाशयेन वृद्धिसंज्ञादिवदादावेव न निवेशयाम्बभूवे॥

ननु च 'कु शब्दे तारे' इत्येवंजातीयकाः केचिदनुक्ता अपि सरूपधातवः सन्त्येव। तत् कथं यथोक्ता प्रतिज्ञा निरङ्कुशं निरवाहीत्यत आह—

सरूपा धातवः केचि-
दनुक्ता अपि सन्ति चेत्।

---

१. धातुपाठसिद्धं रूपमनूद्यैतत्फलवचनं देवेन प्रतिज्ञातामिति विवरणरीत्या.
२. इदमुत्सादि (४-१-८१) गणे द्रष्टव्यम्. ३. चतुर्थपाद इति शेषः.

सन्तूक्तास्तेऽपि चात्रोक्ता
न दुष्यन्त्यन्यसम्भवे ॥ २०० ॥

अत्र च अत्रेत्येतत् पूर्वार्धेऽप्यर्थादुत्तरार्धादन्वेति । अत्रोक्ता अनुक्ता अपि च सन्तु नाम । तथाप्यधिकसम्भवमात्रेणोक्तास्तावन्नैव दुष्यन्तीति । 'पठितस्य' (२ श्लो) इति प्रतिज्ञाप्येवं यथोक्तविषये भविष्यतीति न किञ्चन दुष्यतीति भावः । तत्र च सन्तूक्ता न दुष्यन्तीत्येतावत्येव वक्तव्ये **'उक्तास्तेऽपि च'** इत्यधिकवचनं त्वयापि 'अनुक्ता अपि' इति ब्रुवतोक्ता अप्यभ्युपगता एवेत्येवम्परम् । न्यायश्चायं प्रपञ्चभयादिनास्मदनुक्तेष्वपि तत्तदनुबन्धकार्यादिषु वक्तव्यशेषेषु द्रष्टव्यम् ॥

इत्यनेकविकरणसरूपधातुव्याख्यानं देवनाम्ना
विरचितं दैवं समाप्तम् ।

ऐकरूप्येण वा सादृश्येन वा सरूपाणां यथोक्तानां धातूनां यथोक्तेनैव विकरणादिकृतेन रूपभेदेनार्थभेदेनोभयेनापि वा पुनःपाठफलोक्त्या व्याख्यानमित्यर्थः । करणे ल्युट् । अत्र च वक्ष्यते (२ श्लो) इत्युपक्रम्यापि व्याख्यानमित्युपसंहारः प्रकरणस्य श्लाघ्यतातिशयोपदर्शनपरः । दैवमिति (च?) 'तस्येदम्' (४-३-१२०) इति वा, 'कृते ग्रन्थे' (४-३-११६) इति वा देवादणि दैवमिति रूपम् । कृतवाद्येव च विरचितशब्देना (प्यु?) णुपदर्शितः । एवं तु देवकीयमिति प्राप्नुयात् (गर्तोत्तरपदा गच्छ?)

'[2]अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥'

---

१. अस्य स्थाने 'गर्तोत्तरपदाच्छः (४-२-१३७) गहादिभ्यश्च(४-२-१३८) इति कुक्छयोः प्रसङ्गात्' इति पठनीयं भाति. २. एष परिहारग्रन्थः.

इति न्यायात् प्रसिद्ध एव देवादौ तत्तत्कार्यप्रवृत्तेर्नाग्नि तयोरप्रवृत्तम्[1] । अत एव च देवनाग्नेत्युक्तम् । तथा च 'बाह्वादिभ्यश्च' (४-१-९६) इत्यत्र भाष्यं—बाहोरपत्यं बाहविः । यो हि बाहुर्नाम बाहवस्तस्य भवति' इति । यदि पुनर्भक्त्यादिवशात् प्रसिद्धदेवत्वारोपेणैवात्र देवशब्दः प्रवर्तितो भवेत्, तदापि तस्य विकार इत्यस्यां विवक्षायां 'देवस्य यज्ञञौ' इति वार्तिकेनाञि कृते रूपमेतद् भविष्यति । तथा च—'दैवो विस्तरशः प्रोक्तः' इति भगवान् कृष्णः । तथैव च 'गहादिभ्यश्च' (४-२-१३८) इत्यत्रामुमेव प्रयोगं सुधाकरः समर्थयाम्बभूव । 'अपवादविषये क्वचिदुत्सर्गस्यापि समावेश' इति ब्रुवतः परमेश्वरभोजदेवस्य मतेनाणैवाप्यविकलमभिमतं सम्पद्यते । भाष्यकारवचनप्रामाण्याद्वा सिद्धम् । तथा हि 'पृषोदरादीनि यथोपदिष्टम्' (६-३-१०९) इत्यत्र भगवान् पतञ्जलिर्बभाषे—'नूनमस्य दैवोऽनुग्रह'[2] इति[3] ॥

उक्तानुक्तदुरुक्तानि स्थाने स्थाने विविञ्चता ।
कृष्णलीलाशुकेनैवं कीर्तितं (नै?)दैववार्तिकम् ॥
कृष्णलीलाशुकस्येयं कृतिः कृतिमनोहरा ।
पुष्णती कृष्णसम्प्रीतिं भुवनान्यभिपुष्यतु ॥

इति श्रीकृष्णलीलाशुकमुनिविरचितो
दैवसहायः पुरुषकारः
समाप्तः ।

---

१. तयोः कुक्छयोः अप्रवृत्तं प्रवृत्त्यभावः । क्तो भावे. २. अक्लिष्टमित्यर्थः । अञ्पक्षे हि विकारत्वं कृतत्वे नेतव्यम्. ३. दैव इति देवसम्बन्धीत्यर्थः.

APPENDIX.

श्रीः ।

दैवम् ।

सच्चित्सुखैकरसवस्तुनि यत्र विश्वम्
मिथ्यैव रूप्यमिव राजति शुक्तिभित्ते ।
तस्मिन् प्रतीचि परमात्मनि चित्तवृत्ति-
र्ब्रह्माहमस्मि परमित्यनिशं ममास्तु ॥ १ ॥

पठितस्य पुनःपाठे फलं वृत्तेन वक्ष्यते ।
न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम् ॥ २ ॥

सत्तायां भवति प्राप्तौ णिचि भावयते तङि ।
भवते शपि तत्रैव भावयत्यवकल्कने ॥ ३ ॥

दाञो दत्ते ददातीति दाणो यच्छति दो द्यति ।
दाति दायति दाप्दैपोर्दयते रक्षणे ङितः ॥ ४ ॥

गाते गाङो गतावर्थे कै गै शब्देऽस्य गायति ।
पाने पिबति रक्षायां पाति पायति शोषणे ॥ ५ ॥

धेटो धयति पानार्थे धाञो धत्ते दधात्यपि ।
द्रै स्वप्ने द्रायति द्राति कुत्सिते गमने लुकि ॥ ६ ॥

शब्दसङ्घातयोर्धात्वोस्त्यायत्येकस्य सो न षः ।
सै क्षये सायतीतीष्टमन्तकर्माणि तु स्यति ॥ ७ ॥

जानातीति ज्ञि सिध्येज्ज्ञपयति तु पुनर्मारणादौ घटादे-
श्चौ मित्वेऽपीदमेव ज्ञप मिदिति पदं ज्ञापने मारणादौ ।
तेनार्थाज्ज्ञापनेऽर्थे ज्ञपयतिपदवद् ज्ञापयेदित्यपि स्या-
दुक्तस्योक्तिर्णिचश्चेत्युदितविहतये ज्ञापयेद् ज्ञो नियोगे ॥ ८ ॥

मिमीते मायते माने माति तत्रैव शब्लुकि ।
मयते प्रणिधानेऽर्थे श्राति श्रायति लुक्छपोः ॥ ९ ॥

गतिगन्धनयोर्वाति वायतीति तु शोषणे ।
वयते वयतीत्येवं तन्तुसन्तान इष्यते ॥ १० ॥

गतौ त्यागे यथासङ्ख्यं जिहीते च जहाति च ।
रै शब्दे रायतीर्तार्थं रा दाने राति शब्लुकि ॥ ११ ॥

स्नातीति शौचे तु स्नायेदिति चेच्छन्ति केचन ।
क्षये क्षयति हिंसायां क्षिणातीति पितो भवेत् ॥ १२ ॥

निवासगत्योः क्षियति क्षिणोत्यावगुणे क्षिणोः ।
(एके क्षेरेव भाषायां क्षिणोतीति पदं विदुः ।)
जयेज्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः ॥ १३ ॥

उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः ।
अयत्येतीयते गत्यामधीतेऽध्येति चेङिकोः ॥ १४ ॥

सिनोति सिनुते बन्धे सिनीते च सिनाति च ।
ईषद्धासे स्मयेतेति स्माययेतेत्यनादरे ॥ १५ ॥

श्रीणाति पाके श्रीणीते सेवायां श्रयते श्रयेत् ।
मीञो मीनाति मीनीते हिंसायां मीयते ङितः ॥ १६ ॥

मिनोति मिनुते स्वादेर्गतौ मयति मायेत् ।
यौ द्रवीकरणेऽनात्वे लीनयेल्लायेल्लयेत् ॥ १७ ॥

लापयेल्लालयेदात्वे श्लेषणे लीयतेऽलिनात् ।
श्रवणे रीयते रीङो रिणाति गतिरेषयोः ॥ १८ ॥

व्रीणाति वरणे तत्र व्रीङो व्रीयेत तु श्यनि ।
प्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीते तर्पणे त्रितः ॥ १९ ॥

अणौ यौ त्रित्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत् ।
विहायसां गतौ डीङो डयने डीयते पदे ॥ २० ॥

षुञः सुनोति सुनुते प्रसवैश्वर्ययोरसौत् ।
गतौ तयोश्च सवति द्विरुक्त्या तस्य सो न षः ॥ २१ ॥

स्थैर्ये ध्रवति गत्यां तु स्थैर्ये च ध्रुवतीति शे ।
दुनोति दूयते तापे दवतीति गतौ पदम् ॥ २२ ॥

अव्यक्तशब्दे कवते कुवते त्वार्तशब्दने ।
कौतीति शब्दमात्रे स्याद् रवते रौति शब्दने ॥ २३ ॥

यावयेत जुगुप्सायां मिश्रणे यौति बन्धने ।
युनाति च युनीते च स्तुत्यां नुवति नौति वा ॥ २४ ॥

प्रेरणे सुवति प्राणिप्रसवे सूयते भवेत् ।
प्राणिगर्भाविमोकेऽर्थे सूते शे श्यनि शव्लुकि ॥ २५ ॥

धूनयति धवति धवते धुनोति धुनुते धुनाति च धुनीते ।
धूनोति धूनुते स्युः पदानि कम्पे विधूनने धुवति ॥ २६ ॥

श्नि पुनाति पुनीते स्तां पवने पवते ङितः ।
प्रसह्य हृत्यां हरणे जिहर्ति हरते हरेत् ॥ २७ ॥

भृञो बिभर्ति बिभृते भरते भरतीत्यपि ।
ऋदन्तस्य भृणातीति भर्त्सने श्नि तथा भरः ॥ २८ ॥

म्रियते स्यादवस्थाने धृङोऽवध्वंसने पुनः ।
धरते धारणार्थे तु धरते धरतीत्युभे ॥ २९ ॥

गतौ ससर्ति सरति श्लुशपोर्धावति क्वचित् ।
तत्रेयर्त्यृच्छतीत्यर्तेः श्नि गतौ स्यादृणाति च ॥ ३० ॥

हिंसाकरणयोः श्नावौ कृणोति कृणुते कृञः ।
करोति कुरुते द्वे द्वे सम्पद्येते पदे क्रमात् ॥ ३१ ॥

भक्तौ वृणीते वरणे वृणोति वृणुते वृञः ।
वृञ आवरणे वा णौ वारयेद्वरते वरेत् ॥ ३२ ॥

ज्ञाने गारयते गरेन्निगरणे शब्दे गृणाति त्रयं
युक्तं ग्रो गरतीति सेकविषये ह्रस्वान्तधातोः शपि ।
सेके प्रस्रवणे क्रमाच्छपि णिचि स्यातां घरेद् घारयेद्
यद् दीप्तौ क्षरणे जिघर्त्ति तदिदं केचिद्विदुश्छान्दसम् ॥ ३३ ॥

प्रीतौ पृणोत्यृदन्तस्य व्यायामे प्रियते पृङः ।
मृणाति हिंसार्थे प्वादेर्मृङम्तु म्रियते पदम् ॥ ३४ ॥

स्तृञः श्निच्छादने प्वादेः स्तृणीते च स्तृणाति च ।
श्नावृदन्तस्य तत्रैव स्तृणोति स्तृणुते स्तृञः ॥ ३५ ॥

दरेद् दृणाति द्रियते क्रमाद् भीदारणादरे ।
पृणाति पूरणे श्नौ तु पिपर्त्ति णिचि पारयेत् ॥ ३६ ॥

वृवृञोरञितो धातोर्वृणाति वरणे भवेत् ।
वृणाति च वृणीते च वृञस्तत्रार्थ इष्यते ॥ ३७ ॥

सिद्धे पदद्वये वृञो ञित्त्वाद्यदञितो वचः ।
फले तत्कर्त्रभिप्राये परस्मैपदसिद्धये ॥ ३८ ॥

जृणाति जीर्यति जरत्येकार्थे जारयत्यपि ।
कृणन् कृणीते हिंसायां विक्षेपे किरतीति शे ॥ ३९ ॥

तृप्तौ चकेत् प्रतीघाते तृप्तौ च चकते शपि ।
(प्रतीघाते च तृप्तौ च चकते चकतीति तु ।
तृप्तिमात्रे चकेरस्य मित्त्वाच्चकयतीति णौ ॥)
दर्शने लोकते लोकेर्भाषार्थे णौ तु लोकयेत् ॥ ४० ॥

अङ्क लक्षण इत्यस्य भवेदङ्कयतीति णौ ।
इदितस्त्वङ्कते तत्र कुटिलायां गतावकेत् ॥ ४१ ॥

णिचि बुक्कयतीति स्यात् भाषणे शपि बुक्कति ।
मर्षणे शीकयेच्छीकेत् सेचने शपि शीकते ॥ ४२ ॥

शङ्कते शकि शङ्कायां शक्तौ शक्नोति मर्षणे ।
शक्यते शक्यतीत्येवं शपि श्नौ श्यनि च क्रमात् ॥ ४३ ॥

तकेत् तङ्केद्यथासङ्ख्यं हसने कृच्छ्रजीवने ॥ ४३$\frac{1}{2}$ ॥

अन्वेषणेऽर्थे मृगयेत णौ यौ मार्गेर्भवेन्मार्गति मार्गयेच्च ।
लिङ्गेर्गतौ लिङ्गति लिङ्गयेदित्यस्यैव चित्रीकरणार्थवृत्तेः ॥ ४४$\frac{1}{2}$ ॥

भाषणे लङ्घयेच्छोपे लङ्घेद्वृत्यां तु लङ्घते ॥ ४५ ॥

सेचने सचते तच्च समवाये सचत्यपि ।
णौ लोचयति भाषार्थे दर्शने शपि लोचते ॥ ४६ ॥

कल्कने मुञ्चते मुञ्चेर्मोक्षे मुञ्चति मुञ्चते ।
प्रमोचने चुरादेर्णौ मोचयत्येष न ल्लुदित् ॥ ४७ ॥

णौ पञ्चयति विस्तारे व्यक्तौ तु शपि पञ्चते ।
वञ्चतीति गतावर्थे वञ्चयेत प्रलम्भने ॥ ४८ ॥

पूजायां णौ विभाषार्चेरर्चयत्यर्चतेऽर्चति ।
भूवादौ पाठसामर्थ्यात् कर्तृगामिक्रियाफले ॥ ४९ ॥

गतियाचनयोरञ्चत्यञ्चते णौ विशेषणे ।
अञ्चयत्यञ्चतीत्येकं गतिपूजनयोरपि ॥ ५० ॥

वक्तीति भाषणे वा णौ वाचयेद्वचतीति वा ।
पृणक्ति पृङ्क्ते सम्पर्के यौ पर्चयति पर्चति ॥ ५१ ॥

रिचिर् विरेचने रिङ्क्ते रिणक्ति श्ने वियोजने ।
सम्पर्चने च यौ वा णौ रेचयत्यपि रेचति ॥ ५२ ॥

शुच्यते शुच्यतीत्येवं पूतीभावे शुचेः श्यनि ।
शोके शोचति हिंसायां तर्जने परिभाषणे ॥ ५३ ॥

चर्चत्यध्ययने त्वर्थे भवेच्चर्चयतीति णौ ।
सङ्कोचे कुचतीति स्यात् कोचेत् सम्पर्चनादिषु ॥ ५४ ॥

वियोजनेऽर्चयेदर्चेद् यौ स्तुतावृचतीत्यृचेः ।
शशपोरुञ्छतीत्युञ्छे स्वरभेदाद् द्विरुच्यते ॥ ५५ ॥

उच्छतीति विवासे स्यादिदितोऽनिदितस्तयोः ।
णौ विच्छयति भाषार्थे गतौ विच्छायतीति शे ॥ ५६ ॥

विच्छेराये शतुर्वा नुं शे स्यादिति तुदादिता ।
रजते रजतीत्येवं रज्यते रज्यतीत्यपि ॥ ५७ ॥

रागार्थे शप्श्यनोर्द्वे द्वे गतौ वजति वाजयेत् ।
दीप्तौ शप्येजते तत्र भवेदेजति कम्पने ॥ ५८ ॥

वृणक्ति वर्जने वृङ्क्ते यौ वर्जयति वर्जति ।
गर्जेद् गृञ्जेद् गजेद् गञ्जेच्छब्दने गाजयेण्णिचि ॥ ५९ ॥

धर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद्भृतौ शपि ।
शौचालङ्कारयोर्वा णौ मृजेर्मार्जति मार्जयेत् ॥ ६० ॥

मार्ष्टि शुद्धौ तथा मार्जेः शब्दार्थान्मार्जयेण्णिचि ।
वेवेक्तीति पृथग्भावे वेविक्ते च भये पुनः ॥ ६१ ॥

विनक्ति विजते सर्गे सृज्यते सृजतीति च ।
ऋञ्जते भर्जने गत्याद्यर्थे स्यादर्जते त्वृजेः ॥ ६२ ॥

प्रतियत्नेऽर्जयेदर्जेरर्जतीत्यर्जने पदम् ।
निङ्क्ते नेनेक्ति नेनिक्ते शौचेऽर्थे पोषणे तथा ॥ ६३ ॥

युनक्ति युङ्क्ते योगार्थे समाधौ युज्यते श्यनि ।
युजेः संयमनार्थे वा णौ योजयति योजति ॥ ६४ ॥

भुजेद् भुनक्ति भुङ्क्ते स्युः कौटिल्ये पालनेऽदने ॥ ६४½ ॥

सेवायां भजते भजेदिति भर्जेर्विश्राणने भाजये-
दामर्दे तु भनक्ति भाजयति णौ भाजेः पृथक्कर्मणि ।
भाषार्थे गिचि भञ्जयेदभिहिते त्वर्थे पदं तुञ्जये-
द्धिंसायां शपि तुञ्जतीत्यनिदितस्तस्यां तुजेस्तोजति ॥ ६५½ ॥

सन्तर्जने तर्जयते भर्त्सनार्थे तु तर्जति ॥ ६६ ॥

वर्णे पिङ्क्ते भवेत् पिञ्जेर्भाषार्थे पिञ्जयेदिति ।
गुञ्जेदव्यक्तशब्दे स्याच्छब्दमात्रे गुजेदिति ॥ ६७ ॥

भृञ्जते भृञ्जति भ्रञ्जेर्भर्जने भर्जते भृजेः ।
प्रकाशे लजयेद्रीळे लजते लज्जते पदे ॥ ६८ ॥

लञ्जेर्लाञ्जेर्लञ्जेर्लाजेदित्येते भर्त्सने शपि ।
भञ्जे रुजति हिंसायां रोजयेदिति णौ रुजेः ॥ ६९ ॥

घाटयेद् घण्टयेत् सङ्घभाषयोर्घटते मितः ।
क्रमाद्विकासे शशपोः स्फुटति स्फोटते पदे ॥ ७० ॥

स्फोटयेत् स्फोटतीति द्वे भेदे विशरणे क्रमात् ।
प्रमर्दने चाक्षेपे च मुटेदाये तु मोटति ॥ ७१ ॥

सञ्चूर्णने चुरादेर्णौ मोटयेदतङ्स्वयः ।
हिंसातिक्रमयोरट्टेरट्टतेऽनादरेऽट्टयेत् ॥ ७२ ॥

घट्टयेद् घट्टते द्वे स्तां चलने णौ शपि क्रमात् ।
णौ लोटयति भाषार्थे लुब्धेल्लोटति लोटने ॥ ७३ ॥

लोटते प्रतिघातेऽर्थे स्तेये लुण्टति लुण्टयेत् ।
रोटते प्रतिघातेऽर्थे रोषे रोटयतीति णौ ॥ ७४ ॥

कूटयेताप्रसादे णौ कूटेर्दाहे तु कूटयेत् ।
भाषासंसर्गसंश्लेषे पोटयेत् पुटयेत् पुटेत् ॥ ७५ ॥

नृतौ नटत्यवस्पन्दे चुरादेर्णीचि नाटयेत् ।
भाषार्थे पाटयेद् ग्रन्थे पटयेद् गमने पटेत् ॥ ७६ ॥

वण्टयेद्वण्टतीत्येते णिशपोः स्तां विभाजने ।
णावदन्ताद्वटेर्ग्रन्थे वटयेद्वेष्टने वटेत् ॥ ७७ ॥

श्लेष्मालस्योपघातेषु प्रतिघाते क्रमाल्लुठेत् ।
लुण्ठेल्लोठति लोठेत किन्तु गत्यां च लुण्ठति ॥ ७८ ॥

रुण्ठतीति गतौ रोठेदुपघातेऽथ कण्टते ।
शोके यौ कण्टयेत् कण्ठेत् कठेत् स्यात् कृच्छ्रजीवने ॥ ७९ ॥

गतिप्रतिहतौ शोठत्यालस्ये शोठयेदिति ।
शुण्ठयेच्छुण्ठतीत्येवं शोषणे णौ शपि क्रमात् ॥ ८० ॥

शठयेच्छ्वठयेदेते द्वे सम्यगवभाषणे ।
गत्यसंस्कारधात्वर्थे शाठयेच्छ्वाठयेदिति ॥ ८१ ॥

कैतवे शठतीति स्याच्छ्लाघायां शाठयेत णौ ।
मण्ठते शपि शोकार्थे मठेन्मदनिवासयोः ॥ ८२ ॥

वण्ठते त्वेकचर्यायां स्थौल्ये शपि वठेदिति ।
मुण्डते मार्जने मुण्डेः खण्डने शपि मुण्डति ॥ ८३ ॥

भूषार्थे मण्डतीति स्यात्तत्र मण्डयतीति णौ ।
मण्डते वेष्टने स्तुत्यामीट्टे तत्रेड्येण्णिचि ॥ ८४ ॥

मन्थार्थे खण्डते खण्डेर्भेदार्थे खण्डयेण्णिचि ।
हेडतेऽनादरे हेडेर्वेष्टने हिडयेन्मितः ॥ ८५ ॥

होडतीति गतौ होडेर्होडतेऽनादरे पुनः ।
कण्डयेदिति भेदे णौ मदे तु शपि कण्डते ॥ ८६ ॥

लाडयत्युपसेवायां विलासे तु लडेच्छपि ।
मृडेन्मृण्णाति सुखने तत्रैव मृडतीति शे ॥ ८७ ॥

वैकल्यदाहरक्षासु कुण्डेत् कुण्डेत कुण्डयेत् ।
तोडनार्थे तुडेस्तुण्डेस्तुडेत्तोडति तुण्डते ॥ ८८ ॥

कल्याणे भण्डयेद्भण्डेत् परिहासे तु भण्डते ।
प्रेरणे जोडयेच्छे तु बन्धने जुडतीति च ॥ ८९ ॥

सङ्घाते पिण्डयेत् पिण्डेस्तत्रैव शपि पिण्डते ।
कणेः कणति शब्दार्थे काणयेण्णौ निमीलने ॥ ९० ॥

भूवाद्योर्घुणिघूर्ण्योः स्तां घोणते घूर्णते शपि ।
भ्रमणेऽत्र तुदाद्योः शे स्यातां घुणति घूर्णति ॥ ९१ ॥

अणेरणति शब्दार्थे प्राप्तने त्वण्यते श्यनि ।
मितः श्रगति दानार्थे श्राणयत्यत्र णौ पदम् ॥ ९२ ॥

व्रणेच्छब्दार्थविषये व्रणयेद् गात्रचूर्णने ।
आमन्त्रणे तु कुणयेच्छब्दे चोपकृतौ कुणेत् ॥ ९३ ॥

बन्धनेऽन्तति सातत्यगमनेऽतति चिन्तयेत् ।
स्मृत्यां चेतति संज्ञाने तत्र चेतयते णिचि ॥ ९४ ॥

कृगति कृन्ततीत्येते वेष्टने छेदने क्रमात् ।
कीर्त्तयेदिति संशब्दे गत्यर्थे पतयेत् पतेत् ॥ ९५ ॥

यतते तु प्रयत्नार्थे निराकारे तु यातयेत् ।
वर्तयेद् भाषणार्थे णौ वर्तने शपि वर्तते ॥ ९६ ॥

ग्रथ्नातीति तु सन्दर्भे ग्रन्थयेद् ग्रन्थतीति यौ ।
कौटिल्ये ग्रन्थते ग्रन्थेर्ग्रथयेद् ग्रथति ग्रथेः ॥ ९७ ॥

हिंसासंक्लेशयोर्मन्थेन्मथेन्मथ्नाति लोडने ।
कुथ्नाति कुन्थेत् संक्लेशे पूतीभावे तु कुथ्यति ॥ ९८ ॥

प्रथते प्राथयत्येतत् प्रख्याने द्वितयं प्रथेः ।
पृथेः पर्थयतीत्येतत् प्रक्षेपे णौ पदं विदुः ॥ ९९ ॥

क्रथत्ययौ यौ हिंसायां क्राथयेत् क्रथते क्रथेत् ।
पुथ्येत् पुन्थति हिंसार्थे भाषार्थे पोथयेदिति ॥ १०० ॥

दौर्बल्ये श्रथयेत् प्रयत्नविषये स्याच्छ्राथयेन्मोक्षणे
यौ तु श्राथयति श्रथत्यपि च वा णौ श्रन्थयेच्छ्रन्थति ।

सन्दर्भे श्रि विमोचनार्थविषये श्रथ्नात्यथ श्रन्थते
शैथिल्येऽथ पथेर्गतौ पथति णौ पन्थेर्गतौ पन्थयेत् ॥ १०१ ॥

क्लिन्दते क्लिन्दतीत्येवमिदितः पारिदेवने ।
क्लिद्यतीत्यार्द्रभावेऽर्थे क्लिदेः श्यन्यूदितो भवेत् ॥ १०२ ॥

आस्वादनेऽर्थे स्वदते स्वादयेदिति शब्णिचोः ।
अर्दयेदर्दतेऽर्दैद्यौ हिंसनेऽर्दति याचने ॥ १०३ ॥

मेदते मेद्यतीत्येते स्नेहने मिन्दयेण्णिचि ।
ऋदितो मेदते मेदेन्मेधाहिंसनयोर्द्वयोः ॥ १०४ ॥

आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति ।
वैक्लव्ये तु तयोर्धात्वोः क्रन्दते कन्दते मितोः ॥ १०५ ॥

मित्त्वार्थपाठसामर्थ्यात् तयोर्दीर्घविकल्पनम् ।
भवेच्चिण्णमुलोस्तस्मादक्रान्द्यक्रन्दि सिध्यतः ॥ १०६ ॥

गात्रप्रक्षरणे स्विद्येत् स्वेदते स्नेहमोकयोः ।
क्ष्वेदत्यव्यक्तशब्दार्थे क्ष्विद्यति स्नेहमोक्षयोः ॥ १०७ ॥

ज्वलादेश्च तुदादेश्च सीदेद्विशरणादिके ।
पद्यतेरर्थ आसीदेदासादयति चाङि यौ ॥ १०८ ॥

व्यक्तवाचि वदेद्वा णौ वादयेद्वदते वदेत् ।
सन्देशे श्यनि गत्यर्थे पद्यते पदयेत णौ ॥ १०९ ॥

णौ देवशब्दे गदयेद् व्यक्तवाचि गदेच्छपि ।
नदत्यव्यक्तशब्दार्थे भाषार्थे नादयेदिति ॥ ११० ॥

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दतीत्येवं लाभे वेदयते णिचि ॥ १११ ॥

दैन्येऽर्थे खिद्यते खिन्ते परिघाते तु खिन्दति ।
स्तुत्यादौ मन्दते हर्षे माद्येन्मादयते णिचि ॥ ११२ ॥

यौ वा णावपवारणे छदत इत्येकं द्वितीयं छदे-
दन्यच्छादयति च्छदेदिति पुनः स्याद्दूर्जनेऽर्थे मितः ।
यत्तु छन्दयतीति णौ नुमि पदं तत् संवृताविष्यते
संसर्गे णिचि मोदयेदिति भवेद्धर्षे पुनर्मोदते ॥ ११३ ॥

प्रत्येकं निदिनेद्योः स्तां नेदते नेदतीत्युभे ।
कुत्सायां सन्निकर्षे वा कुत्सामात्रे तु निन्दति ॥ ११४ ॥

छृदी सन्दीपने वा णौ छर्दयेच्छर्दतीत्युभे ।
छृन्ते छृणत्तीति पदे दीप्तिदेवनयोः श्रमि ॥ ११५ ॥

सिधेः सिध्यति संराद्धौ सेधतीत्युदितो गतौ ।
शास्त्रमाङ्गल्ययो रूपमूदितस्तदिटा भिदा ॥ ११६ ॥

शुन्धयेच्छुन्धते शुन्धेद्यौ वा णौ शौचकर्मणि ।
शुद्धौ शुन्धति भूवादेः शुधेः शौचे तु शुध्यति ॥ ११७ ॥

शर्धते शब्दकुत्सायामुन्दे शर्धति शर्धते ।
हिक्कादौ शर्धयत्यस्य शृधेः प्रसहने णिचि ॥ ११८ ॥

बुध्यते बोधतीत्येवं बुधेरवगमे द्वयम् ।
बुधिरो बोधनार्थस्य बोधे बोधयतीत्यपि ॥ ११९ ॥

बध्नाति ब[illegible]धे [illegible]
यत्तु बीभत्सते [illegible]
(बध्नन् बीभत्सने ब[illegible]
गुधेर्गुध्नाति रोषेऽर्थे गुध्यत् तु परिवेष्टने ।
रुन्धे रुणद्ध्यावरणे कामेऽनावनुदात्यते ॥ १२१ ॥

राध्नोति संसिद्ध्यर्थे श्नौ राध्येद् वृद्धावकर्मकात् ।
ऋध्नोतीति भवेद् वृद्धावृध्यतीत्यत्र तु श्यनि ॥ १२२ ॥

गृधेर्गृध्यति काङ्क्षायां गर्धेस्तत्रैव गर्धयेत् ।
छेदने पूरणे चार्थे वर्धेर्वर्धयतीति णौ ॥ १२३ ॥

तदेव रूपं भाषार्थे वृधेर्वृद्धौ तु वर्धते ।
याचने वनुते शब्दे संभक्तौ च ननेदिति ॥ १२४ ॥

क्रियासामान्यवृत्तेश्च तदेव स्यात् पदं गितः ।
स्तम्भे मानयते ज्ञाने मन्यते मनुते पदम् ॥ १२५ ॥

पूजायां मानयेन्मानेद् यौ मीमांसेत तङ्सनोः ।
ध्वनयेदित्यदन्तस्य ध्वनेः शब्दे ध्वनेच्छपि ॥ १२६ ॥

शब्दे च देवशब्दे च स्तनति स्तनयेत् क्रमात् ।
श्रद्धोपकरणार्थस्य तनेस्तनति तानयेत् ॥ १२७ ॥

दैर्घ्यार्थस्योपसर्गात् तु विस्तारे तनुतेऽतनोत् ।
दाने सनोति सनुते सम्भक्तौ तु सनेदिति ॥ १२८ ॥

णौ गोपयति भाषार्थे निन्दायां से जुगुप्सते ।
गोपायेद्रक्षणे त्वाये व्याकुलत्वे तु गुप्यति ॥ १२९ ॥

धूपायतीति सन्तापे भाषार्थे धूपयेदिति ।
क्षिप्यति प्रेरणे शे तु क्षिपति क्षिपते पदे ॥ १३० ॥

सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत् ।
ऐश्वर्ये वा दिवादित्वात् तप्यते तपतीति च ॥ १३१ ॥

आक्रोशे शप्यते शप्येच्छपते शपतीति च ।
उपालम्भे शपेर्वाक्यात् तङि स्याच्छपते पदम् ॥ १३२ ॥

तृम्नोति तृप्यतीत्येते प्रीणने श्नौ श्यनि क्रमात् ।
तृप्तावन्यतरस्यां णौ स्यातां तर्पति तर्पयेत् ॥ १३३ ॥

सङ्घाते डेपयेतेति क्षेपे डिपति डिप्यति ।
डेपयेदिति चत्वारि णिचि शे श्यनि णौ डिपेः ॥ १३४ ॥

कल्पते शपि सामर्थ्ये कल्पयत्यवकल्कने ।
अदन्तस्य कृपेर्णौ तु दौर्बल्ये कृपयेदिति ॥ १३५ ॥

क्षम्पेः क्षम्पयति क्षान्त्यां प्रेरणे क्षपयेदिति ।
दिवादेः कुप्यति क्रोधे भाषार्थे कोपयेत् कुपेः ॥ १३६ ॥

आपयत्यापतीत्यापेर्यौ वा णौ लम्भने पदे ।
व्याप्त्यर्थस्यास्य तु स्वादेराप्नोतीति पदं भवेत् ॥ १३७ ॥

स्पर्शे चुपति मन्दायां गतौ तु शपि चोपति ।
शपि तोपति हिंसायां तत्रैव तुपतीति शे ॥ १३८ ॥

तत्रैव शशपोस्तुम्पेदर्दने तुम्पयेण्णिचि ।
लुम्बयेत् तुम्बयेदर्दे शपि लुम्बति तुम्बति ॥ १३९ ॥

हिंसायां वक्रसंयोगे चुम्बयेच्चुम्बति क्रमात् ।
णिचि कुम्बयतीति स्याच्छादने शपि कुम्बति ॥ १४० ॥

गार्ध्ये लुभ्यति मोहार्थे तुदादेर्लुभतीति शे ।
दृभी भये विभाषा णौ स्यातां दर्भति दर्भयेत् ॥ १४१ ॥

अर्नादितश्च सन्दर्भे दृभति ग्रन्थ ईदितः ।
स्तभ्नाति स्तभ्नुयात् स्तुभ्नात्यपि स्तुभ्नोति सौत्रयोः ॥ १४२ ॥

स्तम्भते प्रतिबन्धार्थे स्तम्भेऽर्थे स्तोभते शपि ।
हिंसाभाषणयोः शोभेच्छोभार्थे शुभतीति शे ॥ १४३ ॥

शोभते शपि दीप्त्यर्थे शुम्भेरन्यत् तडः समम् ।
क्षुभ्नाति क्षोभते क्षुभ्येदिति सञ्चलने क्षुभेः ॥ १४४ ॥

नभ्येन्नभ्नाति नभते हिंसायां तत् तुभेः समम् ।
जृम्भणे जम्भते याभे जम्भेन्नाशे तु जम्भयेत् ॥ १४५ ॥

प्रेरणे लाभयेल्लाभेः प्राप्त्यर्थे लभते शपि ।
अपितः क्षाम्यति क्षान्तिः क्षमूपः क्षमते क्षमा ॥ १४६ ॥

गत्यादावमतीति स्याद्रोगे स्यादामयत्यमेः ।
चलने भ्रमति भ्रम्येच्छमादेर्भ्राम्यति भ्रमेत् ॥ १४७ ॥

यमेरुपरमे यच्छेद्यमयेत् परिवेषणे ।
स्यमेः स्यमति शब्दार्थे वितर्के स्यामयेत णौ ॥१४८॥

आलोचने शामयते शाम्यत्युपशमे श्यनि ।
भामेर्भामयति क्रोधे तत्रैव शपि भामते ॥ १४९ ॥

वित्तत्यागे व्ययययति व्ययति व्ययते गतौ ।
पूरेराप्यायनेऽर्थे स्यात् पूर्यते पूरयेदपि ॥ १५० ॥

स्तेये चोरयतीति स्याण्णिचि चोरयते चुरेः ।
(स्तेयें चोरयतीति स्याच्चुरेश्छेदे चुरेदिति ।)
शूरयेतेति विक्रान्तौ शूर्यते स्तम्भहिंसयोः ॥ १५१ ॥

गुरते गूरयेतेति शे णावुद्यमने तङि ।
श्यनि गूर्यत इत्येवं गतिहिंसनयोस्तङि ॥ १५२ ॥

संशये चारयेद् गत्यां चरतीरयतीरिति ।
ईरेः क्षेपे विभाषा णौ लुकीर्त्ते गतिकम्पयोः ॥ १५३ ॥

गतौ शलति संवृत्यां चलने शलते शलेः ।
समाधौ शीलतीति स्याच्छीलयत्युपधारणे ॥ १५४ ॥

कलेः कालयति क्षेपे गतिसङ्ख्यानयोर्द्वयोः ।
कलयेच्छब्दसङ्ख्यानविषये कलते शपि ॥ १५५ ॥

महत्त्वे पोलति पुलेर्णौ तु तत्रैव पोलयेत् ।
सङ्घाते पूलयेत् पूलेत् पूलेः स्तां णिशपोः क्रमात् ॥ १५६ ॥

मूलेः प्रतिष्ठितौ मूलेद्रोहणे मूलयेदिति ।
वेलेत्तु चलने वेलेर्वरणे विलतीति शे ॥ १५७ ॥

क्षेपे णौ वेलयेद् भृत्यां चालयेत् कम्पने चलेत् ।
फलेर्विशरणे फुल्लं फलितं फलति त्रयम् ॥ १५८ ॥

आदितोऽनादितस्त्वन्त्ये रूपे निष्पत्तिवाचिनः ।
विदारणे शपि दलेद् दालयेदिति णौ दलेः ॥ १५९ ॥

श्लेषे मिलेत् सङ्गमे तु मिलते मिलतीति च ।
अर्दने देवयेद् दीव्येत् क्रीडादौ परिकूजने ॥ १६० ॥

देवयेतेदितो दिन्वेद् देवेर्देवेत देवने ।
माने गर्वयते दर्पे गर्वतीति भवेच्छपि ॥ १६१ ॥

ष्ठीवति ष्ठीव्यतीत्येते स्यातां निरसने ष्ठिवेः ।
पूरणे पूर्वतीति स्यात् पूर्वयेण्णौ निकेतने ॥ १६२ ॥

पूर्व्यतीति तु यत् स्वप्ने तन् कण्ड्वादिषु दर्शनात् ।
व्यक्तोक्तौ क्लेशते क्लेशेः क्लिश्नाति तु विबाधने ॥ १६३ ॥

दिवादेरुपतापेऽर्थे तङि स्यात् क्लिश्यते पदम् ।
दंशने दशतीति स्यात् तत्र दंशयते णिचि ॥ १६४ ॥

भाषणे दंशयेत् काशेर्दीप्तौ काश्येत काशते ।
लिश्यते लिशतीत्येवमल्पीभावे गतौ क्रमात् ॥ १६५ ॥

व्याप्तावश्नुत इत्याहुरश्नातीति तु भोजने ।
बाधने स्पर्शने चार्थे हिक्कादौ स्पशते स्पशेत् ॥ १६६ ॥

ग्रहणे श्लेषणे चार्थे चुरादौ स्पाशयेत णौ
भ्राशते भ्लाशते दीप्तौ भ्राश्यते भ्लाश्यते तथा ॥ १६७ ॥

झषेज्झषेत संवृत्त्यामादाने हिंसने झपेत् ।
इष्णात्याभीक्ष्ण्य इच्छायामिच्छेद्वृत्यर्थ इष्यति ॥ १६८ ॥

ईषतीतीष उञ्छेऽर्थे गत्यादावीषते भवेत् ।
घुषेर्विशब्दनादौ णौ घोषयत्यविशब्दने ॥ १६९ ॥

घोषतीतीदितो घुंषेद् घुंषते कान्तिकर्मणि ।
ईर्ष्यायामादरे चार्थे क्रमात् सूर्क्ष्यति सूर्क्षति ॥ १७० ॥

धारणे पोषयेत् पुष्टौ पुष्येत् पुष्णाति पोषति ।
म्लेच्छने म्रक्षयेन्म्रक्षेत् सङ्घाते दाहकर्मणि ॥ १७१ ॥

प्लोषति प्लुष्यतीति स्तां प्लुष्णाति स्नेहनादिषु ।
प्लुष्णाति च प्लोषति च दाहे भूषति भूषयेत् ॥ १७२ ॥

अलङ्कृतौ क्षमायां यौ मर्षेन्मर्षत मर्षयेत् ।
मृष्यते मृष्यतीति स्यात् सहने शपि मर्षति ॥ १७३ ॥

सेचने मेषतीति स्यात् स्पर्धायां मिषतीति शे ।
व्याप्तौ धेवेष्टि वेविष्टे विषेर्वेषति सेचने ॥ १७४ ॥

विप्रयोगे विषेः क्रचादेर्विष्णातीति पदं भवेत् ।
श्लिष्यत्यालिङ्गने दाहे श्लेषति श्लेषणे णिचि ॥ १७५ ॥

श्लेषयेत् क्रमतोऽलीके तुष्टौ हर्षति हृष्यति ।
शक्तौ वर्षयते सेके वर्षेत् स्नेहे तु वर्षते ॥ १७६ ॥

भक्षयत्यदने भक्षेः शपि भक्षति भक्षते ।
कान्तौ लप्यति लप्येत श्यनि वा लपते लपेत् ॥ १७७ ॥

कर्षत्याकर्षणे शे तु कृषते कृषतीत्युभे ।
शिषोऽसर्वोपयोगे यौ शेषयच्छेषतीत्युभे ॥ १७८ ॥

लुङ्यभावादङोऽशेषीच्छिनष्टीति विशेषणे ।
शपि रोषति हिंसायां रोषे रुष्यति रोषयेत् ॥ १७९ ॥

चुम्बने परिमाणे च निक्षेन्निक्षयते क्रमात् ।
जोषयेज्जोषतीत्येते युजादेः परितर्कणे ॥ १८० ॥

प्रीतिसेवनयोरिष्टं तुदादेर्जुषते पदम् ।
धृषेः प्रसहने यौ स्तां धर्षयेद् धर्षतीत्युभे ॥ १८१ ॥

प्रागल्भ्यार्थे तु धृष्णोति परस्मैपदिनावुभौ ॥ १८१½ ॥

आलोचनार्थाण्णिचि लक्षयेत स्याल्लक्षयेल्लक्षयतेऽङ्कनार्थात् ।
स्यात् तक्षतीति त्वचनेऽथवा श्नौ तक्ष्णोति तक्षेच्च तनूक्रियायाम् ॥ १८२½ ॥

आशंसते स्यादिच्छायां शंसतीति स्तुतौ भवेत् ॥ १८३ ॥

हिंसायां शसतीच्छायामाशास्ते शास्ति शासने ।
शब्दार्थे नासते नासेः कौटिल्ये नसते नसेः ॥ १८४ ॥

असतेऽसति गत्यादौ भुव्यस्ति क्षेपणेऽस्यति ॥ १८४½ ॥

अस्रंसिष्ट स्रंसते चाद्युतादेस्ते च द्वे स्तामस्रसच्च द्युतादेः ।
ध्वंसत्यादेः साहचर्याद् द्युतादेर्नांगित्याहुर्दत्वमन्यस्य चापि ॥ १८५½ ॥

दंसयेन्मोक्षणे दस्येत् क्षये दंसयते णिचि ॥ १८६ ॥

दंशदर्शनयोर्दासेर्दानें दासति दासते ।
वस्यति स्तम्भने वस्ते छादने वसयेद्वसेत् ॥ १८७ ॥

निवासे वासयेत् स्नेहे वासयत्युपसेवने ।
(वसेन्निवासे वसयेच्च वस्ते त्वाच्छादने स्तम्भन एव वस्येत् ।
निवासयत्याच्छदने निवासेरासेवने वासयतीति वासेः ॥)
मोक्षणे जस्यतीति स्याण्णावत्रार्थे तु जंसयेत् ॥ १८८ ॥

हिंसाताडनयोर्धात्वोरुदितोर्जासयेदिति ।
तस्यत्युपक्षयार्थे णावलङ्कारे तु तंसयेत् ॥ १८९ ॥

भ्रस्नाति भ्रासयत्युञ्छे पदे श्नि णिचि च भ्रसेः ।
लासयेच्छिल्पयोगेऽर्थे श्लेषणे क्रीडने लसेत् ॥ १९० ॥

भाषणे त्रंसयेत् त्रंसेर्धारणे त्रासयेण्णिचि ।
त्रसति त्रस्यतीत्येवमुद्वेगार्थे तु वा श्यनि ॥ १९१ ॥

णौ पिंसयति भाषार्थे गत्यां तु शपि पेसति ।
गतिशासनयोः कंस्ते कसतीति गतौ शपि ॥ १९२ ॥

शब्दे शपि रसेत् स्नेहास्वादयो रसयेद्रसेः ।
प्रपूरणे दोग्धि दुग्धे दोहतीत्यर्दने दुहेः ॥ १९३ ॥

ण्यन्तस्य ग्रहणे गृहेर्गृहयते तत्रानदन्ताद् गृहे-
र्भूवादेः शपि गर्हते श्नि तु पदे गृह्णात्यगृह्णीत च ।

गर्हेर्वा णिचि निन्दनार्थविषये गर्हेत् तथा गर्हयेद्
भूवादेः शपि कुत्सनार्थविषये गर्हेर्भवेद् गर्हते ॥ १९४ ॥

रहयेद्रहति त्यागे गतौ रंहेस्तु रंहति ।
श्नै तृणेढीति हिंसायां तृहतीत्यूदितस्तृहेः ॥ १९५ ॥

महयेन्महतीत्येते पूजायां णौ शपि क्रमात् ।
चहयेच्चहतीत्येते चहेः स्तां परिकल्कने ॥ १९६ ॥

मर्षणे सहते यौ तु साहयेत् संहति द्वयम् ।
श्यनि सह्यति शक्यर्थे पूजनेऽर्हति चार्हयेत् ॥ १९७ ॥

स्नेहने स्नेह्येत् प्रीतौ स्निह्येद् बृंहति बर्हति ।
वृद्धौ भाषार्थविषये बृंह्येद्बर्ह्येदिति ॥ १९८ ॥

नुमादिनान्यभावेऽपि सादृश्यात् केऽप्यवक्षत ।
चुरादिश्चुर्युजादिर्युः स यस्माण्णिच् विभाषितः ॥ १९९ ॥

सरूपा धातवः केचिदनुक्ता अपि सन्ति चेत् ।
सन्तूक्तास्तेऽपि चात्रोक्ता न दुष्यन्त्यन्यसम्भवे ॥ २०० ॥

इत्यनेकविकरणसरूपधातुव्याख्यानं देवनाम्ना विरचितं
दैवं समाप्तम् ।

00044398

Digitized with financial assistance from

Government of Maharashtra

on 30 January, 2020